र्तृकेऽग्न्यन्वाधानेयथार्थंविपरिणम्यंते॥ समाकमग्नेसमभ्यंनमंतामितिचैवमादीनि॥ अध्वर्युकर्तृकेत्वन्यायनिग
दत्वादनूह एव। नचवर्चोदिशांचावनतिरध्वर्युविषय॥ कर्म्मणः परार्थत्वाल्लिंगाच्च। यांवैकांचयज्ञऋत्विज आशिष
माशासते यजमानस्यैवसेति॥ असौचसमिद्बाहुप्रमाणास्या। दधिकरणस्यैतावत्प्रमाणत्वात्। तत्कुतः। परिधीनांव
र्मसंस्तवात्॥ वर्म्मणास्त्वशरीरप्रमाणत्वादाधेयंचाधिकरणप्रमाणमुचितं। लिंगाच्च॥ यदुवाच्यान्समितमन्नंतदव
तितंनहिनस्तियद्भूयोहिनस्तितद्दिति। प्रादेशमात्रीणा।शिष्टानुस्मरणात्॥ वेद। समित्पवित्रंचत्रयंप्रादेशसंमित

क० ६ त्वतोऽज्ञापनीयमित्यध्वर्युग्रहणं॥ ननुकतिपयशाखोपसंहारेसत्यसर्वशाखाप्रत्ययत्वादनादरणीयमेतत्सू
त्रकारवचनं। नैतदेवं॥ एवंहिस्मरंति। याएवकाश्चनपंचदशवाशाखाउपनिबध्यंते। तत्रैवनेयमिकांग
प्रधानकर्म्मोपसंहारः संभाव्यते। किमुतपंचदशशाखोपनिबंधनइति॥ तस्मादपरिचोदनासर्वशाखाप्रत्ययत्वमि
ति॥ अथसर्वशाखाप्रत्ययकर्म्मोपसंहारेणैवाधिक्रियते। तथासत्यशक्यार्थोपदेशात्सर्वशाखानामानर्थक्यमे
वस्यात्॥ स्मर्यतेत्वेकशतमध्वर्युशाखानामिति। तथैकदेशाध्ययनेनाप्यधिकारंस्मरंति। वेदानधीत्यवेदौवावेदं
वापियथाक्रमं। अविप्लुतब्रह्मचर्योगृहस्थाश्रममावसेदिति॥ तथाचलिंगं। योवैज्ञातोनूचानस्तमवकाशयेदिति। सर्व
शाखाप्रत्ययत्वेत्वनूचानोनकश्चित्स्यात्। अपरेध्वर्युग्रहणंयजमानसंबंधार्थंव्यावर्णयंति। तत्किमर्थं। यहनेध्वर्यु
र्वैत्युक्तेयजमानोयथास्यादिति। किंवस्यादध्वर्युणाविकल्पितत्वादधिकृतमेवऋत्विगंतरंगाक्रमयात्। अथपुनर्य एम ६
जमानसंबंधेत्तापितेयजमानासिद्धोभवति। एतस्यामपिव्याख्यायामध्वर्युर्यजमानोवाऽस्थमनक्तीति। तथाध्व

यंपचनः स्वरित्याहवनीय इति॥ तथा भूरिति वा अयं लोको भुव इत्यंतरिक्षलोकः स्वरित्यसौ लोक इति। अयं
वै लोको गार्हपत्योंतरिक्षलोकोन्वाहार्यपचनोसौ लोक आहवनीय इति च॥ समस्तोपदेशो लाघवार्थो। भेदोप
देशश्च होमविधानार्थः॥ ताश्चैताः शब्दत्वसामान्यान्मंत्रस्यनिवर्तिकाः॥ ॥ तूष्णीं वा यथापूर्वं॥ समिदाधान
मिति वाक्यशेषः॥ तत्र च युगपत्समिदाधानं। भेदकारणाभावात्॥ केचित्तूष्णीं द्वितीयामिति द्वितीयाग्रहणमि
हार्थमन्यंते। तूष्णीमेवेति लघीयसान्यायेन सिद्धत्वाद्यद्गुरुत्वं करोति तदिह भेदेनाधानं यथा स्यादिति। न द्युक्तं॥
नहि सूत्रकारप्रवृत्तिरीदृशी। यन्न्यायगौरवमर्थीत एव भवत्यसति वचने सति वचने नु प्रमाणवानयमर्थ इत्यति
रेको विगृह्यते। न च न्यायगौरवस्यान्यथानुपपत्त्या शक्यं वचनमनुमातुं। द्वितीयां समिधमादधातीति कदाचित्स्वश
ब्देनोच्यते। कदाचिन्नुग्रहणेनेति॥ अतो न्यायप्राप्तं युगपत्समिदाधानं दुर्निवारमिति। येतु सूत्रगौरवमात्रेणोपार्थांत
रं परिकल्पयंति नमस्तेभ्यः। यथापूर्वमिति वचनेन यथाव्यवस्थितं। सन्नादेशे वैलक्षण्यात्॥ एवं वारितिनन्येवं प्रकारे

क॰
७

मिति। तस्य चाविरोधात्। कनि च दर्शनात्प्रादेशमात्र्यो भवंति। त्यधिकरणप्रमाणं चत्राग्नेयस्थाने कांतिकं। लिंगं
विप्रर्यशेषं। तस्मात्प्रादेशमात्र्येव॥ ॥ तूष्णीं द्वितीया॥ द्वितीयाग्रहणेन प्राप्तो मंत्रो निवर्त्यते तूष्णीमिति॥
एवमितरयोरग्न्योः॥ समिधावादधातीति वाक्यशेषः। प्रथमं दक्षिणाग्नौ संनिधानात्तत्र दक्षिणक्रमयोगाद्दुदक्तस्य
तासं यत्रेष्वा गार्हपत्ये वा। मुख्यक्रमानुग्रहा॥ दग्न्याधानस्य हि कार्यं देवतापरिग्रहः॥ ताश्च पूर्वं गार्हपत्योः भाज्यंते।
ततो दक्षिणाग्नाविति॥ संनिधानाद्यकारणं॥ केचिदग्निग्रहणं प्रकृतत्वादग्न्यंमन्यमाना गार्हपत्यदक्षिणाग्न्योः क्रमार्थं
मन्यंते॥ ॥ महाव्याहृतिभिर्वा प्राकृतं स्यं॥ भूर्भुवः स्वरित्येता महाव्याहृतयोऽध्येतृप्रसिद्धाः॥ भूर्भुवः स्वरित्येता मिश्र
व्याहृतिभिरिति लिंगात्। विभागानुपदेशात्समस्ताभिः॥ भेदेन च कचिदुपदेशात्प्रतिमहाव्याहृतीति। नवा॥ वाक्यभेदा
त्। वाक्यमनुवृत्तयस्य चान्याप्यत्वात्॥ तस्मात्प्रत्यग्निविभक्ताभिर्व्याहृतिभिः समिदाधानं। सूत्रकारानुपदेशाच्चेति चेत्।
तस्मात्परिभाषितत्वात्॥ तेषां मारंभेर्ये तोच्यवस्थानद्वचनत्वादिति॥ तत्कथमर्थवादात्॥ भूरिति गार्हपत्यो भुव इत्यन्वा

एम॰
७

६८

पेदीक्षिष्यमाणाइति प्रकृत्य। तत्सर्वाश्चैवैतद्देवताः परिगृह्येत्युक्तं। निर्ज्ञात दीक्षाप्रयोजनायां दीक्षणीयायां देवताप
रिग्रहफलस्कृतिरर्थवादी भवति। किंतु नरभ्युपगतो देवतापरिग्रहोऽत्र प्रयोजनत्वेन जैमिनिप्रभृतिभिरपि।
एवं च सति वाच निकं कार्यं देवतापरिग्रहः तस्मिन्सति नोपलभ्यमानमपि प्रयोजनांतरमवगंतुं न्याय्यापच्चलिंग
मुक्तं। तेवा एते उल्मुके इति तद्दूर्वं प्रकृतेपि दृश्यते॥ तद्यथा। सयद्वाइतश्चेतश्च संभरतीति अत्र प्रकृत विषयत्वछ
वः॥ प्रयोजनमवारिष्वपि क्रियते। किमिदमेकं कर्म उत बहूनि। बहूनीति ब्रूमः॥ अधिकरणभेदादाधेयभेदाच्च।
प्रत्यग्निसमिद्धूयपर्यवसानात्॥ एकं वा। कार्यैकत्वात्। एकं हि कार्यममीज्यमानदेवतापरिग्रहः। एकवचनांतेन चैके
नशब्देनोपदेशो भवत्यग्न्याधानमिति। न चाधिकरणभेदः प्रतिपर्यवसानं वा कर्मभेदे कारणं। परिधिपरिधान
वत्॥ तस्मादेकमिति। प्रयोजनमंते नैमित्तिकं भवतीति संप्रदायः॥ केचित्तु गृहमेधीयादिषु सर्वत्र कर्तव्यमिति प्रयो
जनमाहुः तत्तु नरालोचनीयं। तद्यपएग्निसंबंधहोमाभीज्यमानदेवतापरिग्रहत्वेनोपपद्यते। तस्मादप्रवृत्तिः त

क॰ द्यर्थेषाचार्यः प्रायशः सत्राणि प्रणयति। तस्माद्यथापूर्वं यथोत्पन्नान्यग्नयइति॥ तदेतत्त्रिकल्पमग्न्यन्वाधानं दृष्टा
८ र्थमुतधर्ममात्रमिति॥ दृष्टार्थमिति ब्रूमः॥ दृष्टं हि कार्यमग्नौ काष्ठमाधीयमानं करोत्यग्नींधनं तद्धारणं च। न च तदन
भिवांछितं। कार्यस्य विद्यमानत्वात्॥ तेवा एते उल्मुके उद्दूहंतीति पूर्वोदितसमिद्धूयविषयः तत्र द्वो द्विवचनांत एवमे
वोपपद्यते॥ देवतापरिग्रहणार्थो वा। वचनसामर्थ्यात्॥ कस्य देवा गृहानागच्छंति कस्य वनयः एवैकमर्मानइत्यत्री
नुगृह्णातीत्यर्थवादस्वरूपमपि कार्यनिर्देशविषयमभ्युपगतमाचार्येण॥ येनाग्न्यन्वाधानमभवतीत्यनुक्रम्यदी
क्षणीयादिप्रागुदवसानीयाया निवर्त्तयति। तत्राग्न्यन्वाधानकार्यं दीक्षणीयया कृतमित्यभिप्रायः तत्र हि वचन
माग्नावैष्णवं प्रकृत्याग्निर्वै यज्ञस्यावराद्धो विष्णुः परार्द्धस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य दीक्षा इ रम॰
ति। दीक्षणीयायां प्रधानदेवतापरिग्रहस्य निर्वर्तितत्वात् प्रायणीयादिष्वग्न्यन्वाधानं निवृत्तिरुच्यते। न च देवताप ८
रिग्रहणार्थेग्न्यन्वाधानउपपद्यते। नाग्निधारणार्थे। ननु चार्थवादस्वरूपमेव वचनं। आग्नावैष्णवमेकादशकपालं निर्व

मात्राभिसंबंधात्फलपरिकल्पना स्यात्॥ ननु च मांसमैथुने वर्जयेदिति इत्यपि सत्त्रे प्रकरणात्कर्मांगत्वावगतिरवि
रुद्धा। व्यर्थमहर्ग्रहणमिति॥ सत्यमेवं॥ आप्रयोगद्वयपरिसमाप्तेरयं धर्म्मो माभूदिति॥ प्रतिप्रयोगावसायित्वमंगाना
मिति न्यायसंसूचनार्थमहर्ग्रहणं॥ एवं च मतिदासायणे पुनरारंभसामर्थ्याद्वाप्रयोगद्वयपरिसमाप्तेर्मां॰ सत्त्रान्त
नमूत्रकृतवामा॰ मिवर्जयेदित्ययं धर्मः॥ ॥ केशश्मश्रु वपते वाऽशिखं॥ वाशब्दस्य संनिधानाविशेषेपि सति वपति
नैव संबंधः। शिखासंबंधे हि सति पक्षे सशिखं स्यात्तत्र स्मृतिरुपरुध्येत। अमुत्रिवीणयपन्मुंडलस्यैतरपिधानं यच्छि
खेति॥ नवाहत्यवचनं सशिखस्य॥ तस्मात्स्मृत्यनपरोध एव ज्यायानिति॥ ॥ अपराह्णे व्रतोपायनीयमश्नीतः सर्पिषा
मुदितौ॥ अपराह्णग्रहणमह्नोऽपरभागमात्रविषयं॥ इतरसामर्थ्यात्॥ न यथान्यत्राह्नस्त्रिभागविषयता। तत्रत्वपराह्णे
ददातीति प्रकृत्य पूर्वाह्णो वै देवानाममध्यंदिनो मनुष्याणामपराह्णः पितृणामिति वाक्यशेषाद्विशेषावसाधनं। इह त्व
परभागमात्रप्रवृत्तित्वं। भोजनकालप्रत्यासत्तेश्च। व्रतोपायनीयमिति व्रतं भोजनमुच्यते। यथान्यत्र तद्व्रतस्यान्यो व्रतमि

त्र॥ अपरेत्वाहुरग्निपरिग्रहद्वारेण देवतापरिग्रहो ममाग्ने इत्यग्नीन् गृह्णातीति वचनात्तेषां चाग्नीनां भेदः।
कं॰ प्रत्यग्निवान्याश्चान्याश्च देवताः परिगृह्यंते। तेनापराग्निहोमेषु सत्सु न देवतापरिग्रहो नास्तीति निवर्त्यते स्य
९ त्वाधानं। न चात्र समुदितानामेककार्यता। तद्यथा। त्रयो ग्रावाण इतरेतरसव्यपेक्षा उखां धारयंति॥ प्रत्यक्षं
हि तत्र समुदितानामेककार्यत्वं। इह त्वग्निद्वारेण भेदाध्यवसानं। नत्वेवं सत्यपराग्निकयोः कार्यांतरत्वं प्राप्नो
ति। अस्तु को दोषः॥ कर्मभेदः स्यात्तत्र पशोगोमिप्रभृतिकृतव्याख्यापरोधः स्यात्॥ उच्यते॥ न व्याख्यापरोध॰
भयात्पदार्थस्यान्यथात्वमवसातुं वाक्यं। यथा हि प्रमाणैरर्थः प्रमीयते तथैव गृह्यते॥ अथवैकमेवाग्न्याधा॰
नं प्रत्यग्न्यभ्यस्यत इत्यदोषः। एवमाश्रीयमाणे प्रत्यग्न्यभ्यासं नैमित्तिकावसर इति॥ ॥ अहनि मां॰ समैथुने व
र्जयेत्॥ ननु चाहनि मैथुनस्य प्रतिषिद्धत्वाद्वाच्यं॥ कर्मोपलक्षणार्थमहर्ग्रहणमित्यदोषः॥ दृश्यते च कर्मणः काल राम
व्यपदेशः। चतुर्होत्रा पौर्णमासीमभिमृशेत्पंचहोत्रामावास्यामिति नियमस्य कर्मांगता न्याय्या॥ अंतरंगत्वे हि तदुप ९

गत्वा॰परेणाहवनीयं प्राङ्ति·ष्ठन्नग्निमीक्षमाणो प उप स्पृश्य व्रतमुपैत्यग्ने व्रतपत इदमहमिति वा॥ अंतरेणाप
णश्रोरिति षष्ठ्यां प्राप्तायां तदपवादोऽन्तरांतरेणयुक्ते इत्युपपदविभक्तिर्द्वितीया॥ प्राङ्ति·ष्ठन्निति शक्यमवक्तुं त्र
परेणाग्न्यवस्थितस्याग्नेरीक्षणविधानसामर्थ्यात्॥ अग्निमीक्ष्यमाण इत्यपि न वाच्यं। मंत्रलिंगादेव प्राप्ते॥ उक्तं च प
देशांतरेऽप्याहवनीयमीक्षमाणस्तद्वचनत्वादिति॥ वक्तव्यं वोत्तरमंत्रार्थत्वा। तस्य च विलिंगत्वात्॥ प्राङ्मुखता वा
च्या॥ प्रोषितस्यापि रिक्नियमो यथा स्यादिति॥ अपामुपस्पर्शनमाचमनं। लिंगात्॥ प्राङ्ति·ष्ठन्न उपस्पृशतीति प्र
कृत्यनेन [illegible]नैरंतरतो मेध्या वा आपो मेध्यो भूत्वा व्रतमुपायानीति॥ आलंभमात्रं वा। आचमनानुपदेशात्॥ तस्य च नै
मित्तिकत्वात्॥ शब्दसामर्थ्याच्चाप उपस्पृशतीति। लिंगमर्थवादमात्रं। दीक्षास्नानवत्। व्रतमुपैतीति नियममुपगच्छतीति
अग्ने व्रतपत इत्याहवनीयाग्निरुच्यते। न हि देवतान्ते ऐक्षणं संभवति॥ तेन दार्षद्भूतावभृथे विपरिणामः। ननु च
सामिधेन्यजुरंते चावभृथविधानात्। तत्र च व्रतस्य प्रासंगिकत्वाद्ग्रहणमिति चेन्न। नानद्भेत्तान्तदिस मिष्ट्य

निका। नद्येनोपयते अमामादिनात द्वलोपायनीयं॥ अथ श्रोत इति द्विवचनोपदेशात् पत्नी च। इतरथाहि यजमान एव नि
कौ यमः स्यात्। यथा सौत्रामण्यां हुतोच्छिष्टमदा इति॥ सर्पिषेति नात्र पयोव्रतवत् सर्पिरेव साधनं। स्थित्यसंभवा। इमा
१० षमम्माद समिति च पर्युदासात्। तेन यथाप्राप्तं सर्पिरभिधीयते। नन्वपि किं नियमविधिरुत तैलादिपरिसंख्या। कश्चा
त्र विशेषः। यदि नियमस्तैलमपि व्यंजनादिसंस्कारप्राप्त्या न निवर्त्तते। अथ परिसंख्या सर्पिषो न नियमः। किमत्र
युक्तं। नियमविधिः। तत्र हि स्वार्थप्रवृत्तिनाशवस्व स्यात्। तैलक्षुरासे परार्थताकाल्पेन। लक्षणा च स्यात्॥ तस्मान्नि
यमविधिरेव। नियमे च सत्यर्थात्तैलादिनिवृत्तिः॥ असुहिताऽवत्माविति। तदेतदशनं दृष्टार्थमुत धर्ममात्रमिति।
धर्ममात्रमिति ब्रूमः॥ कुतो द्रव्यकालादिनियमात्॥ दृष्टार्थे हि यत्किंचित्स्यात्। तस्माद्धर्ममात्र॥ दृष्टार्थं वा। प्रसिद्धेस्तद एम·
येत्वा। नह्यदृष्टाय कश्चिद्भुंक्ते। यत्तु द्रव्यादिनियम इति। कामं नियमाददृष्टपरिकल्पना। प्राङ्मुखोऽन्नानि भुंजीत १०
निवत्। ननु गम्यमानत्वस्य यज्ञवद्द्वारेण दृष्टपरिकल्पनमिति। प्रयोजनं सति सामर्थ्ये श्रीयात्॥ ॥ अंतरेणायणश्रो

५१

प्रतिषेधमनुवादं मन्यंते। तथाहि। नवाआहिताग्निनानृतंवदितव्यंनवदंजानुनानृतंवदेदित्याह॥ ॥ वृक्षारण्यौष
धीनामश्नीयाद्॥ इदमवसरप्राप्तंसायाशनमुच्यते॥ आरण्यवृक्षाणामारण्यौषधीनावाश्नीयाद्वानवेतिविकल्पः।
केचिदारण्यशब्दमौषधिविशेषणंमन्यंते। निर्देशसामर्थ्यात्॥ नत्वारण्यशब्दोवृक्षपदात्पूर्वः। अतोनतदुपसर्ज
नमिति॥ नवा। अविशेषेणश्रवणात्॥ नवाआरण्यमेवाश्नीयादितिप्रकृत्ययावदारण्यानुपवयपोयद्यादृस्यमित्या
ह॥ सूत्रस्यतन्मूलत्वादतंत्रोनिर्देशः। सामर्थ्येसिद्धत्वाद्विकल्पोऽनाद्यइतिचे।न्न॥ अवधारणार्थत्वादेवधार्य
हिवैकल्पिकेकर्म्मणिप्रवृत्तिर्न्याय्या। आरण्यगुणविधिस्तयाचेदमुच्यते॥ ॥आहवनीयगृहशाय्यथोगार्हपत्य
स्यवा॥ विकल्पेनहिश्रवणमत्र। तत्रायमधःशब्दः किंखट्वादिनिरोधकृदुतास्तरणस्यापि। नास्तरणनिषेधकः।
स्तत्रापिप्रयोगप्रत्ययाभ्यामधःसुप्तावयमिति। क्वचित्स्थंडिलशायीत्यतोनास्तरणनिषेधोऽधःशायीताधस्तादि
वहित्रेयसउपचारइतिलिंगात्॥ ॥ सद्योवाप्रातः॥ पूर्वोमुत्तरंवोपवसेदितिहिपूर्वमुक्तं। तत्रसद्योवेत्युच्यमानेतयो

जुरंततावभृथस्यधर्मः। तस्मात्तदंतएवावभृथात्तत्रचव्रतग्रहणेऽग्निशब्दोविचारिणम्पतइतिनदुरुक्तं॥ ॥
का० सत्यवाद्यतः। अतइत्यवाच्यं। पाठादेवतत्सिद्धेः। स्यात्संबंधज्ञापनार्थत्वा। व्रतग्रहणोत्कर्षेसत्यस्यनियमो
११ यथोत्कर्षेणेति। अपरेत्वतःशब्दंहेत्वर्थंमन्यंते। ननुचैकमुपनयनसमकालमेवसत्यवदनं। मुत्तरेषांचै
तदविरोधीतीहापिप्राप्तं। तथापरमाधानसमकालं। नवाआहिताग्निनानृतंवदितव्यं। अनृतातिथ्यपनोदे
तिसूत्रितं। इदमन्य। त्सत्यवाद्यतइत्यस्यविषयोपप्रदर्शनायाह॥ ॥कर्मांगमुत्तरेसत्यवदनं। पूर्वपुरुषांगं।
यदिदमुत्तरदेशेनत्कर्मांगं। कोविशेषइतिचेत्। कर्म्मांगेप्रायश्चित्तसमुच्चयः। पुरुषार्थोपचारेस्मार्त्तमेव। नन्वि
हदेपुरुषार्थेश्रौतंस्मार्त्तंच। तत्रश्रौतापचारेकृतेप्रायश्चित्तसमुच्चयइहप्राप्नोत्येव। पुनरारंभोव्यर्थइति॥ सत्यमे एम०
वं। कर्मांगेकर्मगतविशेषनिबंधनंविशिष्टंप्रायश्चित्तंयथास्यादिति। तच्चाग्नेर्वैदिकेऽरिति॥ याजुर्वैदिकेभुवइति। ११
होतृकपदार्थानुष्ठानकालेसत्यवदनापचारेहौतृकंश्रौतमाध्वर्यवंचस्मार्त्तंवेति। केचित्त्वाधानकालानृतवदन

हनिकर्मसाकल्यात्। एतेनोचाविधाना। दग्निहोत्रग्रहणंचेद्यर्थीभावादमावास्याविषयं। तत्रहिवचनंउदितेस
वितरि पौर्णमासस्यतंत्रंप्रक्रमियादनुदितेआमावास्यस्येति। अतोग्निहोत्रग्रहणमानतर्यार्थं। अग्निष्वमिति
चपदार्थसतत्वोपजाताऽवबोधेन। नहिपरमात्माख्यब्रह्मसतत्वाऽवबोधोत्रोपयुज्यंते॥ ॥वृत्तोजपत्यहंभूपति
रित्यादि॥ वृत्तोजपति॥ ब्रह्माऽजपतीतियावदुक्तं। अथवायदावृतः समस्तेनमंत्रेणभवतितदाजपति। कर्तृभेदादौ
नपद्यंमाभूदिति॥ ॥वाचस्पतेयज्ञंगोपायेत्याह॥ सामर्थ्याद्यजमानः। सहिवरणेनात्रानत्याचयज्ञगोपायनेनियो
क्तुंसमर्थोनान्यः। वाचस्पतित्वंचस्तोतुंब्रह्मण्यध्यारोप्यते। वाचस्पतेब्रह्मन्यज्ञंगोपायेति॥ यदपिचकाण्वानांदेव
सवितरित्युक्त्वावाचस्पतेयज्ञंगोपायेत्याहेतिपद्यते॥ तदपिनसमानकर्तृकार्थ्यं। पूर्वकालतामात्रेहिक्त्वाशब्दः। स
मानकर्तृकतायामसामंजस्यंस्यान्नहिब्रह्मात्मानमेववाचस्पतइतिसंबोधयति। अथाधिष्ठात्रीदेवतोच्यते। तत्रापि
नियोगाभावाद्दृष्टार्थतास्यात्। तस्माद्यथोपवर्णितएवार्थः। सचायंप्रैषोनियोगार्थत्वादस्त्यपिचरणेषवदंते। यथा

रेवान्यतरत्रयागः प्राप्नोति। उत्तरोपवासपक्षेवद्वितीयायां। तन्माभूदित्यतः प्रातर्ग्रहणं। अथाक्रियमाणेपि
क॰ प्रातर्ग्रहणेंगानांप्रधानकालत्वस्यन्याय्यत्वात्पूर्वस्यामप्राप्तिरेवयागस्य। उच्यते॥ एवंसतियथोत्तरस्यांसांग
१२ यागप्राप्ति। रेवमुत्तरोपवासपक्षावलंबनद्वारेणोत्तरस्यामपिप्राप्नुयात्॥ तन्निरासार्थंप्रातर्ग्रहणं॥ अस्तु
तथेतिचेन्न। पौर्णमास्यांयागविधानसामर्थ्यात्। उत्तरस्यामप्राप्तिरितिचेत्स्यादारंभसामर्थ्यात्। पूर्वामु
त्तरांवोपवसेदिति॥ उत्तराहिपौर्णमासीप्रतिपदितिप्रतिपादितं। तेनसद्योवाप्रातरितियदाप्रातस्तदासद्यइ
ति। पौर्णमासीद्वितीयाचतिरस्तेभवतः॥ सूत्रारंभसामर्थ्यादयमर्थोऽवसीयते। पक्षादौयद्यद्भुविरिति। हविः
पक्षादिनाविशेष्यते। तन्नैवमुपपद्यते। अथेतरथानैकांतिकत्वादविशेषणंस्यात्॥ तस्मादुत्तरस्यामेवया एम॰
गइतिसाधूच्यते॥ ॥ अग्निहोत्रंहुत्वाब्रह्माणंवृणीतेॐभूर्भुवस्वःभूपतेभुवनपतेमहतोभूतस्यपतेब्रह्माणंत्वा १२
वृणीमहइति॥ ॥ प्रातरित्यनुवर्त्तमानेऽग्निहोत्रंहुत्वेत्युक्तेतत्प्रतिपत्तिः। माभूत्सायमग्निहोत्रमिति॥ तत्कुतोऽ

स्मरणा। प्रसिद्धिरविशिष्टा। तस्माद्यथाप्रसिद्धमेताविरुद्धमासनमिति॥ ॥ब्रह्मसदनात्तृणंनिरस्यतिनिरस्तः
माप्रासहतेनयंद्विष्मइति॥ सचायमासनसंस्कारः। तेनपशुपुरोडाशेष्वापशुपरिसमाप्तेः। संस्कृतत्वादासन-
स्यपुनर्नप्रवर्त्तते॥ ॥ इदमहंबृहस्पतेः सदसिसीदामिप्रसूतोदेवेनसवित्रातदग्नयेप्रब्रवीमितद्वायवेतत्पृथि-
व्याइतिब्रह्मसदनआहवनीयमभिमुखउपविशति। तदग्नयेप्रब्रवीमीत्यग्निशब्दोदेवतावचनस्यात्प्रकृतत्वात्।
नवा। वायुनासहसमुच्चारणात्। तस्यचाप्रकृतत्वात्॥ तस्माद्देवतांतरवचनः॥ प्रयोजनं॥ सौर्यादौ व विपरिणा-
मः। ब्रह्मसदनग्रहणंगुणार्थंप्रकृतत्वादेव। कोगुणइतिचे। दाहवनीयमभिमुखइति॥ ॥वाग्यतश्चानुयाजप्रस-
वात्॥ यतवाग्ब्रह्माभवत्यनुयाजप्रसवंयावत्॥ ॥भागपरिहरणादिवा। सौवेषावधारणा॥ अथास्मैब्रह्मभागंपर्या-
हरंतीतिप्रकृत्यासवैवाचंयमएवस्याद्ब्रह्मन्प्रस्थास्यामीत्येतस्माद्वचसइतिआम्नायते। पूर्वमविशेषाद्ध्यवसितं।पा-
ठक्रमाद्विशेषाध्यवसानं। लिंगाच्च। विरूहंतिवाएतेयज्ञंक्रूएवंतियेमध्येयज्ञस्यपाकयज्ञियेऽयाचरंतीति हेतुत्वेनवा

ज्योतिष्टोमेदीक्षणीयादिष्वाधानेचेष्टिषु। कथमाधानेवरणाभावइतिचे।त्स्यात्प्रवृत्तिदर्शनाच्चत्वारऋत्वि-
क॰ जःप्राश्नंतीति। ब्रह्मौदनावेऽस्कवरणमितिचेन्न। तत्रापिदर्शनादग्न्याधेयेब्रह्मासामानिगायतीति। तेनप्र-
१३ तिपन्नब्रह्मत्वस्यवरणक्रियमाणमप्राकृतप्रयोजनंस्यात्। वरणविशेषनियमार्थमस्तुप्रवृत्तिरितिचेत्।
न। नियमस्यक्रियाउपसरत्वात्॥ सत्यांहिक्रियायांनियमानुग्राहे॥ ननियमानुग्रहायक्रियाप्रवृत्तिः॥ योहिपं-
डितंमन्यमानएवंकुर्यात्सप्राङ्मुखान्नभोजननियमानुग्रहायनत्मोपिसन्भुंजीतापि। यश्चज्योतिष्टोमेब्र-
ह्मवरणनिमेषोधोन्यायमूलः सइहापिप्रवर्त्ततएव॥ ॥ अपरेणाहवनीयंदक्षिणातिक्रामति॥ उत्तर-
तउपचारोयज्ञइतिवरणमुत्तरतः। दक्षिणतोब्रह्मयजमानयोरासनइतिगमनेविकल्पः॥ शास्त्रसामर्थ्यात्॥
अहेदेधिषव्योदतस्तिष्ठान्यस्यसदनेसीदयोस्मत्पाकतरइतिब्रह्मसदनमीक्षते॥ तच्चैतत्कौशंस्यात्तृणनिर- एम॰
सनोपदेशात्। प्रसिद्धेश्च। नवानियमशासनाभावा। तृणनिरसनंतुकुशास्तृतत्वादासनस्य। तत्कुतः। शिष्टानु- १३

र्शपूर्णमासादौ। तेनाग्निहोत्रेणान्यथानुपपत्त्या ब्रह्माक्षेप्तुं शक्यत इति। एकर्त्विक्त्वाविरोधाच्च॥ न चात्र क्रिया
ब्रह्माणमंतरेण न संभवति। कर्त्रंतरविधानाच्च। अस्ति त्वत्राध्वर्य्वाख्यं कर्त्रंतरं। तेनापि न तदाक्षेपः॥ यदप्युक्त
मग्निहोत्राद्य आमहत उक्थादिति। सोपि चतुस्त्रिंशद्धो विषयोऽर्थवादः॥ अस्तु तर्हि दर्विहोमविषयतास्य सूत्र
स्य। दर्विहोमा हुतयोऽवषट्काराः। तासां हि पौर्णमासविध्यंतग्राहित्वेनोचितो वषट्कारः तस्य स्वाहाकाराम्ना
नात्पुनर्निवृत्तिः। तदभावेऽन्वाख्यानमुपपद्यते। तदेतदनुपपन्नं। तत्र हि प्राप्त एव ब्रह्मा। मंत्ररहिता च क्रिया ब्रह्म
वरणादिका तस्मिन्ननर्थेनुमा इति॥ पूर्णाहुतिविध्यंतग्राहिहोमविषयता तर्ह्यस्तु सूत्रस्य। तत्रापि ह्यवषट्का
रा इति। एतदपि नोपपद्यते। अग्निहोत्रन्यायस्य लक्षणया। दर्व्युद्धृताभ्यस्तमयाहुतौ पौर्णाहुतिका धर्मा विहिता
स्त्वाचार्येण पूर्णाहुत्यामुपसंहृत्यान्यत्राऽतिदिष्टाः। अतस्तर्ह्यत्रापि ब्रह्मणः प्राप्त्यभाव एव। एवं चेदिहार्थमेव सूत्र
मस्तु। इह हि प्राग्ब्रह्मवरणाद्याहुतिहोमनिमित्ते सति तदर्थं ब्रह्मवरणप्रकर्षो न्याय्यः॥ अंगप्रधानार्थत्वाद्ब्रह्मणः

न्यमनस्येहाचरणं निर्दिशति। तस्माद्भागपरिहरणाद्येव। सर्वार्थपदार्थधर्मोपेतवान्को हि सत्यप्रमादात्कृताकृत
क॰ प्रत्यवेक्षणमाचरति॥ ॥आवृताऽवषट्कारासु॥ अवषट्कारास्वाहुतिषु ब्रह्माऽवृतोत्पाद्यते। तथैवात्राग्निहो
१४ त्राहुतयोऽवषट्काराः॥ अस्ति हि तत्रैकर्त्विक्त्वेपि सति प्रायश्चित्तार्थतया ब्रह्मणः प्राप्तिः॥ तेन निमित्ताद्याहुतिहोम
आपन्ने सति आवृता क्रियामात्रेण ब्रह्मोत्पाद्यत इति। क्रियया हि कारकमाक्षिप्यते। लिंगाच्च॥ अथ हैतां मंद्रक्र
षये प्रायश्चित्तिमुवाचाऽग्निहोत्रादय आमहत उक्थादिति॥ न चैतदेव। मेकर्त्विक्त्वादेवं हि श्रूयते। एकर्त्विजमग्निहोत्र
मिति॥ अंगप्रधानार्थोभिनिर्वृत्तिरेकेनर्त्विजा कर्त्तव्येति। ननु नैमित्तिकार्थतया द्वितीयोपि भविष्यति। नेत्युच्यते।
न हि नैमित्तिकस्य ब्रह्माक्षेपसामर्थ्यमस्ति। भिन्ने जुहोतीति होममात्र एव विधेर्व्यापारपर्यवसानं। वाक्यांतरपरिप्रा रुम॰
प्त इति चेत्॥ यदेव त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमित्येवमादिनाद्याहुतिहोमे ब्रह्मसंबंधविधानं॥ तेन यत्राद्याहुत १४
यस्तत्र ब्रह्मणा भवितव्यं॥ नैतदेवं। यदि त्वेतदन्यत्राचरितार्थं स्यात्ततः कदाचित्स्यादपि॥ अस्ति ह्यस्य चरितार्थत्वं

५५

वोजपेदिति॥ यजमानस्यत्वनाम्नानादाध्वर्यवमेव। केचित्तुचशब्दाद्यजमानस्यदीक्षाकालेवाग्यमापचारेवैष्णवमिच्छं
ति॥ तत्रापिह्याम्नायते। सयदिपुराणमानुषींवाचंव्याहरेदिति॥ सचमंत्रः प्राकरणिकः स्यात्। प्रकरणादेवसामान्यसंबं
धावगतेर्विशेषविषयत्वेसतिवाक्यस्यलाघवं॥ इतरथात्वप्राकृतउपादीयमानेसामान्यसंबंधोविशेषसंबंधश्चेति
गौरवंस्यात्॥ ॥ प्रणयज्ञमित्यतआरभ्यंतुप्रणयेतिप्रणीताः प्रसौतीत्येवमंतंसूत्रं॥ प्रणयज्ञमित्यनेनमंत्रेणप्र
णीताः प्रणीयमानाअनुजानाति॥ तुप्रणयेत्यस्यप्रसवार्थत्वात्ततः पुरस्ताज्जपः। प्रयोजनमुपांशुप्रयोगः॥ अत्रपु
नरूहः मध्यमपुरुषैकवचनात्विशेषेसतिमध्योविशेषः॥ अयंचमंत्रोनेकयजमानकेकर्मणियजमानः संनुयज
मानाश्चयेहीतिविपरिणम्यते। द्वित्वेपियजमानौस्तां। यजमानौवयेहीतिच॥ ॥ एवमामंत्रतन्नुकारेणप्रोक्षयज्ञ
मितिहविर्धानवर्हिषोश्चाप्रोक्षयज्ञमित्यनेनमंत्रेणहविर्धानवर्हिषोश्चप्रोक्षणंप्रसौति॥ एवमामंत्रितवत्यामंत्र
णविधानंव्रह्मन्हविः प्रोक्षिष्यामीत्येवमादिनाभाष्ये। नहितत्रप्रणीताप्रणयनवदाम्नानं। एवमोंकारेणेतिंतुकारपूर्व

तदर्थमिदंसूत्रं। आहुतावषट्कारासु॥ आहुताक्रियया। समंत्रिकाचासौक्रियान्यायतः प्राप्नोति। ननुचान्यत्राव
क० धीयमानश्छन्दोमंत्ररहितक्रियाविषयः प्रयुक्ताः महासहोखौंकरोत्याहरेति। सत्यमेवं। महासहोखौंकारेणै
५१ यतैवसमंत्रिकाक्रियाप्राप्ता। तत्राछन्दोमंत्रनिवृत्तिपरएव। तन्निवृत्तिश्चवाचनिकी। एतयैवाहुतानुपहरन्त्यजु
रिति॥ अतोब्रह्मवरणायकार्यार्थमेतत्॥ वाचयतिप्रैषस्तस्यकालीनएव। व्याहृतीनामतदंगत्वात्॥ अतदंग
ताचप्रकरणव्यवच्छेदात्॥ शक्यंतेवाववषट्कारव्याहृतयोवक्तुं। उक्तित्वात्तुवषट्कारस्य। याज्याकार्येहितासामा
म्नानमस्ति। यदियाज्यांपुरोनुवाक्यांनविंदेद्व्याहृतीरेवयाज्यायाः पुरोनुवाक्यायाः स्थानेकुर्यादिति। तेनेहवषट्
काराभावेऽवषट्काराव्याहृतयउच्यंते॥ ॥ अत्रवाइतोपायनं। शास्त्रतुल्यत्वात्॥ ॥ व्याहृतरेवैष्णवंमंत्रंजपेत्। एमः
वाग्यतश्चानुयाजप्रसवादिति। वाग्यमेसतियद्यनुव्याहरतितंदावैष्णवंमंत्रंजपेत्॥ अधिकारमुपजीवन्नाह॥ ॥ २५
अध्वर्युश्च॥ ॥ हविर्ग्रहणकालेवाग्यमने। तस्मिन्हिशास्त्रमुभयोः। सयदिपुराणमानुषींवाचंव्याहरेत्तत्रोवैष्णवीमृचंवायजु

दृ॰ शमयंतुस्वाहाकृतंजठरमिंद्रस्यगच्छघसिनामेमांसंशृत्वाऊर्द्धमेनाभेः सीदेंद्रस्यत्वाजठरेसादयामीति
प्रक्षालनंचकार्यंसंबंधाविशेषाद्द्वयोरपिपात्रयोरेकवचनंतुजात्यपेक्षं। ननुचैकमेवैतत्पात्रं। प्रक्षाल्य
पात्रमित्येकवचननिर्देशात्॥ तथातूष्णींप्राशित्रहरणमिति॥ द्वेव्याख्याते॥ मंत्रेप्रत्निपन्निर्दर्शनात्काग
योः प्राशित्रहरणेइती। तज्जात्यपेक्षयेत्युक्तं॥ ॥ एतेनइतिसमिदामंत्रितः प्रसौति। समित्संबंधादामंत्रण
समिछब्दोनोच्यते। अथवासमिछब्देनतादर्थ्यादनुयाजाउच्यंते। अनुयाजार्थमामंत्रितएतंतइत्यनेनमं
त्रेणानुजानाति॥ यज्ञपतिशब्दश्चसत्रेविपरिणम्यते। यज्ञपतिसंबंधवचनसंस्कारपरिलोपःकस्यचिन्माभू
दिति॥ ॥ प्रतिष्ठेतिब्रूयाद्॥ सयदिकामयेतब्रूयात्प्रतिष्ठेतिवचनात्॥ केचित्प्रतिष्ठेतिक्रियापदंपदांतरमध्या
हरंतिसामर्थ्यात्॥ तत्पुनर्युक्तमयुक्तंवेतिविचारणीयं। प्रतिष्ठतमितिचवरुणप्रघासेषुविपरिणामः॥ ॥क
र्मोपवर्गेसमिधमादधातिजुहोत्युपतिष्ठतेवानमः कृतायकर्मणेअकृतायकर्मणेनमः॥ अयाड्यज्ञंजातवेदा

केणार्धसनूपेणवचसेतियावत्॥ ॥ बृहस्पतेपरिगृहाणवेदिं॰ सुगावोदेवाः सदनानिसंत्वस्यांवर्हिः प्रथता
का॰ ॰ साध्वंतरहि॰ सापृथिवीदेवीदेव्यस्त्वितिवेदिंपरिगृह्णाति। प्रसौतीत्यनुवर्त्तते। प्रजापतेनुब्रूहियज्ञमितिसामि
१६ धेनीरनुवक्ष्यंतं। देवतावर्द्धयत्वमितिसर्वत्रानुषजति। अनुषंगश्चलाघवार्थः। अत्रचप्रोक्षणपरिग्रहणेषुअ
ध्वर्युपरंवेदिपरंचवरुणप्रघासेषुवचनमूह्यते॥ यजमानपरंचानेकयजमानके॥ ॥ मित्रस्यत्वाचक्षुषाप्रतीक्ष
इति प्राशित्रंप्रतीक्षतेदेवस्यत्वेतिप्रतिगृह्णाति॥ सपात्रं। प्रसिद्धेः। सादनोपदेशात्पुनरादानसामर्थ्याच्च॥ पृथिव्या
स्त्वेतिसादयत्यपोत्थवहीं॰ विपुनरादायदेवस्यचेत्यनामिकांगुष्ठाभ्यामग्नेष्ट्वेतिप्राश्नातिदंतैरनुपस्पृशन्नत्रचेत्॥
पुनरादानंचद्रव्यमात्रस्य। प्राशनार्थत्वात्॥ अतश्चअसादितेपिभविष्यति॥ अनामिकांगुष्ठाभ्यामादायाग्नेष्ट्वेत्यनेन
मंत्रेणप्राश्नाति। चेच्छब्दोविकल्पार्थः। अत्रचेत्प्राश्नातिपुनरादायप्राश्नाति। अथोपरिष्टाज्जानोर्निदध्यात्पं संदेशोपू एमः
र्वमविशेषेणाभिहितं। विशेषप्रतिपिपादयिषयापात्रपुनर्वचनं॥ प्रक्षाल्यपात्रंनाभिमात्रमते॥ पात्रस्थंनदैवतासार १६

पात्रांउदकस्योद्देशः। तच्चाविशेषेपिसतिचतुरस्रंस्यात्। चमसेनायाप्रणयतीति॥ सचतुरस्रः प्रसिद्धेर्लिंगाच्चाचम
संप्रकृत्यचतुःस्रक्तिनाचतस्रोवेदिश्राइत्याम्नायते। सूत्रकारप्रस्थानाच्चाचमसवत्स्रुवेणेति। आलंभउदकस्य
स्यान्नत्संस्काराभिप्रवृत्तेः॥ पात्रस्यवा। तदुपदेशा। संत्संस्कारश्चतत्संबंधद्वारेण। इडोपहवेहोत्रान्वारंभणवत्। प्रयो
जनंप्रणीताकार्यापन्नयोर्दधिपयसोर्विपरिणामः। उदकालंभेहिभूतस्त्वाभृतंकरिष्यामीतित्वाशब्दस्तद्विषयःस्या।
त्तत्रद्रव्यद्वित्वेविपरिणम्येत॥ ॥ब्रह्मन्नपः प्रणेष्यामियजमानवाचंयच्छेत्याह॥ ब्रह्मन्नपः प्रणेष्यामीतिब्रह्मानुज्ञाप्र
थीनं। ब्रह्मा। ऋत्विविशेषः॥ सचयद्यपिवरणाभरणमितिन्नस्तथापितुब्रह्मत्वस्यकर्त्तुयुपचर्यते॥ प्रयोजनं। सत्रेष्वविप
रिणामः। कुंडपायिनामयनेचमैत्रावरुणोब्रह्मत्वंकुर्वीतीति॥ यजमानवाचंयच्छेत्सनेकयजमानकेयथार्थंविपरिणम्य
ते। सचायंवाग्यमः परार्थधर्मत्वात्सत्यपिप्रणयनेप्रवर्त्ततएव॥ प्रैषश्चतादर्थ्यात्॥ ॥अनुज्ञातउत्तरेणाहवनीयं
संप्रतिनिदधातिकस्त्वेति॥ सामर्थ्योपरिप्रापितत्वादनुज्ञातइत्यवाच्यं। नवा॥ प्रैषप्रैषार्थयोरानंतर्यव्युदासार्थत्वा।द्यज

का०
६१

अंतरः पूर्वोस्मिन्निषद्यसुन्वꣳ मनिꣳ मुविमुचाविमुंचधेत्यस्माभ्यंद्रविणंजातवेदः स्वाहेतियथेतमेत्य॥ अपव
र्गः समाप्तिः। यथेतमेत्येतिपरिभाषितत्वादवाच्यमितिचेत्॥ अतीत्यनिःक्रमणमिति। नेदमर्थेनाप्राप्तेः। तत्र
स्थस्यापिहिसमिदाधानादिनविरुध्यते॥ स्वाहाकारप्रदानंचउपस्थानसमिदाधानार्थं॥ होमेत्यसमाम्नातोपि
प्राप्त्यादेवस्वाहाकारः सर्वत्रेत्यनेन। सचायंपदार्थोयावदुक्तांताऽपच्छिन्नादिषुनिवर्त्तते॥ ॥ एतद्ब्रह्मत्वमिष्टिप
श्वोः एतद्ब्रह्मत्वमधिकारादिहोक्तं। तदेतदिष्टिपशुविषयंप्रतिपत्तव्यं। इष्टिग्रहणंप्रकृतत्वादकार्यं। पशुग्रहणंच
चोदकपरिप्रापितत्वात्॥ कर्त्तव्यंवापशुग्रहणं। ब्रह्मानुज्ञातेप्रोक्षणंयथास्या। न्नहितत्रसान्नाय्यविकारत्वात्प्रो
क्षणमस्ति। इष्टिग्रहणंतर्हिनकर्त्तव्यं। नवाकार्यं। वाक्याद्विपश्चथैतैवब्रह्मत्वस्यस्यादितितन्माभूदितीष्टिग्रहणं॥
ब्रह्मवरणाधिकारेतत्प्रसंगमुपजीवतायावतब्रह्मत्वंतत्सर्वमभिहितं। अतः प्रणयनाद्युच्यते॥ गार्हपत्यमुत्तरेण
दपात्रंनिधायालभतेभूतस्त्वाभूतंकरिष्यामीति॥ गार्हपत्यमित्युपपदविभक्तिः षष्ठ्यपवादोद्वितीया। उदपात्रंउदकस्य

राम
६१

नस्पत्येनुवाहरणेप्रवर्त्तमानेक्रत्वर्थस्यसाधारणत्वात्तदाश्रयः। कामोप्रस्रवर्वसंप्रवर्त्तेतएवाएताः प्रणीतादृष्टा
र्थाउतधर्ममात्राः। धर्ममात्राइतिब्रूमः। देशनियमात्मात्रनियमाच्च। तथामंत्रवत्वोपदेशात्। छिद्रः संस्तवाच्च। शिलेह
वाएतद्यज्ञस्यपत्प्रणीताइति॥ अनवखंडनत्तापान्याच्छिद्रसंस्तवः। स्कंदनप्रतिषेधश्चधर्ममात्रउपपद्यते॥ इत
रथात्द्यवश्यंभाविस्कंदनमिति। प्रतिपत्तिविधानाच्चा।ध्यप्रणीतास्विणतः परीत्मनिनयतीति। दृष्टार्थत्वेहिक
दाचिदुपयुक्ताभवेयुः। तत्रप्रतिपत्तिविधानंपाक्षिकंस्यात्॥ अपाक्षिकंचश्रवणं। तस्माद्धर्ममात्राइति॥ दृष्टार्था
वा। द्रव्याणांक्रियाभिनिर्वृत्त्यर्थताप्रसिद्धेः॥ नहिकश्चिद्द्रव्यमदृष्टार्थायप्रकल्पयति। संतिचात्रोदकसाध्याः क्रियाः।
नचतत्सिद्ध्येन्यदुदकमुपदिश्यते। तेनदृष्टेर्थेवगम्यमानेपियोनामादृष्टंपरिकल्पयतिसदिद्भिः यमवज्ञोजनाद
प्यदृष्टंप्रकल्पयेत्। लिंगाच्च॥ प्रणीताभिःहवींषिसंयौति॥ यत्तूक्तंदेशादीनियमइति। सनियमोदृष्टायाशिरःसं
स्कृतिः प्राग्विभागसामान्यात्॥ स्कंदनप्रतिषेधस्तुसुतरांदृष्टार्थत्वउपपद्यते। प्रतिपत्तिश्चशेषस्येति॥ दृष्टार्थत्वेपिसं

मानवाचंयच्छेत्पनंतरंयथाख्यादिति। पाठादेवतत्प्राप्तिरितिचेत्॥ न॥ प्रैषसमनंतरंतदर्थोनुष्ठानंन्याय्यमिति।
का० संप्रतिशाद्यो। नेतिकोऽनातिदूरविषयः। नानातिद्रुत्पसादयेन्नो अनाप्ताः सादयेदितिवचनात्। न्निधानेसंत्रःप्रा
१८ ।न्नदुपदेशात्। न्निदधातिकस्त्वेति। श्रुतिविरोधान्नेतिचेत्। सप्रणयतिकस्त्वायुनक्तीति। निधानेवा। प्रणयनस्य
वतदर्थत्वात्। तस्मादसंप्रत्येवोत्तरेणाहवनीयंप्रणयतीत्युपसंहारात्। शाखांतरेस्पष्टतरः पाठः। सनिदधातीति
कस्त्वेति॥ नाशब्दोद्रव्यपरत्वाद्द्रव्यबहुत्वेपियथोदधिघृतादौविपरिणम्येत॥ नवाऽन्यायनिगदत्वात्रयःप्रणय
तीतिद्विबहुवचनांतेनोपदेशः॥ नाशब्दश्चैकवचनांतः। तस्मान्नूहइति॥ ॥ नांतरेणगच्छेयुः। प्रकृताप्रकृतयो। रूपदे
शात्। लिंगाच्च। तेनमिथकं चर्यमाणमंतरेणसंचरणानीति॥ प्रयोजनं। सर्वत्रप्रायश्चित्तं॥ ॥ कांस्यवानस्पत्यमार्त्तिकैरभि
चारब्रह्मवर्चसप्रतिधामकामायथासंख्यं॥ कांस्यादीनिप्रणयनाश्चितानिमृदंतानितान्यभिचारादीन्साधयंति एम- १८
ननदाश्रयाक्रिया। शब्दस्यतत्परत्वात्कांस्यादीनांफलसंबंधः। एवंभवतिविकारएषामप्रवृत्तिः। पुरुषार्थत्वात्॥ वा

न्नैवैतस्मिन्सतिक्रमेणरूपचारेस्मान्नैमेवप्रायश्चित्तं॥ तच्चैतत्परिस्तरणमाहुत्यंगं। यज्ञसंयोगात्। सहैषयज्ञउवाच
नन्नतायावैविभेमीतिप्रकृत्यतस्मादेतदग्निमभितः परिस्तृणंतीत्याह। यज्ञसंबंधादाहुतियज्ञशब्देनोच्यते॥ अथ
यज्ञसंबंधमात्रमेवोच्यते। तथासत्यग्निव्यतिरेकेणान्यत्रापिस्यात्॥ तत्रतस्मादेतदग्निमभितः परिस्तृणंतीत्यसमं
जसंस्यात्॥ तस्मादाहुत्यंगमेतत्॥ तत्रापिकेचिदाहुत्यर्थत्वात्सर्वत्रैवहिरण्यादिषुवाक्यसंयोगात्परिस्तरणमिच्छंति।
वाक्यंत्वेतत्॥ सहैषयज्ञउवाचेति॥ तच्चप्रकरणानुरोधेननयज्ञविशेषेव्यवस्थापयितुंशक्यमिति। तदेतदसत्। ह्येकस्यय
ज्ञविशेषविषयत्वात्सहैषयज्ञउवाचेति॥ एषह्यत्यंशब्दः प्रकृतयागविषयः॥ तस्माद्दर्शपूर्णमासाहुत्यंगमेव। तथाचाह।
परिस्तीर्यतंपूर्ववत्पात्रासादनमिति॥ ॥द्विशःपात्राणिप्रसादयतीति। द्वंद्वएकीकृत्य। साचेयाद्वंद्वतापात्राणांदर्शसाम
र्थ्यात्सर्वत्रप्रवर्त्तते। एवंहिसमामनंति। द्वंद्वंपात्राण्युदाहरतीति॥ ननुअथैवाग्निहोत्रहवण्यांचित्येवमादिसमाम्नाना
दृशगणस्यैवद्वंद्वता। इतरथाहिपात्रैयष्यप्रसंगः स्यात्। आहच। तद्दशदशास्तरावेविताद्विशोद्वैयत्तइति। नचोक्तहे

देहः। किंसंयवनार्थाउतसर्वार्थाइति॥ तत्रकेचित्प्रणीताभिः संयौतीतिवाक्यसामर्थ्यात्संयवनार्थतामाहुः॥ द्रव्य
प्रकृतेः परार्थत्वान्नत्रवाविशेषात्सर्वार्थत्वादनुवादोयमित्यपरे॥ किंचाग्नीषोमीयेप्रतिषेधानुपपत्ते॥ संयवनार्थ
त्वेहितदभावादेवप्रणीतानस्फर्थयेः प्रतिषेधइति। निरूढेचप्रतिप्रसवानुपपत्तेः॥ तत्रापिहिनैवसंयवनमस्ति। स
वार्थत्वेपुनः प्रतिषेधप्रसवावुपपद्येते। सत्रकाप्रस्थानाच्च। प्रणीताद्युपसदिति। तस्मात्सर्वार्थाइति॥ ॥तृणैरग्नीत्प
रिस्तीर्यपुरस्तात्प्रथमंद्विशः पात्राणिप्रसादयति॥ तृणशब्दोदर्भविषयः। यजियाउवैदर्भाइतिलिंगात्। दर्भैस्तृणीत
हरितैः सुपर्सैरितिच। समाचाराच्च। आचारेतिहिदर्भैः परिस्तरणं। आचार्याभिप्रायाच्च। बर्हिषस्तृणोतिरग्नीनिदध्या
तीन्युक्त्वान्येषामुक्तत्वादित्यभिधायान्यत्रापितृणार्थइति। अन्यदुपादीयमानंबर्हिर्जातीयमेवप्रतीयते॥ ननृणांतर
जातीयं॥ पुरस्तात्प्रथममितिदिगभिप्राय॥ माहवनीयस्यकार्यक्रमादेवप्राप्नोति। ततोगार्हपत्यदक्षिणार्थो। तयोरपिपुर
स्तात्प्रथमंप्राप्तेः। शेषंचस्मृतिवशात्प्रदक्षिणं। मादत्रिः सामंतेषुप्रदक्षिणमिति। इहचपरिस्तीर्येतिपरिसंमंतार्थः। स्मा

चेत्। तथा च प्रतिचितिं द्वंद्वता। न। समाम्नानसामर्थ्यात्। स्फ्यं च कपालानि चेति। उद्धरणपात्र्योरपि कपालवदन्येन द्वं-
द्वता। अर्थप्रसंख्यया द्व्योपकल्पनमिति परिभाषितत्वाद्वाच्यं पात्रासादनमिति चेन्न। देशकालाद्यर्थता
त्॥ ॥ यजमानो वा॥ विकल्पार्थोऽयमारंभः॥ शूर्पाग्निहोत्रहवणि॥ अर्थवच्चेति यावत्॥ आसादयनीति वर्त्तते॥ अ-
र्थप्रसिद्धमेव स्यात्। लिंगाच्च। परिदत्तानां यद्विवृणां परीधीकारणमिति। एषां वाध्वर्युरेव कर्त्ता स्यात्॥ समाख्याना।
त्त्वा। करणास्याचोदितत्वात्। अन्यासगाच्च। तस्मात्तद्भूतानामुपादानमिति। लिंगाद्यानद्यद्वैषामत्रामुद्धृत्य कृत्वा
ऽन्यो वाऽमेध्यः कश्चित्पराहंतोऽन्यार्थवच्चेति। अर्थोऽप्यस्मिन्विद्यत इति अर्थवत्प्रयोजनवदित्यर्थः। तद्धि विनियोग
क्रमेणासाद्यते॥ अर्थवद्ग्रहणाद्यदपि न परिध्यपवेषादिवत्साक्षादुच्यते॥ अन्वाहार्योपसर्जनीपात्राद्यपि॥ तद
प्यासादनीयं। इंधनाद्यपीति चेन्न॥ नाचोदितार्थत्वात्॥ चोदिते हि परस्यात्योगो तेन तदासाद्यते। तत्र यथाज्ञिके ईडकः
प्रणीतोऽनः पात्रीयापविक्तच्छेदनानि चेत्येवमादि॥ अत्र चोपवेषसमनंतरमाज्यस्थालीनोपसर्जनीपात्रं। पेषणोप

क॰ तुत्वा। उक्तं हि पात्रोद्देशेन द्वंद्वताविधानमिति। पाठवैयर्थ्यप्रसंग इति चेन्न। विशेषपाठस्य विशिष्टद्वंद्वपरिग्रहार्थत्व
२० ॥ दन्यथा हि विनियोगक्रमव्यवस्थितानां द्वंद्वताप्याः। तत्र स्फ्यस्य कपालैः सह द्वंद्वतानस्या। इत्थं पुनः पाठे सति विशि
ष्टद्वंद्वपरिग्रहः सिद्धो भवति। यत्तु पुनरुक्तं तद्दशरणाकृतौ वैविरद्वितियजूष इति सोऽवयुत्यवादः। एवं च सति विकारेत्व
र्ष्विष्यांस्य एक एवासाद्यते॥ न हि तस्य द्वंद्वोपजननकानि कपालानि संतीति। अथ शो परित नेन द्वंद्वता क्रियेत। तत्र यथा-
पाठं द्वंद्वता न कस्य चित्स्यात्। नन्वेवं पक्षेऽपि स्फ्यस्य द्वंद्वताभावप्रसंगः। किं क्रियतां बहूनामयथार्थीमाभूदिति। अर्थव
दासादितानां तु द्वंद्वगतविशेषानाम्नानात्यस्यकस्यकस्यचिदेकेन केनचिद्द्वंद्वतेत्यविरुद्धं॥ सूत्रकाराभिप्रायाच्च। द्विरुः
पात्राणीत्युक्त्वा शूर्पाग्निहोत्रहवणि स्फ्यः कपालमित्येवमादि द्वंद्वैकवद्भावमाह। तेन च सिद्धायां द्वंद्वतायां दिशरत्यवा- णमः
च्यं स्यात्। उक्तं च। तस्मात्सर्वत्र द्वंद्वतेति सिद्धं। पात्रशब्दः साधनवचनो न त्वाकृतिवचनः॥ तथा हि स्फ्यकपालशम्योलूखलाजि २०
नादीनामपात्रता स्यात्। साधनं चेत्पात्रं। कपालसमुदायस्य साधनत्वात्तथाभूतस्य द्वंद्वता प्रतिचितिसाधनभाव इति

न्तेयथामंथनचतुष्टयंयूपचतुष्टयंरूरचतुष्टयादिनत्मकल्पनएव। नासाद्यतेनप्रोक्ष्यतेवा। नहितस्यासाद
नप्रोक्षणेविहिते। नचकार्यापत्तितः प्राप्ति। तस्मादुपकल्पनमेव। वर्हिष्योश्चरुपात्रस्य। तर्हिकपालधर्म्माः संतु
कार्यापन्नेरिति। स्यादेतदेवं। यदिकार्यापत्तिः स्यात्। नत्विहतथा। इहहिनचरुपात्रगतेनोष्मणाचरुः पच्यते। क
पालगतेनेवपुरोडाशः॥ कथंतर्हि। चरुपात्रगतऊष्मोदकमेवतासंतापयति॥ ततश्चरुसिद्धिरित्यकपालकार्यापत्ति
रिति॥ ततश्चरुपात्रंमप्युपकल्प्यते॥ यत्तुप्रकृतावेवपात्रिकाद्ध्मावर्हिषोरुपकल्पनमाहुस्तदिहप्रोक्षणाभावात्॥
तदभावश्चउपरिष्टात्प्रोक्षणविधानात्॥ इध्मंप्रोक्षतिविस्रंसयेति॥ ॥अपरेणस्यपश्चादुत्तरतोवा॥ शास्त्रस्यतुल्य
त्वात्॥ ॥कर्म्मणेवामितिसूर्य्याग्निहोत्रहवण्यादायवाचंयच्छति॥ साकांक्षत्वाददद इत्यध्याहारः। मंत्रस्याविशेषादु
भयार्थः। प्रयोजनमंन्यतरापायेन्यतरेणापिप्रयुज्यते॥ सूर्य्याग्निहोत्रहवण्यादानंचनिर्वापार्थं। तत्संनिधावाम्नानात्प्र
योजनंपश्चाद्मंत्रवदग्निहोत्रहवण्यादानंप्रोक्षणपर्थतया। वाच्यमस्त्यपदार्थधर्मः। मावाञ्चमू॰ हविर्ग्रहीष्यन्वाचंयच्छ

धानाज्यनिर्वपणानामेककालत्वा। त्रि॰ यंतिमिश्रान्यभांधतेकपालान्यथैकश्चाज्यंनिर्वपति। उपधानोत्तरका
क॰ लंत्वपसर्जन्यधिश्रयणमिति। कुशमुष्टिरपितर्हिततः पूर्वंप्राप्नोति। एवंहिसूत्रितंनिरुप्याज्यंवेदंकरोतीति।
२१. न। समन्त्वा। उपधानानुत्तरकालमुपसर्जन्यधिश्रयणं। आज्यनिर्वपणाद्वेदवंधनं। तुल्यकालतोभयोरपीति
ननियमोवसीयते॥ उच्यते। कुशमुष्ट्युपसर्जनीयात्रयोर्यद्यप्येककालता। तत्कार्ययोस्तुगम्यते पौर्वापर्यं। प्रा
क्कालीनंत्वुपसर्जनीकार्यंवेदकार्यात्। इतः पूर्वमुपसर्जनीपात्रंततः कुशमुष्टिरिति। ततश्चान्वाहार्यपात्रं। ननुचा
न्वाहार्यपात्रंप्राशित्रहरणोत्तरकालंप्राप्नोति। न। तंडुलानामसावःवसरः। तत्पात्रंतुकुशमुष्ट्यनंतरंत्वरणयोरं
तरालइति॥ पात्रस्याधिश्रयणार्थत्वात्॥ एवंसर्वत्रकार्यक्रमेणासादनमालोचनीयमिति। विकारेपिचप्राकृत दप:
पात्रकार्यापत्त्यस्यैवैकृतस्यासादनादिप्रवर्त्ततएव। किंपुनस्तत्रापिकार्यक्रमएव। नप्राकृतपात्रक्रमः। प्रकृतावपि २१.
हिकार्यक्रमएवकारणमिति। तद्यथानिरूढेवपाश्रयणपनंतरंदक्षिणाद्रव्यमिति। यत्पुनर्विकृतावप्राकृतकार्याप

मिवैषां वर्हं भवतीति॥ अतोन्यत्रोपचारवृत्तिः। यथे पाग्रयो॥ धूर्भेदाक्षोभयोरभिमर्शनं॥ तत्संस्काराच्च। दक्षिणाम
भिमृश्य तत उत्तरामुदक्संस्थतासंपत्तेः। समर्पते हि सर्वत्रोदक्संस्थता। लिंगं च भवति तथा त्वा दक्षं भवति तथो
र्वी भवतीति च॥ केचित्त्वेकस्या एव धुरोभिमर्शनमिच्छंति। वाक्यशेषात्। दक्षिणोपध पर्यस्तमेतदन्योन्यं भवति ह
विग्रहीष्यंस्तस्मादेवेन निरुक्त इति। एकत्वादक्षेः सकृदेव निरूढवदिति। तत्पुनरेतदर्थवादमात्रं। अनोवयवसंस्का
रश्चात्र। तौ च संस्कार्यौ भिन्नौ। प्रतिसंस्कार्यं संस्कारावृत्तिर्न्याय्येति॥ भेदेनाभिमर्शनमिति संप्रदायः॥ ॥ देवानामित्यु
पस्तंभनस्य पश्चार्दीषां॥ अभिमृश्य जपतीति सूत्रशेषः॥ अथ जघनेन कस्तंभीमीषामभिमृश्य जपतीति श्रुतत्वा
॥ त्वावायमनः संस्कारत्वाच्च प्रतीषमावर्तते। तत्संस्कारश्च मंत्रलिंगवाक्यशेषाभ्यां। देवानामसि वह्नितममित्येवमा
दिना अनोभिधीयते। नेषेति॥ अत एवैतदुपस्तौत्युपस्कृता द्रातमानसो हविर्गृह्णानीति च वाक्यशेषः। अयं मंत्रश्चा
दितार्थाभिधायी पितृयज्ञे विपरिणम्यते। पितृणामसि वह्नितमं पितृहूतममिति च। देवशब्दस्य प्रकृतदेववचनत्वात्। व

मत्र्वैनां विसृजन्त इति कालोपलक्षणार्थत्वात्॥ प्रयोजनं ह विग्रहणाभावेपि पश्चादीमं विष्यति॥ ॥ प्रतप्तं मन्युष्टं नि
क० ष्टप्तमिति वा॥ तत्संस्कारो हविर्ग्रहणार्थः। तेन तदभावेन भवति॥ ॥ गच्छस्वंतरिक्षमिति अवरोहयपश्चादनस्तिष्ठंत्सर्म
२२ गि॥ अपणशदस्याविरोधेपि सति अत्र गार्हपत्यविषयो ग्राह्यः। एवं ह्याह जघनेन गार्हपत्यं प्राग्गीषमनो वास्थितं भव
ति तस्य दक्षिणां चक्रमारुह्यानसो धिनिर्वपतीति। विकल्पस्तु प्रवृत्तिदर्शनात्। स जघनेन गार्हपत्यं प्राचीनावीती भू
त्वा दक्षिणासीन एतं षट्कपालं पुरोडाशं गृह्णातीति। अंगतांगं समंगि। सांयोगिकानि वांगान्यन्यत्र गृह्यंते। न हि
सामवायिकव्यतिरेकेणानोग्र परेशोस्ति। अनुग्रासा नि दधितं हि स्यात्॥ नाकेवलंगमनार्थत्वात्तयोः। तस्य चात्राभा
वात्॥ तस्माद्धगयोक्त वरत्रादिमात्रमेव॥ ॥ धूरसीति धुरभिमर्शनं॥ धूः शब्दो युगशम्यांतरालवचनः। स्मृतेः॥ एवं हि स्म
रंति युन्नादर्यति च॥ धूः धूर्वे ते ये धकर्म्मणा दयम पीनरा धूरेतस्मादेव विहं तिवहं धारयते वेति। वहस्य विदृतिरनसो वाधार एमः
णां शम्यांतरालात्तदुत्तरं चं धसंधाङ्गवति। लिंगाच्च॥ तस्य चाएतस्यानसोग्निरेव धूरग्निर्हि वै धूरथ एनदुहंत्यग्निदग्ध २२

३२

अथतत्रपितृशब्देनचोदना।पितृभ्यः सोमवद्भ्यः पितृभ्योबर्हिषद्भ्यइति।नचपितरोदेवशब्देनाभिधातुंशक्यं
तेइति विपरिणम्यतेदेवशब्दे॥ नैतदेवं। देवताविषयेहिदेवशब्देपितॄणामपिचोदितत्वात्देवतात्वात्देवशब्दप्र
योगोऽविरुद्धएव। अथशब्दांतराभिहितेषुदेवशब्दोनप्रवर्त्ततइति। तथासत्यग्न्यादिष्वपिदेवशब्दप्रयोगोदुर्ल
भः॥ अत्रापिहिशब्दांतरमाग्नेयोग्नीषोमीयइति। इयांस्तुविशेषः। इहतद्धितः। तत्रचतुर्थी। नचचोदितएवदेवश
ब्दो।न्यत्रापिप्रयोगादित्युक्तं॥ अथदेवशब्दोयोगाद्यादिषुप्रवर्त्ततेदानाद्देवइति। तथापिपितृयज्ञेऽप्यन्नदएव। पित
रोहितत्साध्यक्रियाभिनिर्वृत्तिद्वारेणफलदानाद्देवाइति। तदेतदप्यसत्॥ प्रत्यस्तमितावयवार्थवृत्तितयादेवशब्दस्या
र्थेप्रतीतिसामर्थ्यात्। नचदानाद्देवत्वंसर्वत्रेष्यते। नहिसंसर्पन्नपिगोधासर्पशब्देनाभिधातुंशक्यते। प्रत्ययस्यविशिष्ट
जातिविषयत्वात्। भुजंगएवसर्पशब्देनाभिधीयते। तेनेहापिप्रत्ययस्यविशिष्टार्थवृत्तित्वाद्देवएवदेवास्तेषांचब
हुत्वात्समवेतंवचनं। ननुचैवमपिदेवद्वित्वमग्नेरुभयत्रैकत्वात्॥ नैतदेवं। एकोहिकेवलोग्निरपरःसोमसहितोयइतिव

क०
२३

चनंचात्रासमवेतं। द्वयोर्हिदेवतयोर्बहुवचनंश्रूयते। तेनविकारएकदेवत्येवचनस्याविपरिणामइतिकेचित्। तदेत
दनुपपन्नमिव। वचनस्याप्यत्रसमवायात्। इहवोन्यत्रदेवाअग्निरग्नीषोमौचेति। नन्वग्नीषोमयोः समुदितयोर्दे
वतात्वादेकत्वं। नैतदेवं। समुदितयोरपिदेवतात्वेदेवशब्दस्यप्रत्येकवृत्तित्वं। अग्निर्देवः। सोमोदेवइतिप्रसिद्धेः॥
मंत्रलिंगाच्चदेवोअग्निर्देवस्सोमइतिच। नचात्रावयवमतोअग्निः सोमोवानास्ति। किंतुपृथक्त्वेनदेवतात्वाभावः
पृथक्चेतद्धितानुत्पत्तेः॥ समुदायाच्चतद्धितप्रत्ययदर्शनात्। समुदितयोरपिदेवतात्वेअग्नेःसोमस्यचास्त्ये
वसमवायः॥ एवंचसतिअग्नीषोमाभ्यामितिद्विवचनस्योपपत्तिः। अग्नीषोमयोरुज्जितमितिच॥ यथाचोक्तं
अविशेषोवादेवतान्यत्वादिति। युक्तंत। दग्निसहितीयस्यपृथक्त्वोदेवतात्वाद्भवतिपृथक्त्वोन्यत्वं। समवायस्तुपृथक्त्वेपि
ननिवार्यते॥ अथदेवतैवदेवशब्दोनोच्यते॥ तथासतिप्रातिपदिकार्थस्याप्यन्यपरत्वात्पितृयज्ञेदेवशब्दस्याप्य
विपरिणामः। पितरोपिहिचोदितत्वाद्देवताशब्देनाभिधातुंशक्यंते। ततश्चदेवताविषयोदेवशब्दइत्यविपरिणामः।

एमः
२३

रुह्यानसोधिनिर्वपतीति। ॥ प्रेक्षतउरुवातायेतिहविष्यान्॥ ॥ व्रीहिन्यवान्वा। तच्चैतद्धविः प्रेक्षणंनानाबीजे
ष्वपांतत्संस्कारात्प्रतिबीजमावर्त्तते। मंत्रश्च। क्रियाशेषत्वात्। साकांक्षत्वाच्चोरुवातायेत्यस्य भवेत्यध्याहारः॥
ननुचास्यप्रेक्षतइतिप्रेक्षणस्यचोदितत्वाद्बोत। क्रियापदाध्याहारएवन्याय्यः॥ सत्यमेवं। यत्रतेनैकवाक्यतोपजा
यते। इहपुनरुरुवातायेतिविस्तीर्णतात्हविषः प्राणायवातायप्रार्थ्यते। नचासौप्रेक्षतइतिक्रियापदेनशक्यतेभिधातुं
।तस्माद्यथोक्तएवभवेत्यध्याहारः॥ ॥ अपहतमितिनिरस्यत्यन्यत्॥ हविर्द्रव्यव्यतिरेकेणयदन्यत्लोष्टादितद
पहतमित्यनेनमंत्रेणनिरस्यति। रक्षोभिधायकत्वाच्चमंत्रस्योदकस्योपस्पर्शनंभवति। प्रतपनमंत्रेचैवं। नाना
बीजेषुचशक्यत्वाद्ग्रणपरपद्रव्यनिरसनं। भवति॥ ॥ अविद्यमानेभिमृशेत्॥ अभिमर्शनेप्ययमेवमंत्रः॥अथा
पास्यत्यपहतंरक्षइतियद्यत्रकिंचिदापन्नंभवतियद्यनाप्येवमृशेदितिश्रुतत्वा।न्नानाबीजेषुचभेदेनाभिमर्श
नंसंस्कारश्चतत्रमंत्रावृत्तिः॥ ॥ यज्ञंतामित्यालभते॥हविर्द्रव्यंप्रकृतत्वात्॥ पंचभिरंगुलीभिरभिमर्शनंस्यात्।मं

क०
२४

रुत्वं। ननुचैवमपिदेवानामितिषष्ठीबहुवचनमनुपपन्नं। नहितदनः पृथग्भिनासोमेनचसंबध्यते। इतरेतरस
व्यपेक्षयोर्देवतात्वा। द्यथाचदेवतात्वंतथानदर्थहविर्द्धारणद्वारेणनोदेवानामित्युच्यते॥ सत्यमेतदेवं।
मंत्रेदेवशब्दस्यबहुवचनांतत्वात्तयोश्चसाक्षादनः संबंधाभावात्तदुपलक्षितसमुदायद्वारेणानः संबध्य
तइत्यदोषः। ततश्चविकारएकदेवत्यद्विदेवत्ययोर्देवस्यासिदेवयोरसीतियुक्तरूपतरंवचनं। कल्लिंगमपिचा
त्रसमवेतं। विशिष्टलिंगत्वाद्दृश्यादीनां। ततश्चादित्येष्ट्यांदेव्याअसीतिप्रयोगः। नदेवशब्दोदेवताशब्दवदवि
ष्टलिंगः। येनादित्येष्ट्यामप्यविकृतः प्रयुज्येतादेवींवाचमजनयंतदेवाइतिदर्शनात्॥ तथादेव्यनुमतेदेव्यदिते
स्तथा। देवीत्यइति। केचित्तुवचनलिंगयोरसमवायंगम्यमानात्रविपरिणाममिच्छंति। तत्पुनर्विचारणीयं।य एमः
ज्ञमविशब्दश्चानेकयजमानकेपिविपरिणम्यतोचोदितार्थाभिधानात्॥ ॥विष्णुत्वेत्यारोहणं॥विष्णुत्वेत्य २४
नेनमंत्रेणानसोदक्षिणंचक्रमारोहति। एवंश्रूयते। जघनेनगार्हपत्यंप्राङीषमनोवस्थितंभवतितस्यदक्षिणंचक्रमा

नापूर्वीतरति। तस्मादूह्यमेवमग्नीषोमीयमिति॥ ॥यथादेवतमन्यत्॥ ऐंद्राग्नार्थोयमारंभः। ननु चैवं सति न य
थादेवतमित्युपपद्यते। वीप्सायामव्ययमव्ययीभावसमासः। यायादेवता यथादेवतमिति। वीप्सा च बहुविषया। न चा
त्र देवताबहुत्वं। अतोनुपपन्नमेतदिति। अथ विकृत्यर्थमुच्यते। तत्रापि चोदकेनैव प्राप्तत्वादवाच्यं। प्रकृत्यर्थत्वे च
प्रागुक्तो दोष इत्युक्तं। उच्यते। प्रकृतावेव देवताबहुत्वमस्ति। तद्धैके चरुं निर्वपंति पौर्णमास्यां सरस्वते मावास्यायां सर
स्वत्या इति। ऐंद्राग्नेन सह देवताबहुत्वं। अथायमविधिः स्यात्तदाभ्युदितेष्टिविषयं भविष्यति॥ अभिहितं च प्रताश
क्तौ ग्रहणे देवताबहुत्वमिति। नन्वभ्युदितेष्टिरपि विकृतिरूपा ततश्च विकृत्यंतरवत् नेदं विषयतामियात्। सत्यमेवं।
तद्वदेवैष कर्मविकृतरूपमित्यदोषः॥ ॥भूतादत्वेतिशेषाभिमर्शनं॥ सांकाङ्क्षत्वात् मंत्रस्य परिशेषयामीत्यध्याहा
रः। न ह्यत्राभिमर्शनक्रियापरमेकवाक्यतामुपैति। किमिति। भूताय प्रभवायाविच्छेदाय नारातये त्रदानाय रूपण
तया परिशेषयामीत्येकवाक्यता। न ह्यस्याविच्छेदायाभिमर्शनं परिशेषणं वा अविच्छेदाय भवति। तस्माद्यथोक्त एव वा

का°
२५

त्वलिंगवाक्यशेषाभ्यां। यच्छुतां पंचेति। वध्नंतु पंचेत्यनेन तदुक्तं भवति। तथा। पंचवा इमा अंगुलयः पांक्तो वै यज्ञस्तद्य
ज्ञमेवैतदत्रदधातीति। न चो। पदेशाभावात्॥ मंत्राणां चाविधायकत्वात्। यच्छुतां पंचेति च ग्रहणापेक्षया। बहुषु च
भेदेनालंभः। संस्कारत्वात्॥ ॥देवस्य त्वेति गृह्णात्याग्नेयं चतुरो मुष्टीन्॥ ग्रहणमंत्रः स्यात्तदुपदेशात्। त्वा गृह्णाति देवस्य
त्वेति। प्रक्षेपवपेवा। गृह्णातेस्तदर्थत्वात्। तत्कुतो वचनात्। अग्निहोत्रहवण्यां चतुरो मुष्टीन्निर्वपतीति। मुष्टीन्यजमानो गृह्णी
यात् परिमाणस्य याजमानत्वात्॥ नवा। परार्थप्राधान्यात्तस्य वाध्वर्युकर्तृकत्वात्। तत्कुतः॥ समाख्यानात्। यजमानप
रिमाणमन्यविषयं। यथा पंचारत्निपरिवासयेदिति॥ ॥एवमग्नीषोमीयं ननु चोत्तरसूत्राद्देवतत्वात्प्राप्ते नैवाच्यं
मेतदिति। न हि तदैंद्राग्नविषयं। यथादेवतमन्यदित्येतद्विषयता वा स्यादस्त्विति चेत्। ततश्चावाच्यमेवमग्नीषोमी
यमिति। न। समाम्नायोपप्रदर्शनार्थत्वात्। यथादेवतमन्यदिति हि प्राप्ते समाम्नायो न प्रदर्शितः स्यात्। तत्र पूर्व
स्मिन्मंत्रेग्नीषोमाभ्यां जुष्टं गृह्णामीति शेषभावमियात्। द्विलिंगत्वादप्रवृत्तिरिति चेत्। न। तत्रारंभसामर्थ्यात्तदादि

राम:
२५

स्यंते। जपतिशब्दोपादानात्। विलिंगा अपि वचनसामर्थ्याद्धि नियुज्यंते। अनंतरमयमुतर्हि यजूंषि जपेदिति॥
दृंहंतामित्यन्तानि॥ अस्मिन्पक्षे॥ ॥कुशौ समावप्रच्छिन्नाग्रावनंतर्गर्भौ कुशौ छिनत्ति पवित्रे स्थ इति॥ अप्रच्छि
न्नाग्राऽवप्रवन्नाऽवनंतर्गर्भौ यो रंतर्मध्ये गर्भौ न स्तः॥ तौ कुशौ छिनत्ति पवित्रे स्थ इत्यनेन मंत्रेण॥ ॥त्रीन्वा छि
नत्तीत्यनुवर्त्तते॥ तत्र मंत्रो न स्यात्। द्विवचनांतत्वात्। पवित्रद्वयपक्षे च कृतार्थत्वात्॥ स्याद्वाऽभिधानसामर्थ्यात्।
प्रातिपदिकार्थस्य विद्यमानत्वात्। द्विवचनस्यासमवाय इति चेत्। न्माभूत्समवायः॥ गुणो हि संख्या। प्रातिपदिकार्थः प्रधान
भूतः। न च गुणानभिधानेन प्रधानाभिधाने सति शक्य उत्स्रष्टुं। तस्मात्त्रित्वपक्षेपि मंत्रः प्रवर्त्तत एव॥ ॥हविर्ग्रहणाम
पः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इति॥ हविर्ग्रहणीति न हविर्ग्रहणविवक्षया। किं तर्हि। अग्निहोत्रहवण्या चतुरो मु
ष्टीन्निर्वपतीत्याम्नानात्। अतस्तद्विवक्षेयं। प्रयोजनं। ग्रहणाभावेपि तत्रापा क्रियेरन्। ताभ्यामुत्पुनाति सवितुर्व इ
त्यनेन मंत्रेण॥ ताः स्थानं तयोः। ताश्चापः पवित्रयोः स्थानं। वचनसामर्थ्यात्। पवित्रे निधाय प्रणीतासु चाम्नानात्॥ ॥

कःशेषः। स चायं शेषसंबंधेपि सति हविष एव संस्कारः॥ प्रयोजनवत्त्वात्। न च शेषेण संस्कृतेनास्ति प्रयोजनं।
क॰ अतः स्रङ्मालापनयनवत्शेषिसंस्कारः प्रतिपत्तव्यः। तद्यथा। स्रङ्मालादेवदत्तीयेति कृत्वा शुचौ देशे व्यवस्था
२६ प्यते। अपगते देवदत्तसंबंधाया अपि मालायाः संस्कारो देवदत्तस्यैवानिष्टपरिहारार्थो न मालायाः। एवमिहापी
ति। प्रयोजनं। शेषिसंस्काराभिसंबंधार्थं तथा सशेषग्रहणं कर्त्तव्यमिति॥ ॥स्वरिति प्राङीक्षते॥ तद्धैतदक्षसंनि
रोधोपजातश्च मा भूदित्यपेक्षणं। परिवृतमिव वा एतदनो भवति तदस्यैतच्चक्षुः पाप्मगृहीतमिव भवति यज्ञो वै स्व
रहर्देव — सूर्यस्तत्स्वरेवैतदतोभिविपश्यतीति लिंगात्॥ प्रयोजनं। निर्वापाभावेन भवति॥ ॥दृंहंतामित्यवरोहति॥
अनसः॥ ॥गच्छतूर्वंतरिक्षमिति श्रपणस्य पश्चात्सादयति पृथिव्यास्त्वेति॥ योपरः श्रपणः। अग्निशब्दश्चात्र श्रपणाग्नि
विषयो न देवतावचनः॥ संनिधानात्। प्रयोजनं। विकृतावविपरिणामः॥ ॥पात्र्यां वा स्फ्योपहितायां॥ एतदनः संबंधिम रम:
तिपत्तव्यं। उतो याज्यै गृह्णंतीति हि समामनंति॥ ॥ नदाधूर्षारोहणानि पात्रीबिले जपति॥ धूर्षारोहणादिशब्दैस्तन्मंत्रा २६

लाऽस्यंते। जपतिशब्दोपादानात्। विलिंगा अपि वचनसामर्थ्याद्धि नियुज्यंते। अनंतरण्यमुत्तर्हि यजुऽं पिजपेदिति॥
चऽहंतामित्युक्तानं॥ अस्मिन्पक्षे॥ ॥कुशौ समावप्रशीर्त्वाग्रावनंतर्गर्भौ कुशौ छिनत्ति पवित्रे स्थ इति॥ अप्रशी
र्णाग्राऽवप्रवृक्णाऽवनंतर्गर्भौ ययोरंतर्मध्ये गर्भौ न स्तः॥ तौ कुशौ छिनत्ति पवित्रे स्थ इत्यनेन मंत्रेण॥ ॥वैवाच्छि
नत्तीत्यनुवर्त्तते॥ तत्र मंत्रो न स्यात्। द्विवचनांतत्वात्। पवित्रद्वयपक्षे च कृतार्थत्वात्॥ स्याद्वाऽभिधानसामर्थ्यात्।
प्रातिपदिकार्थस्य विद्यमानत्वात्। द्वचनस्यासमवाय इति चे। न्याभक्त्समवायः॥ गुणो हि संख्या। प्रातिपदिकार्थः प्रधान
भूतः। न च गुणानभिधानेन प्रधानाभिधाने सति शक्य उत्स्रष्टुं। तस्मान्नित्यपक्षेपि मंत्रः प्रवर्त्तत एव॥ ॥हविर्ग्रहणाम
पः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इति॥ हविर्ग्रहणात्तिन हविर्ग्रहणविवक्षया। किं तर्हि। अग्निहोत्रहवण्या चतुरो मु
ष्टीन्निर्वपतीत्याम्नानात्। अतस्तद्विवक्षेयं। प्रयोजनं। ग्रहणाभावेपि तत्राप्याक्रियेरन्। ताभ्यामुत्पुनाति सवितुर्व इ
त्यनेन मंत्रेणातास्त्यानंतयोः। ता आपः पवित्रयोः स्थानं। वचनसामर्थ्यात्। पवित्रे निधाय प्रणीतासु चाम्नानात्॥ ॥

कश्शेषः। स चायं शेषसंबंधेपि सति हविष एव संस्कारः॥ प्रयोजनवत्त्वात्। न च शेषेण संस्कृतेनास्ति प्रयोजनं।
का० अतः स्रङ्मालापनयनवच्छेषिसंस्कारः प्रतिपत्तव्यः। तद्यथा। स्रङ्मालादेवदत्तीयेति कृत्वा सुचौदेशे व्यवस्था
२६ प्यते। अपगतदेवदत्तसंबंधाया अपि मालायाः संस्कारो देवदत्तस्यैवानिष्टपरिहारार्थो न मालायाः। एवमिहापी
ति। प्रयोजनं। शेषिसंस्कारणमिसंबंधार्थतया सशेषग्रहणं कर्त्तव्यमिति॥ ॥स्वरिति प्राङ्वीक्षते॥ तद्धैतदकृ संनि
रोधोपजातस्य मापनोदापेक्षणं। परिवृतमिव वा एतदनो भवति तदस्यैतच्चक्षुः पाप्मगृहीतमिव भवति यज्ञो वै स्व
रहंते — सूर्यस्तत्स्वरेवैनदतोभिविपश्यतीति लिंगात्॥ प्रयोजनं। निर्वापाभावेन भवति॥ ॥दृऽहंतामित्यवरोहति॥
अनसः॥ ॥गच्छन्नुर्वंतरिक्षमिति अपणस्य पश्चात्सादयति पृथिव्यास्त्वेति॥ योपदाश्रपणः। अग्निहृस्यात्र श्रपणाग्नि
विषयो न देवतावचनः॥ संनिधानात्प्रयोजनं। विकृताववि परिणामः॥ ॥पात्रीं वा स्फ्योपहितायां॥ एतदनः संबंधि प्र रम:
तिपत्तव्यं। उतो यात्रै गृह्णंतीति हि समामनंति॥ ॥नदाधूरणारोहणानि पात्री विलेजपति॥ धूरणारोहणादिशब्दैस्तन्मंत्रा २६

मितिबहुवचनसामर्थ्यात्कूटीकृत्यप्रोक्षणमित्येके। तत्र। प्रोक्षणस्यपात्रोद्देशेनविधाना। त्समुदायस्यचावोदितत्वा।
त्प्रतिसंस्कार्यंवसंस्कारावृत्तिर्न्याय्या॥ तस्मात्प्रतिपात्रमेव। बहुवचनंवप्रदर्शनार्थं। एनाउन्याउवसः केतुमक्नेतिचादि
वृशब्दस्यस्थानेपितृयज्ञप्रधानार्थेषुचशूर्पकपालकृष्णाजिनोलूखलमुशलादिषुपितृशब्दप्रयोगः। यानित्वंग
प्रधानकर्मार्थानिप्रणीतादिकयापितेषुदेवपितृशब्दप्रयोगः। यत्तुतत्रापिदैवकर्मार्थेनत्रेदेव्यायेत्येव। पात्रप्रोक्षणे
चविनियोगक्रमः। क्रमांतराभावात्॥ ॥ असंचरेप्रोक्षणीर्निधायशर्मासीतिकृष्णाजिनादानं॥ सचाऽसंचरः प्रणीता
हवनीयांतराले। तानांतरेणासंचरेयुरित्युक्तत्वात्। यद्यपिचआहवनीयगार्हपत्यमहविष्यात्रस्तात्मृत्विजामंतराग
मनप्रतिषेधेसत्यसंचरव्युपदेशोभवति। तथापिप्रकरणसमधीतएवपरिगृह्यते। तानांतरेणसंचरेयुरिति। उ
तरस्यचसर्वविषयत्वात्॥ प्रोक्षणीशब्दश्चयौगिको। नजातिनिमित्तः संस्कारनिमित्तोवाप्रोक्षणीभिरुद्दीजिताः स्म
रत्यसंस्कृतेपिशब्दप्रयोगात्॥ प्रकृत्युपसर्गप्रत्ययसमुदायस्यचार्थस्यावगम्यमानत्वात्॥ उक्षतिः। सेवने। प्रशब्दप्रक

कृ० २८

मध्येकृत्वादक्षिणेनोदिंगयतिदेवीरापइति॥ उदिंगयतिरूर्ध्वंगमयति। दक्षिणग्रहणंशक्यमकर्त्तुं। समावाप्त्याज्ञेः।
कर्त्तव्यंवा। मध्येस्थितानामेवप्रोक्षणीनामुदिंगनंयथास्यादिति। यज्ञपतिशब्दश्चात्रानेकयजमानकेयथा
र्थेविपरिणम्यते॥ ॥ प्रोक्षितास्थेतितासांप्रोक्षणं॥ ताभ्यएवाद्भ्यएकदेशेनेतिसंप्रदायः। नेत्यपरेस्वात्म
निक्रियाविरोधात्॥ नहिप्रोक्षणेकर्मताकरणताचतासांसंभवतीति॥ अभ्यास्वनोपदिश्यंते। तस्मान्मंत्रोच्चार
णमात्रमेवातदेताभ्योनिद्भुतइतिचलिंगात्॥ अत्रपुनस्तासांप्रोक्षणमित्यसमंजसंस्यात्। हविश्चेतिप्रोक्षणेक्रि
याऽनुकर्षणार्थश्चशब्दानुपपत्तिश्च। तस्मात्संप्रदायएवज्यायान्॥ अथताभिरेवप्रोक्षणंविरुध्येत। ततश्चाणी
तेनप्रविष्यति। तिङ्कवश्चार्थवादप्रायः॥ ॥ हविश्चाग्नयेत्वाग्नीषोमाभ्यांत्वेति॥ अत्रक्रियापदाभावाद्यथस्तन
मंत्रोपात्तंप्रोक्षणक्रियापदंचशब्देनानुकृष्यते॥ तत्रयथाश्रुतमेकवाक्यतामनुपपद्यत। अनुपगच्छत्। प्रोक्षतीति। एमः २८
विपरिणतरूपमनुकृष्यते॥ ॥ यथादेवतमव्यत्॥ कृतंयात्म्यानं॥ ॥ पात्राणिदैव्यायेति॥ प्रोक्षतीत्यनुवर्त्तते। शुंधध्व

त्वेत्युभयोः शेषः। अत्राद्रिग्रावशब्दावुलूखलं स्तोतुं प्रयुज्येते॥ नहीदमश्ममयमुलूखलं॥ वानस्पत्य इति विरो
धात्॥ पृथुबुध्न इति च मंत्रवर्णात्सामर्थ्याच्च। अभिनिहितमेव सव्येन पाणिना भवति। अथ दक्षिणेनोलूखल
माहरतीति। न ह्यश्ममयमुलूखलं दक्षिणेनोकेनाहर्तुं शक्यते॥ तस्मादुपचारवृत्त्याऽद्रिग्रावशब्दौ॥ येनुमंत्रा
भिधानसामर्थ्यमात्रेणैवाश्ममयतां नियमयंति त एवमप्रवृत्त्याः। किंच॥ मुशलेपि ग्रावशब्दप्रयोगात् दृहस्वावासी
त्यसंशयं च तद्वानस्पत्यमत्र केचिन्नखनिभित्र चरौ वानस्पत्यपदस्य स्थाने मानुष इति विपरिणाममिच्छंति। तत्तु
न नीतियुक्तमिव। न ह्युलूखलस्यापि यत्रावपि न खानां कृष्णाजिने स्थापनमस्ति। यतो न ते उलूखलवत् कृष्णाजि
नेऽवस्थितास्तंडुलनिष्पत्तिं कुर्वंति॥ ॥ हविराववपत्यग्नेस्तनूरिति॥ अग्नेस्तनूरित्यनेन मंत्रेणोलूखले हविर्द्रव्यमा
वपति॥ अग्निशब्दश्च न देवताऽभिवचनो लिंगात्। यतो हितेनाग्नेस्तनूरिति॥ यज्ञसाधने यज्ञशब्दस्तस्य चाग्निसंबंधा
दग्नेस्तनूरित्युच्यते। तस्मात्तत्र न विषयोऽग्निशब्दोऽग्नीषोमयोश्चाऽनभिधानात्प्रयोजनाभावादवभृथेऽपांतनूरसीति

र्थेऽकरणे च प्रत्ययः। प्रोक्ष्यंते आभिरिति प्रोक्षण्यः। श्रितायाः प्रयोजनमाज्य प्रोक्षणी रूपम्येन्पत्रासंस्कृताउपादी
का०
यते। शर्मासीत्यनेन मंत्रेण कृष्णाजिनस्यादानं। कृष्णाजिनमिति षष्ठीतत्पुरुषः। कृष्णस्य अजिनं कृष्णाजिनं।
२८
न कर्मधारयः कृष्णं च तदजिनं चेति। कुत एतत् लिंगात्॥ स कृष्णो भूत्वा चचार तस्य देवा। अनुविद्य त्वचमेवावच्छाया
जह्रुरिति। कृष्ण इति मृगोऽभिधीयते॥ प्रयोजनं मार्गयथा स्यादिति। तदेन दानमवधानार्थं तदभावे चाऽभावः॥ ॥
अपेत्यपात्रेभ्योवधूनोत्यवधूतमिति॥ यद्यपि चापगमनक्रियाध्वर्युविषया तथापि सामर्थ्यात्कृष्णाजिनापन
यनं प्रत्येतव्यं। तस्य त्वपनयनमत्र श्रूयते॥ अतिनन्येव पात्राण्येव धूनोति यदस्यामेध्यमभूत्तदस्यैतदवधूनो
तीति। तेनैतदवधूननमदृष्टार्थत्वान्नकृत्क्रियते। रक्षोऽभिधायकत्वाच्च मंत्रस्योरकालंभो भवति॥ ॥प्रत्यग्रीवमास्तृ
णात्सदित्यास्तृणातीति॥ चर्मणोंऽभाक्ग्रीवतोक्ताः। तदपचारः प्रत्यग्रीवमिति॥ ॥ तस्या मध्ये निदधात्युलूखलमद्रिरसि एमः
यावासीति वा। सव्येन पाणिना अभ्यन्य कृष्णाजिने उलूखलं स्थापयति॥ अद्रिरसीत्यनेन मंत्रेण ग्रावासीति वा॥ ॥प्रति २८

६८

न हि शूर्प्पादानादेर्व्याभाषणं धर्म्मनियमः॥ इतरत्त्वनुयनवाक्कानियमइति॥ ॥ वृहद्ग्रावेतिमुसलमादत्ते स
इदमित्यवदधाति॥ हविष्कृन्मुसलमितिवाक्यशेषः॥ सचायंमंत्रः सइदंइतिचोदितार्थाभिधायकत्वाश
पितृयज्ञे विपरिणम्यते। वचनलिंगयोरुक्तं व्याख्यानं॥ ॥ हविष्कृदेहीतित्रिराह्वयति॥ हविष्कृदेहीत्य
नेनमंत्रेण त्रिः संशब्दयति। हविःसंस्कर्त्रीं पत्नीमग्नीध्रं वा॥ ॥ अतः पत्न्यवहंत्यन्यो वा। अनत इत्यवाच्यं। वाद
क्रमादेव तत्सिद्धेः॥ वाच्यं वा। यदृच्छावघातस्याह्वानप्रज्ञापनार्थत्वात्॥ तत्कुतो। वचनसामर्थ्यात्॥ हविःकृदे
हीति त्रिरवघ्नन्त्याह्वयतीति॥ अन्यशब्देन च नर्त्विग्व्यतिरिक्तोऽप्युच्यते। अन्यस्याप्रकृतत्वात्॥ ऋत्विजां च प
रिक्रीतत्वात्॥ सूत्रकारप्रस्थानाच्च। ऋत्विजां वै। कामप्रकृतत्वादिति। तेनाध्वर्युव्यतिरिक्तोऽन्यः परिगृह्यते। स चाग्नी
त्सन्निकर्षात्। समारम्भोऽनुग्रहाच्च। ब्रह्मापीति चेत्। न। तस्य वेदत्रयविहितकर्म्मसंबंधात्समारम्भानुग्रहाभावात्
भवति चाग्नीध्रोऽध्वर्युसमारम्भानं॥ आश्विनमध्वर्यवो भक्षयंतीति प्रकृत्याम्नायते। तथ आश्विनं भक्षयंत्यध्वर्युः प्रति

क॰ २९

विपरिणामात्तत्रापि सवनीयैः सहानुष्ठानादसति प्रयोजने। दार्षद्वतावभृथविषयतो ह्य। पितृयज्ञे च देववीत
य इत्यस्य स्थाने पितृवीतय इति प्रयोगश्चोदितार्थाभिधानात्॥ ॥ वाचं विसृजते॥ एवं हि श्रूयते। यां वा अमूं ह
विर्ग्रहीष्यन्वाचं यच्छत्यत्रैवैनां विसृजत इति॥ ॥ यजमानश्च। वाचं विसृजत इत्यनुवर्त्तते॥ ॥ हविष्कृता वा॥
हविष्कृदाह्वानकाले वा वाग्विसर्गः। तत्रापि हि श्रूयते॥ वाग्वै हविःकृद्वाचमेवैतद्विसृजत इति। नन्वर्थवादस्वरू
पत्वात्तन्नायं विसर्गकालः। सत्यमेवं। पूर्वत्रापि त्वर्थवादस्वरूपतैव। किन्तु यत्राश्रितं विधित्वमाचार्येण वा
क्यांतराद्वाकुतश्चित्॥ ॥ नानाबीजेष्वंत्ये सामर्थ्यात्॥ अथ नानाबीजेष्टौ किमंत्ये वाग्विसर्जनमुताद्य इ
ति। यस्मादेव सह हविःषु। तत्र हविरावपनस्य यतवाक्त्वं धर्म्मः। शूर्प्पादानादेर्व्याभाषणमेकैकं च हविस्तक्ष
विमोकांतं कर्त्तव्यं। पदार्थस्यैतावत्त्वात्। तत्र यद्याद्ये वाग्विसर्जनं शूर्प्पादानादेर्व्याभाषणधर्म्मानुग्रहः। अ
थांत्ये हविरावपनस्य यतवाक्त्वधर्मानुग्रहात्तत्र नियमान्नियमायोर्न्नियमसामर्थ्यादंत्य एव वाग्विसर्गः। राम: २९

त्राविति मंत्राभ्यामार्थीयमारंभः। हंत्यभिसंबंधे पुनस्त्रिशब्दस्यानुवादकर्त्तव्या। स चायमदृष्टोपकारकः पदार्थ
इति वक्ष्यत्युपरिष्टात्। तथा वसति यावदुक्ते निर्वर्त्तते॥ ॥वर्षवृद्धमसीति शूर्पमादत्ते॥ अवहंताऽभिप्रवृत्तत्वात्
॥प्रतित्वेति हविरुद्वपति॥ सत्वा॥ ॥परापूतमिति निःपुनाति॥ ॥अपहतमिति तुषान्निरस्यति। अध्वर्युरन
ववातशेषत्वात्॥ न चैषां प्रसिद्धिर्यदवहंतात्तुषान्निरस्यतीति॥ प्रतिपत्तिश्चैषां तदभावेऽभावः॥ ॥वायुर्वेद्
ति विविनक्ति॥ पृथक् करोति तंदुलान् कणांश्च। वितुषीकरणाय। तच्चैतद्विवेकीकरणं तुषनिरसनात्पूर्वं प्रतिप
त्तव्यं। सामर्थ्यात्। दृशेषनिरसनं ह्येवं सति भवति। उक्तं च। विरोधे त्वर्थस्तत्परत्वादिति। तत्र क्रमश्च यथाश्रुतीत्यदो
षः। स चायमवघातः कृष्णाजिनादानादिस्तुषमोक्षांतः। तत्र नानाबीजेष्ट्यां हविरावपनमुसलयोजनहविरुद्व
पननिष्पवनविवेकीकरणानि भेदेन मंत्रवंति॥ हविष्मत्वात् मंत्रस्याशेषं तंत्रेण॥ ॥देवो व इति पात्राण्यभ्याभि
मंत्रयते। हविष्मान्नानाबीजेष्ट्यां च संनिपातात्तंत्रेणाऽभिमंत्रणं॥ ॥त्रिः फलीकरोति देवेभ्यः शुंधध्वं देवेभ्यः शुंधध्व

मस्यानाग्नीध्र इति। तस्मादन्यशब्देनाग्नीध्रः समभिधीयते॥ ॥आह्मयत्याहंत्यन्यो दृषदुपले कुक्कुटोऽसीति त्रिः शम्य
क॰ ३० या द्विर्दृषदं सकृदुपलां। हविष्कृदाह्वानं कुर्वत्यध्वर्योऽन्यो दृषदुपले आहंति शम्यया करणभूतया द्विर्दृषदं
सकृदुपलां कुक्कुटोऽसीत्यनेन मंत्रेण। अन्य इति कुतः। वचनात्। सर्वत्रैव हविष्कृतमुद्वादयति तदेको दृषदुपले
समाहंतीत्येव इति सर्वनामशब्देनाध्वर्योः परामर्शाद्देकोदृषदुपले समाहंतीत्येकशब्दोऽग्नीध्रविषयः। ततश्च
वचनादग्नीध्रस्याहनने कर्तृत्वं। न च विरोधाद्दुपधा भवत्॥ तत्र त्वनागृहीतकर्तृविशेषं वचनं। सार्वैकपालान्येवा
न्यतर उपदधाति दृषदुपले अन्यतर इति। इह पुनर्गृहीतः कर्तृविशेषः॥ अथ हविष्कृतमुद्वादयतीति समाख्यया
ध्वर्युः। समत्रैव हविष्कृतमुद्वादयति तदेको दृषदुपले समाहंतीति। तस्मान्न विरोधादग्नीदिति। प्रयोजनमस्या
इतेऽप्यध्वर्यावग्नीदेवाहनन इति। ननु च द्विर्दृषदं सकृदुपलामित्युक्तत्वात्त्रिरित्यवाच्यं। स्यादेतदेवं। यदि त्रिःश रामः ३०
ब्दोऽहंतिना संबध्यते। अयं तु मंत्रेणाभिसंबध्यते त्रिः कुक्कुटोऽसीति। द्विर्दृषदि सकृन्मंत्रप्रयोगे प्राप्ते एकद्रव्ये कर्माभ्या

ग्रेऽग्निमामादं जहि निःक्रव्यादं सेधेति। अपजह्यामिमामादं निषेध क्रव्यादमिति। वाक्यशेषाच्च। एता
वेवैतदुभावतोपहंतीति। तदेतदनुपपन्नं। मविधानात्। विध्यंतरशेषत्वाद्वात्तित्यत्र विध्यंतरं। तेन प्राचों
गारानुदूहति। मंत्राणां चाविधाय कृत्वा मुक्तं। मत उदूहनमात्रमेव। पित्र्यपि चाक्रत्सर्गो दोषो दृश्यते। वीर
हा वा एष भवति योऽग्निमुत्सृजतीति॥ ॥ आ देवयजमित्यंगारमाहृत्य कपालेनावच्छादयति ध्रुवमसीति॥ यद्य
पि चात्रांगारे द्वितीयाकपाले चन्द्रनीया। तथाप्यंगारस्य निःप्रयोजनत्वात्कपालार्थतैवांगारस्य। तस्य च प्रयोजन
त्वात्। कपालधर्मोपि वसन्। तं मध्यमेन कपालेनाभ्युपदधातीति मध्यमसंयोगात्तद्धर्म एवायं। न कपालमात्रधर्मः
न च भर्जने प्रवर्तते॥ अंगारे बुद्धिं तस्याधिश्रयणं। अपित्र्ययजं वहेति च पित्र्ये विपरिणामः। ननु चायम
समवेतवचनो नत्यत्र देवा इत्यंत इति तेन देवयाड्त्वं यथा कथंचिद्राजाच्यते। देवेज्यार्थे हविः श्रपणद्वारेण
देवयाड्त्वमस्यापि भवति॥ यथा च देवयाड्त्वं तथा मंत्रोऽनुवदति। तस्मात्समवेतवचनः॥ ॥ अमुष्मेति द्विष्व

क०
३३

मित्यके॥ फलीकरणं कणविप्रमोकः तच्च कर्तव्यं देवेभ्यः शुंधध्वमित्यनेन मंत्रेण। वीप्सा च प्रतिफलीकरणं मं
त्रावृत्तिपरा। नहि प्रतिप्रयोगं मंत्रावृत्तिर्युज्यते। पित्र्ये च पितृभ्यः शुंधध्वमिति विपरिणामः॥ ॥ फलीकृत्य क
णान्निदधाति। फलीकृत्येत्यवाच्यं। पाठक्रमादेव चनत्सिद्धेः स्यात्॥ प्रतिफलीकरणं कणनिधानं यथा स्यादिति॥ ॥ पे
षणोपधाने युगपत्॥ सर्वकपालान्येवान्यतर उपदधाति दृषदुपले अन्यतर इति हि प्रकृत्य समामनंति। तद्युपतदुभ
यं सह क्रियत इति। तत्रोपधानमंतरंगत्वादध्वर्युः करोति॥ बहिरंगत्वाच्चोपधानमग्नीत्॥ तत्र श्रुतिपाठानुसारेण
पूर्वमुपधानमुच्यते॥ ॥ धृष्टिरसीत्युपवेषमादायापाग्नेऽग्निमामादं जहीत्यंगारान् प्राचाकरोति॥ उपवेषोंगारापोहनसमर्थकाष्ठं।
तद्धृष्टिरसीत्यादायापाग्न इत्यनेन मंत्रेण प्राचोंगारानुदूहति॥ तच्चैतदंगारापोहनं देशरे च नार्थी रिक्ते हि देशे
कपालानि यथोपधीयेरन्निति। एवं च सति। चर्विष्वामपोहनाभावः। धानाभर्जनस्य च देशरे च न कृतोपकाराभावा
त्॥ अंगारे बुद्ध्यधिश्रयणमुभयोरपि प्रसिद्धं। केचिच्च नेन मंत्रेणांगारनिरसनमेव कुर्वंति। मंत्रलिंगात्। अपा

तमः
३१

तिरदक्षिणक्रमयोगेन। स्मार्त्तं चैतत्प्रदक्षिणं। नश्रौतं। ततश्चैतदपचारे स्मार्त्तमेव प्रायश्चित्तं भवति॥ समं विभ-
ज्येत्यवाच्यं। दृढप्रदक्षिणात एवमुत्तरत इति स्वशब्दाभिधानात्॥ स्यादेन्द्रीसौमीयाम्यत्वात्॥ तत्र हि समविभागानुक्ता-
वधिकं प्रदक्षिणात इति विभागाधिकं स्यात्तत्र को दोषः तत्स्याधिक्यमप्याशंक्यते॥ अथ पुनः समविभाग उक्ते यदधि-
कं विभागस्य तस्य प्रदक्षिणात उपधानं सिद्धं भवति॥ ॥तस्मीना। नचितस्येति॥ एवमेकादशाग्नीषोमीयस्य॥ ॥क-
पालान्यपदधातीति शेषः॥ ॥अधिकं दक्षिणातः। विभागाधिकं यत्तद्दक्षिणात उपधेयं त्रामेणैव। न सर्वोपधानानं-
तरं। स्मृत्यनुग्रहात्॥ ॥भृगूणामित्यंगारैरभ्यूहति॥ ॥कपालानीति वाक्यशेषः। सचायं मंत्र एव। कपाले विपरिणम-
य्यते। तपसा तप्यस्वेति। वचनसमवायात्। द्विकपाले च तप्येथामिति। अभ्यूहनं च कपालतापनार्थं। तत्रेषु कपाले-
षु यथा पुरोडाशः पच्यत इति। एवं च सति कपालविध्वंसं ग्राहिणो विधाना भर्जनस्य नांगारैरभ्यूहनं भवति। प्रसिद्धभा-
वा रथस्याद्वितस्य संतापनं प्रसिद्धमिति॥ ॥उपसर्जनीरधिश्रयति॥ उपसर्जनीशब्देन संयवनार्था आप उच्यंते। तद-

---

कृ०
३२

देभिचरन्॥ अमुष्य त्वा वधायेत्यभिचरन्नामादिशति द्विषच्छब्दमपनीय। सचायं द्विषच्छब्देन स्वरूपतो गृह्यते॥
किं तर्हि। द्विषच्छब्दाच्छब्दान्तरमपि॥ एवं च सति भ्रातृव्यशब्देनादेशः सिद्धो भवति। किमिह यद्द्विषच्छब्देऽभिचरतो
नामादेशः। नेत्युच्यते॥ ॥अन्यत्रापि॥ अतोऽन्यत्राप्यभिचरतो द्विषच्छब्देनादेशः कर्त्तव्यः। यथा द्विषतो वधो-
सि। भ्रातृव्यस्य वधायेत्येवमादि॥ ॥सव्यांगुल्याश्रन्येंगारं निरधान्यमेव ब्रह्मेति॥ अभिनिहितमेव सव्यस्य पाणेरं-
गुल्या भवतीति श्रुतत्वात्॥ सचायं कपालसंस्कारत्वात्प्रतिकपालमावर्त्तते॥ गुणविभागेऽनिर्दिष्टमपि चात्र प्र-
योजनत्वात्कपालमेव संस्कार्यं। मगारेणावोवास्यंतो। माकारेकुसुमानीतिवत्। भर्ज्जनेपि चोपरिष्टादंगार। प्रव-
र्त्तत एव। अदृष्टार्थत्वात्। व्रीह्यैः स्वकपालकार्योपत्तेर्न्ने तद्धर्मप्रवृत्तिः॥ ॥धरुणमिति पश्चात्॥ कपालमुपदधातीति
वाक्यशेषः॥ ॥पुरस्ताद्धर्त्रमिति॥ ॥विश्वाभ्य इति दक्षिणतः॥ प्रथमं कपालमंगीकृत्येतरत्र दिग्नियम उच्यते॥ ॥
समं वि-ज्य दृढप्रदक्षिणात एवमुत्तरतश्चितस्येति॥ समं विभज्य चितस्येत्यनेन मंत्रेण। दृढदक्षिणत एवमुत्तरत उपदधा-

रामः
३२

पनकालएवतासामधिश्रयणं॥ ॥कृष्णाजिनमादत्ते पूर्ववत्प्रतिकृष्णाजिनं। कृष्णाजिनस्य पूर्वं यद्धर्मजातमुपदिष्टं आदानादिसव्यान्यकरणांतं तदिहातिदिश्यते॥ तुल्यश्रुतित्वात्॥ तच्चैतत्पेषणार्थत्वात्पेषणेनसात्॥ ॥तस्मिन्दृषदं धिषणासीति॥ तस्मिन्कृष्णाजिने दृषदमुपदधाति धिषणासीत्यनेन मंत्रेण॥ ॥पश्चाच्छम्यामुपोहत्युदीचीं दिव इति॥ उपरिष्टाद्वाकाशेषात्॥ हनूपवदृषदुपले जिह्वेव शम्येति। जिह्वासंस्कृतिरंतरालवृत्तिसामान्येन। नवा। विरोधात्। विरुध्यते ह्युपरिशम्यया परिहितया पेषणं। किंचान्यदधस्तादुपहिताद्दृषदः प्राक्प्रवणतामुपजनयति निश्चलीकरोति॥ अतो दृषदर्थत्वादधस्तादुपधानं। लिंगाच्च॥ सजयेजघनेन शम्यां पिष्यमाणानामवसीयंते पिष्टानि वा तंडुला वेति। अधस्तादुपहिताया एतद्भवति। नोपरि। जिह्वासंस्कृतिरुपधानक्रमापेक्षया॥ ॥दृषद्युपलां धिषणासीति॥ पेषणार्थत्वादुपलायादृषद्येवोपधानं प्राप्नोति तेन शम्यायान दृषद्युपधानमिति अभिहितन्यायसूचनार्थे दृषद्ग्रहणं॥ ॥धान्यमसीति तंडुलानोप्य पिनष्टि प्राणाय त्वेति प्रतिमंत्रं॥ ॥धान्यशब्दः।

का०
३३

धिश्रयणं चनमाभिः पिष्टानां मार्दवं यथा स्यादिति॥ एवं च सति पुरोडाशपाकार्थो एवैतत्। ततश्च यत्र श्रपणं तत्रोपसर्जन्यधिश्रयणमपि कार्यं। पित्र्ययज्ञे च दक्षिणाग्नौ श्रयणविधानान्मंथस्यौपसर्जन्यधिश्रयणमपि तत्रैवेति संप्रदायः॥ तत्र पुनरधिश्रयणकृत उपकारो मंथे ऽन्वेषितव्यो न ह्युपसर्जनीगतेनोष्मणा सक्तूनां पाक उपजन्यते। यथा पिष्टानामिव पुरोडाशे। तस्मादनधिश्रयणमेव न्याय्यतरमिवाभाति। करंभपात्रेषु चैवं॥ ननु चोपधानसमनंतरं युगपदुपक्रमाभिधानात्पेषणमभिधेयमितरथा हि प्रकृतपरित्यागोऽप्रकृतोपादानं चायुक्तं स्यात्॥ तेनोपसर्जन्यधिश्रयणविधानस्यायमनवसर इत्युच्यते। उपधानवत्पेषणेन सह यौगपद्यं यथा स्यादित्येवमर्थमिहाभिधानं। तथा च विरोधादग्नौ धएव कर्त्व्यमत्रापि। यत्र तु विरोधो नास्ति यथा चार्द्धेष्ट्यां तत्राध्वर्योरेवोपसर्जन्यधिश्रयणे कर्तृत्वं॥ यद्येतत्प्रधानसमनंतरमुपसर्जन्यधिश्रयणाभिधानस्य प्रयोजनांतरं व्यावसीयंति। यत्रोपधानंतरधिश्रयणमपि तत्रैवाधिकाराद्यथा स्यादिति॥ एवं चोपसर्जन्यान

एनः
३३

८६

तिचाध्याहारः साकांक्षत्वात्॥ ईक्षणं चेद्द्रव्यसंस्कारत्वान्नं दुत्लानामपि च हविष्यांप्रवर्त्तेते॥ ॥पिष्यमाणेषु निर्वपत्यन्यो
मह्। नामिस्माज्यं। पिष्यंति पिष्टान्यंसीधते कपालान्यथैकश्चाज्यं निर्वपतीति तुल्यकालश्रवणात्। अत्रान्यशब्दे
नकैश्चिद्यजमानोऽभिधातुमिष्यते। अध्वर्युग्रीवो हि येषे रणोपधानयोर्व्योष्टनाविति। तथा च सूत्रकारप्रस्थानां मिन्
प्याज्यं वेदोसीति यजमानो वेदं करोतीति। नदेतदयुक्तमिवाभाति। यत्कारणं। यत्किंचिदिह कर्त्तव्यं तत्तत्सर्वमृत्वि
ग्भिः परिक्रीतत्वात्तैर्विज्ञा। मतोन्यशब्देन तस्याभिधीयते। अन्य इत्यध्वर्युसन्निकर्षादृत्विगेव ग्रहीतुं न्याय्यो न
यजमानः॥ सूत्रकारप्रस्थानाद्वचनविरोधाभ्यामन्य इति। यत्तु न हन्नं निरूप्याज्यं वेदं करोतीति तत्रापि न समान
कर्तृकार्थः क्त्वाप्रत्ययादेशः। न ह्यत्रान्यनिर्वापविधानमन्यत्र विहितत्वात्। तेनाः निर्वापकालेऽस्य वेदबंधनस्य कालं
लक्षयितुं क्त्वाप्रत्ययविकारोऽयं प्रयुक्तः। यथान्यत्र निरूप्याज्यं प्रातर्दोहनमन्यस्मिन्निति। तस्माद्वत्सैवाज्यं निर्व
पेत्। निर्वापश्च पात्रांतरे प्रक्षेपणं॥ ॥ पात्र्यां सपवित्रायां पिष्टान्यावपति देवस्य त्वेति॥ पात्र्यामावापनं संयवनार्थं। तत्र

मन्त्रलेषु व्रीह्यादिषु रूढः। यद्यपि च धिनोतेर्धान्यमित्यवयवार्थोऽवगम्यते॥ तथापि प्रत्ययस्य विशिष्टार्थ
क० विषयत्वात्। गोशब्दवत्त्रूढिशब्दत्वं। एवं च सति लक्षणया तद्विकारप्रकाशनं शब्दस्य। यवगुरुकुलिकाऽपि
३४ तद्विकार एवेति मंत्रः प्रयुज्यत एव। शाक्यानामयने वतरसमयाः पुरोडाशा भवंतीत्यत्र तरसमसीति मंत्रो
विधिक्रियते। धान्यशब्दस्य जातिनिमित्तत्वात्॥ ननु च प्रकृतौ प्रकृतिद्रव्यशब्देन धान्यविकारद्रव्याभिधा
नादत्रापि तरसप्रकृतिद्रव्यशब्देन मृगो सौत्यभिधानं कर्त्तव्यं। एवं हि तत्र वचनं। संस्थितेऽहनि गृहपतिर्मृगयां
याति तत्र यान्मृगान्हंति तेन तरसमयाः पुरोडाशा भवंतीति। तरसस्य मृगः प्रकृतिद्रव्यं। नैतदेवां प्रकृतौ ग्राम्या
नसामर्थ्यात्। धान्यशब्देन लक्षणया तद्दुत्लाभिधानं। इह पुनः स्वायत्तेप्रयोगेनावाचकशब्दप्रयोगो युज्यते। तस्मा
त्तरसमसीत्येवं प्रयोगः। पिनष्टीति चाध्याहारः॥ साकांक्षत्वात्॥ ॥दीर्घामिति कृष्णाजिने प्रोहति। प्रक्षिपति पि एमः
ष्टानि। प्रोहणं च पिष्यमाणतः। नानावीजेषु वैकैकं प्रोहणांतं कर्त्तव्यं॥ प्रसिद्धेः॥ ॥ चरूकपेत्वेतीक्षते। पिष्टानि। ईक्षउ ३४

ति।तस्मादेकैकेनालंभः। समंविभज्यालभनइतिपाता।येषिद्वेपदसंहरिष्यन्नितिसूत्रयतितद्यस्यपस्यपदाऽ
संहारस्तस्यतस्यतदेवालंभोयथास्यादिति। यथाचहूणंफलीकरणांते।पोष्ट्रस्यत्नीक्षणांतइति॥ ॥यथादेवत
मन्यत॥ कृतंव्याख्यानं॥ ॥इषेत्वेत्याज्यमधिश्रयत्यन्योपत्नीकस्याहवनीयेनछ्रापितः॥ अन्यश्चात्रव्याख्याभिधीय
ते।पुरोडाशयोरध्वर्युर्ग्नीध्रौव्याष्टत्रौ॥ आर्त्विकत्वेकंचकर्मपरिक्रयाम्नोनादित्युक्तं॥ याजमानंचपरिभाषितमेव।
प्रधानंस्वामीफलयोगादित्येवमादि। विशेषाद्यमाम एवब्रह्मणिपदन्यग्रहणंकरोति।तदविरोधेष्फपसदाहोत्रस्ये
वयथास्यादित्येवमर्थमितिसंप्रदाया।अपरेत्वन्यइतिन्यायसूत्रमाहुः।विशेषादेवाऽन्यप्राप्तिरेवंत्याह॥तद्यएतद्
भयंसहक्रियतइतिप्रकृत्यअर्द्धोहवाएषआत्मनोयज्ञस्ययत्ताज्यमर्द्धोयदिदहांवेभवतिसपश्चात्सावर्द्धोपउवाय
मर्द्धस्ताउभावग्निंगमयावेति।एवंवाविशेषेध्वर्योरेवाधिश्रयणंस्यात्॥ ॥अपत्नीकस्याहवनीयेनच्छ्रापितः॥
अपत्नीकइतिनाविद्यमानयापत्न्याधिकाराभावात्॥तस्माद्विद्यमानापिपत्न्याऽपत्येवयदारजस्वलातदेतद्भवति

क०
३५

अविध्यांतंदुलानांपात्र्यामनावपनं। संयवनाभावात्॥ सपवित्रत्वाच्चादृष्टोपकारिणीतिचएवपिभवति॥ ॥
अपणास्पपश्चादुपविशन्त्यंतर्वेदिवा॥ अंतर्वेदिग्रहणाच्छपणोत्रगार्हपत्योभिप्रेतः॥ ॥उपसर्जनीरन्यनयत्यन्यः
उपसर्जन्यन्यशब्दौव्याख्यातार्थौ॥ पवित्राभ्यांप्रतिगृह्णातिसमापइति। आनीयमानाःपवित्राभ्यांपरिगृह्णातिसा
मापइत्यनेनमंत्रेण।तथाचानीयंतेयथामंत्रांतेनग्रहणंभवति॥ सचायमभिधायकत्वान्तत्कार्यापन्नेपयसिद
धनिघ्नेचविपरिणम्यते।उपसर्जन्यानयनंचवरणवच्छकार्यलोपात्प्रवर्त्तनएव॥संयौतिजननपत्न्यैत्वेतिः नचैत
त्पिंडार्थत्वात्चरोनभवति॥ ॥समंविभज्यासंहरिष्यन्नालभतइदमग्नेरिदमग्नीषोमयोरिति॥ समभागोदृष्टार्थो
स्तत्सहावद्यंतितत्सहविषंतितत्पुनर्नोनाकरोति।तिदृष्टार्थोवगमात्॥ततश्चैकस्मिन्प्रवर्त्तते॥केचिदाग्नेयालं
भात्दृष्टार्थोभिनिर्दिष्टेरग्नीषोमीयालंभनमदृष्टायेतिमन्यमानाविकृतावग्नीषोमीयविकारएकैकेप्याग्नावैष्ण
वादोत्रालंभमिच्छंति॥ तत्पुनरयुक्तं।दृष्टद्वारकत्वात्तस्य।विभागपूर्वकोत्यालंभः॥ एवंत्युक्तंतत्पुनर्नोनाकरोती

सम:
३५

६६

नुपपन्नं॥ ॥ अग्निष्टइत्यद्भिरभिष्टशातिसकृत्त्रिर्वा॥ चैतेनयात्कार्यन्नोपात्॥ ॥ पर्यग्निकरोत्यंतरितंरक्षोन्तरि
ताअरातयइतिसहाज्यं॥ पुरोडाशाज्यसंयोगात्पर्यग्निकरणस्यौपदेशिकत्वाच्चप्रकृतौधर्म्माणांसाम्याप्येअप
वृत्तिः॥ एवंचसतिनद्विकारेपशौपर्यग्निकरणाविधानमुपपन्नंभवति। प्राक्पर्यग्निकरणात्पिष्टलेपापनय
नपात्र्यंगुलिप्रक्षालनेवायोत्कर्तव्यो। नहितयोरुत्पत्तिश्चोदिता॥ प्रतिपत्तिमात्रविधानंत्वलिं। सामर्थ्यादपिचक्र
मोवसातुंशक्यते॥ ॥देवस्त्वेतिश्रपणं॥ ददातीतिवाक्यशेषः। सामर्थ्याच्चचरोरधस्तात्॥ ॥माभेरित्यालभते॥ त
चैतद्भूतात्मसंवित्त्यर्थं। नमभिमृशतिसृतंवेदानीतिहिश्रूयते॥ प्रयोजनंधानानामभावोभिमर्शनस्य। दर्शनात्पाक
संवित्तेः॥ मंत्रोदर्शनएवास्त्वितिचेत्॥ नालंभेपिसतिसामर्थ्यपरिप्रापितत्वादतस्तदकार्योपपत्तिः। अशौचस्यादकार्यत्वो
पादालंभः॥ ॥ अतमेरुदातिशृतावभिवासयतिभस्मनावेदेनोपवेषेणवा॥ अशृतयोः श्रपणप्रदानार्थंशृतग्रह
ण। मितरथात्घवाच्यंस्यादिति॥ भस्मनाभिवासयति॥ आच्छादयतिवेदेनोपवेषेणवाकरणभूतेन। विरोधाच्चएवग्रह

क॰
३६

तथावाहुः॥ अन्येहनियस्यपत्न्यवालंमुकास्यात्तामवरुध्ययजेत॥ आहवनीयश्रापिणोः पत्नीकस्याहवनीयेएवा
ज्याधिश्रयणमेवंत्वक्रमाहवनीयश्रापिणंप्रकृत्ययस्योपत्नीनभवत्यग्रएवतस्याहवनीयेधिश्रयतीति।
इतरस्यगार्हपत्यएव॥ ॥धर्म्मोसी।तिपुरोडाशंयुगवत्॥ आज्यस्यपुरोडाशयोश्चयुगपदधिश्रयणं॥ तद्वाएत
दुभयं सहक्रियतइतित्युक्तं॥ तत्राध्वर्युमुख्यत्वात् आग्नेयमधिश्रयति॥ अग्नीषोमीयमश्नीत्॥ ॥उरुप्रथा
इतिप्रथमयतियावत्कपालमनतिदृष्युंत्यावत्कपालमित्युक्तेऽतिदृष्युप्राप्त्यभावान्तिषेधवैयर्थ्यमनतिदृष्यु
मित्युच्यते। कपालपरिमाणमिद्धौयावत्कपालमितिप्रथनपरिमाणोपपत्तिःस्यात्। ननुकपालपरिमाणंसि
द्धं। अतस्तत्परिमाणावधारणायाऽनतिदृष्युग्रहणं। तत्कथं। श्रुतिसंयोगान्नात्रसत्रादृष्युंकुर्यादितिप्रकृत्या
अशफमात्रंकुर्यादित्युहैकआहुः॥ अनेकयजमानाकेचयथार्थेमंत्रविपरिणाम। अशौचकार्याभावात्॥ प्रथना
भावः॥ यश्चयेनाधिश्रितः सतस्यप्रथनाद्भिरभिमर्शनंकरोति। तथाहितप्रकपालसंयोगाद्दोषणोमतिप्रपनम

रामः
३६

परिमाणवत्त्वान्नेति चे। न्यायौचित्यात्॥ उचितादिपुरुषाणां प्रसृतित्रयेणाञ्जलिरिति॥ स च लौकिक उदके पच्यते। साम
र्थ्यगृहीतत्वान्नत्वस्य। न चेह प्रणीतमुपदिश्यंते॥ परिक्रियार्थत्वाच्चास्य पुरुषार्थरूपता॥ तस्मात्प्रणीतोदकसाध्यइ
तिसंप्रदायः॥ अपरे व्यावर्णयंति॥ सामर्थ्यगृहीतमपि यद्देवसर्वार्थत्वाय परिकल्पितं तद्देव गृहीतुं न्याय्यं॥ न च स
र्वार्थत्वे कश्चिद्विशेष आश्रयितुं शक्यते ऐदमर्थ्यं प्रति॥ प्रणीतं च सर्वार्थमित्युक्तं॥ पुरुषार्थरूपत्वेपि च सति क्रत्वनिमि
त्त्यर्थे पुरुषार्थे। न तिद्वारेण कर्म्मसंबंधोस्त्येवेत्यदोषः॥ अथ निर्दिष्टकार्योर्थे नैव प्राप्नोतीनां नार्थगृहीतता। तद्यथा प्र
विगृह्णापामयः कृत्वेत्यप उपस्पृश्येप्सिव। तथा सत्यप्राप्तिः स्यात्पाणेः अपारवनेजने प्राशित्रहरणप्रक्षालने च॥ अथ क
र्म्मसंबंध्वपात्रसंस्कारः स उत्पुच्येत। तत्संबंधाविशेषात्॥ अध्वर्युपाण्योरपि संस्कारः शक्यो वक्तुं। केवलं तु नत्र कृतप्र
योजनत्वात्पात्रस्य। पाण्योरवनेजनं तु करिष्यमाणप्रयोजनं। नेचेयतापि विशेषः शक्यो वमातुं। तस्मात्पाण्योरवनेजनपात्र
प्रक्षालनयोः प्रणीतमेवोदकं। संप्रदाये तु पात्रप्रक्षालन एव प्रणीतमुदकमिच्छंति। न पाण्योरवनेजने। तत्पुनर्विचार्य

क॰ ३७

त्रिरभिवामस्य। अनेकयजमानके मंत्रस्य विपरिणामः॥ ॥ पात्र्यंगुलिप्रक्षालनमासेभ्यो निनयत्यभिमंत्र्य
प्रत्यगसः स्पंदमानं तृतीयत्वेति प्रतिमंत्रं॥ आप्यग्रहणं यागहे देवताज्ञापनार्थमितरथा हि देवतोद्देशाभावे
प्रतिपत्तिमात्रमेव स्यात्। अथ पुनराप्यग्रहणेन तदुद्देशेन परित्यागः कार्यं॥ तथा च नाशदोषादौ द्रव्यमात्रमु
त्पादयितव्यमिति याज्ञिकाः। अपरे तु द्रव्यप्रधानत्वात्तस्य च नाशे दैवरक्षा हि किंशुकाइति नोत्पत्तिमिच्छंति॥
अभितप्येति पात्रीस्थमेव। उल्मुकपातनमयित्वा। प्रत्यगिति प्रत्यग्वचनात्प्रागुदक्सा। असंस्पंदमानमिति समुपस
र्गनिर्देशादसंगस्वन॥ न स्पंदनमात्रप्रतिषेधः। त्रिनायत्वेत्यभिमंत्रैः प्रतिमंत्रं निनयामीति वाक्यशेषः॥ ॥ अ
न्वाहार्यदक्षिणामावधिश्रयति॥ ॥ अन्वाहार्यो दक्षिणार्थं तून उच्यते॥ ततो देवा एतां दर्शपूर्णमासयोर्दक्षिणाम
कल्पन्यदन्वाहार्यमिति श्रूयते। दक्षिणाग्नावन्वाहार्यं पचति। ति च विधानान्तत्राधिश्रयणं। स च भोक्तृतृप्तिव्यवस्थि
तपरिमाणः स्यात्॥ परिमाणान्तराविधानात्॥ अन्नस्य च भुज्यर्थत्वात्॥ भुजेश्च तृप्तिप्रवृत्तिसंयोगात्॥ अनवधृत

श्रौ
रामः
३७

प्रकाशरूपो हि खनतिर्वेदिस्वरूपं प्रकाशयति॥ नतथेतरे मानादयः॥ तस्मात्खनतिशब्दः प्रयुक्तः॥ तथा च वक्ष्यति
अत्र वेदिकरणं यथोक्तमिति खनतिशब्दार्थं करोतिनानुवदति॥ खननाधिकारार्थमाह॥ ॥ अंगुलखाता॥ अंगु
लपरिमाणं खातमस्या इति अंगुलखाता॥ व्याममात्री पश्चात्। परिमाणतः। व्याममात्री पश्चात्स्यादित्यधुरितिवच
नात्॥ अरत्निप्राची॥ अरत्नित्रयपरिमाणा प्राची भवति॥ अपरिमिता वा। त्वपरिमितशब्दो यद्यपि पूर्वप्रमाणापेक्ष
यावदुत्तरेण दिनो वर्त्तते॥ तथापि न तु समास एव अत्र गृहीतव्यः। किं कारणं॥ एवं हि श्रूयते। नात्र मात्रास्ति यावतीं
मेव स्वयं मनसा मन्येत तावतीं कुर्यादिति॥ तेन न परिमिता अपरिमितेति। तथा चाग्नौ अपरिमिते इष्टको वेति। तत्राप्यपरि
माणमेव शास्त्रं। तेऽपरिमिता एव परिश्रित उपदधात्यपरिमिता अनुष्टुभतीरपरिमितात्लोकं पृणा इति। कुत एव दिति चेत्। लिं
गात्। नवै मे सर्वाणि रूपाणि पथ्यन्तानि वै वरेव यथ्यन वाभ्यापयथेति। अनासिर परिमाणपक्ष उपपद्यते। इतरथाह्य
तिरेक एव स्यात्॥ पुनश्चामृतत्वात् प्राप्रयेदष्टकापरिमाणमाह॥ षट्त्रिंशत्त्रीणि वशतानि परिश्रुत उपधाने येऽन्येवमादिन से

क॰
३८

माणं नातिसमंजसमिव। उभयत्र हि क्रियाक्षिप्रमुदकं। न स्वशब्दाभिहितं। तस्मादुभयत्र प्रणीतमुदकमिति॥ अन्वा
हार्येतु द्रव्यासिद्धमित्यक्रियाक्षेपात् यदि विशेष उपलभ्यते तेन तोक्तं लौकिकमिति॥ ॥ अत्र वा व्रतोपायनं॥ तुल्य
श्रुतित्वात्तुल्यसत्रारंभसामर्थ्यात्॥ ॥ अपरेणाहवनीयं वेदिं खनति त्र्यंगुलखातां व्याममात्रीं पश्चादरत्निं प्रा
चीमपरिमितां वा प्राक्प्रवरणमुद्गवामध्यसंगृहीतामाग्नेमभिनोऽसौ। आहवनीयमपरेणेति कुतः। वाक्यशेषा
त्॥ सोयं विष्णुर्ग्लानः छंदोभिरभितः परिगृहीतोग्निः पुरस्तान्नापक्रमणमासेति। वेदिरिति संस्कारनामधेयं॥ तेषु हि
सत्सु शब्दप्रयोगादाहवनीयवत् प्रयोजनं सोमे धर्मप्रवृत्तिरिति। खनतिः करोत्यर्थः। अवश्यमेवात्राख्यातपदप्र
योगेन भवितव्यं। अत्र किं सामान्यरूपः करोतिः प्रयुज्यतां उत विशेषरूपः खनत्यादिरिति॥ तत्र विशेषरूपे खनत्या
दौ प्रयुज्यमाने सामान्यरूपाख्यातपदप्रयोगमंतरेणापि कार्यसिद्धेस्तत्प्रयोग एव ज्यायानिति खननीतिसूत्रितं। एमः ३८
मानपरिसमूहनादीनामन्यतमस्योच्चारणमस्त्विति चेत्॥ तेपि हि वेद्यर्थाः खनत्यादिवत्। न। अप्रकाशरूपत्वात्।

८६

नमित्युच्यते। तस्मिंश्चपक्षेनुषधानांमूलान्युच्छेत्तवाइतिप्रैषः॥ तञ्चाग्नीदाहेतिवक्ष्यामः॥ ॥ केचित्तुपूर्वसूत्रमाकारां
तमेवकुर्वंति। सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालइति औकारस्याकारादेशः। छंदोवद्भावात्सूत्राणां॥ तत्रोच्च
रंसूत्रं। वामूलोच्छेदनादोषधीनामितिस्वशब्दाभिहितः एव विकल्पः॥ नहितदानींसांधिकोयमावादेशविकारः॥ सचायं
प्रैषस्तारभ्यात्खननकालेएवदातव्यः॥ केचिदाहु। मूलोच्छेदान्तनासारस्वतादिविषया। नहिदर्शपूर्णमासयोर्वेद्यांमूला
निसंति।। कुतस्तदुच्छेदनमिति। अपरेतुमूलोच्छेदनस्यखननमपरिमाणविषयत्वादिहापिमन्यंते॥ एवंत्वाहा तस्मात्र्यंगु
लावेदिःस्यादिति। पुनश्च। तद्वत्तथानकुर्याद्दोषधीनांवैममूलान्युपाम्लोचत्तस्मादोषधीनामेवमूलान्युच्छेत्तवैब्रूयादिति।
ओषधिमूलोचितखननापरिमाणं। खेयमित्येतदुक्तंभवति॥ ततश्चसर्वत्रसंभवात्सर्वविषयता। एवंचप्रकरणमनु
गृहीतंभवति॥ ॥आहार्यपुरीषांपशुकामस्य। वेदिपुरीषमपनीयान्यत्पुरीषमाहर्त्तव्यं। तच्चैतदनुमार्जनात्पूर्वंसामर्थ्या
त्कर्तव्यं। पुरुषार्थत्वाच्चविकृतावप्रवृत्तिः॥ ॥वेदिंपरिसमुह्यवितृतीयेग्नीदुत्तरतउत्करंकरोति॥ परिसमूहनोत्करकरणयो

नदपरिमाणवचनेपरिमितशब्देउपद्यते। नान्यथा। तेनैतौद्वावेवयज्ञशास्त्रेऽपरिमितशब्दावपरिमाणवाचिनौ। शेषा
क० स्तुविशेनबहुवाचकाइति॥ यथाद्वादशाहीप्साअपरिमितावा। यथावयंपञ्चअपरिमितोवेत्येवमादि॥ तथाचपरिशि
३९ ष्टकारश्चाह॥ अपरिमितंप्रामाणाद्भूयइति। अत्यस्तमितावयवार्थवृत्तितयाऽपरिमितशब्दःशक्त्यैवबहुनिवर्त्तते
॥ अपरिमितपक्षेपिचमानंप्रवर्त्ततएव। नह्यपरिच्छिन्नेदेशेखननादिकर्त्तुंशक्यमिति॥ ॥प्राक्प्रवणामुद्धन्वंति॥
समोहिदर्शपौर्णमासयोर्देशोभिहितः॥ समेदर्शपौर्णमासाभ्यांयजेतेति॥ तत्रवेदेःप्राक्प्रवणतानियमोवाचनिकः।
सावैप्राक्प्रवणास्यादितिप्रकृत्याहाथोउदक्प्रवणेति॥ मध्येसंह्वारितेतिवचनात्॥ मध्यसंगृहीतां॥ अग्निमभितोऽ
सो। भवतः। तावपिचवेदिशब्दवाच्यौ। यतः खन्येतेतावपि। इतरथाहवनीयमपरेणवेदिंखनतीत्यपरतएवखननं॥ रामः
तथाचसूत्रकारः॥ अपोन्यवर्हीऽषिनिदधात्यऽसदेशाइत्यऽसद्योस्तरणंदर्शयति॥ ॥ आमूलोच्छेदनादोषधीनां॥ वे ३९
तिसामर्थ्याद्द्रष्टव्यं॥ नहित्र्यंगुलखातमूलोच्छेदनयोःसमुच्चयः संभवति। त्र्यंगुलस्यानतिरिक्तंअन्यूनंचखातंत्र्यंगुलखा

निर्वापदेशात्तृणस्य हि निःसंदिग्धं स्तंबयजुर्हरणार्थत्वं । स्फ्यस्यापि तद्वत्तादर्थ्येनैव ॥ ॥ नोपस्पृशेत्पृथिव्यात्मानौ
तेन स्तंबयजुर्हरिष्यन् ॥ ॥ प्राक्स्तंबयजुर्हरणाद्वज्रेण पृथिव्यात्मानौ नोपसंस्पृष्टव्यौ ॥ एवं हि श्रूयते । वज्रं प्रकृ
त्यनेन संशितेन नात्मानमुपस्पृशति न पृथिवीमिति । केचित्तेन तदनुपस्पर्शनमाकर्मपरिसमाप्तेरिच्छंति ॥ अवि
शेषाम्नानसामर्थ्यात् ॥ स्तंबयजुर्हरिष्यन्निति चोत्तरसूत्रे ऽवयवं योजयंति । स्तंबयजुर्हरिष्यन्वेद्यां तृणं निदधा
तीत्येवं । तत्तु नोपपद्यते । तत्रोत्तरसूत्रे संबध्यमानः स्तंबयजुर्हरिष्यन्नित्यवयवोर्थवान्न भवति । स्तंबयजु
र्हरणं हि प्रहरणादिपुरीषनिवपनांतं । तत्र पाठादेव वेद्यां तृणं निदधातीत्यत्रापि सूत्रेणार्थः सिध्यति । नार्थो
नेनावयवेन । पूर्वसूत्रे चार्थवत्त्वं च तस्यावयवस्य । नोपस्पृशेत्पृथिव्यात्मानौ तेन । कियंतं कालमपेक्षिते स्तंब
यजुर्हरिष्यन्निति कालसमर्पणेनार्थवत्ताऽवयवस्या । पि च । वज्रत्वात्तस्य स्तंबयजुर्हरणार्थतेत्युक्तं ॥ जयस्यापि
तत्संस्कारद्वारेण तादर्थ्यमेव । तत्र वाक्यशेषः ॥ सं स्पृशन्त्येवैनमेतद्यज्ञपतीति । संस्पृशति । शेतेन त्वकरणे । नीदर्शक

का०
४०

रग्निधः कर्तृत्वं । स्ववादेशसामर्थ्यात् । द्वितीयं च सामर्थ्यात् वेदेर्ग्राह्यं ॥ तच्च पूर्वे वितृतीयं । परिशिष्टकारवचनात् । द्वि
पर्ययोत्तरं स उत्कर इति । आचार्याभिप्रायाच्च । चात्वालोत्कएवंतरेण संचर इति । संनिहितौ हि चात्वालोत्करः पू
र्वे वितृतीये भवति ॥ ॥ देवस्य त्वेति स्फ्यमादाय सतृणं सव्ये कृत्वा दक्षिणेनालभ्य जपतींद्रस्य बाहुरि ॥ आदानं स
तृणस्य स्फ्यस्यैव । तृणस्य सहत्वमात्रं । सतृणमित्युपरिष्टात् । अप्रयोजनमंतरा येन तूष्णीमेव तृणादानं ॥ आददेध्वरकृ
तं देवेभ्य इति अंगप्रधानदेवताविषयो देवशब्दस्तदर्थं हि वज्रस्यादानं । वेदिनिष्पत्त्यर्थत्वात् ॥ वेदेश्चांगप्रधान
देवतासंबंधहविर्द्धारणार्थतया शक्यते तादर्थ्यं वेदितुं ॥ ततश्च पितृयज्ञे देव पितृभ्य इति विपरिणामः ॥ दक्षिणेना
लभ्येत्यवाच्यं । सामर्थ्यसिद्धत्वात् । नहि सव्ये कृतस्यान्यथालंभः संभवति ॥ तेन सव्यपाणिस्थस्यैवालंभो यथा स्यादि रमः
ति । अक्रियमाणे हि दक्षिणेनालभ्येत्येतस्मिन्न मुख्याप्यालंभः प्राप्नोति तन्मा भूदिति दक्षिणग्रहणं । तच्चैतद्वज्रादानं ४०
जपश्च स्तंबयजुर्हरणार्थत्वात्तदभावे न भवति ॥ तादर्थ्यं च तत्संनिधावाम्नानात् । तत्र चार्थस्याविद्यमानत्वात्तृणमि

व्रजं गच्छेति पुरीषमादत्ते॥ वज्रेणोद्धृतं पुरीषं व्रजं गच्छेत्यनेन मंत्रेणादत्ते॥ ॥ वर्षवृत इति वेदिं प्रोक्षते
वधानेत्युत्तरे करोति॥ आत्तं पुरीषमिति वाक्यशेषः। प्रहृत्य निदधाति वधान देव सवितरिति हि श्रूयते॥ ॥
प्रहरणशेषो वा विशेषोपदेशात्॥ प्रक्रियतेऽनेनेति प्रहरणो मंत्रः प्रहरणशब्देनाभिधीयते॥ तस्य शेषः ए
कदेशः प्रहरणशेषः॥ कुत एतत्॥ अविशेषोपदेशात्॥ प्रहरणं हि प्रकृत्याविशेषेणोपदिश्यते॥ स प्रहरति
पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषमित्येवमादि तमतो मामौमिति यावत्॥ यद्येवं खंडशोऽध्ययनं
कथं। मंत्रलिंगादिति केचित्। एवं चेत्प्रहरणशेषत्वं प्राप्नोति॥ नहि भिन्नाध्यायका मंत्रा इति॥ लिंगमपि च कथ्या
विहत्या प्रहरण एव शेषभावमुपयास्यति। श्रुतितः खंडशो विधानमित्यपरे। तथा च सति श्रुतिद्वयसाम
र्थ्यात् विकल्पो भवति॥ एवं च सति प्रहरणशेषो वा विशेषोपदेशात्॥ मानकर्मणि वा खंडशः प्रयोक्तव्यो विशेषो
पदेशात् इति॥ एवमपि सत्यन्येऽन्यथा वर्णयंति। नाशंहि पाठो ह्यविशेषोपदेशात्॥ शास्त्रांतरे तु विशेषेणोप

२

क॰
८०

रोतीति एतदुक्तं भवति॥ पुनश्चाह। तेन संशितेन नात्मानमुपस्पृशति न पृथिवीमिति॥ तीक्ष्णीकरणस्पर
स्तं वा यजुर्हरणार्थत्वादनुपस्पर्शनमपि तावदेवेति गम्यते॥ तस्माद्यथोपवर्णितमेवास्माभिः सूत्रं॥ नोपस्पृ
शेत् पृथिव्यात्मानं नेति नस्तंतु यजुर्हरिष्यन्निति॥ ॥ वेद्यां तृणं निदधात्युदक् पृथिव्यै वर्मासीति॥ भावित्वात्तृत्या
वेदिः। तद्यथापि संस्क्रियतेऽत्र देशः॥ तृणं च प्रकृतत्वाद्यदाँ तं तिनिधेयं॥ उदगिति च प्राक्केति निवृत्त्यर्थं।
स्मृत्या हि प्रागग्रतोदग्रता वा प्राप्नोतीति तन्निवृत्तौ च श्रौतीयमुदग्रतेति गम्यते। ततश्च तदपवादे श्रौतमेव प्राप
त्तं भवति॥ पृथिवि देवयजनीति तृणं तर्हि ते प्रहरति॥ तद्वज्रेण तद्दर्थत्वादासादनस्य। देवयजनीति अस्य
स्थाने पितृयज्ञे देवपितृयजनीति प्रयोगः। अंगप्रधानार्थत्वाद्देरित्युक्तं॥ पृथिवीशब्देन च वेदिरभिधीय
ते॥ तत्संस्कारमिमरत्ते॥ प्रहरणं च वेद्यां॥ न तृणे। अंतर्हितं इति सन्निहितत्वा। दितरथा हि तृणे प्रहरतीत्येव
मवक्ष्यत्॥ अथ पुनरंतर्द्धानवचनान्नार्थ्यमेव तृणस्य॥ न प्रहरणाधिकरणता तृणस्य प्रहरणमिति संप्रदायः

राम
९

ट ५

तीयं॥ प्रहरणादीनि वर्त्तंते॥ ॥ तूष्णीं चतुर्थं॰ सतृणं॥ सह तृणेन पुरीषमुत्करे करोति॥ ॥ पूर्वं परिग्रहं परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्च स्फ्येन गायत्रेणेति प्रतिमंत्रं॥ पूर्वशब्दसंबंधिवचनः पूर्वं नद्याः कूलमिति यथा। परिग्रहणं परिग्रहः। यद्येवं परिगृह्णातीति नोपपद्यते॥ तस्मात्परिग्रहं करोतीत्येतदुक्तं भवति॥ दक्षिणतः पश्चादुत्तरतश्च स्फ्येन करणभूतेन गायत्रेणेत्येवमादिभिर्मंत्रैः प्रतिमंत्रं॥ ॥ वेद्यास्त्रिरुल्लिख्याहरत्त्रिरिति॥ ॥ अयं च मंत्रः किमियत्तापेक्षया उत तत्त्वविवक्षया। किंतावत्तोयदीयत्तापेक्षया वरुणप्रघासेषु षट्कृत्व इति प्रयोगो वेदिद्वित्वात्। प्रतिवेदि हि तिस्रस्तिस्रोल्लेखाः॥ अथ तत्त्वविवक्षया ततस्त्रिशब्दोऽभ्यसितव्यः॥ नह्यनभ्यस्ते प्रतिवेदित्वविशिष्टं हरणमभिहितं भवति॥ तत्र केचिदाहु। रियत्ताविवक्षा॥ प्रकृतौ ह्युल्लेखानां त्रित्वसंख्याविशिष्टं हरणमभिहितं। विकृतावपि षट्त्वेषा इति षट्संख्याविशिष्टं हरणमभिधेयमिति॥ अन्ये त्वाहु। त्रिशब्दश्रुत्यैव त्रिस्वरूपविषयता। लक्षणायेन्नापरत्वाख्यानात्॥ श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसीति साभ्यासस्त्रिशब्दः प्रयोक्तव्यः॥ ॥ हत्वा त्रिर्लेखाः संपृ

क॰
८२

दिश्यते॥ तेनाविशेषस्याविशेषप्रवृत्तिरविरुद्धा॥ न तु विशेषस्याविशेष इति। तेन विशेषोपदेशात्त्र्यवयवश एव प्रयोग इत्यवधारणमाप्नोति॥ संप्रदाये तु विकल्पमेवेच्छंति॥ षहरणशेषपक्षश्चेत्तूष्णीं पुरीषादानं वेदिश्रेष्णं पुरीषाहरणमिति॥ ॥ अपारुमिति द्वितीयं प्रहरणादि। अपारुमित्यनेन मंत्रेण प्रहरणादि द्वितीयं कर्मोत्करकरणांतं प्रतिपत्तव्यं॥ अररे रिहंवेनामासुररक्षसमामेति॥ रक्षोभिध्यायकत्वाद्राक्षसो मंत्रः॥ ततश्चोदकोपस्पर्शनमत्र भवति॥ देवपितृयजनाद्वध्यासमिति च प्रयोगः पितृयज्ञे। देवयजनं हि वेदिरत्राभिप्रेत।॥ असौ च पितृयज्ञे देवपितृयजनं भवति॥ ॥ अभिन्यस्यस्फ्यन्नीदुत्करमररोदिवमिति॥ ॥ अभिन्यासश्च हस्तद्वयेन भवति नैकेन पाणिना। कुत एतत्। लिंगात्॥ अभिनिहित एव सव्येन पाणिना भवत्यथ दक्षिणेन जुहूं परिगृह्णाति॥ प्रसरंस्तुतत्वात्तमभिनिदधातीति हि प्रकृत्यैवमामनंति॥ अभिनिहित एव सव्येन पाणिना भवति॥ पूर्वाभिनिहिते त्वेव कारकरणं समर्थं भवति॥ इहापि चाभिनिधानमेव चोदितं॥ तमग्नीदभिनिधातीति॥ ॥ उपस्तरणेन

राम:
८२

जुहरणादिभिः सहोच्चारणात्तस्मादिह भवति लेखाकरणादि॥ ॥अत्र वेदिकरणं यथोक्तं॥ ॥खननमिहा
र्थोदवसरे प्रतिपत्तव्यं। नामूलोच्छेदनात्॥ अंगुलं वा॥ ॥उत्तरं परिग्रहं परिगृह्णाति॥ ॥सुक्ष्मास्योनोर्जस्वतीति
प्रतिमंत्रं पूर्ववत्॥ प्रतिमंत्रमितीयतादिसिद्धे यत्प्रतीकोच्चारणं करोति न तद्वाक्यावसानप्रज्ञमये॥ इतरथा हि सु
ष्मा चासि शिवा चेत्यत्रापि पर्यवसानं स्यात्। एतः प्रतीकोच्चारणं पूर्ववदिति स्फ्येन दक्षिणतः प्रश्चादुत्तरतश्चेत्येवम
र्षी॥ ॥पुराक्रूरस्येत्यनुमार्ष्टि॥ ॥अनुमार्जनं समीकरणमत्राभिप्रेतं। पुरीषाहरणपक्षे वास्मिन्नवसरे वेदिपुरीष
मपनीयाऽन्यदानीमानुमार्जनं कर्तव्यं। सामर्थ्यात्। यच्चोक्तं प्राक्प्रवरणादुदन्वेति तदप्यस्मिन्नेवावसरे कार्यं। करणं
तृणानुपदेशाच्च वज्रेणैवानुमार्जनं प्रकृतत्वात्॥ ॥अथाधिवेदिं प्रोक्षणीर्द्धीरयति॥ ॥अधिशब्दः सामीप्येउ
परिभावे चा वेदिमिति द्वितीयोपपदविभक्तिः प्रोक्षणीशब्दो यौगिकोपि सन् विशेषविषयः। विशिष्टशब्दो वारानसाम
ष्मीन्॥ ॥अन्योथस्य मुद्यम्याह प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः संमृड्ढि पत्नीं संनह्याज्येनोदेहीति पदी

शति॥ हरणसंमर्शने अग्नीन्कल्के॥ शब्दसामर्थ्यात्॥ पितृयज्ञाग्निचित्ययोर्वा तत्र दर्शनात्॥ ते चैते पितृयज्ञीयवि त्या
का० ध्यत्रयोः प्रतिपत्तव्यो। कुत एतत्॥ तत्र दर्शनात्॥ तत्र ह्येते दृश्येते। पितृयज्ञे तावल्लिखति हरति यज्ञार्थं भवति।
५३ अग्निचित्येपि च लिखित्वाहहरत्रिरिति हरति त्रिरग्नीध्र इति॥ दर्शनमत्र विधानमभिप्रेतं। वाद इह भवति। कुत
एतत्॥ तत्र दर्शनादेव। तत्र हि दर्शनं न विधानमन्यपरत्वाद्वचनस्य। किंपरं तदिति चेत्। पितृयज्ञे तावल्लिखति
हरतीति प्रकृत्य सयज्ञोपवीती भूत्वाज्यानि गृह्णातीति पितृत्वादवस्मृत्युदितं प्राचीनावीतित्वमुचितमतोप
ज्ञोपवीतिविधानपरं वचनं। अग्निचित्येपि च प्रायणीयहविः कृदंते सौमिक्या वेदेः स्फ्यादिसंमर्शनात्तस्यावसरविधा
नार्थं वचनं॥ वेदिशब्दस्य संस्कारनिमित्तत्वात्तद्धर्मप्राप्तौ सत्यामवसरो विधीयते॥ एवं हि तत्र वचनं। प्रायणीयं
प्रकृत्य तस्य हविः कृत्वा वाचं विसृजते वाचं विसृज्य स्तंबयजुर्हरति स्तंबयजुर्हृत्वा पूर्वेण परिग्रहेण परिगृह्य लिखि एमः ५३
त्वाहहरत्रिरिति हरति त्रिरग्नीध्र इति। अतोपि कृत्यनुमन्त्रनिर्देशः। –न्यकृतानुपदेशोनुमीयते॥ किंच॥ स्तंबय

रसदिति। इहसमुदाय एकवचनांतो जात्यपेक्षः॥ ततश्चाविपरिणामः। तृणसमुदायांतरेपि सैव जातिरिति॥
स्रुक्शब्दे बहुवचनस्य समवायात् गृहमेधीयोपमदादौ यथार्थं विपरिणामः। पत्नीशब्दस्य त्वनेकपत्नीके चा
नूह एवैकवचनान्तस्य समाम्नानात्॥ आज्येनोदेहीति आज्येन गृहीतेनोद्धेत्येतदुक्तं भवति। प्रैषार्थकर्तृग
तमपि वचनं समवायाद्यथार्थं विपरिणम्यते। यथा वरुणप्रघासेषु प्रोक्षणीरासादयतमित्येवमादि। यदीछेन्नः
प्रैषो भवति। स यदि कामयेत ब्रूयादेतद्यच्छ कामप्येतापि नाद्रियेतेति। प्रैषप्रैषार्थयोरध्वर्युकर्तृकत्वे विरोधादन्यः
प्रैषेऽन्यश्च प्रैषार्थ इति प्राप्त इदमाह॥ ॥ यथाप्रैषितमन्यः पराधिकारात्॥ ॥ यथाप्रैषितमन्यः करोति प्रैषवचन
सामर्थ्यादेवान्यस्मिन्प्राप्तेऽन्यशब्दोग्नीत्विषयः॥ यथान्यत्राहं त्वन्योऽन्यः करोतीत्यग्नीत्करोतीति यावत्॥ कुत एतत्॥
पराधिकारा। त्सामर्थ्यादेव च परप्राप्तौ परशब्दो जघन्यविषयः। परं हि जघन्यं निकृष्टमधिकृत्य प्रैषः प्रवर्त्तत इति॥ अपि
च निकृष्टेनोत्कृष्टस्य प्रैषणं विरुध्यते॥ नन्वेवमाचरंति॥ यदि चाध्वर्युः प्रैषयिताग्नीध्रः प्रैषार्थं करोति ततोध्वर्युणा किंचि

छेत्॥ ॥ अन्यशब्देनाग्नीदभिधीयत इत्युक्तं। अथशब्दप्रयोगोनर्थकः॥ पाठानुपूर्व्यादपि तत्प्राप्तेः। उच्यते। प्रोक्ष
क० णीधारणस्य वर्त्मोद्यमनस्य चैककालता यथा स्यादिति॥ आनंतर्यार्थत्वादथशब्दस्यानेककालार्थतेति वे।
५४ त्स्या। पाठादपि तत्प्राप्तेर्व्यर्थोथशब्दप्रयोगो माभूदित्येककालार्थता कल्प्यते। एवं त्याहा स वा उपर्युपर्येव प्रो
क्षणीं धारयमाणस्त्वथ स्फ्यमुद्यच्छतीति। ननु च सघम्याम्नानादयमर्थो लभ्यते। अध्यधिवेदिं प्रोक्षणीर्धारय
त्यध्वर्युरन्यः स्फ्यमुद्यम्याहेति सिध्यत्येवैककालता। एवं वेदन्यार्थो यमथशब्दः। कोन्योर्थः। प्रोक्षण्यासादना
दयो बहवः प्रैषास्तत्र वन्याप्यत्वात्प्रैषसमनंतरमेव तदर्थानुष्ठानमपि प्राप्नोति तन्माभूदित्यथशब्दप्रयोगः।
सतित्यथशब्दे धार्यमाणासु प्रोक्षणीषु सर्वे प्रैषाः प्राक्वंति नान्यथा॥ इध्माबर्हिशब्दौ वरुणप्रघासेषु न वि रामः
परिणम्येते॥ यत इंधनादिध्मः॥ एवं चैकस्मिन्नपि काष्ठेध्मयोग उपलभ्यते। इध्मस्य वा शकलमपच्छिद्योति। बर्हिः ५४
शब्देतु जात्यपेक्षयैकवचनं॥ दृश्यते चैकस्मिन्नपि तृणे बर्हिः शब्दः प्रयोगः। बर्हिरेवास्मा पतन्स्तृणात्पस्तत्र हवि

हरेति॥ अथवा संप्रैषावचनादिति नैतत्संप्रैषवचनं। किं तर्ह्यध्येषणामेतदिति॥ अथ यदुक्तमध्वर्योः प्रैषे सति किंचित्कृतमध्वर्योः किंचित्कारितं तथा सति समाख्यानुग्रह इत्युच्यते॥ एवं हि प्रेषदानक्रियामेव प्रतिसाक्षादध्वर्योः कर्तृत्वं न प्रैषार्थे। साक्षात्कर्तैतरस्याविद्यमानत्वात्॥ ननु चोक्तं स्वतंत्रः कर्तेति प्रकम्प्य तत्प्रयोजको हेतुश्च कर्ता चेति॥ प्रयोजकस्यापि कर्तृत्वं। नैतदेवं। अन्यकर्तृत्वात्प्रैषार्थस्येत्युक्तं। कथं तर्हि प्रयोजकस्य कर्तृत्वं। नैव साक्षात्कर्तृत्वे प्रैषे व्यापारात्। क्रियायां वान्यस्य दृष्टत्वात्। तेन कर्तृत्वनिबंधनकार्यार्थं कर्तृत्वमतिदिश्यते॥ आह च। प्रेषणे यदि कर्तृत्वं तदर्थेनोपपद्यते॥ तत्र चान्यस्य दृष्टत्वात्कर्तृत्वमुपवर्ण्यते॥ कर्तृनिर्देशः कार्यं च कर्तृकरणयोस्तृतीयेत्येवमादि। यथा अपिति सार्वधातुके ङित्त्वातिदेशः ङिन्निबंधनकार्यार्थो न च तस्य साक्षात् ङित्वं। ङकारस्येतो भावात्॥ एवमिहाप्यकर्तरि कर्तृत्वातिदेशः। तेन समाख्यानुग्रहो नातीवोपपद्यत इति॥ प्रयोजकस्य कर्तृत्वं साक्षाच्चेत्किमतिदिश्यते॥ अथातिदेशः कार्यार्थस्तदेव स्यात्प्रयोजनं। एवं च सति नातीव समाख्यानुग्रह उपपद्यते॥ तस्मादध्वर्युः प्रैषार्थेऽग्नीच्च प्रैष इति॥ तथा च लिंगं॥ प्रैषवचनं हि प्रकृष्टी

त्कृतं किंचित्कारितं भवति॥ तथा सति समाख्यानुग्रहो न प्रैषार्थस्य पुनरध्वर्युकर्तृकत्वे कृतमेव न कारितं स्यात्तत्र नातीव समाख्यानुग्रहः स्यात्। तस्मादध्वर्युः प्रैषेऽग्नीत्प्रैषार्थ इत्येवं प्राप्त उच्यते॥ स्वयं वा विरोधात्॥ स्वयं वाध्वर्युः प्रैषार्थं करोति। सामर्थ्यात् अग्नीत्प्रेषयति। कुत एतत्॥ प्रैषार्थस्य प्राधान्यात्॥ कुत एतदिति चेत् प्रैषस्य तदर्थत्वात्॥ अंतरंगं प्रैषार्थः बहिरंगं प्रैषः। प्रैषार्थेन व्यवहितत्वात्॥ ततश्चपरंतरंगं प्रधानं च तदध्वर्युः करोति। बहिरंगं गुणभूतं चाग्नीदिति न्याय्यं॥ ननु च विरुध्यत एतदित्युक्तं। न हि निकृष्ट उत्कृष्टं प्रेषयितुमलमित्यत्राह। अविरोधात्॥ यस्मादयं विरोधो यद्ययं प्रैषः स्यात्। अध्येषणा त्वेषा॥ अग्नीदध्वर्युमधीच्छति॥ यद्येतच्चैतच्च कुर्यादिति। प्रैषाध्येषणयोः को विशेष इति चेत्। निकृष्टविषयं प्रेषणं। उत्कृष्टविषयमध्येषणमिति॥ यथा लोके माणवकः प्रेष्यते काष्ठान्याहरेति। स्वामिनं प्रत्यध्येषणा स्नायतां भुज्यतामिति। वेदेपि च येभिरग्ने सरथं याह्यर्वाङ्नारथं वा विभवो ह्यश्वा इति॥ अग्नीधाऽग्निरध्येष्यते। ततश्च न विरोधः। किंच॥ ॥संप्रैषावचनाच्च॥ न वा संप्रैषवचनमस्ति। यथान्यत्राग्नीदग्नीन्वि

भाष्यते॥ कर्तृकार्यातिदेशार्थमकर्त्तर्य्येवमुच्यते। गुणवृद्धिनिषेधार्थे ङित्त्वं तु ङित्कल्प्यते॥ अकर्त्तर्य्यपि कर्तृ
त्वं स्मृतौ याघ्यर्थमुच्यते॥ औपचारिककर्तृत्वं न सर्वत्राभ्युपेयते। गोणत्वं भविधाने हि वाहीको नैव गृह्यते॥ कर्तृशब्द
स्य वाच्यत्वेन प्रयोज्ये हेतुरेव च। एवमप्येकशब्दस्य प्राप्तौ नेकार्थता विना। सत्यां गतौ च सा नेष्टा गत्यभावेक्षशब्द
वत्॥ सादृश्यादिवियुक्तेर्थे युज्यतेऽनेकता विना। लोकेपि कारयन्नेव कर्त्तेति व्यपदिश्यते। कुर्वाणमेव कर्त्तारमाहु
र्नैव प्रयोजकं। कर्तृशब्दः प्रयोज्ये हि कर्तृत्वादेव वर्त्तते॥ प्रयोजके व संबंधात्कर्तृत्वमुपवर्त्तते॥ शब्दस्यार्थेन संबंधे वा
च्यवाचकयोर्द्वयोः॥ अपि शक्तौ प्रकाल्प्येत प्रत्ययो नान्यथा भवेत्॥ तेन यत्रार्थसादृश्यं संबंधो वा क्वचिद्भवेत्॥
नत एव प्रतीतत्वान्न भ शक्तिर्नैवानुमीयते॥ एवं प्रयोजकेध्यर्थौ कर्तृत्वानुपपादितः। प्रैषार्थस्यान्यकर्तृत्वात्समाख्या
नुग्रहः कथं। प्रैषः प्रैषार्थयोर्येन कर्त्रैकत्वं विरुध्यते॥ अतः कर्त्रंतरापत्तिः सामर्थ्यादुपजायते॥ प्रैषार्थस्यांतरंगत्वा
त्प्रधानत्वाच्च कर्तृता। आध्वर्य्योःअप्रतस्यामः कातीयवचनाद्द्वयं। प्रैषस्य बहिरंगत्वाद्गुणत्वेनैव युज्यते॥ अग्नीध एव कर्तृत्वं

न्नायते॥ स यदि कामयेत ब्रूयादेतद्ध्यक्ष कामयेतापि नाद्रियेत स्वयमुन्नेयेत तद्वेदं मतः कर्मकर्त्त्वमिति अ
क॰ ध्वर्युप्रैषार्थस्य कर्त्तारं दर्शयति॥ तत्रकाणनुवृत्तेश्चायमेवार्थोवसीयते॥ हरत्विति प्रैषवचनं हि सति हुत्वाग्नीत्ते
४६ ख्वाः संमृशतीत्याह। तच्चैवमुपपद्यते यथाऽस्माभिरर्थोभिहितो॥ यदा चाध्वर्युः प्रैषदानेऽधिक्रियते॥ तत्राग्नीधः
प्रैषार्थः स्यान्तथा सति हुत्वाग्नीत्त्रेखाः संमृशतीत्यवाच्यं स्यात्॥ प्रैषणे यदि कर्तृत्वं तदर्थेनोपपद्यते॥ तत्र चान्य आहक
स्य दृष्टत्वात्कर्तृत्वमुपचर्यते॥ प्रयोजकस्य कर्तृत्वं न दुक्तिं प्रत्ये संशयं॥ उक्तेश्वपि च कर्मत्वमुच्यतमानतयैव हि॥ त
स्याऽपि च कर्तृत्वमुच्यमानप्रबोधनात्॥ उच्यमानस्य कर्मत्वं कर्तृत्वं चार्थसाधनात्॥ एवं त्वनेककर्तृत्वकर्मत्व
व्यवधानतः॥ प्रयोजकस्य कर्तृत्वमुच्यमानं न शोभते। प्रयोजकोक्तिस्तस्यैव व्यापारस्फुट एव हि। न तेन व्यवधान एमः
ंतुपाक एधोरकादिवत्। पच्यर्थेः संभवन्त्येव हेतुवाक्यं विनापि हि॥ तेन पूर्वापरीभावो हेतुवाक्यस्य नेष्यते॥ अङि-
त्वपि हि ङित्त्वस्य यथादेशः कृतोपिति॥ प्रयोजकस्य कर्तृत्वमेवमेवातिदिश्यते। ङिन्निबंधनकार्यार्थे ङित्त्वं त्वविति ४६

त्ततः स्फ्यावदुक्ते निवर्त्तते॥ ॥अवनिज्य पाणी अपरेण प्रणीताः स्फ्यं निदधाति। पाण्योरवनेजनं दृष्टार्थं। वेदि
खननेन हि धूलीधवलावमलौ क्रियेते। प्रयोजनं। तदभावेन भवति। तावन्निज्य प्रणीतानामपरतः स्फ्यं निद
धाति॥ ॥इध्मो बर्हिश्च। समासोक्तयोः क्रमापरिज्ञानात्तस्मादाह॥ ॥पूर्वमिध्मं। निदधातीति वर्त्तते॥ ॥प्रणीताद
क्षिणेन वाहृत्य। इध्मं निदधातीति॥ ॥एवं प्रतप्य पूर्ववद्वेद्यग्रैरंतरतः प्राक्संमार्ष्टि निशित इति विपर्यस्य
वर्हिर्मूलैः प्राङ्क्रम्य। एवं प्रतप्य पूर्ववदिति॥ अनुष्टं निष्टसमिति वा। तथा तुल्यश्रुतित्वात्॥ वेद्यग्रैः करणभू
तैरंतरत इति मुखतः॥ प्रागिति बुध्नादारभ्याग्रात्संमार्ष्टि अनिसित इत्यनेन तमंत्रेण। विपर्यस्य वर्हिर्मूलैर्विपर्यासा
त्प्रत्यगिति लभ्यते॥ वर्हिर्वाह्यतः। वेद्यग्रमूलैः। प्राङ्क्रम्येति प्राङ्गत्वा। प्राङ्ङ्वैवोक्रम्येति वचनात्॥ उक्रमणं व
संमार्गमात्रे। न प्रतपने॥ तस्मादुत तथैव संमृज्याद्यथाग्निनाभिघुक्षं त्प्राङ्ङ्चैवोक्रम्येति वचनात्॥ वर्हिरग्निमंत्रः प्रव
र्त्ततेऽदेशभेदात्॥ तथा च सूत्रकारो देशभेदे मंत्रप्रवृत्तिं ज्ञापयति॥ अग्निसंमार्गेत्वृष्टीमुपरीति॥ ॥प्रतप्य प्रतप्य प्रयच्छ

विपरीतमतोऽन्यथा॥ लौकिकभ्रांतिनाशाय महांतं यत्नमास्थितैः। कृतेयं न्यायमास्थाय हेतुकर्तृनिराक्रिया॥ २०॥
क॰ प्राक्स्तरणाद्वेदिं नावमृशेत्॥ ॥वेदिं प्रकृत्यत्येवमामनंति॥ तेनानवमृश्य यजध्वं तथा श्रेयांसो भविष्यथेति॥ ॥
५७ स्तृतानि च हवींष्याप्रचरणात्॥ नावमृशेदिति वर्त्तते॥ प्रचरणं च प्रधानविषयं॥ न च स्विष्टकृदादिविषय। मतदर्थत्वा
द्धविषः॥ ॥अंगुष्ठांगुलिभ्यां मांससंहिताभ्यामवद्यंत्येके। मांससंहितेन मांससंलग्नेनाभ्यामेकेऽवद्यंति। एके का
ष्ठेन। पर्यंत्याम्नानं काष्ठेनावद्यतीति। तथा स्रुवेणावद्यति। स्वधितिनावद्यति। हस्तेनावद्यतीति। तत्र सामर्थ्यात्
स्रुवस्य द्रवद्रव्यविषयता॥ स्वधितेश्च मांसविषयता॥ हस्तकाष्ठयोः पुरोडाशविषयत्वं॥ तथा च सूत्रका
रः स्रुतावदानं पात्रीचेति॥ आहव॥ सामर्थ्यात्स्वधितिर्मांसे द्रवे स्रुवः स्यात्स्रुवसंख्या। हस्तकाष्ठे पुरोडाश एमः
मवदातुं प्रकल्पयेत्॥ ॥आपन्नं तृणं निरस्येत्॥ यद्वेद्यां तृणकाष्ठाद्यापन्नं तत्स्तरणकाले निरसितव्यं ५७
॥ ॥द्विषतो वध इति॥ स्फ्यमुदंचं प्रहरंति॥ ॥तदेतद्दृष्टार्थोदृष्टार्थेभ्या संभवा। प्रधानोपकारकं प्रयोजादिव।
चे

त्नीगृह्णीत। संनहनं च संपूर्वस्य नहेः संनहनं बंधनमित्यर्थः। प्रत्यग्दक्षिणत इत्यवांतरदेश उच्यते। सक
स्य गार्हपत्यस्य। कुत एतत्। श्रुतेः। सा वै न पश्चात्प्राची यज्ञं सत्वासनितिप्रकृत्य तस्माद्दक्षिणत इवैवाध्यासी
नेत्याह। उपविष्टामिति भूतकालप्रत्ययनिर्देशान्नेदानीमुपवेशनं। पूर्वमेवोपविष्टां संनह्यति॥ तस्याश्चापि
च कर्म्मसंनिधिव्यवस्थानं न्याय्यं। यजमानवत्त्वामित्वाविशेषात्। क्वचिच्च दर्शयति पत्नी च पूर्ववत्॥ पत्नी च यथा
देशमिति। मुंजयोक्त्रेण त्रिवृता॥ मुंजमयेन त्रिगुणेन योक्त्रेण संनह्यति॥ तच्च परिहरत्यधीवासोदित्यैतस्त्रेन्प
नेन मंत्रेण। अधीवास इति बहिर्वासः। सर्वाभिवासः संनह्यत्यौषधयो वै वासो वरुण्यपारक्षस्तदोषधीरेवैनदं
तर्द्धातीति॥ ॥ दक्षिणं पाशमुत्तरे प्रतिमुच्योर्ध्वमुदूहति विष्णोर्वेष्यसीति॥ ॥ उत्तरस्य शंकुस्थानीयता। प्रतिमोक
क्त उपानहो प्रतिमुंचत इति न्यायेन प्रवपणमुच्यते॥ ऊर्ध्वमुदूहति विष्णोर्वेष्य इत्यनेन मंत्रेण। तच्चैतत्पत्नीसंनहनं ज्या
तत्संस्कारात्प्रतिपत्नि कर्त्तव्यं॥ येसोच्याने संनहनं प्रकृत्याशंमध्यनेवोत्तरार्द्धे नाज्यमवेक्षते॥ ततश्चावेक्षणार्थता

क०
५८

ति॥ विस॥ क्रमादिविषया। ततश्च स्रुगादीनामप्युत्तरं प्रतपनं प्रवर्त्तते॥ पूर्वेतु स्रुवस्यैव विधानात्॥ ॥ अनिशिते
तिस्रुवः॥ संमार्ष्टीत्यनुवर्त्तते॥ ॥ दर्व्यां प्राशित्रहरणं॥ शृतवदानं॥ पात्रीं वा। ननु वा वाच्यं दर्व्यामिति। संमार्गमं
त्रानुपदेशात्॥ स्यात्। प्रतपनमंत्रव्युदासार्थत्वा। तन्त्रान्निश्च क्रियानिर्देशात्। तच्छेषत्वाच्च मंत्रस्य। पात्रीमात्रोपादे
शसामर्थ्यात्प्रयोजनवत्त्वाविशेषाच्च उद्धरणपात्र्योरिडापात्र्याश्च संमार्गः। स च विनियोगक्रमेण कर्मांतरे प्रमा
णाभावात्॥ ॥ संमार्जनान्यथास्यति॥ अपस्यपत्युत्करे। प्रदेशांतरविधाना। लिंगाच्चोत्करो वा अतिरिक्तस्य प्र
तिद्धेति॥ ॥ आहवनीये प्रासनमेके॥ तैरेके स्रुक्संमार्जनान्यग्नावभ्यादधतीति वचनात्॥ पत्नीं संनह्यति प्रत्य
ग्दक्षिणत उपविष्टां गार्हपत्यस्य मुंजयोक्त्रेण त्रिवृता परिहरत्यधीवासो दित्यैरास्नेति॥ पत्नीशब्देन यत्तस्य स्वा
मिन्यभिधीयते। कुत एतत्। स्मृतेः॥ स्मरंति वैयाकरणाः पत्युर्नो यज्ञसंयोग इति॥ तत्रैव पत्नीरूपं भवति नान्यत्र। एमः ५८
यत्तु रजकस्य पत्नी कर्षकस्य पत्नीत्युपचारमात्रं तत्। किं चितायाः प्रयोजनं। संनहनक्रियाकर्त्रभिसंबंधान्नैधर्युप

८६

ज्योत्पवने पवित्रे प्राप्येते इति। कुत एतदिति चेत्। प्रोक्षणीषु पवित्रे भवतस्ते तत आहृत्ये ताभ्यामाज्यमुत्पुनातीति॥
प्रोक्षणीनां पुनः संस्कारः कार्यार्थः। प्रयोजनमभिधायार्हयोः प्रोक्षणाभावेन भवति॥ ॥आज्यमवेक्षते तेजोसीति
यजमानो वा। प्रकृतत्वादध्वर्युः॥ ॥स्रुवेणाज्यग्रहणं चतुर्जुह्वां धामनामेति सकृन्मंत्रः॥ ॥स्रुवेणाज्यग्रहणमिति
कुत एतत्॥ चतुर्जुह्वां गृह्णातीति श्रूयते॥ चतुःसंख्याविशिष्टं च ग्रहणं कथमन्यथोपपद्यते॥ यदि स्रुवेण न गृह्येत।
तत्राप्याज्यस्य नियमः यदाज्यस्य ग्रहणं तत्स्रुवेणैवान स्रुवनियमः॥ नाप्युभयनियम। स्त्याहि सति दधिपयसि
च स्रुवस्याप्रवृत्तिः स्यात्। तत्र को दोषः। स्रुवेणैवावद्यतीत्येतदुपरुध्यते॥ अथ पुनराज्यस्यानियमे सति स्रुवस्या
वदानसाधनत्वसामर्थ्यात् दध्यादौ प्रवृत्तिरनिवारिता भवति। जुह्वां चतुर्गृहीतं धामनामित्यनेन मंत्रेणासकृन्मं
त्रवचनं। पारिभाषिकस्त्वात्रिः कृत्वः प्राप्तोऽह विकल्पेन सकृत्त्वमुच्यते॥ ननु परिभाषायामपि नैव त्रिर्मंत्रवचनम
भिहितं। तत्र हि व्यापनः प्रतिग्रहणं मंत्रप्राप्ताविरमुक्तं। वचनादाज्ये मुष्टौ चोनम इति॥ सत्यमेवमपि तु त्रिरेवं मंत्रो भि

वगम्यते। तदप्यर्थवादप्रायं। न हि संनहनस्याज्यावेक्षणार्थत्वे प्रमाणमस्ति॥ ॥न ग्रंथिं करोति॥ स एव न ग्रंथिं कु
क० र्यादिति वचनात्॥ ॥ऊर्जैत्वेत्याज्यमुद्वास्य पत्नीमवेक्षयत्यदब्धेनेति॥ ॥ऊर्जेत्वेत्यनेन मंत्रेणाज्यमुद्वास्य पत्नीम
४९ वेक्षयः त्यवेक्षणं कारयति॥ ततश्चाध्येषणा पत्नि आज्यमेक्षस्वेति॥ तत्त्वन्यथावेक्षयितुं शक्यते॥ अदब्धेने
त्यवेक्षते। यद्यपि चोक्तमवेक्षयत्यदब्धेनेति। तथापि त्वपश्यामीत्युत्तमपुरुषयोगादवेक्षण एव मंत्रो नाध्येष
णा इति॥ तेनैतदनेकपत्नीकेषु एकार्थत्वात् सैव करोति॥ पत्न्यभावेपि चापेत्य यज्ञेद्रव्यसंस्कारः यथायादध्वर्युरवेक्ष
ते॥ ॥वेद्यां करोत्यपरं प्रोक्षणीभ्यः। निगदव्याख्यानं॥ ॥आहवनीये वाकृत्वा तच्छ्रायिणा॥ आहवनीये वाकृ
त्वा वेद्यां करोति॥ तच्चैवमेव विकल्प्यते। किं तर्हि व्यवस्थितविभाषेयं। आहवनीयश्रायिणा आहवनीये वा कृत्वा। रामः
एवं ह्यामनंति। अथाज्यमादाय प्राङुदाद्रवति तदाहवनीयेधिश्रयति यस्याहवनीये हवींषि श्रपयंति सर्वो मे ४९
यज्ञ आहवनीये श्रृतोसदिति॥ ॥सवितुस्त्वेत्याज्यमुत्पुनाति॥ प्रोक्षणीश्च पूर्ववत्। चशब्दादाज्यं च पूर्ववत्॥ न त्वन्यथा

-६०

मेव चतुर्गृहीतं भवतीत्ययमभिप्रायः॥ ॥किंच। पश्चातिथ्यादर्शनाच्च॥ पञ्चेनावदन्यद्रव्यकेष्वनुयाजेपूपभृति चतु
र्गृहीतं दर्शयति॥ अथोत्तूयाज्यं चतुर्गृहीते जुह्वां चोपभृति च गृह्णाति पंचगृहीतं पृषदाज्यमिति॥ तथा अननुयाज
केकर्मण्यपातिथ्यायां॥ अथोत्तूयाज्यं सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति न ह्यत्रानुयाजा भवंतीति। तत्रानु
याजार्थेन द्रव्येणानार्थे इति प्रयाजार्थमेव चतुर्गृहीतं दर्शयति॥ ॥न कृत्स्नोपदेशात्॥ नैतदेवं॥ कृत्स्नं त्वेतदष्टगृ
हीतमनुयाजार्थत्वेनोपदिश्यते॥ अथ यदष्टौ कृत्व उपभृति गृह्णाति छंदोभ्यस्तत् गृह्णाति अनुयाजेभ्यो हि तद्गृ
ह्णाति छंदांसित्यनुयाजा इत्यो। वं चानुयाजार्थस्यैव वचनात्प्रयाजेषु विनियोगो। यथाप्रयाजार्थस्योत्तरत्वात्॥ यदु
क्तं पश्चातिथ्यादर्शनादिति न तद्दर्शनं। किं तर्हि वचनं तत्॥ ॥पश्चातिथ्ययोर्वचनात्॥ ॥यदा सकलस्यानुयाजार्थ
तातदानुयाजाभावे उपभृत्यग्रहणे प्राप्तेर्वचनाच्चतुर्गृहीतं विधीयते॥ प्राप्तिपूर्वकं हि दर्शनं भवति॥ न चेह प्राप्तिर
स्तीत्यतो वचनमिदमिति॥ अत्र वदामः॥ स्यादेतदेवं यदि कृत्स्नमनुयाजार्थत्वेनोपदिश्यते॥ न तूपदिश्यते॥ एवं हि शा

हि न स्यात्। वचनोपन्यासात्। एवं हि वचनं। त्रिस्त्रिरेव यजुषा गृह्णीयादिति। तेन नत्वप्राप्तेन तु सकृत्सकृदे
का० वेति इह सकृत्वमुच्यते॥ ननु वचनादाज्यप इतीयदेवसत्रं मुष्टौ वोत्तम इत्युत्तमशब्दस्य मुष्टिना संबंध आज्यपणा
५० प्युत्तमसंबंधेपि सति उपभृति सप्तकृत्वो मंत्रः प्राप्नोति। तथा च न वेदवाक्यं व्यवस्थितं। तेन वचनादाज्यप इति पा
रिभाषिकेनैव वाक्यद्वयोपनिबंधनं सिद्धं न वाच्यं इह सकृन्मंत्र इति। सत्यमेतदेवं वाक्यद्वयप्रतिपत्त्यर्थस्तु पुनरा
रंभः। इतरथा ह्येकवाक्यताप्याशंकेत। सकृन्मंत्रवचनविधिप्रशंसार्थं तया त्रिशब्दस्य तन्मा भूदित्यतः सकृन्मं
त्रवचनमुच्यते॥ ॥अष्टावुपभृत्यल्पीयोनुयाजाश्चेत्॥ अष्टगृहीतमुपभृति ग्रहीतव्यं। जौहवादल्पतरं। यद्यनुयाजा
संति। इहानुयाजानामेवैकस्मिकत्वात् द्विकृत्यर्थः। अत्रवदः॥ ॥चतुरन्यत्र प्रतिविभागात्॥ अनुयाजवत्कर्मणो
न्यत्र अन्यद्रव्यानुयाजके च कर्मणि चतुर्गृहीतमुपभृति ग्राह्यं। कुत एतत्॥ प्रतिविभागात्॥ प्रतिविभागेन ह्युपभो एमः
गश्चौपभृतस्य दृश्यते। प्रयाजेषु चानुयाजेषु च। तेनोभयार्थतौपभृतस्याध्यवसीयते। ततश्चानुयाजाभावे प्रयाजार्थं ५०

मेव चतुर्गृहीतं भवतीत्ययमभिप्रायः॥ ॥किंच। पश्चातिथ्यादर्शनाच्चः॥ यत्रैतावदन्यद्रव्यकेष्वनुयाजेषूपभृति चतुर्गृहीतं दर्शयति॥ अथोत्प्रयाज्यं चतुर्गृहीते जुह्वां चोपभृति च गृह्णाति पंचगृहीतं पृषदाज्यमिति॥ तथा अननुयाजकेकर्म्मण्यातिथ्यायां॥ अथोत्प्रमाज्यं सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति नत्यत्रानुयाजा भवंतीति। तत्रानुयाजार्थेन द्रव्येणनार्थ इति प्रयाजार्थमेव चतुर्गृहीतं दर्शयति॥ ॥नकृत्स्नोपदेशात्॥ नैतदेवं॥ कृत्स्नं ह्येतदष्टगृहीतमनुयाजार्थत्वेनोपदिश्यते॥ अथ यदष्टौकृत्व उपभृति गृह्णाति छंदोभ्यस्तद्गृह्णाति अनुयाजेभ्यो हि तद्गृह्णाति छंदांसि ह्यनुयाजा इत्येवं चानुयाजार्थस्यैव वचनात्प्रयाजेषु विनियोगो। यथाप्रयाजार्थस्योत्तरयोः। यदुकं पश्चातिथ्यादर्शनादिति न तद्दर्शनं। किं तर्हि वचनं तत्॥ ॥पश्चातिथ्ययोर्वचनात्॥ ॥यदासकलस्यानुयाजार्थता तदानुयाजाभावे उपभृत्यग्रहणे प्राप्ते वचनाच्चतुर्गृहीतं विधीयते॥ प्राप्तिपूर्वकं हि दर्शनं भवति॥ न चेह प्राप्तिरस्तीत्यतो वचनमिदमिति॥ अत्रवदामः॥ स्यादेतदेवं यदिकृत्स्नमनुयाजार्थत्वेनोपदिश्यते॥ न तदुपदिश्यते॥ एवं हि शा-

ऽहितः स्यात्। वचनोपन्यासात्। एवं हि वचनं। त्रिस्त्रिरेव यजुषा गृह्णीयादिति। तेनतत्त्वप्राप्तेन तदनु मकृत्सकृदे-

का० वेति इह सकृत्वमुच्यते॥ ननु वचनादाज्य इतीयदेवसत्त्रं मुष्टौ वोत्तम इत्युत्तमशब्दस्य मुष्टिनासंबंध आज्यपया-

५० स्तुत्तमसंबंधेपि सति उपभृति सप्रकृत्वो मंत्रः प्राप्नोति। तथा च न वेदवाक्यं व्यवस्थितं। तेन वचनादाज्य इति पारिभाषिकेनैव वाक्यद्वयोपनिबंधनं सिद्धं न वाच्यं इह सकृन्मंत्र इति। सत्यमेतदेवं वाक्यद्वयप्रतिपत्त्यर्थस्तु पुनरारंभः। इतरथा त्वेकवाक्यताप्याशंकेत। सकृन्मंत्रवचनविधिप्रशंसार्थं तथा त्रिशब्दस्य तन्माभूदित्यतः सकृन्मंत्रवचनमुच्यते॥ ॥अष्टावुपभृत्यसौमीयोनुयाजाश्चेत्॥ अष्टगृहीतमुपभृति ग्रहीतव्यं। जौहवादस्मात्तरं। यद्यनुयाजा संति। इहाऽनुयाजानामेवैकल्पिकत्वात् द्विकृत्यर्थो। अब्रुवन्॥ ॥चतुरन्यत्र प्रतिविभागात्॥ अनुयाजवत्कर्म्मणोन्यत्र अन्यद्रव्यानुयाजके च कर्म्मणि चतुर्गृहीतमुपभृति ग्राह्यं। कुत एतत्॥ प्रतिविभागात्॥ प्रतिविभागेन त्वप्रभो- एमः ५०
गत्रौपभृतस्य दृश्यते। प्रयाजेषु चानुयाजेषु च। तेनोभयार्थतौपभृतस्याध्यवसीयते। ततश्चानुयाजाभावे प्रयाजार्थ

थिंकृष्णोसीति प्रतिमंत्रं॥ ॥ इध्मादि प्रोक्षति कृष्णोसीत्येवमादिभिर्म्मंत्रैः प्रतिमंत्रं॥ किंपुनरिध्मं विस्त्रंस्य प्रोक्ष
ति। बर्हिश्च प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रंथिं। प्रतिग्रहणं च समर्प्पणपूर्वकं। प्रत्युपसर्गप्रयोगसामर्थ्यात्॥ तथा
च वचनं। यथास्मै बर्हिः प्रयच्छतीति॥ इध्मस्य चान्यार्थस्य प्रोक्षणं। मंत्रलिंगवाक्यशेषाभ्यां। अग्नये त्वा जुष्टं प्रोक्षा
मीति मंत्रवर्णः॥ इध्मं प्रकृत्य चाह॥ तन्मेध्यमेवैतदग्नये करोतीति। प्रयोजनं। नादृष्टार्थत्वभावेन प्रोक्षणं। यथावभृ
थेष्ट्यां परिस्त्रित्सु च परिधिसंस्कारार्थस्येध्मकाष्ठस्य॥ वेदेरपि वानेन कारणेन स्तरणाभावेन प्रोक्षणं॥ यथा गृह
मेधीये। तत्रापि मंत्रलिंगं। बर्हिषे त्वा जुष्टं प्रोक्षामीति॥ तन्मेध्यमेवैतत्तद्बर्हिषे करोतीति वाक्यशेषः॥ उपस
त्सु स्तृतायामप्येकवृत्स्तरणमस्त्येवेति प्रोक्षणं प्रवर्त्तत एव। बर्हिर्म्मंत्रे स्रुग्भ्यस्त्वेति समवेतवचनत्वात्स्रुक्
द्वित्वैकत्वयोर्विपरिणाम्यते। स्रुगभावे ज्योतिष्टोमे अनूबंध्यापक्षे स्रुक्शब्दस्याऽप्रयोगः॥ ॥ शेषं स्रुक्ष्वासि
चत्यरित्येकं स्नमिति॥ अत्र शेषस्य द्वितीयांतनिर्द्देशात्स्रुग्लानां च सप्तम्या गुणविभक्त्या निर्द्दिष्टत्वात्॥ शेषार्थते

कं० ५१

खिनां वचनं॥ यद्द्वैकृत्व उपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद्गृह्णातीत्युभयार्थता विधानं। यत्पुनरुक्तमनु
याजेभ्यो हि तद्गृह्णातीति तत्रोभयार्थविधानादनुवादः सः॥ ननु स एव विधिरयमनुवादः कस्मान्न भवति। नाते
न सकलस्यानुयाजार्थत्वे प्रयाजार्थतानुवदितुमशक्या॥ उभयार्थविधाने पुनर्यथाप्राप्तोऽनुयाजांशोऽनूद्यत इ
त्यदोषः॥ कृत्स्नोपदेशो हि स्यादेवैतदेवं नत्वयं कृत्स्नोपदेशः। पश्चात्तिष्ययोश्च वचनं स्याद्यद्युभयार्थतानस्या
त्॥ उक्तेन न्यायेनोभयार्थत्वप्राप्तिपूर्वकत्वाद्दर्शनमेवतदिति। किंच। वचनेमन्यतस्मिन्ननन्यत्रानुयाजाभावं
तीति हेतुरसमर्थः स्यात्॥ तस्मादपि दर्शनमेवेत्याह च॥ उभयार्थविधानं वेदितरस्यानुवादता॥ युज्यते त्वननुयाजा
नां स्वार्थांशस्यावलंबनं। अथानुयाजसंबंधो विधिरभ्युपगम्यते॥ प्रयाजार्थांशविध्यंशेनास्तीत्यननुवादता॥
ध्रुवायां च जु—वत्॥ वचनादुपभृति च। किंसिद्धं भवति॥ सकृन्द्विर्वा मंत्रवचनं। तद्वचनपरिग्रामं। त्रिस्त्रिरेव यजुषा
गृह्णीयादिति विधाय पुनराह तदनुसकृत्सकृदेवेति॥ ॥ इध्मं प्रोक्षति विस्रंस्य वेदिं च बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रं

एमः ५१

यज्ञेविपरिणामः॥ उपपत्त्यावाबहुत्वं॥ बर्हिषउपपत्त्यावाबहुत्वंस्तृणाति॥ अधरमूलं॥ स्तृणंअधस्तान्मूलानिकरो
ति॥ पश्चादपवर्ग॥ पश्चादपवर्गः समाप्तिर्भवति॥ नमागुदग्वा। ब्रह्मणेप्रदानंदृष्टार्थमव्याप्तहस्तः स्तरणंकथंनाम
कुर्यादिति॥ तेनपितृयज्ञेनभवति। गृहमेधीयेपिकेचित्स्तरणाभावान्नप्रदानमिच्छंति। नेत्यपरे। अस्तिहितत्रव्या
पारः॥ संनहनविस्रंसननिधानाच्छादनानि। प्रकृतौहितानिप्रत्नप्रस्तरेणाध्वर्युणानुष्ठितानि। इहापितद्क्रियेति
॥ प्रदहस्वा॥ गृहन्निष्कर्षेनिष्कृष्यनिष्कृष्य। अथोअपिनवर्हेः स्तरणीयादितिवचनात्॥ अस्मिंश्चपक्षेमंत्रावृत्तिंने
छंति॥ स्तरणक्रियासातस्या। इतरत्रप्रतिमुष्टिक्रियाविच्छेदान्मंत्रावृत्तिरिष्यते। स्तरणद्रव्यान्यत्वात्॥ यद्यपिचस्तीर्य
मारोकवेदिद्रव्यविषयास्तरणक्रिया। मंत्रोपिचतत्परः। तथापिस्तरणद्रव्यान्यत्वमात्रमंगं। कृत्यस्तत्रकृतामंत्रावृत्ति
रभिहिता। नग्रहणान्तवर्णाज्यग्रहणेष्विति॥ ॥ अत्रोद्वासनमाहवनीयस्यापिणो। विरोधात्॥ आहवनीयकल्पनेहिहवी
ः षिदृत्योरत्॥ यद्येवंकपालोद्वासनमपिकर्त्तव्यं॥ ॥ इध्मात्समिधमादायाहवनीयंकल्प्यत्फपर्युपरिप्रस्तरंधारयन्॥

क॰
५१

न्तिकेचित्॥ नेत्यपरेवेदवाक्येहिशेषस्यमूलाग्रेनैवगम्यते॥ एवंत्वाह। अथयाः प्रोक्षण्यः परिशिष्यंतेताभिरो
षधीनोमूलान्यपनिनयतीति। तत्संस्कारइवदृश्यते। ताइमाआर्द्रमूलानुषधयइति। किंच। प्रयोजनवत्द्रव्य
संस्कारएवगतेरितिप्रयोजनवद्बर्हिर्द्रव्यंतदनेनसंस्क्रियतइतिसूत्रंचयथावेदवाक्यंनेयं। य। अथयाः प्रोक्षण्यः
परिशिष्यंतइतिशेषव्यपदेशः सामस्त्यार्थः सोपि। प्रयोजनं। नाशदोषादौमूलोपनिनयनंकर्त्तव्यमेव॥ पवित्रे
निधायप्रणीतासुबर्हिर्विस्रंस्यपुरस्तात्प्रस्तरग्रहणंविष्णोरिति॥ प्रणीतासुनिधानंवाचनिकं। बर्हिर्विमुच्यपूर्वस्मि
न्प्रदेशात्प्रस्तरग्रहणंविष्णोरित्यनेनमंत्रेण॥ सचायमपच्छेदेमंत्रः॥ पुरस्तात्गृह्णातीतिवचनात्॥ ततश्चयत्रोप
च्छेदोनास्ति। यथापितृयज्ञेपरिच्छिन्नएवगृहीतोसाविितितत्रमंत्रानिवर्त्तने॥ ॥ ब्रह्मणेप्रदायसंनहनंविस्रंस्य
दक्षिणस्यांवेदिश्रोण्यांनिधायान्यैरवच्छाद्यवेदिंस्तृणात्यूर्णाम्रदसमितितृचेन। ब्रह्मणेप्रदायप्रस्तरंबर्हिः संनह
नंविस्रंस्यविमुच्यदक्षिणस्यांवेदिश्रोण्यांस्थापयित्वाअन्यैस्तृणैरवच्छाद्यवेदिंत्रिरच्छादयेत्॥ ऊर्णाम्रदसमित्य

एमः
५१

६३

णोत्तराणगंधर्वइतिप्रतिमंत्रं॥परिधीयंतइतिपरिधयः। संज्ञावैषावैदिकी। नहिलोकेपरिधिशब्दःप्रत्यस्तमिता
वऽयवार्थवृत्तितयागवादिशब्दवन्नकचिद्रूढः। नचरूपादिवत्संस्कारनिमित्तताशक्यावगंतुं। संस्काराणामविधा
ना। दृश्यतेचात्रावयवार्थः सर्वतोधानात्परिधयइति॥ रूपेत्ववयवार्थोनावगम्यते॥ संस्काराश्चविधिविहिताःछेद
नादयः। तेनतन्निमित्ततावगम्यतेरूपशब्दस्य। ननुचैवंसतिपरिधानात्परिधयइतिचत्वारःप्राप्नुवंति। नोपदेशसा
मार्थ्यात्॥ मध्यमदक्षिणोत्तराणीति॥ यत्रनुनैवंविधंवचनंनचचोदकानुवृत्तिस्तत्रचत्वारएवभवंति॥ यथापितृ
मेधेचारणात्परिधान्परिधायेति॥ प्रवर्ग्येपि। तिचेन्न। मध्यमश्रवणात्। तुल्यामध्यमेपरिधाउपश्रयतीति। त्रयाणांचम
ध्यसोभवति। येनुद्वारवेषुचतुस्रंस्त्वास्त्विति चेन्न। सूत्रारंभसामर्थ्यात्सर्ववदिति॥ परिधानयोगनिमित्तत्वेचपरिधिश
ब्दस्यपितृमेधादौनधर्मप्राप्तिः। नन्वत्रधर्मोपलक्षणार्थःपरिधिशब्दोग्निहोत्रादिशब्दवत्। संज्ञातत्वेनर्थिका। न।
संव्यवहारार्थत्वात्॥ परिधिपरिधानेशकलान्याधायमत्वेति। एकरसीयानितिउत्तरसूत्रादेवैकजातीयत्वंप्राप्तमेएक

उपर्युपरीतिसामीप्येप्रस्तरंधारयंत्समिधाहवनीयंसमर्थीकरोति। तद्वैतत्समर्थीकरणमग्नेरेव॥ दृष्टार्थत्वा
क॰ त्ततत्कार्यापन्नानामपांपरिशिष्टतांवेति॥ ॥उल्मुकेउद्दूहत्यनुयाजाश्चेत्॥ ॥अनुयाजार्थमुल्मुकोद्दूहनं।
५३ तत्संस्पर्शनेनत्वग्नेरनुयाजोर्थस्यायातयामतोपजन्यते॥ तत्संस्कारप्रयोजनत्वाच्चउल्मुकयो। एहवनीया
नुगमनेततोनानयनं। गार्हपत्यादेवप्रणीयतइति॥ तयोश्चपुनरनुसंस्पर्शनविस्मरणेनुयाजनिर्वृत्त्युत्तर
कालंनाहवनीयेनुसंस्पर्शनं। तदर्थसंस्कारत्वा। न्ननुचोत्तरपदार्थमग्निसंस्कारार्थमपीष्यते॥तथाप्याह। ते
पुनरनुसंस्पर्शयंतीति प्रकृत्यत्रयातयाम्नियदतऊर्ध्वमसंस्थितेयज्ञस्यतत्तनवामहाइति॥ न। केवलानुयाजा
र्थत्वात्॥ तत्कुतोवचनात्॥ नेवाएतेउल्मुकेउदूहंत्यनुयाजेभ्यइति। इतरदर्थवादप्रायं। तथाचसूत्रकारः। अनुया
जांश्चेदिति। तच्चैतद्यागाभिनिर्वृत्त्यर्थंद्रव्यादृष्टावयवेनोपचयसंस्कारत्वादुदकेपिभवति॥ ॥ परिधीन्परिदधात्या गमः ५३
द्रौनेकरसीयान्बाहुमात्रान्पालाशवैकंकतकार्ष्मर्यवैल्वान्सर्वालाभेपूर्वालाभउत्तराण्वादौदुंबरान्वा मध्यमदक्षि

ल्वखादिरोदुम्बरा विकल्प्यंते॥ आहवा। अभावेहिपलाशस्य वैकंकतविधिर्यतः। तेनबिल्वविकल्पादौखादिरोदुं
बराविति। मध्यमदक्षिणोत्तराननि। त्रित्वार्थंक्रमार्थंच। गंधर्वइत्येभिर्मंत्रैः प्रतिमंत्रंपरिदधाति। त्वाशब्दस्याग्नि
परत्वादवभृथेविपरिणाममिच्छंति। अग्निपरतावतत्संस्काराभिप्रवृत्तेः। सूर्यस्त्वापुरस्तात्पात्वितिवव्यक्तंअग्निपर
त्वामतोस्यापितत्परतैवेति। तदेतन्नातीवसुविचार्यालोचितमिव। परिधिपरत्वात्त्वाशब्दस्य। तत्कथमेकवाक्यत्वात्परि
धित्वेत्राभिधीयते। गंधर्वस्त्वाविश्वावसुः परिदधात्विति। यजमानस्यपरिधिरसीतिवसिष्ठैवपरिधिपरता॥ तस्मादवभृ
थेप्यन्तरः। यत्तुनरुक्तं। सूर्यस्त्वापुरस्तात्पात्वित्यग्निपरतेति। यदितस्याग्निपरताऽस्य किमायातं। अतोयमनुपन्यासः॥
इंद्रस्यबाहुरसिदक्षिणइत्यापवादिकमेतत्॥ नदक्षिणादिक्स्थितत्वाद्दक्षिणइति॥ कुतोलिंगात्॥ एषवैवीर्यवत्तमोयदिं
द्रस्यबहुर्दक्षिणइति॥ तेनपित्र्यज्ञेनविपरिणामः। मित्रावरुणौत्वोत्तरतः परिधत्तामितियुक्तरूपोत्रविपरिणामः॥ उ
त्तराशब्दस्यसमवेतवचनत्वात्॥ ॥प्रथमंपरिधिंसमिधोपसृज्यध्रुवा। तिहोत्रमित्यादधाति॥ ॥प्रथमग्रहणंद्वितीयतृतीयव्य

वृक्षस्यत्वपर्यमेवैकवृक्षीयग्रहणं॥ अपरंतुवचनाभावान्नैवमिच्छंति। नन्वेकत्वावच्छिन्नवृक्षस्यक्किपरंवचन
क० मस्ति। आस्तिजातिपरंवचनं। तेवैपालाशाः स्फारिति। ननुपालाशादिग्रहणादेवैतत्सिद्धं। सत्यमेवं। अभाव
५८ उत्तरेणेत्युक्तत्वादेकस्यद्वयोर्वाभावेउत्तराजातिर्माभूदितिएकवृक्षीयग्रहणं। बाहुमात्रा। बाहुप्रमाणा। पाला
शादीनांपूर्वस्यपूर्वस्याभावेउत्तरोत्तरग्रहणं॥ सचायंप्रतिनिधिः स्यात्तृतीकादिवत्॥ नवाऽनर्थप्राप्तत्वात्। न
ह्यर्थेनपरिधिमात्रंप्राप्नोतियेनजातिर्नियम्येत। तस्माद्विधानमेवेदं। प्रतीकेषुचद्रव्यापचारेसामर्थ्यात्तत्सदृश
द्रव्यप्राप्तावीप्सत्वाद्दृश्यप्रतीकनियमउपपद्यते। प्रयोजनं। सर्वाभावेपिनप्रायश्चित्तमिति॥ खादिरोदुंबराभावेते
वामी। खादिरोदुंबराअभावविधानाभावात्पालाशैः सहविकल्प्यंते॥ अपरेतुबैल्वैःसहविकल्पमिच्छंति। एवंत्याम्ना रामः
यते। तेवैपालाशाः स्फरितिप्रकृत्यपरिपालाशान्नविंदेदपोअपिवैकंकताः स्फयरिवैकंकतान्नविंदेदपोअपिका ५८
र्ष्मर्यमयाः स्फयरिकार्ष्मर्यमयान्नविंदेदपोअपिबैल्वाः स्फरथोखादिराअथौदुंबराइति। तेनकार्ष्मर्यमयाभावे

संभवात्॥ ॥आवृत्य वेदिं वर्हिषत्तृणे तिरश्ची निदधाति सवितुरिति॥ ॥अथस्तीर्णां वेदिमुपावर्त्तते सदं तृणमादायति
रश्चीभिर्दधातीति हि श्रूयते। तिरश्चीरस्तुरग्रे। अत एव च प्रागग्रं वेदिस्तरणं॥ आवृत्य वेदिमिति त्यवाच्यं। सामर्थ्यादेव त॰
प्राप्तेः। स्यादेवाधिकरणार्थत्वात्॥ अन्यथा हि न ज्ञायते केन तृणे निधीयेत इति॥ ॥अन्ये वाऽयुक्तत्वात्॥ अन्ये च
तृणे उपादेये। न वेदिसंबंधिनी। कुत एत। दयुक्तत्वादन्येषां। इतरेषां चैव हि तृणानां वेदिस्तरणे विनियुक्तत्वान्न च
विनियुक्तं वचनमंतरेणार्थांतरे विनियोगमर्हति। वेदितृणे अध्वर्युरादत्त इति यथा। नन्वत्रापि वचनमस्ति॥ तस्माद्वे
तृणे आदायेति। न। पंचम्यभावात्॥ पंचम्यां ह्ययमर्थो यसामुंशकाते। षष्ठ्यापि त्वयमर्थो लभ्यत इति चेत्॥ सत्यं लभ्य
ते विभक्तिव्यत्ययेन। अलक्ष्यत्यय इति चेत्॥ नान्यायविरोधात्। षष्ठ्यर्थे स्यात्संभव इति चेत्॥ सप्तम्यर्थे षष्ठी भविष्यति।
एवं चाऽवश्यंभवि निव्यत्ययेन न्यायविरोधो विनियुक्तस्य विनियोग आश्रितो भविष्यति॥ तस्मात्प्रकृते तृणे उ
पादाय वेद्यां निदधाति। इति सूत्रार्थः। तथा चोत्तरसूत्रं॥ ॥अन्यत्रापि तृणार्थे॥ अतोऽन्यत्रापि तृणार्थे अन्यान्येव तृणा

दासार्थे॥ उपस्पर्शनं च तत्संस्कारो। द्वितीयानिर्देशाद्वाक्यशेषाच्च। तैनैनानप्रेमसमिंध इति॥ प्रयोजनमवभृथेपि क्रियेत।
क॰ अस्मैतु समिदाधानं दृष्टार्थं। ततश्चावभृथे न भवति॥ ॥अनुपस्पृश्य द्वितीयां समिदधीति॥ द्वितीयाग्रहणादुपस्पर्शनम
५५ पिप्राप्तं निषिध्यते॥ ॥सूर्यस्त्वेति प्रत्याहवनीयमीक्षमाणस्तद्वचनत्वात्॥ त्वाशब्दोऽग्निपरत्वात्॥ अवभृथे विपरिणम्य
ते॥ पुरस्ताच्छब्दस्य दिक्परत्वात् पितृयज्ञे सूर्यस्त्वा दक्षिणतः पात्विति। संप्रदायेत्वस्याः विपरिणाममिच्छंति॥ तेषामभिप्रायः
पुरस्ताच्छब्दोऽप्यवचनान्न दिग्वाचीति॥ तच्चैतत्परिधिपरिधानाद्यवेक्षणांतमेकं कर्म्म कार्यैकत्वात्॥ एकं हि कार्यमग्निसंस्का
र। स कृतो वाक्यशेषा। हुत्वा हि वषट्काराद्बिभेमीति प्रकृत्य तद्यस्मै वैतरमयेनेन्धतीति॥ तथा तु श्रुतेवाऽभितः परिधयो भवं
त्यथैतत्सर्वमेव पुरस्ताद्घारं कौरोतीति। एककर्म्मत्वे च नैमित्तिकमंते भवति॥ अग्निसंस्कारत्वाच्चाग्निकार्योपन्नाम्ब ०मः
सुपरिस्तरसु च भवति। ननु वषट्कारान्तभीतिनिमित्तं परिधानमिति। तेनावषट्कारेऽजुहोतौ न प्रवर्त्तेत इति॥ नैतदेवं। न हि क ५५
श्चिद्वषट्काराद्बिभेति। न च तद्भयं परिधिभिरपनीयते। तेनाग्निसंस्कारविध्यर्थे वारमायमेत। स चाऽदृष्टोऽग्निसंस्कारो। दृष्टस्या

यते। अन्यत्रापि तृणार्थे वर्हिस्तृणसदृशेभ्योन्यानि तृणानि भवंति। तस्मादृश्यं च संस्कारैर्भवति। तेभ्योन्यान्यसंस्कृता-
नीत्यर्थः। कुत एतत्।। वर्हिःशब्दस्य जातिनिमित्तत्वात्।। संस्कारनिमित्तता शंक्यत एवेति चेत्। संस्कृतेषु वर्हिःश-
ब्दं प्रयुंजते याज्ञिकाः।। नासंस्कृतेष्वपि शब्दप्रयोगात्।। वर्हिरादाय गावो गता इति। सादृश्यात्प्रयोग इति चेन्न।।
ने। तरेतराश्रयप्रसंगात्।। यदि संस्कारनिमित्तस्तदा सादृश्यज्ञानो प्रयोगः स तत्र कथं वर्हिःशब्देन जातिनिमित्तेनै-
वोद्दिश्य संस्कारविधानमुपपद्यते।। वर्हिरादायति वर्हिः प्रोक्षतीति च। जातिनिमित्तत्वे पुनरेष दोषो न भवति। त-
स्माज्जातिनिमित्तः। एवं च वर्हिषा न यावदंस्तृणातीत्येवमादौ संस्काराणामप्राप्तिरत इदमुक्तमन्यत्रापि तृणार्थे इ-
ति।। स्रुपांजने च सर्पिरित्येतदपि केचिदेवं व्याचक्षते।। तदयुक्तं। मुक्तो ह्ययमार्थो घृतमाज्यलिंगादिति। तस्माद्यथो-
क्तैव व्याख्या।। ।। पुरोडाशपयस्यासाधनानामुपवेष्टन। पुरोडाशसांनाय्यामैंद्रवायवे प्रास्यति पयस्यां मैत्रावरुणाश्चाग्निनेधा-
नादृति।। अत्वेज्या लौकिकानि गृह्यंते इध्माप्राकरणिकानि।। तुल्यशास्त्रत्वादिकल्पः। अपरे तु न्यायत एव विकल्प

निगृहीतव्यानि। यथो पावीरसीति तृणमादायेति। कुत एतदयुक्तत्वादेव। युक्तं यदरणोत्यादरं करोतीति।। अथ स्तो-
णीयैव देदैत्वे अध्वर्युरेदत्त इति।। ननु विशेषेनौकिकमित्यनेनैव सिद्धत्वादवाच्यमेवेतत्।। नैतदेवं। तद्धि सर्वार्थनि-
राकरणविषयं। सर्वार्थेन यान्यग्निद्रव्याणि प्राप्तान्यग्निमुपसमाधाय स्तृणंतीत्यत्र उल्मुकमेवादायोपयपेयादित्यत्र च लौ-
किकमुपादेयमित्येवमर्थं।। ननु चैवमग्नीनां सर्वार्थता विरोधः।। न। निर्दिष्टकार्ये सर्वार्थत्वाददोषः।। इदं त्वसर्वार्थे-
कार्यविशेषद्रव्यनिराकरणविषयं। सर्वार्थेन यान्यद्रव्ये प्राप्ते आह।। ।। स्रुपांजने च सर्पिः।। अन्यदेव ग्राह्यं। प्रकरणे-
ष्वसंयुक्तविधानात्स्यात्सर्वस्य सर्वार्थता। तेन पशावपि सर्वार्थमेवेतदाज्यमिति पांजनमाशंक्यते।। यद्येवं किमिति न
भवति। नाकृतकार्यविशेषसंबंधात् इत्यदोषः।। कार्यविशेषसंबंधाविशेषाद्दर्शविशेषेनौकिकमित्यनेन न तर्हि पुनरुक्त-
ता।। न। तद्धि नत्यावगतकार्यविशेषसंबंधविषयमिदं तु प्रकरणावगतविषयमित्यदोषः।। अन्यत्रापि तृणार्थे त्यस्य सू-
त्रस्यापरा व्याख्या।। अन्यं वा युक्तत्वादित्यनेनैवोपाकरणतृणादिष्वन्यत्वसिद्धेः अवाच्यमेतदित्यतोन्यथा व्याख्याप

नयेति घृताची। तद्युक्तमिव। उपभृति ध्रुवायां चासंभवात्॥ नहि ताभ्यां घृतमुच्यते। चिंतायाः प्रयोजनं॥ करणपक्षे न विपरिणामः। प्रियेण धाम्नेत्यस्याप्यप्रयोगमिच्छंति केचित्॥ धामशब्दस्याज्यविषयत्वात्॥ एतद्धि देवानां प्रियतमं धाम यदाज्यमिति हि श्रूयते॥ मा त्वं घृताच्यसि जुहूर्नाम्ना सेदं प्रियं सदस्त्वासीद प्रियेण धाम्नाज्येनोपेता सतीति वाक्यार्थः। तदेतदनुपपन्नं। नहि धामशब्द आज्यविषयः। धामानि त्रयाणि भवंति स्थानानि नामानि जन्मानीतित्यभियुक्तोपदेशः। तस्मात्प्रियेण धाम्नाभिहिता सतीदं प्रियं सदस्त्वासीदेति। यत्तु धामशब्द आज्ये दृश्यते स कथंचिदुपचारवृत्त्या प्रतिपत्तव्यः॥ ॥एवमितरे उत्तराभ्यां प्रतिमंत्रं बर्हिष्युपभृतं ध्रुवां चावकृष्टेन शंवे। एवमितरे उत्तराभ्यां प्रतिमंत्रं बर्हिष्यासादयति॥ के ते इतरे इत्यत आह। उपभृतं ध्रुवां च। अनुपूर्वं मवकृष्टे। मंत्रांतरविधानात्तत्वात् बर्हिषीति च प्रस्तरनिरासार्थत्वात् एवं शब्दः प्रतिग्रहणविषयः समर्पणपूर्वकं ग्रहणं यथा स्यादिति। नन्वितरे इत्युक्तत्वात्॥ उपभृतं ध्रुवां चेत्यवाच्यं। वाच्यं वा॥ स्फ्यासादनप्रतिपन्नार्थत्वादितरथा त्वाधेयस्याज्यस्यासादनं प्रतीयेत॥ गुणत्वादधिकरण

क॰ ५७

मिच्छंति॥ सवनीयपाणशेषस्य हविःशेषभक्ष इत्यनेन यजमानाऽशने विनियोगः। तत्र च पुरुषार्थत्वादभक्षणेऽप्यदोषः॥ ननु चैवं सति प्राकृतं चतुर्धाकरणं कस्मान्न भवति। नान्यत्र विनियोगशासनात्॥ अतएवमुक्तं पुरोडाशपयस्याधानासु वेछत्विति॥ ॥तयोः प्रस्तरं स्रुग्गणात्स्रुक्प्रदसमिति॥ तयोर्विधृत्योरुपरि प्रस्तरं स्रुग्गणात्संप्रदत्तमित्यनेन मंत्रेण। अंगप्रधानार्थं जुहूधारणार्थत्वात्सिद्धपत्ते देव पितृभ्य इति विपरिणम्यते मंत्रश्चरितार्थाभिधानात्॥ ॥अभिनिदधात्या त्वा वसव इति। अभिनिधानं पाणिद्वयेन क्रियेत। प्रसिद्धिलिंगाभ्यामित्युक्तस्रुक्ष्वभिन्यासे ॥ ॥सव्याऽन्यं जुहूं प्रतिगृह्य निदधाति घृताचीत्य। भिनिहित एव सव्येन पाणिना भवत्सव्यदक्षिणेन जुहूं प्रतिगृह्णातीति श्रूयते। प्रतिग्रहणं च समर्पणपूर्वकं। प्रत्युपसर्गप्रयोगसामर्थ्यात्॥ बर्हिषस्त्वस्कन्नोसमर्पणं विहितं॥ अथास्मै बर्हिः प्रयच्छतीति। स त्रितं बर्हिः प्रतिगृह्णोति। घृताच्यसीति मंत्रश्चरितार्थाभिधानाद्धि कृतो विपरिणम्यते। यथागृहंमधीयारावः नाज्यस्कचासादने घृताच्यसीति पदद्वयं निवर्त्तते॥ घृतमंवितामस्यामिति घृताची॥ अपरे त्वाहुर्घृतामच्यते

रमः
५७

ष्यति कपालमंजने। नयुगपद्दशकपत्वा। देवं सति यानिधर्म्मे कपालानीति बहुवचनमंजनक्रियाव्यवच्छि
न्नसमुदायसापेक्षं। पात्रप्रोक्षणमंत्रवत् पूजार्थं वा॥ ॥तद्धींवा। कपालांजनं॥ ॥संख्ययोद्वासयति। संख्या
शब्देन करणभूतेनोद्वासयतीत्येतदुक्तं भवति॥ तत्रैतद्विचार्यते। किमेकमिति प्रयोगः सर्वत्र। उतैकं द्वे त्रीणि
ति। उत प्रथमं द्वितीयं तृतीयमित्येव। कमुद्वासयामीति प्रतिकपालं प्रयोगः। एकमिति हि संख्याशब्दः सच प्राथ-
म्यादिवितेष्वपि सर्वत्र प्रयुज्यत इति। तदेतदयुक्तं। नत्येकशब्दः सर्वत्र प्रयुज्यमानः समर्थो भवति। एवं चेदे-
कं द्वे त्रीणीति प्रयोगः॥ तथा सति यथावत्संख्यासंख्येयसंबंधात्सामंजस्योपपत्तिः॥ एतदपि नोपपद्यते। नहि-
द्वितीयकपाले द्वित्वविशिष्टमुद्वासनं। तथा तृतीये चतुर्थे च॥ अतः पूरणप्रत्ययांता संख्या परिगृह्यते॥ प्रथमं द्विती

स्य। अथ पुनरुपभृद्ध्रुवयोर्ग्रहणे क्रियमाणे स्रुक्सादनमेतदिति ज्ञापितं भवति। तत्कथमिति चेत्॥ वचनात्॥
क॰ ५८ घृताच्यसि जुहूर्नाम्नेति जुहूं उपभृन्नाम्नेत्युपभृतं ध्रुवा नाम्नेति च ध्रुवां। मंत्रलिंगात्। जुहूर्नाम्नेत्येवमादि॥ प्रयो-
जन। आज्याभावेप्यासादनमिति॥ अपरे तूपभृद्ध्रुवाग्रहणस्य फलं व्यावर्णयंति। ध्रुवादाज्यपात्रस्यासादनक्र-
मसार्थं। तत्पुनराचार्येणाभिहितमेव। उपभृतामादनमित्युक्त्वा प्रियेण धाम्नेति वा विशेषोपदेशादिति॥ ध्रुवादाज्य-
पात्रस्य चावकाशव्युदासार्थं उपभृद्ध्रुवाग्रहणं। तत्कथं। सत्युपभृद्धिकारत्वात्। उपभृतोन्यपाभरणं कार्यं। न च तत्स्य-
दाज्यपात्रेण क्रियते। अत एव चार्थे गृहीतत्वात्तस्यासादनादि न भवति॥ ॥पुरोडाशाच्चाभिघार्योद्वास्योपस्तीर्णे निधा-
यान क्लिप्तस्ते प्राण इति। उपस्तीर्णे इति पूर्वेण तरं द्रष्टव्यं। तद्भूतोपदेशात्॥ उद्वासोपस्तरणमशक्यं कर्तुमभिघारणं हि
विर्मोत्वस्यस्या। तत्संबंधेनोपदेशात्॥ पेटूरविरभ्यक्तं परभिधारितं तत्तजुष्टं तन्मेध्यमिति। सूत्रकारस्य पुरोडाशे लक्ष- रामः ५८
यति॥ ॥यथादेवतमन्या। दित्युक्तार्थं॥ ॥प्रत्यनक्ति कपालानि यानि धर्म्मे कपालानीति॥ कपालादेशेन विधानसामर्थ्या-

श्वमेधे विरोधात्प्रतिप्रस्थाता सवनीयान्पशूनारभ्यालंभने कृते अध्वर्युरन्नहोमाभिप्रवृत्त एव आत्मानं संस्पृश
क° ति॥ ॥अत्रवाव्रतोपायनं॥ तुल्यप्रशस्त्वात्॥ ॥ इति कात्यायनीयमन्त्रविवरणे कर्कोपाध्यायकृतौ द्वितीयोध्या
६० यः समाप्तः॥ ॥ शुभ श्रीसंवत् १९३७ ॥ आश्विन्यकृष्ण ११ बुधवार सर्मप्रम ॥ ॥

रामः ६०

क° यत्नीयमित्येवमादि॥ एवं संख्योद्ग्रसनं कृतं भवति। यथावत्संख्यासंख्येयसंबंधश्च। तथा च कपालनाशे सं
५९ छिन्ने प्रायश्चित्तविधानमुपपद्यते। ननु च प्रथमशब्दस्य द्वितीयापेक्षत्वात् द्विकृतावेककपाले अप्रयोगः। उच्यते।
न विकृतिविशेषणा प्रकृतौ पदार्थावधारणमुपपद्यते। प्रकृतिविशेषणा हि विकृतावधारणं युक्तंरूप। मतो
पङ्क्तिर्विरेतारिति॥ ॥ प्रियेणधाम्नेति हवी॰ षी वेद्यां कृत्वा ध्रुवा अ आसदन्निति सर्वाण्यालभते। बहुवचनं स्थाल्य
पेक्षया। सर्वशब्दश्च जोहवाद्यपेक्षः। मुख्यक्रमेण चासादनालंभने॥ क्रमान्तराभावात्॥ यज्ञ१ निशब्दश्च बहुयजमा रामः
नकेविपरिणम्यते॥ ॥पाहिमामित्यात्मनं। आलभन इति वर्त्तते॥ स चायमात्मसंस्कारः करिष्यमाणप्रयोजनः। ततश्चा ५९

ब्रूहीत्याग्नयेसमिध्यमानायानुब्रूहीत्यमुंमंत्रमाह।सोयमग्निशब्दोजात्यपेक्षः।आकृतेःपदार्थत्वात्।तस्य च
रुणप्रघासेष्वनूहः।इध्मपोत च।आसादयहवींषिअग्निंमथ्यतीतिप्रकृत्याग्नेर्बहुरेवाहाग्नयेसमिध्यमानायानुब्रू
न्त्रहाभावः।तथा।प्रतिप्रस्थातायोदेतिप्रतिप्रस्थातास्तंमन्थत्यग्निः।संमन्थेद्याविति।तथाचाग्नेर्बहुरेवाह।।बहुत्व
च्यास्याभिसमिध्माधायाग्निमथीसंमृडीत्येकवचनांतोग्निशब्दः।एवंदर्शतिआग्नेयेपितुल्यत्वाद्विपरिणा
मएव।।आग्नेयेनोद्देहीत्येवमादौ।ननुचाग्निभ्यांप्रणीयमानाभ्यामनुब्रूहीतिद्विवचनमपिदृश्यतेनवक्ष्यातिपरे
णोपपद्यतइति।नैषदोषः।वचनेहितद्व्यक्तिपरं।व्यक्तेर्हिजातिशब्दमंतरेणाप्यनुपपत्तिरिति।। ।।होतरिति
चैके।होतरित्येवंचैकेआहुः।तच्चैतद्धोतपदमनुब्रूहीत्येतस्मात्प्रागवक्तव्यं।तदुदेकेआहुरग्नयेसमिध्यमानायहो
तरनुब्रूहीतिवचनात्।। ।।प्रथमस्थानेनप्राक्स्विष्टकृतः।।स्थानशब्दःसवनाभिप्रायः।। ।।मध्यमेनेडायाः।।स्वि
ष्टकृन्नृतीयंतंमध्यमेनसवनेन।। ।।शेषमुत्तमेन।सचायंसवनधर्मउच्चैर्ध्वनिकारणं।नपरत्वं।यस्पउच्चैर्ध्वनि
तउतोविशेषोवक्तुंशक्यतइति।। ।।संतनोतिवमेनुब्रूहीत्याहयजमानः।सचायंहोतःसंबोधनार्थत्वान्नो

क·
१

ॐनमोयज्ञपुरुषाय।।होतृषदनंकृत्वापरेणवेदिंश्रोणिंवोत्तरेणेध्मात्समिधमादायाग्नयेसमिध्यमानायानु
ब्रूहीत्याह।होतायस्मिन्सीदतितद्धोतृषदनं।समाचाराद्वेदविहितं।।नन्वकुशोत्तरीयामुपरिष्टात्तृणनिरसनो
पदेशसामर्थ्यात्।कृत्वेतिकरोतिरयमभूतप्रादुर्भाववचनः।।शब्दसामर्थ्यात्।।दृश्यतेचकर्मसमवेतफलसन्निपत्यादी
ना।स्थापनार्थोवा।परेणवेदिमितिप्रदेशनिर्देशात्।किंच।कृतेरचोदितत्वात्।सत्कृतद्रव्यस्यैवकर्मण्यभिप्र
वृत्तिसामर्थ्यात्।क्रियासातत्याविच्छेदात्।सूपादीनांत्वाहृत्यैवोत्पत्तिश्रोयते।तस्मादेषमन्यमनेन।।यत्तुकरो
तिरयमभूतप्रादुर्भावइति।।तदनैकांतिकं।।मन्यत्रापिदृष्टत्वात्स्यादेतकरोतीतिसंस्कारेगोमयानिकरोतीति
संहारे।।घटमत्रकुर्विति स्थापने।।तस्मात्स्थापनार्थएव।अपरेणवेदिमितिलिंगादश्मवसानं।एवंवालो
कइत्युदङेजतीतिप्रकृत्याह।अंतराचाएतदाहवनीयंचगार्हपत्यंचास्तइति।वाश्रोणिंउत्तरेणेतितुशा
स्त्राद्यद्येवंश्रोणिमुत्तरेणैवेतिअवधारणं।।ननुलिंगविरोधः।नोदयामनतिविशेषत्वात्।।एवंवालोकइ
त्युदङेजतीत्यभिधायसंस्तौतिअंतराचाएतदाहवनीयंचगार्हपत्यंचास्तइति।साचोपचारवृत्त्याअंतराश्रा १
श्रोंतरेवांतरइति।।इध्मात्समिधमादायाग्नयेसमिध्यमानायानुब्रूहीत्याह।।इध्मात्समि ।। ।।

702

अमिति वा प्रयोगः। अत्र च कर्तव्यर्थेऽवबाधने अमुष्येति द्विषच्छब्देभिचरं नन्यत्रादीत्यभिधानात्। यद्यप्यभिचरं
नामादिशति। तत उदकोपस्पर्शनं भवति। ननु च द्वेष्य द्विषतो नामादेशो वर्ष्यं भावी यत्र को विशेषः। उच्यते। कु
द्विष्य इति ब्रूमः॥ यदाभिचारकुर्वाना मादेशः। तदैवोदकोपस्पर्शनेन कर्तव्यरूपताया मिति। अन्यैरत्र नै ५
वाभिचारमिच्छंति। न ह्यत्र वचनमस्ति यथावज्ञाभिमर्शनं जपेद्द्विषतो वध इति। यदि नाभिचरेदित्युक्त्वा पशु अभिच
रेदमुष्य वध इति ब्रूयादिति। एवं स्फोटे कृष्णहरणेपि वचनं। तथास्ति च यजुर्हरणे। यद्यु अभिचरेदिममतो मा मो गि
ति ब्रूयादिति। वचन एवैकं च तत्सूत्रं। अमुष्येति द्विषच्छब्देभिचरं नन्यत्रापि। न चात्र वचनं। अभिचारभावात्। कु
त उदकोपस्पर्शनं॥ ॥यावत्सामिधेनीर्देवेदिममहं तावतिथेन वज्रेणेति। अयोगार्थमिदमारभ्यते। यावत्यः सामिधे
न्यो-स्मिन्कर्मणीति वेद विजानीयादिदमहं तावतिथेन वज्रेणेति। ननु चात्र पंचदशे वसामिधेन्यः। तत्र या वृत्ता मिधे
नेवेदृशवाक्यं। सत्यमेवं। एवमेव विहिता अभिधीयंते। अथ वैकविंशतिसंख्या पंचदशत्वापनार्थं। एकविंशतिरस
मिधेनीरपि दर्शपूर्णमासयोरनु ब्रूयादिति। इदमहममुमवबाध इत्यत्राभिहित एव इदमहमिति शब्दः पुनरि

भोजे. तेनन प्रयोक्तव्यः। इहैव होतृसंबोधनमन्यः करोमीति तदुक्तं। गुणेष्वप्रतिनिधिः परार्थत्वादिति। सत्रेष्वेवैक एवानुवदति।
२ त्वात्माभिवादिपरसंबंधेष्वात्मनः किंचित्साध्यते। यदनुच्चारणे यजमानानां संस्कारपरिलोपश्चाशंक्यते। त
स्मादेक एवाहेति॥ ॥ अंगुष्ठाभ्यां चावबाधते पादाभ्यां वेदमहममुमवबाध इति द्वेष्यं अंगुष्ठाभ्यां चावबाधते।
अवबाधनमाक्रमणं। चशब्दाद्यजमानः। इदमहममुमवबाध इत्यनेन मंत्रेण द्वेष्यं। एवं च अमुमित्यस्यस्थाने
द्वेष्यस्य नामादेशः। स च कर्तव्यो न पुरुषार्थः। आरभ्यमित्युपदेशसामर्थ्याद्यदि हि पुरुषार्थता स्यात्। न द्वेष्यामा
वेशात्तस्यावबाधनमुपदिश्येत। उपदिश्यते च तस्मात्क्रतूपकाराय द्वेष्यस्यावबाधनमिति निरवद्यं। पादा ५८
भ्यां वेति इयमवधारणा। माध्यंदिनीयायां तु विशेषपाठः। तस्माद्देतास्वनूच्यमानासु यं द्विष्यात्तमंगुष्ठाभ्याम
वबाधेति। काण्वीयायां तु विशेषपाठः। पादाभ्यामंगुष्ठाभ्यामिति। इष्यते च सामान्यस्य विशेषविषयता तेन वि
कल्पः। पादाभ्यामेवेत्यवधार्यतरामिति इदमहमिति चासत्यप्यात्माभिवादिपदप्रयोगे पुरुषार्थरूपताभावात्। स
वेश्वविपरिणामः। अत एवैकः कुर्यादिति॥ ॥ आभावे द्विषंतं भ्रातृव्यमिति वा॥ द्वेष्यस्याभावे द्विषंतं अवबाधेयात् एम २६

ख्या॰

ध:र्मो भवंतितत्वानुपपत्तिः काष्ठानां। अष्टादशेध्ममित्युक्तपरिमाणत्वाद्यदि वृद्धिरभ्युपगम्येत। साहि निःप्रमाणिकाख्या
त। नहि सामिधेनीनामिध्मस्य च परस्परतोंगांगिभावः। तस्मात्समिद्दूरतिषागतरत्य त्र्यक्षतिरनुकृता। एवं हि श्रवणं। स
मिद्धो अग्न आहुतेत्यतः प्राचीनं ८ सर्वमिध्ममभ्यादध्यादिति॥ ॥अनुवचनांते वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेण पू
र्वमाघारमाघार्याग्निमग्नीत्संमृड्ढीति॥ अनुवचनांतः सामिधेन्यंत उच्यते। त्रिरेव प्रथमां त्रिरुत्तमामनवानेन तु
ब्रूयादिति हि प्रकृत्य आह॥ एतदनुवचनमिति। अपरेस्तु कल्पकारांतराभिप्रायात्सुपजाव यजेत्येतदनुवचनं मन्य
ते। तदभिप्रायः। अग्ने महाँ असि ब्राह्मण भारतेत्यादीध्यमानाग्न्यनुवादितया सामिधेन्यनुवचनैकदेश ५ तामिभि
तदंते वेदेनाहवनीयस्य त्रिरुपवाजनं कृत्वा स्रुवेण पूर्वमाघारमाघारयति। न चैतदुपवाजनं प्रसिद्धितादृष्यात्
दृष्टार्थं। उचितं ह्यग्नौ काष्ठान्याधाय धमनोपवाजनमिति। धर्ममात्रं वा द्रव्यविशेषनियमाद्वेदेनेति। संख्यानि
यमाच्च त्रिरिति। नच वेदस्य वोणत्रित्वविशिष्ट उपवाजने दृष्टमिति हित्रिः। तस्माद्धर्ममात्रं। प्रयोजनमवाराव
गक्रियते। स्रुवग्रहणं तु जुह्वा निवृत्त्यर्थं। होमे हि जुहूः परिभाषितेति। आघारमिति संज्ञानिर्देशः। आघार्येति

श्रौ २

कर्क ३

होत्राहरणं तावतिथेन वज्रेणेत्यस्यावसरार्थं। तावतिथ इति हरणमप्रत्ययांतः। तावतीहरणस्तावतिथ इति। पंचदशानां पू
रणः पंचदश इति। यद्येवं पित्र्यायां सामिधेनी त्रित्वेतीयप्रत्ययांतत्वात्त्रिःशब्दस्य तृतीयेनेति प्रयोगः। उपसंख्यानात्तादसंख्या
देर्मडिति मट्प्रत्ययांतत्वान्नवशब्दस्य नवमेनेति प्रयोगः॥ ॥प्रतिप्रणवमाधानं॥ सामिधेन्यनुवचनं कुर्वतो होतुः प्रणवे प्र
णवे इध्माधानं कुर्यात्। स चायं कालार्थः संयोगः। उभयोरप्यर्थता दिध्मोऽग्नीधनार्थः। सामिधेन्योपीध्यमानानुवादित्यः। न
च वचनमंतरेण गुणयोगिना गुणितेष्यते। यत्तु सामिधेनीयाज्यारंभ एवाकृतिरिति सूक्तिमात्रं तत्कालार्थमुपपद्यते। प्रयो
जनं। मानुषार्थवाराद्युक्तायां सामिधेन्यां प्रसिद्धिमरध्मकाष्ठे सामिधेन्यनूच्यतह वेति। उभयं चैतदिध्मनाभावे वरूथा
दीनि वर्तंते॥ ॥समिद्धो अग्न इति प्रागतः सर्वमिध्ममेकवर्जमनुयाजार्थेन। समिद्धवत्याः प्रतीकात् प्राग्यः प्रणवः तत्र सर्वमि
ध्ममभ्यादधाति। एकमिध्मकाष्ठं वर्जयित्वा यद्यनुयाजाः संति। तच्चैतदिह वैकल्पिकत्वादनुयाजानां विकृतिविषयं। स
मिद्धूरस्यतः शाब्दोपादानसामर्थ्यात्केचित्सामिधेनीविवृद्धावागंतूनामंत्यायां सर्वेध्मप्रक्षेपमिच्छंति। तत्तु नरनुपपन्नं। प्र
हृतो हि समिध्यमानो अध्वरस्यास्याः प्रणवे सर्वेध्मप्रक्षेपः कृतः। विकृतावपि चोदकानुग्रहात्तत्रैव कार्यः॥ किंच। यत्रव

शम ३
लेपा

हुत्वा न क्रमश्च आश्रीयते। अग्निसंस्कारस्थायं। तेनप्रदक्षिणोपचारोदक्संस्थतासंपादनाय प्रथमे दक्षिणसंमार्गः॥ अ
परमाहवनीयादंजलिं करोति नमो देवेभ्यः स्वधापितृभ्य इति दक्षिणात उत्तानं। आहवनीयस्यापरतो नमो देवेभ्य इत्य
नेन मंत्रेणांजलिं करोति। नमस्कारार्थत्वाच्च पुनरंजलिः॥ स्वधापितृभ्य इत्यनेन दक्षिणतः उत्तानमंज
लिं करोति। तदेतदंजलिकरणमुत्तराघारार्थं। सक्रवोत्तरमाघारमाघारयिष्यन्पूर्वेणाक्रचानंजलिं निदधातीति
वचनात्। प्रयोजनं। तदभावे भावः॥ अथ उपस्थस्य सुयमे मइति जुहूपभृतावादायोत्तरांगुष्ठं कृत्वा दक्षिणानिका
मतं घृणाविस्रावितिः। अपामुपस्पर्शनं पित्र्यमंत्रमुक्ते निपरिभाषितत्वाद्वाच्यमेतत्। अतः प्राचीनावीत्यादि बुद्धा
सार्थं सुयमे म इत्यनेन मंत्रेण जुहूपभृतावादत्ते किंतूत्तरांगुष्ठं कृत्वा प्रर्वतनं। नन्वेतदवाच्यं पाणिभ्यां जुहूपरिग्र
हे पभृत्याधानमादानकालस्त्वक्तत्वात्। उच्यते। तत्सर्वविषयमेतत्तत्राघारार्थमित्यदोषः। सर्वार्थत्वे वात्रा
[illegible]श्रद्धाव्यापित्वं चेन्मंत्रवदादानस्योत्तराघारार्थतां ज्ञापयतीति। इतरथा हि जुहूपभृतोरादानोपदेशेन विधा

कं॰ ४ चरुत्वादिगुणपरिग्रहार्थं। अत्र च प्रजापतिर्देवता। निरुक्तत्वात्सूत्रकारप्रस्थानाच्च। पूर्वोदेवतासामान्यादिति। स्वाहा
कारस्यानभिभाषितत्वात्। स्वाहाकारः सर्वत्रेति। न चात्र तिष्ठद्धत्वात्। न स्वाहेति विना निरुक्तं हिमन इति। परिभाषा
न्यविषया। अग्निमग्नी संमृड्ढीत्ययं मंत्रश्चोदितार्थाभिधायी। विकृतौ विपरिणम्यते। पदार्थत्वाच्च सर्वोद्यारोपावदुक्ते
निवर्त्तते। उपवाजनं त्विद्रव्यसंस्कारात्प्रवर्त्तत एव॥ ॥ इध्मसंनहनैस्त्रिःपरिधिसमामृष्टिमेवाजजिदिति त्रिस्त्रिः परि
क्रामं॥ इध्मसंनहनैः फरणाद्वे तैस्तु परिधीनग्निं त्रिस्त्रिः परिक्रम्य संमार्ष्टि अग्ने वाजजिदित्यनेन मंत्रेण। सन्नायं होम
साधनभूताहवनीयद्रव्यसंस्कारत्वात्संमार्गोपावदुक्तेऽपि प्रवर्त्तते। मंत्रश्चोदितार्थाभिधायित्वादवभृथे इत्यं वि
परिणम्यते। अत्र केचिदग्निद्रव्याभिधायकत्वात्सकृत्मंत्रवचनमिच्छंति। देशभेदान्नेत्यपरे। परिधुपलक्षिता हि भिन्ना
देशाः। तथा च लिंगं। अथोपरिष्टात्तूष्णीं त्रिस्त्रिरिति। प्रतिदिशं हि मंत्रवत्सोत्तरतूष्णीमिति वचनमर्थवद्भवति। प्रतिदिशं
सकृत्सकृन्मंत्रवचनमिष्यते तदुक्रमेकैकमीहत्वाविति॥ ॥ तूष्णीमुपरि॥ एस्तुल्ल वचनानुवृत्तिसामर्थ्यात्परि
न. प्रे त्वत्रापि भवति। अनुपरिधीत्युपदेशसामर्थ्याद्घचोपधत्तमिति केचित्। नेत्यपरे। न ह्ययं परिधिसंस्कारो येनाभि रम ४ ९८

१०५

आश्रावणेन विशेष्यमाणे विशिष्टानुवादलक्षणो वाक्यभेदः प्रसज्येत। अतः सर्वार्थतेत्युक्तं। अत एव सूत्रकारे
णोहोपनिबद्धं। आह च। आश्रावणे विशिष्टे तु नियमोऽप्ययं भवेत्। विशिष्टस्यानुवादत्वाद्वाक्यभेदः प्रसज्यते। त
स्मात्सर्वार्थतैव॥ ॥वसुमतीमित्यवस्थायेतरं इति जुहोत्युत्तराघारं। अवस्थानवचनमुपवेशनप्रतिषेधार्थं
।जुहोतित्वात्त्युपवेशनं प्राप्नोति। अतो वचनात्तिष्ठतिक्रियोच्यते। तिष्ठंस्तमाघारयतीयं वा च आघारयतीति हि
श्रूयते। अत एव च दर्विहोमेऽपि तिष्ठतैवोत्तराघार आघार्यते। मंत्रवर्णाच्चात्रेंद्रो देवता। ततश्च दर्विहोमे तु इंद्रा
यस्वाहेति होमः। दक्षिणतश्च होमोऽस्य। दक्षिणतः तिष्ठन्नाघारयतीति वचनात्। सर्वाघारे तु जुहोतिस्थाना
देवोत्तरत आघारणं सिद्धं। आघारो प्रकृत्य। स यदुभयत आघारयतीति हि श्रूयते। स वायं पदार्थत्वा घावदुक्ते
निवर्तते। प्रयाजार्थं द्रव्येण वचनसामर्थ्यात्क्रियते। चतुर्गृहीतं वा एतदभूत्स्याघारमाघार्य त्रिरितः प्राचीनं प्रया
जान्यजतीति। प्रयाजार्थता वास्य वाचनिकी। स यच्चतुर्जुह्वां गृह्णाति प्रयाजेभ्यो हि तद्गृह्णातीति। एवं च प्रयाजार्थ
द्रव्याभावेऽवश्यकर्तव्यत्वादाघारस्य स्थाल्या देवैकगृहीतेन निर्वर्त्यते। यथा च दर्विहोमेषु॥ ॥आघार्यासं स्प

क. वं.
५

ग्म्यः समर्थ्यान्तरादानमात्रे प्रवृत्तिराशंक्येत। अथ पुनरुत्तरां जुहूं कृत्वेति सूत्रारंभे सति सर्वार्थस्कगादानादन्यरेतरितिज्ञापितं भ
वतिः ननु च पारिभाषिकस्य सर्वार्थता कथमवगम्यते। उच्यते। वाक्यस्याविशेषविषयत्वात्। इत्थमेव कुर्यादुभाभ्यामेव पाणि
भ्यां जुहूं परिगृह्योपभृत्यधिनिदध्यादिति। इदं तूत्तराघारावान्तरप्रकरणात्तदर्थमिति निरवद्यं। दक्षिणातिक्रामत्यंघ्रिणा वि
ष्क विति अनेन मंत्रेण। यजतिस्थानं प्रतिगमने मंत्रः। अयमपि चोत्तराघाराधिगमनविषय एवाऽवांतरप्रकरणादेव॥
॥परिधीनपरेणासंचरो होष्यतः॥ ॥अपरेणेति तृतीयान्नहि॥ एनप्रत्ययोऽत्र। एनबन्यतरस्यामदूरेऽपंचम्या इ
ति। सर्वार्थे होष्यत इति संबंधात्। ॥सव्येनेतो दक्षिणेनामुतश्च गच्छतीत्याहारेः। इतो गच्छन्यजतिस्थाने स
व्येन गच्छति। अमुतश्चागच्छन्दक्षिणेनेति॥ न च सव्यदक्षिणयोरितरेतरनिरपेक्षयोर्गमनसामर्थ्यमस्ति। तेन चरत्युपल
क्षणार्थं वचनं। एतदपि सर्वार्थमेवाविधानसामर्थ्यात्। अथातो ति क्रमणस्यैवेति हि प्रकृत्य। यत्राश्रावयिष्य
न्सव्येनातिक्रामति दक्षिणेनाश्राव्येति। ननु चैवं सति आश्रावणविशिष्टस्यातिक्रमणे सव्येतरपादनियमो भ
वति। न सर्वत्र तत्सोत्तराघारे न भवति। अत्रोच्यते। अतिक्रमणं हि प्रकृत्य सव्येतरपादनियमाभिधानं। तस्मि

कु ५
२ विप्रौम

राम
५
९९

१०६

घाभिपद्याश्रावयंतीति ।। एवं चेध्मशकलस्यापच्छेदो बर्हिषस्त्वभिपत्तिमात्रमेव ।। ।। एवं सर्वत्राश्रुतप्रत्याश्रुतेषु
उपग्रहद्रव्याणीति केचित् । तदयुक्तं ।। न ह्याश्रावणमात्रे विधानमेषामिति । होतृवरणे तु विधानमेषां । इदं वै किं
विधृतस्येदं यज्ञमभिपद्याथ होतारं प्रवृणीत इति । तस्मादेवं सर्वत्राश्रावणेऽध्वर्युः प्रत्याश्रावणे चाग्नीदिति । तथा च लिंगं ।
आश्रावयत्यध्वर्युस्तदग्नीध्रं यज्ञ उपावर्त्तते । सोऽग्नीत्रापव्याहरेदाप्रत्याश्रावणात् । प्रत्याश्रावयत्यग्नीत्तत्पुनरध्वर्युं यज्ञ उ
पावर्त्तत इति । अध्वर्य्वग्नीध्रावाश्रुतप्रत्याश्रुतेषु दर्शयति ।। ।। अथ प्रवृणीतेऽग्निर्देवो दैव्य इति ।। अथेत्यवाच्यं ।। पाठादेव तद
र्थप्राप्तेः । तन्न वरणे यजमानस्य प्राप्तत्वादध्वर्य्वर्थोयमथशब्द इति केचित् । तदेतदनुपपन्नं । आनन्तर्यार्थे हि वरणे यज
मानः परिभाषितो । नादृष्टसंस्कारार्थे । न चेतदानन्तर्यार्थे । प्रवृत्तत्वाद्धोतुः । अतो यजमानस्य प्रवृत्तिरेव । अथशब्द
प्रयोगस्तर्हि किमर्थः । इध्मसंनहनादि गृहीत्वाश्रावणं कृतं । तच्च तावन्मात्र एव माभूदत उपग्रहद्रव्यस्योत्तरत्रानुकर्ष
णार्थोऽथशब्दः । अथ प्रवृणीते । गृहीतेनैवेध्मसंनहनादिना प्रवृणीतेत्येतदुक्तं भवति । तदर्थमेव स्रुगुपग्रहद्रव्यश्रु
तिः । इदं वै किंविधृतस्येदं यज्ञमभिपद्याथ होतारं प्रवृणीत इति । अथवाश्रुतप्रत्याश्रुतयोः वरणार्थत्वज्ञापनायाथश

६

[illegible] स्रुचावेत्य जुह्वा ध्रुवां समनक्ति संज्योतिषेति । जुहोत्युत्तराघारमिति क्रियानिर्देशादवाच्यमाघार्येति । उच्यते । इद्धा
[illegible]ऽऽरंभः । श्रूयते हि ऋजुमाघारयतीति तथा संततं दीर्घं प्राञ्चमिति । असंस्पर्शीयं न संलाययन् स्रुचावेत्य यजति
स्थानां तज्जुह्वा ध्रुवां समनक्ति जौहवेनाज्येन संज्योतिषेत्यनेन मंत्रेणाग्नुक्ताभित्यध्याहारः । यद्यपि जुह्वा श्रूयते तथा
प्यंजनक्रियोपदेशात्सामर्थ्याज्जौहवपरतैव न्याय्या । ननु चैवं सति जौहवेनानक्तीति सूत्रमारब्धव्यं । नेत्याह । तथा च स
ति स्रुवस्य करणता स्यात् । अथ पुनर्जुह्वेत्युक्ते तस्या एव करणतेति साधूक्तं । स चायं ध्रुवासंस्कारोप्युत्तराघारे सति प्रव
र्त्तते । एवं ह्याह । शिरो वै यज्ञस्योत्तर आघार आत्मा वै ध्रुवा तदात्मन्येवैतद्यज्ञस्य शिरः प्रतिदधातीति ।। ।। निधायेध्मसंन
हनान्यादायाश्रावयेत्याह ।। निधाय स्रुचावपीध्मसंनहनानि गृहीत्वाश्रावयेत्येवमाह ।। स्रुग्निधाने वा यानिकं । इतर
था हि स्रुचयोः प्रयोजनाभिनिर्वृत्तेर्विमोकः स्यात् । एवं च सति स्विष्टकृदंतेपि निधानोपदेश उपपद्यते । निधाय सं
चरमध्रुस्यप्राशित्रमवद्यतीति ।। ।। अस्तु श्रौषडित्यग्नीत् । अस्तु श्रौषडित्येवं पुनरग्नीदाह ।। ।। वेदिबर्हिरिध्मशक
लमपच्छिद्यैके आश्रावणं कुर्वंति । एवं ह्यत्र वचनं । तद्धैके वेदेस्तीर्णायै बर्हिरभिपद्याश्रावयंतीध्मस्य शकलमपच्छि

90/0

त्रिः। किंच। ब्रह्मण्वदिति चनोपपद्यते। उक्तेनैवन्यायेनतु हास्यग्निरित्याह। एवंचसति सर्वपदानां सामंजस्येनैकवाक्यता। तस्मान्नस्विष्टकृदग्न्यभिधानार्थमिदमुच्चारणमिति। चिंतायाः प्रयोजनं। प्रधानदेवताभिधायकत्वे आग्नेयविकारे सौर्यादौ विपरिणामः। स्विष्टकृदग्न्यभिधायकत्वे वर्तते ह्यां। अस्मदभिधायेव विकृतएव सर्वत्र प्रयुज्यते। अस्तुवदस्तुवदिति यजमानार्षेयाण्याह परस्तादर्वाचि त्रीणि। अमुवदित्यार्षेयोच्चारणं। त्रीणि कुतः। त्रीन्वृणीत इति वचनात्। इदं हि पितैवाग्रेथ पुत्रोथ पौत्र इति लिंगात्। यजमानग्रहणं चर्त्विगार्षेयव्युदासार्थं।। ।।यावंतो वा मंत्रकृतः। वाशब्दः पक्षांतरपरिग्रहे। यावंतो वा मंत्रकृतः तावंतः नियमेनैव यावंति यस्य प्राप्नुवंति। तावंति प्रवृणीते। न त्रीणीति। तत्कथं। आर्षेयं प्रवृणीत इत्येषोत्र विधिः। एकं वृणीते द्वौ वृणीते त्रीन्वृणीत इत्यनुवादः। तथा न चतुरो वृणीते। न पंचाति वृणीत इति। आर्षे[illegible] याणि ह्येकत्वद्वित्वत्रित्वपंचत्वपरिछिन्ना [illegible]श्रावरिकायोपपद्यंते। तेनार्षेयं वृणीत इतीयते व यावंति यस्य प्राप्नुवंति तावंत्येव व्रियंते। त्रित्वविधानं तु केवलमेकत्वद्वि[illegible]योरनुकृत्यवदसंभवमात्रादेवाभ्युपेयते। मंत्रकृतो मंत्रदृश उच्यंते। न हि मंत्राणां करणं संभवति। अनित्यत्वप्रसंगात्।

द्वौ २

नुकी
७

कृः। सवैपनरग्याश्रावयतीति हि श्रूयते। अग्निर्देवो दैव्य इति देवनाग्नेरभिधानं स्यात्। प्रकृतत्वात्। न वा। सविशेषणत्वाद्धोतृपदोपसंहितो ह्ययमग्निशब्दः। तेन स्विष्टकृदग्न्यभिधायकः स्यात्। दृश्यते हि तत्र होतृपदोपसंग्रहनमावाहने। यथा जान्यभागप्रधानदेवतासंकीर्तनोत्तरकाले अग्निं होत्राया वहेति तदग्निं होत्रायावाहेवाग्न आवाहेति। तथा स्विष्टकृति। यक्ष्वदग्नेर्होतुः प्रियाधामानीति षट्कृत्याह। तदस्मादेतां देवा आहुतिं कल्पयित्वा यदेनेनैतद्रूपः समश्नन्वंतीति। स्विष्टकृदग्नेरेषाहुतिः परिकल्पिता। अतो होतृपदोपसंहितः स्विष्टकृदग्निः। तथा च सूक्तवाके अग्निर्होत्रेणेदं हविरजुषतावीवृधतेति। तदेतन्नोपपद्यते। स्विष्टकृदग्नेरप्रकृतत्वात्। न हि स्विष्टकृन्मंत्रोयं। किंच। होतृसंस्कारार्थमिदं न तेनाग्निर्देवो दैव्यो होता स होतर्यप्रचारोप्यनेनदभिष्टवायां। एवं प्रकृतवस्त्वभिधायकत्वं मंत्रस्याभ्युपगतं भवति। इतरथा त्वप्रकृतवस्त्वंतरार्थिता। प्रकृतवस्त्वभिधायकत्वैकवाक्यत्वे सत्यमुक्ततोपपद्यते। किंच। एकवाक्यतानुपपत्तेः न स्वग्न्यभिधायकत्वे एकवाक्यतोपपद्यते। देवान्यक्षद्विद्वांश्चिकित्वानिति प्रकृत्य भरतवदित्याह। भरतस्याग्निरभिधीयते एष हि देवेभ्यो हव्यं भरतीति। न चाग्निवदग्नेर्यष्टत्वं संभवति। होतुस्तु संभवति। अग्निवद्यष्टत्वं। तेनाग्न्यभिधायकत्वे भरतवदिति दृष्टांतानुपप

एम
७
१०१

१०८

भित्यस्मिन्सकलेमंत्रवाक्यउक्तेस्रुचौगृहीत्वातिक्रम्याश्रावयति।ततश्चपुरोरुग्भावः।अथयदपुरोनुवाक्यकाः अभ्या
जाभवंतीतिश्रूयते।पंचग्रहणंकर्मभेदज्ञापनार्थं।पंचत्वेतानिकर्माणि।समिद्धोमेनत्वेवसम्बद्धा आज्ञभ्यर
तिवचनात्समिद्धतमउत्सुक्तं।।यजयजेतिशेषं।समिधोयजेतिप्रथमसुक्तं।शेषंयजयजेत्येवंवक्तव्यं।अथयजयजेत्ये
बोत्तराणाहेतिवचनात्।।।।ध्रुवत्तिष्ठन्निति।।स्वनमभिक्रमणमुत्तरस्त्रेवक्ष्यति।। ।।पूर्वंपूर्वंवाभिक्रामं।एणमुत्तये।
ततश्चाभिक्रम्येतिद्रष्टव्यं।तस्मादभितरामभितरामेवक्रामेदभितरामभितरामाकुर्तीर्जुहुयादिति।तेनक्रतपदेस
मिद्धुतमे।अभिक्रमणपक्षे पूर्वंपूर्वमिति।। ।।उपभृतोजुह्वामानयत्यनवम्रंशंश्चतुर्थं।चतुर्थेप्रयाजेप्रत्युपभृतो
जुह्वामान्यमानयति।।तच्चानवम्रंशस्कंधो।।सचात्रनवम्रंशंस्समानयतीति।अधिकारमुपजीवंनाह।। ।।एवंप्रवृद्धो।प्र
याजप्रवृद्धोचतुर्थेचतुर्थेसमानयति।। ।।अनुयाजेषुचैव।।वमेवप्रतिपत्तव्यं।। ।।उत्तरांजुहूमध्युत्प्रप्राचीमवहृत्यजुहोति।
उत्तरैवजुहूरित्यवाच्यमुत्तरामिति।तेनोत्तरांप्राचीमवहृत्येतिसंबंधः।एकमेवकुर्यात्प्राचीमेवस्रुचमुपावहृत्येतिहिश्रूय
ते।अध्युत्याध्युत्यजुहोति।नसकृत्स्वतारितयाकृत्वातेनैवाधिहृत्योपभृत्याधिनिदध्यादितिवचनात्।। ।।एवं सर्वत्र।नप्र

तेनदर्शनार्थंहृञितिव्यवसीयते।दृश्यन्तेचानेकार्थताधात्वर्तो।गंधनावक्षेपणासेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु
कृञइतिआत्मनेपदप्रतिपादनेगंधनादीनर्थानष्टौदर्शयति।। ।।पुरोहितार्षेयेणवा।।तच्चैतद्राजन्यविषयं।पुरोहि
तोपपन्नेः।तथाचोत्तरसूत्रे।। ।।क्षत्रियवैश्ययोश्चनित्यं।क्षत्रियोभिषेकक्रियारहितोभिप्रेतोधस्तनसूत्रारंभवैयर्थ्यप्रसं
गादनयोर्नित्यपुरोहितार्षेयोच्चारणं।राज्ञस्तुविकल्पः।।।। मनुवदितिवासर्वेषां।ब्राह्मणादीनांमनुवदितिवाप्रवरणं
।नचसकृदेवाभ्यासकारणाभावात्।यच्चोक्तं रुद्र॰ द्विःपितैवा येत्रपुत्रोथपोत्ररितितत्प्रदर्शनार्थं।। ।।ब्रह्मण्वदाचवद्
दित्यतआरभ्यहोतृनामग्रहणांतोमंत्रः।। ।।उपांशुश्रुवाहोतृनामग्रहणंभवति।एवमपिहिश्रूयते।तच्चैतद्धोतृवरणमदृ
ष्टसंस्कारः।यावदुक्तेपिप्रवर्तते।। ।।संमृष्टाउपविशतः। अथाध्वर्युश्चाग्नीध्रंचसंमृशतीति।संमर्शनविधानात्तावेवोपवि
शतःसंनिधानात्।। ।।अग्निर्होतेतिस्रुगादापनंप्रयाजेषुसंनिधेः।स्रुगादापनविधानसामर्थ्यात्सर्वत्रपरिभाषाभाविदमु
च्यते।संनिधेरिति।संनिधानात्प्रयाजार्थस्रुगादापनविषयतैवास्यवाक्यस्य।एवंचसतिपशावेकादशप्रयाजोत्कर्षे
पुनरुच्चारणं।। ।।घृतवतीमित्युक्तेस्रुचावादायातिक्रम्याश्राव्याहसमिधोयजेतिपंचप्रयाजान्समिद्धतमे।घृतवती

ते। आगंतूनां चतुर्थपंचमाभ्यां यो धर्मः प्राप्तस्तेन संबंधं कुर्वीत। स चानुमंत्रणस्थानादिकः। कुत एतत्। स्थानात्। क्र
मादित्यर्थः। चतुर्थपंचमयोः स्थाने आगंतवः पठ्यंते। अतश्च संनिधानात् तद्धर्मसंबंधः स्यते। धर्मापेक्षायां हि सं
निहितव्यतिक्रमे कारणं नास्ति॥ ॥प्रथमचतुर्थाभ्यां वा यथालिंगं। प्रथमचतुर्थयोर्वा धर्मेण संबंधः कर्तव्यो लिंग
त। यावदुदेवत्यस्तस्य प्रथमधर्मः। य एकदेवत्यस्तस्य चतुर्थधर्म इति लिंगं च पर्युपस्थापकं। ननु चैवं सति द्वि
तीयतृतीययोरप्यविशेषात् तद्धर्मप्रवृत्त्या भवितव्यं। नेत्युच्यते प्रथमचतुर्थयोर्हि कारणमन्यदप्यस्ति। एकत्र प्राथम्यमित
रत्रानंतर्यं॥ ॥सर्वान्वोत्तमेनोपायित्वात्॥ अथवोत्तमधर्मेण सर्वान्संबध्नीयात्। कुत एतत् उपायित्वात्। तमेव पंचमं होतव्ये
प्रतितस्याकल्पसंजननाबोपायिनः आगंतवः। कथमवगम्यते येन नवप्रयाजान्यजतीत्यभ्यासेन संख्या पूरयितव्या।
नहि नवैतानि कर्माण्युत्पन्नसंयोगात् संख्यायाः। एवं च सति न्यायादुत्तमस्याभ्यासः प्राप्नोति। नहि पूर्वाभ्यासो युज्यते उत्तमेन
स्याभ्यासो यः। तेन पंचमधर्मसंबंध एवानुयुज्यते॥ ॥एतत्तु द्वाभिधारणं ध्रुवायां हविषश्च प्रभृतश्च। संनिधानाद्यजति
स्थानस्थितस्यैवाभिघारणं माभूदित्यत एतदुच्यते। ध्रुवादीनामभिघारणस्यालीपुरोडाशार्थं। तत्कथं। नाहि स्थाल्या

कर्क ९

याजमात्र एवैतत्। नहि प्रयाजान्यकृत्य श्रूयते। एवं होममात्रोद्देशेन च श्रवणं। अथातो होमस्यैवेति प्रकृत्यैतच्छ्रूयते॥ २४
नाभिदेशे धारणं। प्रकृतयोर्जुहूपभृतोः॥ अथातो धारणस्यैवेति हि प्रकृत्याम नंति। अथ हे धमध्यमः प्राणस्तस्मादु
तमुपभृच्चैवेवधारयेदिति। सर्वत्र शब्दश्चानुवर्तते। तथा च सर्वविषयमेतद्धारणं भवति। न प्रयाजेष्वेव। अनारभ्य
ह्येतदुच्यते॥ ॥प्रयाजानुमंत्रणमेकोममेकात्स्ययोस्त्वां द्विष्टिर्थं च यं द्विष्म इति। प्रयाजस्य दृष्टेस्तत्तु मंत्रणं कर्त
व्यमेकोममेति। तच्चैतद्याजमानम करणत्वात्। त्वामभिवादिपदसंबंधेसत्यप्याशीर्योगाभावादनेकयजमानके
कर्मण्यविपरिणामः॥ ॥एवं मिथुनैर्यथासंख्यं ॥ ॥न तस्य किं च नेति पंचमे। पंचमे। पंचमेमनतस्य किं च ने
त्येवं पंचमे मिथुनाजे प्रयोगः॥ ॥त्रिषिमानपचितिमान्यशस्वी ब्रह्मवर्चस्यन्नाद इति च॥ एते त्रयो यथासंख्यमनुमंत्रयी
तां एवं सामान्येवं तदनुमंत्रणमिष्यते। पृथग्विधानसामर्थ्यात्। प्रयोजनं। असंहितावत्प्रयोगः। त्रिषिमान्भूयासमित्ये
श्रौ २ वमादौ शीर्योगसामर्थ्यादनेकयजमानके विपरिणम्यते। अनुमंत्रणस्य चासंनिपातात्वोपि तोपि यजमानः करो सम ९
ति। आगंतूनां चतुर्थपंचमाभ्यां स्थानात्। नवप्रयाजान्यजतीत्येवमादौ प्रयाजधर्मपरिज्ञानो संदेह इदमारभ्य
३ सा कां ... त्वादु यास भितित ति पद म ध्याहार ः। स च ... त्व भिहि ... त एव। स प्रथमे प्रयाजममनुमंत्रयेत त्रिषिमान्भूयासमिति = ३ १०२

ब्धः स्थापयितव्यः। शेषप्रतिपत्तौ संनिहितेष्वेव कार्यमिति॥ आज्यभागाभ्यां चरत्याग्नेयेन सौम्येन। आज्यभागौ विति कर्मणोः
संज्ञा असौ च संव्यवहारार्था। आज्यभागश्रुति इज्यतामेके इत्येवमाद्यर्था। ताभ्यां चरति। चरतिरनुष्ठानार्थः। तावनुतिष्ठतीत्य
र्थः। स चैक आग्नेयः। अपरः सौम्यः। अग्निर्देवतास्याग्नेयः। सोमदेवत्यश्च सौम्यः। स्मर्यते हि देवता तद्धितार्थे ईदृक्। सोमाद्यणिति
च। नेयमस्मिन्कर्मणि इज्यमित्याग्नेयः। एवं सौम्यः॥ ॥ चतुरवत्तꣳ सर्वह्वारासु॥ सर्वह्वारास्वाहुतिषु चतुरवत्तं होतव्यं। चतुरव
त्तं जुहोतीति श्रूयते॥ ॥ अनिधायावदायावदाय ध्रुवामभिघारयत्याप्यायतामिति। अनेन मंत्रेण। अनिधाय स्रुचावित्यु
च्यते। वाचनिको हि तयोर्विमोकः। ते एते स्विष्टकृति विमोचनमागछत इत्यादि। अवदायावदायेति वीप्सा प्रतिस्रुवविषया।
चतुरवत्तविषयत्वे ह्यनुपपत्तिः। आहवनीययजतयोर्ध्रुवाया इति परिभाषितं। अतस्तदभिघारणमुच्यते। आज्यभागयोर्य
जतिलाघाज्यापुरोनुवाक्यावत्त्वमनुवाक्यावर्षेषितेनानूच्यते। तत्रैतत्संदिह्यते। किमवदानोत्तरकालमनुवाचनं। उत सह। आ
हो स्वित्पूर्वमिति। न चेहाचार्येण विशेषः प्रदर्शितः। किंतु विकृतावनुप्रहनिर्दिश्यते। पशोर्गृहीत्वानुवाचनं। तत्पुरोडाशेन
सहानुवाचनं। अवद्येनाहेंद्राग्निभ्यामिति। क्वचित्पूर्वमनुवाचनं। यथा वरुणप्रघासेषु मारुत्यामस्येनस्कंचोऽतोगृहीत्वेति।

कर्क।
१०

मभिघारणस्य प्राप्तिरस्ति। उत्तमप्रयाजसंकीर्तितदेवतासंबंधहविरभिघारणमत्रेष्यते। तच्च ध्रौवं पुरोडाशावोपभृतं च। ए
वं च प्रवाक्यशेषः। उत्तमे प्रयाजे स्वाहाकारेणैव सर्वेषु हवीꣳषि समस्यापयंनिति प्रकृत्याभ्यादृयः संकीर्तिताः। ततश्चात्रे
वसर्वयागपरिसमाप्त्या यातयामानि हवीꣳषि संवृत्तानीति पुनराह। तदेवा अकामयंत कथं न्विमं यज्ञं पुनराप्याययेमेति
प्रकृत्य स यज्जुह्वा नाज्यं परिशिष्टमासीत् तेन यज्ञꣳ समस्यापयंस्तेनैव यथापूर्वꣳ हवीꣳष्यभ्यघारयंनिति। ततश्च
स्यात्प्राप्तानभिघारणं। हविःशब्दश्चात्र गोबलीवर्दन्यायेन पुरोडाशयोर्वर्तते। अत्रैतद्विचार्यते। किं हविःसंस्कारोयं।
उत प्रयाजशेषप्रतिपत्तिः। किं तावत्प्राप्तं। हविःसंस्कारोयं द्वितीयानिर्देशात्। इध्मे च तृतीयाश्रूयते। प्रयाजशेषेण हवीꣳ
ष्यभिघारयतीति। लिंगाच्च। पुनरेवैतानि तदाप्याययत्प्रयातयामानि करोतीति। प्रयाजशेषप्रतिपत्तिर्वा दृष्टार्थत्वात्। इ
होत्रार्था यज्जुह्वा रिक्तता। तया ह्याज्यभागाविज्येते। अतस्तद्द्रव्यसंसर्गाभावे दृष्टार्थता। इतरथा हि हविरभिघारणा
दृष्टं कल्पेत। तच्चान्याज्ये दृष्टे सति। यदुक्तं हविरिति द्वितीया इध्मे च तृतीयेति तत्रापि द्रव्यबलात्तृतीयार्थे द्वितीया च
सप्तम्यर्थे। सुपां सुपो भवंतीति। लिंगं त्वर्थवादरूपं। चिंतायाः प्रयोजनं। हविःसंस्कारे पञ्च पुरोडाशाभिघारणार्थे प्रयाजशे

राम
१०
१०४

१११

६ =स्विष्टकृतः। यावंतिहवींषिसर्वेषामुत्तरा स्विष्टकृदिज्यते। संप्रतिपं नदेवतैकत्वाच्च सकृत्प्रक्षेपः। प्रतिपत्त्यर्थं कर्म =
=चैतत्तदुत्तरार्द्धस्य प्रतिपाद्यते॥ ५
द्धोमवषट्कारात्॥ अथसोमस्येषरेसर्वेयहंगृहीत्वाध्वर्युर्नीपव्याहरेदितिप्रकृत्यैतदपिश्रूयते॥ ॥आग्नेयमुत्तरपूर्वार्द्धे
दक्षिणपूर्वार्द्धेसौम्यं। आग्नेयमाज्यभागमुत्तरपूर्वार्द्धेजुहोतिदक्षिणपूर्वार्द्धेसौम्यं॥ ॥समिद्धतमेवा। उत्तरार्द्धपूर्वार्द्धे हे
कआग्नेयमाज्यभागंजुहोतीतिप्रकृत्यैतच्छ्रूयते॥ ॥ हविर्भ्यांच। वरतीतिवाक्यशेषः। समिद्धतमइति च। समिद्धोमे
नस्तेवसमद्धा आहुतय इतिश्रूयते॥ पुरोडाशावंतरेणाग्नीषोमाउपांश्वाज्यस्य। पुरोडाशयागयोर्मध्येउपांश्वाज्य
स्याग्नीषोमौयजति। अत्रपुरोडाशाविति द्वितीयोपपदविभक्तिः॥ ॥विष्णुर्वामावास्यायां होत्राम्नानात्॥ अमावास्या
यांविष्णुर्वेज्यते। अग्नीषोमौवा। एवंहिहोत्रेआम्नायते। विष्णुश्चेदिदंविष्णुरिति॥ ॥यावद्धविरुत्तरार्द्धं [illegible] याग
स्वनिर्दिश्यते। अतएवयावदुक्तेपिप्रवर्त्तते॥ ॥ तत एव होमः। उत्तरत एव होम इति। शेषात्स्विष्टकृते समवद्यतीत्येतदु
क्तं। उपांशुयाजशेषादपिध्रौवा स्विष्टकृदवदानेषात आह॥ नाज्यात्शेषात्। नस्विष्टदर्थमवदानं ध्रौवादाज्याज्जुहीत्वं।
कुतएतत्। अशेषात्। नह्येतच्छेषभूतं। ननूपांशुयाजनिर्वृत्त्युत्तरकालं शेषव्यपदेशोस्त्येति। नेति ब्रूमः। नह्येतदुपां
शुयाजार्थेवगृह्यते। सर्वस्मै तद्यज्ञाय गृह्यते यंतद्ध्रुवायामाज्यमिति। नचसर्वार्थस्यैकदेशनिर्वृत्ते शेषव्यपदेशोस्ति॥

का.कं. तत्र सर्वानुवाचनमेव युज्यते। तस्य हि विकृत्यनुप्रवृत्तिदर्शनं मारुत्यामित्युक्तं। नन्वितरस्योप्यस्ति। सत्यमेवं। तदनुवाचनिकं। अ
11 स्यापिवाचनिकत्वमितिचेत्। भवनस्यान्यपरत्वात्। वासआलंभेत्र विधीयते। सचाश्रान्तस्मात्सर्वानुवाचनंप्रकृतितःप्राप्त
मेवानूद्यत इति। पशुपुरोडाशस्यैत्वनन्यपरत्वाद्भवनस्य सहानुवाचनादिपरतैव। तस्मात्सर्वमनुवाचनं। ततोवदानं। य
स्तुनइतिकल्प्यंपैषवचनमिति। तदपिप्रदर्शितमाचार्येणातिक्रम्याश्राव्याहसमिद्धोयजेत्येवमादीसर्वयजतिप्रैषक्रमइति॥
॥अनुब्रूहीत्युक्त्वानापव्याहरेद्धोतावाश्रावणात्। अनुवाचनोत्तरकालमध्वर्युर्नापव्याहरेत्। होतावाश्रावणंयावत्॥ ॥
ऽना आश्राविते यौदात्प्रत्याश्रावणात्। प्रत्याश्रावणमस्तु श्रौषडिति आनन्तरत्येतदुक्तंभवति॥ ॥प्रत्याश्रावितेध्वर्युराहोतृप्रै
षात्। यजेतिहोतृप्रैषः। आततोनापव्याहरेदिति॥ ॥होतावषट्कारात्। नापव्याहरेदिति वर्त्तते। सोनुब्रूहीत्येवोक्त्वाध्वर्यु
र्नीपव्याहरेदितिप्रकृत्यैतच्छ्रूयते॥ ॥सोमेचग्रहंगृहीत्वोपाकरणात्॥ सोमेचाध्वर्युर्ग्रहंगृहीत्वानापव्याहरेदास्तोत्रोपाकर
णात्॥ ॥उपाकृतउद्गातारआहोतृप्रैषात्॥ उपाकृतेस्तोत्रेउद्गातारोनापव्याहरेयुराहोतृप्रैषात्। होतृप्रैषश्चउत्तमस्तोत्री एम
यायाः प्रस्तावसमनंतरंप्रैषात्तमेति। येनहोतासंबोध्यते॥ ॥होतावषट्कारात्। नापव्याहरेदितिवर्त्तते। कियंतकालमाग्रहसंव 11

112

१०५

द्विर्हविषोवदायेति।तेनयदवद्यतितद्यवमात्रंपिप्पलमात्रंवेति।शास्त्रिनोत्पद्यते।द्वेशकलेवद्यतियवमात्रेपिप्पलमात्रे
वेतिपिप्पलमात्रमितिचपिप्पलफलमभिप्रेतं।नपिप्पलमात्रं।यवमात्रेणसहोच्चारणात्क्वचिच्चदर्शनात्।यथाश्वंवोढुंवरं
वापिप्पलंवाबंधनात्समुच्चेतेति।एतद्विषयएवपिप्पलशब्दः।आज्यंचान्यतरतोभवत्युभयतोवा।अन्यतरतआज्यंकुर्याद्
धस्ताद्वोपरिष्टाद्वेतिवचनात्।तथासआज्यस्योपस्तीर्यद्विर्हविषोवदायाथोपरिष्टादाज्यस्याभिघारयति।तद्यथैवयत्तस्या
वदानमेवमेवतद्दिति।आग्नेयान्मस्तकंविरूज्यद्वेशकलेवद्यतियवमात्रेपिप्पलमात्रेवेतिवचनमंगीकृत्याग्नेयादित्युक्तं॥
॥भागांश्च।गृह्णातीतिसूत्रशेषः।तांश्चाग्नेयादेव।प्राशित्रसहचरतयासचायमुपदेशः।क्रमस्तूपरिष्टाद्वक्ष्यते।स्थितंतावद
पर्यवसितमंतराण्यत्मक्रियते।तत्किमर्थंचतुर्द्धाकरणसिद्धांतसमानन्यायतयाइतिनिरवद्यं॥ ॥अथषर्डसंवरेणब्रह्मणे
प्रदायपूर्वेणैकेवउपस्पृशेडोपंचायत्तोदक्षिणतोमध्याच्चपावद्ध्वि:स्विष्टकृद्दाज्यं।प्रक्रांतंप्राशित्रमध्वर्युसंचरेणस
र्वत्रपूर्वेणयाइहब्रवीयं:ततोपउपस्पृशतिरुद्रियंप्राशित्रइति।ततश्चतद्भावेनभवति।ततइडांपंचावत्तांगृह्णातिपा
वद्धविरितिप्रतिपत्तित्वात्।नत्ववदक्षिणतोमध्याच्चस्विष्टकृद्दाज्यमितिचोक्तं।पंचावत्तग्रहणमवाच्यं।सर्वेषांत्वल्पत्व

कर्क·
१२

॥असंसृष्टामाहुतिभिः।स्विष्टकृदाहुतिंजुहोतीतिवाक्यशेषः।सवाअभ्यर्द्धइवेतराभ्यआहुतिभ्योजुहोतीतिश्रुतेःकस्माद्रुद्रिय:
स्विष्टकृदुद्रियेणेहपशून्नसृजेद्यदितराभिराहुतिभिःसंसृजेदिति॥३॥निधायसंचरेस्रुचःप्राशित्रमवद्यतियवमा
त्रंपिप्पलमात्रंवान्यतरतआज्यमुभयतोवाग्नेयात्।स्रुग्निधानंवावनिकं।तेएतेस्विष्टकृत्तिविमोचनमागच्छतइति।संच
रश्चपरिक्षीनदेशेणसंचरोभिप्रेतः।तस्यचाभ्युद्धरणमनुयाजार्थं।स्विष्टकृतऊर्ध्वंअनुयाजार्थंअनेनसंचरेणसंचरणं।न
तुप्राशित्रसमर्पणार्थंकस्मान्नभवति।न।तस्यपाणिकमनेनसमर्पणं।अपाहिकंवाभ्युद्धरणं।नेनकरिष्यमाणेनु
योऽनन्तरानुयाजार्थितेवन्याप्प्या।यथोजनेअनुयाजाभावेभावइति।पर्शौवअंगस्विष्टकृदुत्तरकालमभ्युद्धरणं।नत्वरोडा
शस्विष्टकृतीति।ज्योतिष्टोमेतृतीयसवनेसौम्ययागसमनंतरमभ्युद्धरणं।नेतरयोःसवनयोः।अनुयाजाभावात्।केचि
त्तृतीयसवनेपिस्विष्टकृद्यागसमनंतरमेवाभ्युद्धरणमिच्छंति।नसौम्यसमनंतरं।तदनंतरमेवदृष्टत्वात्।सुक्ररूपत
रमिववैतदिति।प्राशित्रमितिब्रह्मणोभागस्तदवद्यति।अवद्यतिशब्दोपादानसामर्थ्याद्द्विरितिप्रतिपत्तव्यं।अवद्यतेहिद्विरेम
खदानसंबंधोदृष्टः।त्रित्वसंबंधोपीतिचेत्।न।विशेषसंयोगात्।त्रिर्जुमरमीनामिति।तथाचप्राशित्रेपकृत्स्नवैति।

१२
ध्रु

११३

१०६

पयतेयपयस्तत्प्रह्वंनप्राश्नातिनेदनुपहूतांप्राश्नानात्येतदेवैनांप्रापयतेयदोष्ठयोर्निलिंपतइति।इडायामंगुलिपर्वंजिनंद
र्शयति।तेनप्रकृतायामपीडायांपुनरिडाग्रहणं।पर्वशब्दःसंधिवचनः।लिंगात्।कांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परीतिदां
उ त्कांडाच्छेदात्पर्वणःपर्वणःप्ररोहतीतिदूर्वोच्यते।तत्रचपर्वशब्दंसंधिवचनेदर्शयति॥ ॥अवांतरेडामादधातिपूर्ववत्॥अ
वांतरेडामिडायाएवहोतुःपाणौसमवद्यति।अथहोतुःपाणौसमवद्यतिसमवत्तामेवसतीतदेनांउपहूंहोतारिअ
यतः।तिहिम्रियते।एवंचद्वहरणेचपंचावत्तामिति।पुरोडाशावदानादेवपंचावत्तानत्वाज्यसंसृष्टरूपत्वाद्विवेके
नगृहीतुंशक्यतइति॥ ॥इडांच॥ आदधातीत्यनुवर्तते॥ ॥सर्वेन्वारभंते।प्रकृतत्वादिडामीतिकेचित्।अपरेतुवाक्यसाम
र्थ्याद्धोतुरन्वारंभमिच्छंति॥स्वर्गस्यलोकस्यैतद्द्वारंयदिडातस्माद्धोतारमन्वारभेतेति॥ ॥इडोपहूतेतुच्यमानेआग्नेयंब
र्हिषदंकरोतिब्रध्नपिन्वस्वेति।इडोपहूतेत्युच्यमानेआग्नेयंबर्हिषदंकरोतिब्रध्नपिन्वस्वेत्यनेनमंत्रेण।विपरिणम्य
तेचासावनेकयजमानकेकर्मणि॥ ॥तंचतुर्द्धाकृत्वेति॥ तंनिर्दिश्यचतुर्द्धाकृतंबर्हिषदंकरोति।आग्नेयंचतुर्द्धाकरो
तीतिवचनादाग्नेयमित्युक्तं।चतुर्द्धाकरणस्यचव्यादेशार्थत्वात्तस्यचयजमानकर्तृकत्वात्तस्माअत्ययसामर्थ्याच्चयजमान

कर्क·
१३

प्रकृतावनार्येतिकेचित्।तदेतदसत्।नहिपुरोडाशस्याज्यस्यचतुल्यतास्कापुंपगंतुं।प्रतिपाद्यतेद्यत्रपुरोडाशोनाज्यं।अस
मुक्तविधानात्।तेनपत्नीसंयाजेडायामपिपंचावत्ततायथास्यादितिपंचावत्तग्रहणं।ननुचानुक्तेपिपंचावत्तमेवेदं।ततश्च
तत्रापिभविष्यत्येव।नेहपुरोडाशप्राधान्यात्तत्कार्येचपत्नीसंयाजेष्वाज्यप्रसंगाद्विरेवाज्यंप्राप्नोति।नोपस्तरणाभिघारणे
वाभिरिति॥तेनसुष्ठूच्यतेपंचावत्तेमिति॥ ॥यजमानभागंहवीर्द्धादीर्घप्रशीर्ष्णपुरस्तात्ध्रुवायाःकरोति।हवीर्द्धपुरोडाश
स्यप्रशीर्यपुरस्तात्ध्रुवायैनिदधातीतिश्रुतत्वात्॥ अयंचभागानामवसरः।ततश्चविनियोगक्रमेणहर्वमग्नीधः।ततोब्र
ह्मणस्ततोयजमानस्येतिध्रुवायाःपुरस्तादितिव्यतिरिक्तेदेशेकरोति॥ ॥इडांहोत्रेप्रदायाविसृजंदक्षिणातिक्रामति।भा
गेहवहितत्वादिडाग्रहणंक्रियते।तांहोत्रेप्रदायाविसृजंदक्षिणातिक्रामति॥ ॥इडांप्रतिगृह्यहोतुरंगुलिपर्वणीअ
नक्ति।प्रकृतत्वादिडाग्रहणमकार्यं।क्रियतेचपर्ववर्जनेयथानतः।क्रियेतेत्येवमर्थं।तथादर्शयति।सहोतुरिहनिर्लिंपतितद्धो
४२ तोष्ठयोर्निर्लिंपतइतिप्रकृत्याहएतद्वैमनुर्बिभयांचकारेदंवैमेतनिष्ठंयज्ञस्यपदियमिडापाकयज्ञियायद्वैमरहरक्षांसि
यद्वंनहिंस्युरितितामेतत्पुरारक्षोभ्यःपुरारक्षोभ्यइत्येवप्राशयततथोएवैनामेषएतत्पुरारक्षोभ्यःपुरारक्षोभ्यःइत्येवप्रा

एम
२३
१०७

११६

मर्थसूत्रे आग्नेयादिति। आग्नेयात्मस्तकं विरुज्येत्यतो वचनात्। अस्तु तथेति चेत्। प्रदेशविधिपरत्वाद्वाक्यस्य। तस्मात्सर्वत्र
प्राशित्रग्रहणं प्राप्यं। भागास्तु पुरोडाशसंयोगात्सान्नाय्येन प्रवर्त्तंते। याज्ञिकसिद्धं तेपि न चतुर्द्धाकरणं सान्नाय्यस्य पुरोडा
शत्वात्। तस्य च पुरोडाशसंयोगात्। प्रकृतौ ह्योपदेशिका धर्माः। सान्नाय्यविकारो वि पशौ चतुर्द्धीकरणाभावात्। अथ पशु
ऽ संमृशतीति हि प्रकृत्याहे तर्हि संमर्शनस्य कालो थयत्पुरः संमृशति यस्म उपतिष्ठंते ते विमथिष्यंत इति यद्यपि विमार्थं
प्रशंके पतान्वे संमृशेदिति चतुर्द्धीकरणाभावे विमथनाशंकायां संमर्शनविधिसंस्तव इति॥ अत्रापि तत्र इति यजमाने
नपति। चतुर्द्धीकृतं पुरोडाशमालभ्य उत्तरत्र विसर्गेपि प्रदेशात् अत्रापि तत्र इति यजमानो जपेत्॥ ॥विस्रज्यामीमं दंतेति। जपती
तिवर्त्तते। अयं चके छिन्नो वितस्यापि यजमानस्येष्यते ऽनाश्रितत्वात्। तत्तु न त्वपपन्नं। आलंभनपूर्वकत्वाद्विसर्गस्य।
तेन यथा पूर्वे प्रधुरेवमुत्तरेपीति। चतुर्द्धीकरणे च सत्यनयोः प्रवृत्तिः। तदत्रापि च्छणं भाक्तं नेनेति वाक्यशेषात्॥ ॥ एके
कमाहरतीति॥ भागेन भागमिति सूत्रशेषः। तच्चप्रकान्त्रोपहारतादर्थ्यात् भक्षणार्थं हरणं। द्रव्यसंस्कारत्वाच्च। अन्वाहार्ये
पितृयेव चेत्। न। परिक्रयार्थत्वात्। अद्रव्यसंस्कारत्वाच्चेति॥ ॥धाता इति प्रोक्तो रूपं न्यङ्गनी षेवडवतां। अथ यत्राहोपहूतेधा

कर्क॰ श्चतुर्द्धीकरणे। सर्वेषु व्यादेशाभावाद भावश्चतुर्द्धाकरणस्य॥ ॥बर्हिष्यत्विप्र आदिशतीति। बर्हिषीति नियमार्थमुच्यते। आदेशश्च
१४ वाच नैकोनस्मर्पणं ताक्त। तेनेदं ब्रह्मणइदं होतुरित्येवमादयादेशः॥ ॥उभौ वाविशेषात्। उभौ वा चतुर्द्धी क्रियेते नाग्नेय एव।
कुतः। अविशेषात्। अथ यत्र प्रतिपद्यते न चतुर्द्धा पुरोडाशं कृत्वा बर्हिषदं करोतीति अविशेषश्रवणात्। किंच चरितार्थत्वा
विशेषात्। संस्कारार्थत्वाविशेषाच्च। तथा प्रतिपत्तिसव्यपेक्षत्वादिति याज्ञिकाः। अत्रोच्यते। स्यादेतदेवं। यद्यविशेषस्या
त्र अस्ति तु विशेषः। आग्नेयं चतुर्द्धा करोतीति यद्यपि च मार्जन्या यां पुरोडाशमात्रश्रवणं। तथापि त्वाग्नेयमिति वच
नाद्विशेषनिष्ठतैवन्याय्या। न चाग्नीषोमीय आग्नेयः। यत्र हि निरपेक्षादग्निपदान्तद्धितउत्पद्यते स आग्नेयः। न च सोमसव्य
पेक्षस्याग्निपदस्य सामर्थ्यमस्ति। सापेक्षं चासमर्थं भवतीति। समर्थानां प्रथमाद्वेति ह्यधिकृत्य तद्धितान्याम्नाने। तेनाग्नीषो
मीयस्यानाग्नेयत्वाच्चतुर्द्धीकरणाभाव इष्यते। यद्येवं उभौ वाविशेषादिति सूत्रे किमर्थं॥ आशंकानिवृत्त्यर्थं अपि वा
प्राशित्रभागानामाग्नेयादिति सूत्रितं। आग्नेयाद्भागांश्चेति। तत्सिद्धं तादर्थ्यं वक्तव्यं सुभौ वाविशेषादिति। तत्कुतो वचनात्। एम
हविर्मात्रस्य हि प्राशित्रं श्रूयते। इडीं विषावद्यतीति। भागानां च। इत्यर्द्धं पुरोडाशस्य पश्चार्धेयेति पुरोडाशसंयोगः। यद्येवं कि १४
१०८

११५

रणतात्रसंभवतिमार्जनंभवति।सुपांहिस्थानेसुपःछंदसिभवंति।छंदोवत्सूत्राणिचेतिस्मर्यते।तेनात्रसप्तमीतृतीया
र्थे।लिंगाच्च।पवित्रपूतायदतऊर्ध्वमिति।केचिच्चात्रोदकेनमार्जनमिच्छंति।मंत्रलिंगात्सुमित्रियानआपइति।तत्तुन
पवित्रविधायकत्वान्मंत्राणामनुपपन्नं।उदकानुपदेशाच्च।नचान्यद्रव्यमत्रार्थेकरणंनास्तियथापसुवपाते।नचपवि
त्रान्यमत्रार्थेनसंभवति।लिंगाच्च।पवित्रेणपूताःपवित्रपूताःइति।यदिवोदकमपिसाधनंस्यात्पवित्रपूताइतिस
मासोनस्यात।असामर्थ्याच्च।यच्चश्रूयतेपवित्रवतिमार्जयंतइतितत्रापिपवित्रवद्वस्तुनिर्देशादनध्यवसायएवेत्यन्य
थानेयमिति।मंत्रश्चसुमित्रियानआपइत्युषध्यःसंत्वित्येवमंतःस्यात्परिसमाप्तत्वाद्वाक्यस्य।नचदुर्मित्रियाइति।एतेषांत
रेनविनिर्मुक्तः।नचपरादिनास्वांतस्यायोत्रसंभवत्यप्रकरणसमधीतत्वात्तस्य।प्रकरणांतरसमधीतेत्वयत्नाद्वाक्यसमुच्चयो
भवति।यथाजोतिरसीतिसमिद्भिस्तेन।। ।।यजमानस्यप्राणायानौपातमितिप्रस्तरेतेकरोति।प्रकृतत्वात्पवित्रप्राप्नोतेत्यवा
चं।उच्यतेच।तेनशाखापवित्रमुदासार्थमिति।तस्यापिसमस्यमार्जनप्राप्तिरतस्तेइतियत्नःक्रियते।अनेकयजमान
केविपरिणामोमंत्रस्य।मार्जनेपुंडाभस्तुनिमित्तत्वात्तदभावेनभवति।पवित्रप्रतिपत्तिस्तुभवतिप्रतिपत्तेरेव।। ।।त

कर्क·
१५

वापृथिवीइतितदग्नीधआदधातीतिहिश्रूयते।तत्रकेचिदिडागृहांउपस्तरणमभिघारणोपेतंषडवत्तमिच्छते।अन्यथाषडवत्ता
भावात्।तत्तुनोपपद्यते।नह्यत्रोपस्तरणाभिघारणेविहिते।कथंषडवत्तमुच्यते।।पात्रस्तमितावपवार्थइतितयाषडवत्तश
ब्दोयीडागडमवचरितउपलभ्यते।अश्वकर्णादिशब्दवत।। ।।माम्नातुपहूतापृथिवीति।। तत्रषडवत्तमग्नीत्प्राश्नातु
पहूतापृथिवीत्यनेनमंत्रेण।। अथद्वितीयसुपहूतोद्यौरिति।श्रुतमपिसत्रप्रकृतानोपनिबद्धं।वाक्यभेदादेकत्वदर्थोप
लब्धेः।। ।।आशासानेमयीदमितियजमानोजपति।। अपसिरविष्करणउपहूतइत्येवमाद्याशीःप्रार्थनमाशा
सनं।एषावाआशीरितिवचनात्।अत्रमयीदमितियजमानोजपति।अत्रयजमानग्रहणंशक्यमकर्तुं।पुरुषयोगिमं
त्रसंस्कार्योह्यस्यायेसामर्थ्यादितिपरिभाषितत्वात्।एवंतर्हिपत्नीसंयाजेडायामपियजमानोयथाजपेदिति।तत्रहि
पत्न्युपहवःक्वचिदाम्नातः।उपहूतेयंपत्नीति।आशीर्वचनेनैकवाक्यत्वान्नस्याएवजपोमाभूदितियजमानग्रहणं।।उप
हूतांप्राश्नंतिसुक्ताः।उपहूतामिडामृत्विजःप्राश्नंतीत्यर्थः।।यजमानश्च।सर्वेषामिडाप्राशित्रंभागास्त्वयावद्भक्तेपिवर्तते।
द्रव्यसंस्कारत्वात्।। ।।पवित्रयोमार्जयंतेपरेणवेदिं८सुमित्रियानइति।तृतीयार्थेसप्तमी।नह्यत्रसप्तम्यर्थःसंभवः।क

एम
१५
१०९

णागतलिंगोतभावेनसेत्युक्तं। अयंचपरिक्रियार्थः। ततश्चपक्वान्नोपहारतादर्थ्येपिदानसमनंतरंभक्षणंनभवति। च
तुर्द्धीकरणेतुद्रव्यसंस्कारात्पक्वान्नोपहारतादर्थ्याच्चानंतरमेवभक्षणं॥ ॥ उदगुद्वासयति हविश्च। उदगुद्वासन
मन्वाहार्यस्य। हविषश्चपुरोडाशादेः॥ ॥४१॥ समस्योल्मुकेसमिधमादधायाह ब्रह्मन्प्रस्थास्यामिसमिधमाधा
याग्निमग्नीत्संमृड्ढीति। समासआहवनीयएवप्रतिसंक्षेपः। तेषुनरत्नसंस्पर्शयतीतिहिश्रूयते। समिच्चयासाव
नुयाजार्थपरिशेषिता तामादायाह ब्रह्मन्प्रस्थास्यामीत्येवमादि। शेषद्रव्यंचैतत्। तत्रैकोल्मुपात्रार्थस्ततश्चतदभा
वेभावआतिथ्यादौनभवति। संमार्गविषयस्तुसंमृजिद्वारेण सर्वार्थत्वात्प्रतिपन्नार्थकर्मसाधनभूताहवनीयसंस्का
रोपजनकत्वेनानुयाजाभावेपिप्रवर्त्ततएव। तथाचसंमार्गंप्रकृत्याह॥ स्रुक्त्रायदततऊर्ध्वमसंस्थितेयज्ञस्पतद्
हादिति। अत्रकेचित्सर्वसमिदाधानमिच्छंति ततउल्मुकसमासः। ऊतएततादृवंविकनोह्युपदिष्टंनिर्दृश्यते।
पात्रसंक्षालनांतेनुयाजाः समिदादीति तद्देतदनुपपन्नमिव। नह्यत्रसूत्रभंगेकिंचित्कारणमस्ति। तदभावे
चयथास्थितसूत्रव्याख्यैवयुज्यते। येनुसमिदादीत्युक्तं। तन्यायपूर्वकत्वात्। एकस्यादिशब्दस्यलोपे

कार्क॰
१६

स्रीवः। पत्नीयोः। प्रस्तरोकरणं॥ ॥ अत्रवाब्रह्माप्राश्नाति। तुल्यश्रुतित्वादत्रवाप्राशित्रभक्षणं॥ ॥ भागमस्मैपरिहरति॥ अस्मै ब्र
ह्मणेपूर्वेणैवाहवनीयं भागंसमर्पयतीत्यर्थः॥ ॥यजमानभागंप्राशितोषिते। अपोषितेयजमानभागंचपरिहरति॥ अन्वाहा
र्यमभिघार्योद्वास्यांतराब्रह्मयजमानौहत्वावेद्यांनिधायालभतेप्रजापतेर्भागइति। सर्वार्थत्वात्तस्यान्येनाभिघारणं। आ
लंभोयजमानस्यस्यान्मंत्रलिंगाद्दानेचतस्याधिकारादध्वर्योर्वीकरणत्वात्। करणमंत्रविषयाशिषांचयजमानयोगि
त्वन्यायात्। तत्कथं। आध्वर्यवः पदार्थः। मंत्रोपिलिंगेनयजमानआशंक्येत। प्रधानभूतश्चपदार्थः गुणभूतोमंत्रस्तेनाध्व
र्योरालंभेधिकारोयुज्यते। तन्मंत्रेपिलक्षणयायजमानाभिधानमित्यदोषः। तथाचलिंगं। यांवैकांचयत्नऋत्विजआशिषमा
शासतेयजमानस्यैवसेति। ऊर्गसीत्यस्यान्नविषयत्वादूर्वादौविपरिणामः। ऊर्जंमयिधेहीत्यत्रापिकेचिदिच्छंति। त
त्पुनर्विचारयितव्यं। नहिप्रकृतेर्विषयतेष्यते। तेनान्यदेवोर्जितरूपंप्रार्थ्यते॥ ततश्चाविपरिणामइष्यते। मयिधेहीतिरा
गस्यतेविपरिणम्यते। अभिघारणंतुगवादेरनुपकारकत्वान्नप्रवर्त्तते। स्वादिष्ठेत्योदनोभिघार्यते। नचगोःस्वादिमाप्रयो
जने। ब्रह्मयजमानयोस्तुअंतराहरणंगोर्नभवति। वाससस्तुप्रवर्त्तते विरोधादिति॥ सादक्षिणा। सदक्षिणेतिवक्तव्ये दक्षि णम
१६

११६

१२०

६

ऽस्य चावभृथे विपरिणामः॥ ब्रह्मानुज्ञातोनुयाजैस्त्रिभिश्चरत्योपभृतः समानीय। ब्रह्मानुज्ञात इत्यवाच्यं सामर्थ्या
देवतत्प्राप्तेरुक्तं च। एतेनाग्निसमिद्रामेत्रितः प्रहोतीति। दाच्यं वा तदनुज्ञोत्तरकालं प्रवृत्तिर्यथा स्यादिति। अथवाप्ये
समनंतरं तदर्थपरिनिर्मितं मा भूत्। न्यायेन हि वैश्वसमनं तस्यैषार्थः प्राप्नोति तस्मात्पृथगित्यतद्दृष्टमुच्यते। ब्रह्मानुज्ञात इ
ति। तद्यथा। अनुज्ञात उत्तरेणाहवनीयं संप्रतिनिदधातीति। त्रिभिरिति चानुयाजत्रित्वप्रज्ञापनायोच्यते। अथवा
चतुर्थस्यानुयाजाभावप्रज्ञापनार्थं। यद्येवमनुयाजांतेस्त्वैवं जुहोतीति प्रकृततः स्रुग्घोमः प्राप्नोतीत्येतदेवं। अनुया
जांगत्वस्यो। तदेतत्स्वानरूपचरितं तत्तस्माददोषः। उपभृतं समानीयत्युक्तं॥ ॥अतिक्रम्याश्राव्याह देवान्यजेति॥
अतिक्रम्याश्रावणवचनमनुवाक्यानिरासार्थं। याज्याप्रैषेत्वाकृतं तो यजनयेत्यनेन प्राप्तत्वात्। अथ यदनुरोनु
वाक्यकाश्चानुयाजा भवंति विशेषवचनात्। तं निरस्तः। तस्मात्साध्वभिहितमतिक्रम्याश्राव्याह देवान्यजेति॥ ॥यज
यजेत्युत्तरौ। उत्तरौ द्वावनुयाजौ भवति यजयजेत्येवं वक्तव्यं। एवं हि प्रसक्ते। देवान्देवानीतिवा सर्वत्र नियमशब्दात्। सर्वत्र
देवान्यजेत्येवं प्रयोगः। कुत एवं नियमशब्दात्। देवान्यजेत्येवाध्वर्युराहद्येवं देवमितिसर्वं जुहोतेति। अथ यजयजेत्युत्तरयो

दर्श.
१८

न समिध आदधीयसदाद्धीति द्रष्टव्यं। समिदादाने प्रैषयोगं केचिदिच्छंति। तदुत्तरकालीनप्रैषविधानात्। न चाध्व
र्योः समिदाधानं येन दृष्टार्थतास्यादतश्चादानस्य प्रैषार्थतेति। तच्चानुपपन्नं। अदृष्टार्थप्रसंगात्। दृष्टश्चात्रार्थ आधा
नं। ततश्चतादर्थ्येनादृष्टपरिकल्पनं भवति। नन्वाधानमग्नीधोनाध्वर्योरिति। कथं दृष्टार्थतास्यादित्युच्यते। अ
र्थाग्नीधः समर्पयिष्यत्येवं दृष्टार्थतास्य भवति। तस्मादाधानार्थमेव। एवं च सत्यवभृथेनुयाजसद्भावे आधाना
भावादनादानमिति उक्तुकसमासश्चानुयाजार्थ आहवनीयसंस्कारः। तथा चास्तु तावदनुयाजनिर्वृत्युत्तरकालं पुन
रसमासः। स्वावयवेनोपवयस्य संस्कारत्वादवभृथेप्यामयि प्रवर्तते। अभिमृग्नीन्संमृड्ढीति वाक्यस्य विपरिणाम
श्चोदितार्थाभिधानात्। एषा तं इति होतानुमंत्रयते॥ अनुमंत्रणं च समिधः स्यात्। तां होतानुमंत्रयत इति वचना
त्। मंत्रलिंगाच्च। तत्तस्य वरुणप्रघासेषु विपरिणामः। एते ते अग्ने समिधौ ताभ्यामिति॥ अजानतिपजमानः। स य
दि मन्येत न होता वेदेत्यपि स्वयमेव यजमानोनुमंत्रयेतेति वचनात्॥ संमार्ष्टि पूर्ववदपरिक्रामं सकृत्सकृत्सकृ
त् समिति। पूर्ववदग्निं संमार्ष्टि अपरिक्रम्य। सकृत्सकृत्त्रिस्त्रिः परिक्रम्येति मा भूत्। सकृत् समिति च विशेषः। मं

एम
१८

११८

१२१

कर्तव्यः। तच्चोक्तमुत्तरत्र उपचारोयमिति। चतुर्थीग्रहणं धारानुयाजेग त्वपता पनार्थं। एतद्रथा ह्यनुयाजजपव्यतिरेके
णान्मदृष्टवैत्त्यादकं होमांतरमाशंक्येत। अतश्चानुयाजप्रवृत्तौ प्रवृत्तिरस्य। तदभावे भाव इति। एवं च सत्यनुयाजेनोतेस्व
रूं जुहोतीति सांगानुयाजकर्माभिनिर्दिष्टत्वे तत्कालं स्वतंत्रहोमः सिद्धो भवति। अथ यदा देवानामेव देवतात्वमत्रापि प्रया
स्यादिति चतुर्थग्रहणं। मंत्राभावेपि चात्र स्वाहाकारोस्त्येवेति वक्ष्याम उपरिष्टात्॥ ॥अभिचरंननुयाजानुमंत्रणम
शान्यमुंजहिद्धाद्दुन्यमुंजस्युल्कुष्यमुंजहीति॥ अभिचरंननुयाजानुमंत्रणं करोति। अशान्यमुंजहीत्येवमादिभिः
प्रतिमंत्रं वाक्यभेदात्। तच्चाध्वर्युः पुरुषयोगाभावात् समाख्यानाच्च॥ एवं पदद्वौ समं विभजेत्। एवमनुमंत्रण
नोविकारेनुयाजप्रद्वौ समो विभागः कर्तव्यः॥ समं स्यादश्रुतित्वादिति न्यायात्। अनुयाजप्रासो च पुरुषार्थरूप
स्याप्यनुमंत्रणस्य प्रवृत्तिरिष्टैवेत्यभिप्रायः॥ ॥स्वस्थानात्वेन चोपायित्वात्॥ न वा समो विभागः कर्तव्यः॥ किंत २।२
र्हि विकृतौ पठ्यमानानामनुयाजमंत्राणां यत्स्थानं तत्रैव न धर्मसंबंधः कर्तव्यः। ततश्च द्वितीयादीनां नाराशंसानु
मंत्रणमितरेषां स्विष्टकृदनुमंत्रणमिति। कुत एतत्। उपायित्वात्। प्रथमे त्वभिनिर्दिष्टे द्वितीये वा निर्दिष्टे तमेव प्रस्त

क.कां. १८
रभिधीयते। तत्रैवकारेण समर्थितः स्यात्। देवान्यजेत्येवावसुरा हेति। किंच॥ ॥विकृतिदर्शनाच्च॥ विकृतौ हि दर्शनं भवति।
अतिक्रम्याश्राव्याह देवान्यजेति सोपबर्हिषो द्वावनुयाजौ यजतीति। तेन नियमशब्दाद् देवान् देवानिति वा सर्वत्राबज
नेति चोत्तरप्रैरितिनु शास्त्रांतरात्। एवं च सति वरुणप्रघासादौ यत्र यजयजेति पुनर्वचनं। तत्र नियम एवेष्यत इति संप्रदा
यः॥ ॥प्रतीचो जुहोति॥ प्रतीचोनुयाजास्तद्यानरूपमिति वचनात्॥ ॥उपसस्रुव॥ अधिकारमुपजीवनाह॥ उपस
स्रुवप्रत्यंचो होमाः। तुल्यं हि शास्त्रमत्रापि प्रतीचो जुहोतीति वचनात्। कर्तुरपि प्रत्यगपसरणे प्राप्ते अनियमेवानि
यमार्थमाह॥ ॥स्रुवः चतुर्थं समानीय प्राचीं॥ चतुर्थहोमेष्विति अपश्चात्समानीय प्राचीमाहुतिं जुहोति। न च य
जतिस्थानादेत्य यजतीनां हि स्थानं परिभाषितं। तिष्ठन्नुदङ् प्राङिति। तथा चोक्तं परिधीनपरेण संचरो होष्यत इ
ति। नन्वेव होममात्राभिसंबंधात् सर्वत्रैवं प्राप्नोति। नाश्रावणाभिसंबंधात्। यत्राश्रावयिष्यंस्तत्रैनातिक्रामतीद
क्षिणे नाश्राव्येति। नन्वाश्रावणातिक्रमणविशेषे इदं वचनं। अनाश्रावणहोमेत्वनियम इति। उच्यते। एतन्मूल राम
मेवैतत्सूत्रं। वचनांतराभावात्। तस्मादाश्रावणासंबंधेष्वेवातिक्रमणं नेतरत्रेति। इतरहोमस्तु तत्र एव व्यवस्थितेन १८
११२

११८

नादिः। यद्वाभ्यस्यमानप्रतापनायेत्युक्तमेव॥ एत्यजुहूपभृतौ व्यूहत्यग्नीषोमयोरिति च जुहूं प्राचीं दक्षिणेनोत्तरेणाग्नी
षोमौ तमितीतरेणेतरां नीचां प्रतीचीं॥ एतस्यैतस्य ध्रुवविषयमवाच्यं। प्राप्तत्वादेव। तेन यजमानस्यैतस्य व्यूहनं यथास्यादि
त्येवमर्थमुच्यते। जुहूपभृद्व्यूहनं न कार्यं। जुहूं प्राचीं दक्षिणेनेत्यभिहितत्वात्। इतरेणेतरामिति चोक्तत्वात्। अतस्त
द्विकाराणां व्यूहनं युग्मासाधिमिति केचित्। तदसत्। नहि तद्विकाराणां स्रुवादीनां चोदकेन व्यूहनं प्राप्तं निवर्तयि
तुं शक्यं प्रतिषेधशास्त्राभावादिति। कस्तर्हि जुहूपभृद्व्यूहणस्य समाधिः। उच्यते। जुहूपभृतौ व्यूहतीत्युक्ते विशेषा
र्थं पुनर्वचनं। जुहूं प्राचीं दक्षिणेनेति। इतरेणेतरां प्रतीचीमिति च। अपि चोपभृत्संशब्दनमुत्तरत्र नास्त्येव। तेन जु
हूपभृतौ व्यूहतीति पूर्वमभिहिते। इतरशब्देनोपभृत्कथं नैव वक्तुं। तस्मादपुनरुक्ततेति। अग्नीषोमयोस्त्वनेन नम
त्रेण दक्षिणेस्तेन जुहूं प्राचीं व्यूहतीति। अग्नीषोमौ तमितीतरेण सव्येन जुहूत्तराम् उपभृतं नीचां प्रतीचीं व्यूहति। अत्र प्रती
चीमिति प्रत्यस्रुवीमुपभृतं कृत्वा प्रतीचीमेव केचित्स्थिरयंति। तदेतन्नोपपद्यते। यत्कारणं प्रतीचीमित्येकः शब्दः
स्य यदि वाग्रेरणो न संभवतेस्येवेति। तत्रैतेषाभिसंबंधो युज्यते। अत उपभृतं प्रतीचीं सव्येनैवमुक्त्वाह। अपां चेत

नहर वान

कर्क पिद्वान त्रयमं तृतीयं वा॥ एवं द्वितीयेभिन्ने तृतीयविषयापेक्षेति। ततश्च स्वस्थानोत्पत्तेरेवायमभ्यास इति। यद्यपि च श्र
१९ तोस्य स्याभ्यासोन्याय्यः। तथापि पाठक्रमाद्द्वितीयस्याभ्यास इष्यते। प्रयाजेषु चतुर्थे तथैव पाठ इति। तेन युक्तस्तत्र पंचमा
स्यैवाभ्यासः। प्रयोजने। आशीराशंसादभ्यासविनाशे साभ्यासो द्वितीय आवर्तते। एवं तृतीयेपि द्रष्टव्यं। आह च। अनु
त्पत्तौ युपासंख्यासाभ्यासेनैवर्ष्यते। इष्टस्तेनानुयाजानामभ्यासो विरूद्धताविति। तत्रोत्पत्त्याभ्यास रक्षेत्र न स्यात्पाठोयदा
व ४ तरा। सति त्वंतरपाठे हि नोत्पत्त्याभ्यास इष्यते। देवी द्वारो य इति त्वेष प्रथमाभ्यास इष्यते॥ निष्टंतेन स्वरूपेण तस्य न ह्युप
पद्यते।।३ किंच। अकृते हि द्वितीये च तदपेक्षैव युज्यते। स्वस्थानोत्पत्तेन वोपायादिति सूत्रमुदाहृतं।४। प्रयाजेषु उपाठ
कर्क तेन यजेतेति श्रुतेः। उत्तरेषु वा मासेष्विति शाखांतरात्॥ ॥पौर्णमासधर्मा वर्हिर्वर्जं। अथैतान्येव पंचहवींषि भवंतीत्यनेन प्राप्तानां निवृत्त्यर्थमुच्य
१८ ते। पौर्णमासधर्मा वर्हिर्वर्जमिति। तच्चैतच्छाखांतरवचनाद्रष्टव्यं। अपरे तु वर्णयंति। तस्या वेदेरुपकिरंत्युत्तरवेदिं न गृह्णंति पृषदाज्यं न मंथं
त्यग्निं च प्रयाजा भवंति। यो नुयाजाः एकं समिष्टयजु रिति। उत्तरवेदिपृषदाज्ययोः प्राप्त्यभावादनुवादः। एवं चेदनिर्देशनादेशवान्ः श्रि
त्वे ४ प्रस्तरादीनां प्राप्तिर्भवत्येव। सूत्रकारेणाच वर्हिर्वर्जं सदेषां निषेधः चैतः। तच्च शाखांतरवचनादेवोपपद्यते॥ ॥नित्ये स्याधिकानि शुना
सीराभ्यां द्वादशकपाल उद्वायवाः शुनासीराया इति देवताः विकल्पः॥ ॥वायव्यं पयः। अथ वायव्यं पयो भवतीति वचनात्॥ ॥लौकिकं
तच्चैतत् किमुक्तं भवति। धर्मरहितं। उक्तमेतत्॥ ॥प्रतिधुक् श्रुतेः। प्रतिधुक्शब्देन च दुग्धमात्रं धारोष्णमभिधीयते। न धारणाद्यादाह॥ ॥गोर्वै प्रति
धुक्तस्यै शृतमिति। एवं च धर्मानुष्ठाने सति सान्नाय्यनिर्वापकाले हृदोः प्राप्नोति। अपरांचोतत्र प्रतिधुक्त्वं विरुध्यत इति। एवं प्राप्त इदमुच्य ह
ते॥ ॥नाविरोधात्। लौकिकं भवति। वैदिकमेव धर्मवद्भवति। कुत एवं तत्। अविरोधात्। यागकाल एव दोहः करिष्यते। धर्माः प्रधा
नभूताः। कालो गुणभूतः। अतो धर्मानुग्रहाय गुणभूतकालबाधनं न त्वेव धर्माः करिष्यंते। ये विरुध्यंते त एव न क्रियंते। परिक्षालनं अपणाद च
यः। तत् कथमापादुक्तं नाविरोधादिति॥ ॥प्राकृतिदर्शनाद्वायव्ये प्रकृतिर्यं गोधर्मा मा प्रवर्तिताः। एवं पयो माहेंद्रं पय इति। नच्छिन्नांतता व्यक्तावे राम
तिमाचे हृदृश्यते। वायव्यं पय इति॥ ॥पयो वा गुर्वीं तु नैः शिथिलपक्वायवा रित्युच्यते वेति विकल्पः। पयो वा गुर्वी पयो वा भवति॥ ॥सो १८

नुसारेण चार्येण चातुर्मास्यान्यनुविहितानि। इदानीं श्रुतिमंत्रपाठानुसारेण ज्योतिष्टोमः संप्राप्तः। तं प्रोत्सार्येह विपर्यस्त
त्वसामान्यान्मित्रविंदानुविधीयते॥ ॥मित्रविंदा श्रीराष्ट्रमित्रायुष्कामस्या मित्रविंदेति कर्मणो नामधे
यं। अविधायकत्वात्। श्रीराष्ट्रमित्रायुष्कामस्य। पर्यायेण च योगसिद्धिः॥ दशहविः। सैतान्दशहविषमि
ष्टिमपश्यदिति वचनात्॥ उपक्रमादेवतत्सिद्धेर्वाच्यमेतदिति चेत्॥ तत्र उपहोमेष्वपि मित्रविंदाशब्दो मा
भूदिति दशग्रहणं॥ ॥आग्नेयः सौम्यश्चरुर्वारुणो दशकपालश्चतुर्वा यावो मैत्रश्चरुः रौद्र एकादशकपालो
बार्हस्पत्यश्चरुः सावित्रो द्वादशकपालोऽष्टाकपालो वा पौष्णश्चरुः सारस्वतश्चरुः त्वाष्ट्रो दशकपालः॥ एकप्र
दानं॥ वचनादेकं प्रदानं॥ याज्यानुवाक्ययोश्च सर्वदेवताभिधानात्॥ ॥ समस्यानुवाचनं॥ अत्र चाऽविभ
क्तिलोपेन समासः॥ एवं हि पूर्वमभिहितं अनुवाचनप्रैषो यथा देवतममुष्मा अनुब्रूहीति॥ अमुष्मा इति चतुर्थ्ये
तेनोक्तः॥ अपि च सुप्समासे सति द्वेधि अजायदन्तेऽस्याचनदमिति च दर्शयन्निपततीति तत्र पाठक्रमो बाध्य
ते॥ तस्मादविभक्तिलोपेन समासः॥ यजेतेति च॥ अविभक्तिलोपेनैव समस्यते॥ प्रैषाश्च॥ असमासेन भवंति॥

तंत्रे

कर्क १९ श्रुतं तस्यायमर्थः। न तत्र गुणप्रधानभावः चातुर्मास्यैर्यजेतेति यागविशेषात्। तस्मात्प्रधानशब्दो महत्त्ववाचकः। महति चेत्तु प्रदेशे प्रशस्ते
न त्वयुक्तमिति॥ पूर्वं युवैश्वदेवपाशुकं। कर्म भवतीति। एवमेव साकमेधासीघेष्टि। उत्तरवेदिः क्षेनावसतीति। सापि स्याद्धवनी
यवदंगप्राधान्यात् तत्र वेति त्वे सत्रापि तथैव भवितव्यं॥ ॥स यो वा। वाशब्दः परिव्यावृत्तौ। स यो वा भवति। न ग्रहकालतया स य
त्वविकृतीनामित्यत उत्कर्षमेवा। यत्तु पूर्वेद्युरुत्तरवेदिक्षादनात मुक्तं। स सौमिको विप्रकर्षो न पाशुक इति। पशुपदार्थमात्रे च गरुत्मा
ति। स यस्त्वविधानात्र सौमिके विप्रकर्षमिति॥ ॥वैश्वदेवः पशुः। वैश्वदेवो भवति॥ ॥पशुपुरोडाशमष्टहवींषि निर्वपति। वच
नसामर्थ्यात्॥ ॥तेषां स्विष्टकृद्रूपत्वात्। तेषां हविषां संबंधी यजप्रैषः स्विष्टकृतो यागो भवति। अपरत्वात्। बहुत्वादित्यर्थः। बहूना
रु६ मनुग्रहो युक्तो नैकस्येति॥ ॥यथाक्रमविरुद्धं। यदविरुद्धेन द्यथाक्रमं कर्तव्यं। यथा आश्ववाल प्रस्तरस्य प्रस्तरता॥ ॥हृदयस्य
नीते वपने पुनर्वचनसामर्थ्यान्नियोगतः कर्तव्यं॥ ॥वरुणप्रघासेषु वारुणः पशुः महाहविषि माहेंद्रः पशुः॥ ॥शुनासीरीये [illegible]
र्थः। कृतानुकरणात् पाप्रतिप्रस्थातुरपि पशुर्मा भूदिति चतुर्थग्रहणं॥ ॥पुरस्ताद्वा पर्वणः पर्वणोऽन्ते वा पशुर्भवति। महाहवि [illegible]
प्र३ हेंद्र इति वचनात्। तस्यैव पुरस्तात्पशुरन्ते वा। सौने कर्मधानामिति भेदेन पश्चनुष्ठाने पशुरपि पर्वशब्दवाच्य एवेति। [illegible]
र्वदीक्षणेति संप्रदायः। नेत्यपरे। पशोर्हि तत्तदक्षिणापरिप्राप्ते। समानतंत्रत्वेतु पर्व एव ता दृगितिपर्वदक्षि [illegible]

स्व

१८३

न्नपतिरिति। एवमादिभिर्मंत्रैः प्रतिमंत्रं। प्रेद्धो अग्न इमो अग्न इति विराजौ संयाज्ये। संयाज्याशब्देन च स्वि
ष्टकृद्यागस्य याज्यानुवाक्ये अभिधीयेते। सहस्ववत्यौ वा नूनो रास्व सहस्ववदित्येवमादि॥ ॥ २१ दक्षि
णा सहस्रं वेति विकल्पः॥ ॥ इति कर्कोपाध्यायकृतौ कात्यायनसूत्रभाष्ये पंचमोध्यायः॥ ॥
चातुर्मास्यानि समाधानि। ऋत्वनुकरणकारिणा वार्येण चातुर्मास्यान्यनुविहितानि॥ इदानीं श्रुतिर्मंत्र
पाठवसरप्राप्तो ज्योतिष्टोमस्तं प्रोत्सार्य हविर्यज्ञत्वसामान्यान्मित्रविंदानुविहिता। हविर्यज्ञत्वसामा
न्यादेव चेदानीं निरूढपशुबंधोनुविधेयः। हविर्यज्ञत्वसामान्यं च। हविर्यज्ञविधो हि वा। अपीषोन्यः प
शुबंधः स च विधोन्य इति श्रुतत्वात्। अस्य च प्राणिसाधनकत्वसामान्यादग्नीषोमीयविध्यंतरमाह क
ल्पं। अग्नीषोमीये हि धर्माणां विशसनादीनां विहितत्वात् इह वा विधानात्। तथा च विशसनादीनमी
षोमीयात्प्राप्ताननुवदति। तस्मादुपांशु संज्ञसं ब्रूयाच्छेतानु मुहूर्तमिति। तथा च तत एव यूपपरिमा

कर्क॰ अत्र च प्रैषशब्देन स्विष्टकृन्निगदाभिधानं। निगदशब्दः स्विष्टकृतिदृष्टः स्विष्टकृति निगदं ब्रूयादिति। निग
२० दः प्रैष इति चानार्थांतरं॥ तस्मात्प्रैषाश्चेति सौविष्टकृतनिगदाभिधानं। प्रैषाश्चेति बहुवचनं देवताभेदात्।
अपरेन्यथा व्याचक्षते॥ प्रेषितेन यदुच्यते। याज्यादौ देवताभिधानं॥ तल्लक्षणया प्रैषशब्देनोच्यते॥ उत्तरे
निगमा यथेष्टं जोषणाश्रुतेः। उत्तराणि यानि सूक्तवाकादिनिगमनानि तानि यथेष्टं कर्तव्यानि॥ कुत एतत्।
जोषणाश्रुतेः। एवं या इष्टा देवता भवंति ताः संपश्यत्यसौ हविरजुषतासौ हविरजुषतेति॥ इष्टाश्च प्रातिलोम्ये
नयाज्यायामभिधानात्। त्वष्टारूपाणि ददती सरस्वतीति॥ अनुलोमा वा चोदनागुणत्वात्॥ अनुलोमा वा
निगमा भवंति न प्रातिलोम्येन। येन सर्वत्रैव निगमनेषूत्पत्तिचोदनानुसर्तव्या। तन्मूलत्वात्॥ इतरथा [illegible]
नान्येव न संभवंतीति तस्माच्चोदनायां तु क्रमस्यैव सर्वत्र गुणभावा॥ हौत्रमप्यत्राभिहितं तदुच्यते॥ ॥ [illegible]
शसामिधेन्यो भवंति॥ सुष्टिमंतावाज्यभागौ॥ अग्निना रयिमश्नवत्॥ गयस्फान इति वा॥ ॥ [illegible]
ग्निरित्येवमादि॥ ॥ याज्या त्वष्टारूपाणि ददती सरस्वती। इत्येवमादि॥ [illegible]

मावात्र क्रियते। निरूढादिषु तु पृथगारंभस्याविद्यमानत्वादेवान्वारंभणीयेति। यथान्वाहार्यो दर्शपूर्णमासप्रकृतित्वेनाग्नीषोमीये प्राप्तः
मिक्काद्दक्षिणाया निवर्त्तितः पुनस्तद्विकारेषु पशुचदक्षिणाम्नानेनानीतिन तु प्रवर्त्तते। एवमन्वारंभणीयापीति। नैतद्युक्तं। अग्नीषो
मीये हि आनत्यंशेन प्रवृत्तोऽन्वाहार्यो गवां शतेन निवर्त्यते। तद्विकारेषु अनुवर्त्तमानः केन निवार्यते। अन्वारंभणीया पुनर्न
केन चिन्निवर्त्यते। आरंभनिमित्तत्वात्। तदभावाच्चाग्नीषोमीयस्यानंगमन्वारंभणीया। अतस्तद्विकारेष्वप्रवृत्तिरिष्यते इत्यलमतिप्रसं
गेन। प्रकृतमिदानीमभिधीयते॥ ॥पशुश्चिन्त्यां संवत्सरे संवत्सरे प्रावृषि कर्त्तव्येति सशेषः॥ पशुनाइज्यायि श्चिन्त्या सा च प्रतिसंवत्सरं कर्त्त
व्येति। तेन संवत्सरे संवत्सरे इत्यनेन नित्यत्वं हि परिभाषायामुक्तमेवादाक्षायणाग्रयणपशुषु प्रवर्त्तेरिति। अपि चात्रैव संवत्सरो नानी
जानमतीपादिति। सा च प्रावृषि प्रावृट्काले वोऽनवर्षाभ्यां ते तेन सुमवसे यजेतेति श्रुतेः। सूपवसा आर्षा वेः। आवृत्तिमुख्येया वा पश्चिन्त्या
भवतिवा प्रावृषि। आवृत्तिशब्देन तु उदगयनदक्षिणायने उच्येते। तयोर्मुखमावृत्तिमुखं प्रथममहः सिनचनं तं [illegible] पौर्णमासी वा मा
स्थावायेस्ते। संवत्सर इति चोक्तत्वादेकत्रैव क्रियानोभयोरपीति। गृहेषु देवयजनं तदग्नीषोमीयस्य दृष्टत्वात्। इहापि तन्माभूदिति गृ
हेष्टि[illegible]ध्यते। तेन गृहेषु यजेतेति वचनात्। अपीत्वयमनुवाद इति मन्यते। न सुरवमानमग्नीषोमीयार्थं ज्योतिष्टोमप्रकरणे विधानात्तत्ता
दृष्टानां आरंभोऽगकं अग्नीषोमीयस्य। एवं च सतिन्यायस्तु चमैवेति इत्यसिद्धिति। यद्येवं समारोपापि प्रकरणान्तमधीतत्वाऽपाति श्यामार्थं इव प्राप्तं

श्र४

९६

संवत्सरे ३

=अस्तत्वेनौचीत्त्यसिद्धेप्पाद नित्यत्वविधीयते॥ सकृत्कृतेन शास्त्रस्यासिद्धत्वात् सकृदेव॥ =

कर्क- २१

प्रैसत्यां जात्यंतरविधानं। तस्मात्पालाशमेव यूपं कुर्वीतेति। तेन निरूढपशुबंधमुद्दिश्य अग्नीषोमी
यधर्मानुकथनं क्रियते। अग्नीषोमीयधर्मेण हि सोमिकैर्धर्मै रत्यंतव्यतिषंगादिह धर्मानुकथनं यु
क्तरूपं। तत्रातिदेशेन धर्मान् वक्ष्यति। अत्र केचित्सोत्रामणीपशुषु निरूढप्रकृतित्वमिच्छंते। तत्पुनर्ना
तीवयुक्तरूपं। येन न हि निरूढः प्रकृतिभूतः। तेनापि त्वग्नीषोमीयादेव धर्मा गृहीताः नव भिन्नक्रमोऽभिक्र
कायावच्यन्तरति। ततस्तेऽप्यग्नीषोमीयविध्यंतग्राहका एव। न हि ते सानुमानिकवचनापवादत्वेन प्रत्य
क्षशिष्टं वचनं नापवाद्यंते। यथा वैश्वदेवधर्माश्चातुर्मास्येषु सोमाच्चावभृथ्य इति च। तस्मादग्नीषोमीय
प्रकृतित्वमेव तेष्वपीति। अग्नीषोमीयप्रकृतित्वे वसतिश्चारंभणीया न भवति। आरंभनिमित्ता हि सा॥ न
चाग्निषोमियस्यारंभोऽस्ति। तेन यैत्नकरिकन्यायेन अग्नीषोमीये अभावादिहापि न भवति। ननु च दर्शपू
र्णमासप्रकृतित्वेनारंभणीया प्राप्ता तत्र पृथगारंभा

रामः २१

१८२

२०

घऽइत्यनेनमंत्रेणाग्रमंगद्वीयस्वधितइत्यनेनमंत्रेणपरशुनाप्रहरति॥ प्रथमशकलंनिदधाति।कार्यार्थो।अनक्षसंगंवृश्चतिपथाकृस्याप
नं२ लेमस्थाणुर्नभवतितथाछिद्यते॥ एवंवृक्षएववयोजातः।द्यांमालेखीरितिपतंतमभिमंत्रयते।यूपं॥ ॥नरहिंणापनेत।सचनरहिंणा
पतेत्॥ ॥अयंहित्वेतिशाधनं।कुतएतत्।मंत्रलिंगात्।अयंहित्वास्वधितिस्तेतिजानःप्रणिनायेति॥ ॥अभिमंत्रणशेषोवाविशेषोपदेशा न्य
त्।वाशब्दःपक्षव्यावर्तनो।अयंहित्वेत्यभिमंत्रणशेषएवभवतिनशोधने।कुतएतत्।विशेषोपदेशात्।तेप्रत्यंवमानमनुमंत्रयतेद्यांमा
लेखीरिति।मंत्राणांवाविधायकत्वात्॥ ॥अतस्त्वमित्यव्रश्चनेजुहोति।आव्रश्चनेचापादानसाधनत्वेनस्थाणुरभिप्रेतः।अथवाव्र
श्चनमभिजुहोतीतिश्रुतत्वात्॥ ॥यूपेवातत्संस्कारात्।यूपेवाजुहोतिनस्थाणौ।कुतएतत्।तत्संस्कारात्।यूपस्यहिसंस्कारोभि
प्रवृत्तः॥ ॥स्थाणौवाऽऽव्रश्चे॥ ॥स्थाणौवाजुहोतिनयूपे।कुतएतत्।आव्रश्चे।अथवाव्रश्चनमभिजुहोतीतिप्रत्यक्षेणाह।नेदंतोनाप्रकरणस्य
न्निष्ठानितियूपच्छिन्नं।अनुनेतआतोरक्षोभिरनुनिष्ठानितिवज्रोवाआज्यंतद्वज्रेणैवैतन्नाष्ट्रारक्षांस्यववाधतइतिश्रुतेचेरी
वाऽन्मेत्रवलोसौअतस्त्वंदेववनस्पतेशतवल्शोविरोहेति।यत्त्वमयावृक्णःसशतवल्शोविरोहेतिमंत्रवर्णेनस्थाणुरेवाभिधीयते
ति।स्थाणावपिहोमेक्रियमाणेयूपायस्थाणुरितिभवत्येवावृश्चायूपसंस्कारः।ततस्थाणावेवहोमइति॥ ॥परिवास्याच्छेदनंपुनःपरि
पूर्वं[illegible]छेदनार्थंपरिवास्यच्छित्वायूपाग्रेपुनःछेदनेकर्तव्यं॥ ॥यावन्निश्चतुररत्निर्वा।परिवास्यते।सवाऽऽयातिर्वैवचतुरत्नि

वर्क [illegible]तोऽधोऽधोयस्तिनयश्चात्तोपुनःप्रवर्तते।नैतदेवंसमारोपाद्यग्निसंस्कारः।अग्रेश्चांगप्रधानार्थत्वात्यदाहवनीयेजुहोतीतिवचनात्तस्माच्च
१ नतएवसमारोपः।अतएवचोत्तरवेदि।समारोपश्चवर्तते॥ ॥यूपाहुतिंजुहोतिचतुर्गृहीतंस्रुवेणवोदुम्बरीमिविति।सयदिस्रुचाजुहोतिचतु
र्गृहीतमाज्यंगृहीत्वाजुहोतिसयदिस्रुवेणस्रुवेणैवापहत्यजुहोतीतिवचनाद्विकल्पः।इयंचयूपाहुतिरग्नीषोमीयेयूपार्थत्वेशो।यूपंवृ
स्प [illegible]स्यवाचाजुहोतीति।तत्रचवृश्चणात्कृताकृतप्रत्यवेक्षणं।वृश्चेरहापिवृश्चेदवदशा।तरकालेतेवगम्यते॥ ॥आज्यशेषमादाय
सतहृगच्छेतियूपं।यदाज्यपरिशिष्टंभवतीतिवचनात्।वक्ष्यत्युपरिष्टात्यूपोतेवाग्निंमथित्वेत्यतश्चविकल्पः॥ ॥अभिमंत्रणस्य
न्यानितियूपमभिमंत्रयतेत्यन्नित्यनेनमंत्रेण॥ ॥प्राकृतिष्टेनमभिमंत्रयतेवा।अनेनैवमंत्रेणेति।सचायंतुल्यशास्त्रत्वाद्विकल्पः॥ ॥
पालाशंवकलपर्णमशुष्काग्रमरूक्षसकलशाखमध्याग्रोपनतमवुर्णं।निरूढेहिश्रूयतेतस्मात्पालाशमेवयूपंकुर्वीतेतिमध्याग्रो
पनतत्वंचनिरूढएवतत्रैवपाठात्।अथयएषआनतउपरिष्टादुपनतोमुख्यइति।अन्यत्रानियमः॥ ॥अभावेखदिरबिल्वरोहि[illegible]
कान्।पालाशाभावेखदिरादयोभवंति॥ ॥खदिराभावेसोमरुजतरान्॥ ॥ज्योतिष्टोमेखदिराभावेबिल्वरोहीतकान्वाकुर्यात्।पा राम
[illegible]निरूढएवेतिसंप्रदायः।खदिराभावेसोमरुजतरान्नितियथावचनमुच्चारणार्थं।यूपव्रश्चनिमेदापेरुवा॥ ॥स्रुवेणोपस्पृशतिवि १
ष्णवेत्वेतिदहेत्वा।यस्मिन्प्रदेशेछेदनंतत्रैवोपस्पृशेत्॥ ॥ओषधइतिकुशंनिदधातिकुशमन्तर्दधातिस्वधितइतिपरशुनाप्रहरति।६४
१७९

अतः स्थानि २१

सचायमग्निसंस्कारोंगप्रधानार्थत्वाच्चाग्नेः अग्नीषोमीयप्राप्तेति अग्नीषोमीयाच्च पश्वंतरेषु न चवेद्याविनोत्तरवेदिर्भवत्यतः हविर्वत्तरा
द्वेदेशप व्रपने तेन वेदिं करोतीत्युक्तं॥ ॥वरुणप्रघासेषु स्याद्याग्निनिधानात्। वारुणप्रघासिक उपदेशो यं न तु धर्मपरिप्राप्तिः॥ ॥ए
कमिश्रेन प्रणयतीति तत्र हि कर्परेण प्रणयनं द्वयोश्च [illegible] हे कमिश्रेनोच्यते। तत्कृतः ज्योतिष्टोमे सौम्येन प्रणयनं दृष्टं। स च आहवनीयसं
स्कारः। अंगप्रधानार्थत्वात् स्यादग्नीषोमीये प्राप्तिस्तत्र कृतित्वाच्च पश्वंतरेषु। तेनैकमिश्रेनेत्युच्यते। एवं च कृत्वा समारोपो न भवत्ये
वः॥ ॥व्रतोपायनप्रणीताज्यभागभागावदानपूर्णपात्रदि स्वक्रमात् कुर्यात् द्विविये न विधि। व्रतोपायनप्रणीताज्यभागानामन्वय
प्राप्तानां सर्वेष्विव प्रतिषेधार्थं ति ८ च प्रतिप्रसवार्थं वचनं। भागावदानानि तु सोमे ब्रह्मणाः स्त्री ह यजमानाय पुरीततमध्वद
वेदेवमादीनां। अग्नीषोमीयमायातानि। तत्र शास्त्रांतरे प्रतिषेधात् विकारपशुपा छं तितेनेह विधानमग्नीषोमीयानिषेधा
र्थं तत्र निषेधात् पश्वंतरे प्रवृत्तौ निवृत्ति विकल्प वसति लोम ज्ञो हा ष्णुष्णीपुरीततं वेच्छन्ति। अतो भागावदानानामग्नीषो
[illegible] नानि रूढे द्विव [illegible] नोत्र नियम इति। पूर्णपात्रविकल्प क्रमपो स्तु निरूढ एवं विधानाद [illegible] मांतत्वादग्नीषोमीयस्या
[illegible] तथा चाह हविर्यज्ञविधा इवा अत्राः पशुवधः सर्वविधान्य इति प्रकृत्य सर्व हविर्यज्ञविधो यस्मिन्व्रतमुपनया
याद [illegible] तिपस्मिन् पूर्णपात्रं निनयति यस्मिन् विसृज्यते [illegible] क्रमपत्यथा हे सम्यग्विधायास्मिन्नेता निनिक्षियंतर इति। परिस्तरणा

३७

[illegible] नेध पू [illegible] भवतीति वचनात्॥ ॥एकादश विप्रभृतीनेके। एवमपि हि श्रूयते सप्तदश श्रुनायस्समाहारा एकादशानि यूपे रुक्तं तस्मात् समे वर्तन्तो
[illegible] पयरत्निमत्तरिकूलोकमवर्तनेन नयतीति एके तस्नेच्छंति न स्यैतो विधौ किं तर्हि अवयवत्पवादे न संहृत्तो पां। येनापसंहर
ति सर्वा एष अरत्नि वं व च तु र र त्नि र्वा पशु बंध यूपो भवतीति॥ ॥अघाग्निं करोत्युपरवगर्ते। अतश्चेदुत्तरत्र व्यापारः एवं हिता
द्वा आनयनं दृष्टार्थं भवति। उपरवगर्तमिति उपराश वेन उपराहेः प्रदेशोभिधायते उपराह प्रदेशवर्जमघाग्निं करोति। अथवा
चालं उपमात्रमघाग्निमध्यमं गृहीतं। करोतीत्यनुषंगः पशुशाचैनामसंकुचितोंगुलिः पाणिरामणिबंधनादुच्यते॥ ॥ऊर्ध्वमग्रेप्र
तिसुं चति द्व्यंगुलं त्र्यंगुलं वा तेभोतिक्रांतं यूपस्य सचायमधुना उपदेशः प्रतिमोक्तव्यजनोत्तरकाल एव॥ ॥पंचारत्नि पंचदश दर्शन
सोमे दश सप्त चतुर्दशारत्निमपरिमितो वा भवतीति यूपः। एवमपि हि श्रूयत इति॥ ॥सप्तदश वाजपेय एकविंशति रश्वमे
धे यथाकामं सर्वे विमा। [illegible] यथाकाममेव भवति न तु वनस्पतीन् तुल्यप्रमाणानि॥ ॥वेदिं करिष्यन् षड्ढोतारं पंचगृहीतं मन
सानुद्रुत्य जुहोत्यकामा ऊतिपंचवाघोः पृष्ठमिति। प्राग्वेदिकरणात् षड्ढोतारमेवं मनसानुद्रुत्य पंचगृहीतं जुहोति पंच [illegible]
मानुद्रुत्य जुहोत्यकामा ऊतिपंचवाघोः [illegible] एवं भवति। तेनैव पात्रेणातनासीध्रः मीयते इति॥ ॥१॥ वेदिं करोति। किमर्थमनव सौवेदिकरणमुक्त [illegible]
[illegible] सचायं होमानिरूढे [illegible] चायं इति उच्यते पात्रं मस्तुतरवेदिविदितात् आहवनीयनिधानमुक्तं आग्नेयं वा अप्सामाधा [illegible]

२

पेतोर

१८६

४

त्रमा कां दत्वा त्प्रयोगः। अवटे शेषमासिंचति शुंधंतामिति। शेषप्रतिपत्तिरवटसंस्कारश्चायं। अतो यूपैकादशिन्यां सर्वावटसंस्काराः कर्त्तव्या
ग बर्हिषि प्राग्युदं वि च प्रास्यति पितृषदनमसीति। अवटे बर्हिषि प्रागग्राण्युदगग्राणि च प्रास्यति पितृषदनमसीत्यनेन मंत्रेण प्रथम
शकलं वाग्रेणीरसीति। प्रास्यतीत्यनुवर्त्तते॥ ॥अवटेनावटं जुहोति दृंसमी। दृंसमीमित्युक्तत्वात् स्वाहाकारो विन भवति। पुरस्तात्परिक्रम्या
ध्वर्युर्यजमानो वा यूपमनक्त्युदङ् पविश्य। परिक्रमणं यजमानस्योच्यते। माभूत्सन्निधानादपरिक्रमणमिति॥ ॥यूपायाज्यमानायानुवा
चयति। अज्यमानस्य यूपस्यानुवाचनं कारयतीत्यर्थः। तथैवं यूपायाज्यमानायानुब्रूहीति॥ ॥देवस्त्वेत्यनक्ति। यूपं च चषालमुभयतः
अनक्तीति वर्त्तते। देशभेदाद्वौ मयत्रमंत्र इत्युक्तं अग्निसंमार्गे॥ अनक्तं प्रतिमुंचति सुपिप्पलाभ्य इति। अनक्त एव पुनरनक्तिग्रहणं च सान्वनि
देशार्थं अनक्तं च चषालं प्रतिमुंचतीत्यर्थः। प्रतिमुंचामीति चात्र मंत्रशेषः॥ ॥सोपरमग्निष्ठादेशमन्याः परिव्ययणादेशं समंतं परिमृश्यः ध्वर्यु
र्नोत्सृजेदापरिव्ययणात्। महोपरेमाग्निष्ठादेशं पुनरक्तापरिव्ययणादेशं समंतं परिमृश्य यूपमध्वर्युर्नोत्सृजेदापरिव्ययणात्। सो
परमग्निष्ठादेशाजनेच स्यापुत्यधापदेशादध्वर्युरिति केचिदभिप्रवृत्तत्वाद्यजमानस्येति संप्रदायः॥ ॥व्ययमाणायानुवाचयति।
ध्वर्युर्वानुवर्त्तते। धाम ग्रेणोच्छ्रयति। यूपायातरनिमिनोत्यग्निष्ठा संप्रत्याहवनीयं याता उत्यनेन मंत्रेणावटे प्रक्षिपति। यथाग्नि
ष्ठाद्याहवनीयं भवति। एवं च सति यूपैकादशिन्यां सर्वाग्निष्ठाः संप्रत्याहवनीयं कर्त्तव्याः॥ ॥ब्रह्मवनिं त्वेति पांसूनभिपर्यूहति॥ ॥पांसू

त्मसादनं प्राकृगाज्यनिर्वपणादिप्रयणानि कृतोत्तरपरिग्रहादिकरोत्याज्यासादनात्। परिस्तरणादीनामुपादानं वैकृतपदार्थानि समनं
कृतानुसंधानार्थं खननावसरविधानार्थं चा उत्तरपरिग्रहस्यादिकरोत्यनेन च उत्तरपरिग्रहस्य पदार्थानन्तरादिकरोत्याज्यासादना
दि अन्यविशेषः। सर्वदाज्यमाज्यग्रहणानि तस्य चानुयाजान्तं सुक्तमेव॥ ॥बर्हिषि प्रकृशाखास्तृणाति। अवसरान्तरविधानाद्ब
स्तरणाधिकारस्तरणमनंतरमेव प्रकृशाखास्तरणं॥ ॥देवस्य त्वेत्यभ्रिमादाय यूपावटं परिलिखतीदमहमित्याहवनीयस्य पुरस्ताद
तर्वेद्यर्धं बहिर्वेदि अन्य यूपार्धस्यागत्वेनोच्यते किं तर्हि देशलक्षणं यं यूपमानं प्रकृत्य वचनं हि भवति। अर्धमंतर्वेद्यर्धं बहिर्वेदीति। तत्र यू
पार्धस्य अगत्वेन वेदिविधाने ऽर्धवेदीत्यतदपि विधेयं तत्र धाचवाक्यभेदप्रसंगः। देशलक्षणायां तु पदोषो न भवति। तेनैकवाक्यत्वे
सतिनानेकवाक्यतापुक्रूपा अनेकादृष्टपरिकल्पनाप्रसंगात्। चिंतायाः प्रयोजनं। त्रीवृत्तमिति प्राची वेदानेकर्तव्येत्यपनेगत्वात्। उपर
संमितं खनति। उपरशब्देन चोपराहः प्रदेशो लक्ष्यते। उपराहप्रदेशसंमितं खननीत्यर्थः। प्राचः पं सूत्रु उपतितदग्रेण यूपं प्रांचं दधा
ति। तद्वेदेनावटः परामृश्यते॥ ॥कुशमुष्टिमुपरि तस्मिन्यूपप्रथमं शकलं च। चशब्दादुपर्येव। अग्रमुत्तरेण चषालं॥ ॥निदधाती
त्यनुवर्त्तते। यवोसीत्य स्तुपकानोप्य प्रोक्षत्यग्रमध्यमूलानि दिवे त्वेति प्रतिमंत्रं। आपश्च वनीश्चपिप्रणीताः स्वस्तौ किका एव नसंते।
मात्राध्यग प्रधानाध्याः प्रणीताः तद्विकारोपशावगाथानामेव प्रतिप्रसवः। तेनापूर्वत्वाद्यूपकर्मादावप्रवृत्तिरिति॥ ॥प्रोक्षामाति मं

हरिः

राम

१८९

१८८

५ [illegible] विल्लो [illegible] नेष्टु नेवते रूप [illegible]

अग्निं मंथित्वा होमान्करोति। गुणविधित्वाच्चास्य धर्माभावे तत्परिप्राप्त्यमा होमादिरप्युच्यते॥ ॥उपाकरणमंथने वा। उपाकरणात्तोनोप
स्पर्शनमुक्तं। तस्य पुनरुच्चारणं मंथनसनियोगसिद्ध्यर्थः। संनियुक्तयोर्विकल्पो यथा स्यादिति॥ ॥त्रिगुणरशनया द्विव्याममपाकोऽथवा
पाशं कृत्वांतरा शृंगमभिदक्षिणं च बध्नात्। ऋतस्य त्वेति पाशं कृत्वा प्रतिमुंचतीति वचनात्॥ ॥देवस्य त्वेति यूपं। बध्नातीत्यनुवर्तते॥ ॥
ऐंद्राग्नः सौम्यः प्राजापत्यो वा यमिच्छेत्। अयोपि हि देवताविशेषा विकल्पेन श्रूयंते। यासौ बद्धादि कल्प्य परिप्राप्तो यमिच्छेदित्यादिविकल्पा
र्थमुक्तं यमिच्छेत्तं सदेव कुर्यात्॥ ॥अग्नस्त्वेति पशुं प्रोक्षणीभिः प्रोक्षति। प्रोक्षणाश्च वृक्षयोगिकापि संस्कृतप्रोक्षणीविषयः। प्रोक्षणो
पादानसामर्थ्यात्॥ ॥अपां पेरुरित्यास्य उपगृह्णाति। आस्याप्य हयांश्च पानार्थं दृष्टार्थत्वात्। तथा चाश्वमेधे श्रूयते। तर्पयित्वाश्वं पुनः
संस्कृत्य प्रोक्षणीरितरान्पशून्प्रोक्षतीति॥ ॥अपो देवीरित्यधस्तादुपोक्षति। अथ अधस्तादुपोक्षतीति वचनात्॥३॥ ॥रधर्मप्र
षादिरोत्पाप्रयाजेभ्यो वै कृत समनंतरं प्राकृतानुवस्यार्थमिदमुक्तं। आदिग्रहणेन च होतृषदनादि उपेक्ष्यं। तदेव हि तत्कृतं पूर्वमि
ति॥ ॥ह्नतरायारभ्याज्यं पशुं पूर्वं समनक्ति ललाटांसश्रोणिषु संतरति प्रतिमंत्रं। प्रकृतो ह्याचारः समनंतरं धृत्वा समंजनमुक्तं। तेनोह
च्यतो पशुं पूर्वं समनक्तीति। अनेन च तामकेनेयच्च प्राकृतं वैकृतयोः समावेशस्तत्र पूर्वं प्राकृतमिति यथा आसाद्य हवींषि संमृशत्यासा
[illegible] मंथतीति। यथा च प्रहृत्य न लमान्मानमालभते। प्रहृत्य तलं वाजिनेन चरंतीति। समंगा नियजत्रैरित्यत्र गच्छंतामित्यध्याहा

नाद

रु.के.
५
[illegible]

[illegible]॥ ॥यूपमदंदेति मैत्रावरुणाय दंडमसमंते त्रिः प्रेषति। मैत्रावरुणाय दंडेन दंडं करोति॥ ॥सम्मृमि कृत्वाद्भिरूपमभिच्य विसोऽन्व
मा[illegible]पति यूपमन्वारब्धं। समभूमि कृत्वाद्भिरूपसिच्य गर्ते विष्णोः कर्माणीति वाचयति यजमानं यूपमन्वारब्धं स्वायसुमयस्मका
रइति संप्रदायः। न यस्य संस्कारस्येव तत्परं। उभयसंस्कारपरं बद्रु यजमानकर्म सर्वेषां वाचनमेकस्यान्वारंभः॥ ॥तद्विष्णोरिति चरवालेमीक्ष्मा
णां वाचयतेत्यनुवर्तते॥ ॥परिवीयमाणमानुवाचयति त्रिगुणा त्रिव्याममयाकोऽशोरशनात्तया नाभिमात्रे त्रिवृतं परिव्ययति परिवीर
सीति। त्रिगुणया त्रिव्याममयाकोश्पारशनया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति। नाभिमात्रे च प्रमाणत्वाद्यजमानविषयं॥ ॥
सं स्न्यान्यतरस्यामंते प्रवेशयति। संहृत्य रशनामन्यतरस्यां रशनायामंते गोपायति। यूपशकलमस्यामवगूहत्युत्तरेणाग्निष्ठादिवः
सूनासीति। यूपशकलमस्यां रशनायामवगूहत्युत्तरेणाग्निष्ठादिवः सूनुरसीति॥ ॥बहुषु प[illegible] स्वं बहुषु यूपेषु यथास्वमुपगूहनं॥ ॥
उपावीरसीति तमारायंत नप्त्रुमुपस्पृशत्युपदेवानिति। पश्वात्र प्राप्ताविदमुच्यते॥ ॥छागमंत्राम्नानात्। स च पशुश्छागो गृहीतव्यः
उक्तप्रकृत। मंत्राम्नानात्। अग्नीषोमाभ्यां छागस्य हविष आज्ञामिति तेन पशुशब्दश्छागविषय इति गम्यते॥ ॥पत्नेदमग्न्यंगा। उपस्पृशति।
पत्रेदाति मध्ये मातदेतद्दत्वं [illegible] अव्यमानः स्पूनांग॥ ॥यथायंच वर्त्म प्रोक्षणीमंत्रे यदृष्टामिहितं। अनुत्वा माता मन्यतामनु पितानुभ्रा
तस्वमादि मातृमान्यतमानिति। मंत्रमिमानसामर्थ्यात्। नाचोदितत्वात्। नैनदेवं न ह्येवंविधा चोदनेति। मंत्राणां चाविधायकत्वात्

राम
५
१८

१८ टि पोक्षण२

थ

हपनस्थानेव्चने।समैत्रावरुणोकर्मणि।यतोस्य स्थाने प्रैष्येतिवक्तव्यं।यत्र मैत्रावरुणस्य प्रैषवचनमस्ति।एवं च सपशौ पत्नीसंयाजेषु प्रैषव
देनाभिःवा यतेत्येव वक्तव्यं॥ ॥दशैषप्रयाजानाहुः शमसमाहरेति।यूपशकलमाहरेति च काश्चानीपध्यने।माध्यंदिनीयानां तु शामन व्या
हरेत्येव॥ ॥स्वरुमादायाक्तौ भोजकृथेताभ्यां पशोर्ललाटमुपस्पृशति घृतेनाक्ताविति।स्वरुं तु गृहीत्वा भावपि स्वधिती जुहुथेऽक्ता तान्या
मवपशोर्ललाटमुपस्पृशति घृतेनाक्ताविति एनेन मंत्रेण॥ ॥स्वरुमवगृह्यासिं प्रयच्छन्नाहैषाते प्रज्ञाता अश्रिरस्त्विति।स्वरुं तु यूपे प्रत्यवगृह्य
शमित्रेऽसिं प्रयच्छन्नाहैषाते प्रज्ञाता अश्रिरस्त्विति॥ ॥सादयित्वा स्रुचौ चात्वालमुत्तरेण शमित्रायोल्लिखति।स्रुक्सादानेनुवचनात्।
उल्लेखने नोपलक्षिता अपरिसमूहनादयः सर्वे भवंतीति संप्रदायः॥४॥ ॥पर्यग्नयेनुवाचयति।पर्यग्निकरणेक्रीयमाणेपदनुवाचनं त
त्कारयतीत्यर्थः।कुर्वंतं कारितं भवति।पर्यग्नयेनुब्रूहीत्येवं तथा च श्रुतिरप्याह पर्यग्नयेनुब्रूहीति पर्यग्निकरणं चाग्नीत्करोति प्रैषश्चेत
दनात् अग्नीध एवेति संप्रदायः।तथा च श्रूयते।यो वाव कर्म करोति स एव तस्योपचारं वेदेति।अपरेत्वध्वर्योरेव प्रैषदानमिच्छंति पर्यग्निकर
णमात्र एव वचनमिति॥ ॥आहवनीयोल्मुकमादायाग्नीत्त्रिः समंतं पर्येति पश्वाश्च शामित्रदेशयूपचात्वालाहवनीयान्त।आहवनी
योल्मुकं गृहीत्वा पश्वादीनग्नीत्त्रिः पर्येति॥ ॥अन्यपक्षे शामित्रान्वा पर्येति न सर्वाणीति।वाशब्दो विकल्पार्थः॥ ॥प्रतिप्रास्योल्मुकं ताव
[illegible]ति॥ ॥आहवनीये प्रदीप्योल्मुकं त्रिरेव प्रतिपर्येति।प्रतिशब्दप्रयोगाच्चाप्रदक्षिणं॥ ॥पुनरासाद्य कप्रतिपद्यते।पुनरग्नीदाहवनी

क.वे.
६

[illegible]संगः एव[illegible]वाक्तताम्नायात।एवं च सति संपन्नपतिराशिषेत्यत्रापि गच्छतामित्यध्याहारो नानुषंगः पूर्वेणाव्यवहितत्वात्।अतश्चामपत्रसं
[illegible]न भवति।प्रायश्चित्तगतश्च विशेषः।अनुषंगविनाशे श्रौतं प्रायश्चित्तं।अध्याहारस्य अवैदिकत्वात् स्मार्तमिति।यज्ञपतिशब्द
श्च अनेकयजमानके विपरिणम्यते।यूपाहुत्यां परिव्ययणाग्निमंथने च॥ ॥प्रवृत्य होतारमाश्राव्याहाग्निर्हदेवानां विशां पुरएतेत्येवमादि
आश्रावणं च मैत्रावरुणार्थं।मैत्रावरुणायाहं वा श्रावयतीति वचनात्।अग्निर्हदैवीनां विशां पुरएतायं यजमानश्चेति वानेकयज
मानकेयथार्थं विपरिणामः॥ ॥हुन्चंनितिस्तुत्यो हन्ये ऽनुयान्त्यर्थे वाणोस्त्वं यजमानेति प्रयोगः॥ ॥मैत्रावरुणाय दंडं प्रयच्छति
मित्रावरुणाभ्यां त्वा प्रशास्त्रोः प्रशिषा प्रयच्छामीत्यौडुंबरं यजमानमुखमात्रं मैत्रावरुणासंनिधानात्तस्यैव मुखमात्रो मा भूदिति यजमान
मुखमात्रमित्युक्तं॥ ॥दीक्षितदंडं सोमे दीक्षितदंडं सोमे समर्पयति॥ ॥क्रीतेवा॥ अस्मिन्वाव सरउति॥ ॥एकादशप्रयाजा अनुयाजाश्च॥
व्या ४ रयं चैकादशसंख्यास्त्यन्नसंयोगानीचोदकप्राप्तेषु प्रयाजेषु श्रूयते।साभ्यासेन पूर्यते।या पुनरुत्पन्नसंख्या श्रूयते सा पृथक्त्वेनिर्देशाद्भिन्न
भवति।यथाप्रकृतौ पंचप्रयाजान्यजतीति।अभ्यासे च सति अल्पस्यैवाभ्यासो न्याय्यः।एवं च सत्यभ्यासविनाशे अल्पस्यैवावर्तते।अनेक
देवताकानेकयाज्यावांश्च पंच स एवायमिति॥ एवं यत्र यत्रोत्पन्नसंयोगिनी संख्या तत्र तत्राभ्यासेन पूर्यते।यथात्राणिसमिधयजेषि ६
न्न होतिरिति कर्माभ्यासः।तिस्रोन्ववध्या एवं विंशतिरग्नीषोमीयाः पशव इति।द्रव्याभ्यासः कार्यं तु सर्वत्रैकमेवेति॥ ॥समैत्रावरुणोप्रैषेत्या १९३

नम्या २

५-६०

कृऊहातेनतद्भवत्॥ ॥संज्ञप्तः पशुरिति प्राहेश्यपतानुमुहूर्त्तमित्याहासोमे। संज्ञप्तः पशुरिति शमित्राहेश्येत। अनुमुहूर्त्तमित्याहासोमे। असोम
यहणेनचनिरूढोभिधीयते। तमेवहिप्रकृत्यैवंश्रूयते। तस्मादुपांशुसंज्ञप्तं ब्रूयादतोनुमुहूर्त्तमिति॥ ॥देवेभ्यः स्वाहेति जुहोति। पूर्वाहुति
संस्कृतेनैवान्येन॥ ॥नवैतेजुहुयात्। वाशब्दो विकल्पार्थः। एवं हि श्रूयते। ते वा एते परिपशव्य इत्याहुती। सयदि कामयेत जुहुयादेते
यशुकामयेतापिनाद्रियेतेति॥ ॥वपाश्रपणीभ्यां नियोजनीचात्वाले प्रास्यति माहिर्भूरिति। रशना वकृत्वेपि विकारे अहि पृदाकुशैवा
उपमायोत्त्वा न विपरिणाम्यते। उपमायाश्चानं गत्वा दविपरिणामः। अंगभूते हि प्रकाशयितव्यं। न चोपमांगभूतेति। भूरिति तु पदं शरनापर
त्वाद्विपरिणाम्यते॥ ॥प्रतिप्रस्थाता पत्नीमुदानयेत्साह॥ ॥नेष्टरिति सोमे। सोमग्रहणं च सोमविषयमेव। तत्र हि नेष्टा विद्यते एवं च सति सो
मवाहेष्टएष्टुषु प्रतिप्रस्थातरिति वक्तव्यं॥५॥ ॥पात्रेजनहस्तौ वाचयति न यत्र मस्तश्रातानेति। पात्रेजनहस्तां पत्नीनयन्त्या च यतिनम
स्मा ४ स्तयः तानेति। पत्नी वक्तृत्वे च कृत्वपर्याचारके वपा त्रेजनहस्ता संस्कारार्थत्वात्सर्वासां वाचनमिति॥ ॥पशोः प्राणान् शुंधति पत्नी। प्रा
णाः शब्देन प्राणायतनान्यभिधीयंते। तानि पात्रेजनीभिरद्भिः पत्नीसौंधयतीत्यर्थः। तानि इदानीमाह॥ ॥मुखं नासिके चक्षुषी कर्णौ।
नाभिं मेढ्रं पायुं पादान्संहृत्य वाचयते शुंधामीति प्रतिमंत्रं। मेढ्रं प्रजननमुच्यते। शेषं प्रसिद्धमेव॥ ॥शेषेण यजमानश्च शिरः प्रभृत्य
[illegible]चेतानेन स्त इति शिरः। पात्रेजनीशेषेण यजमानश्च शाध्यादध्वर्युश्च। अध्वर्युः कृएवीयाघोपघते। अध्वर्युश्च यजमानश्चेति विलिंगत्वा

ण्वी

कृ.पं. ७ [illegible]मादादादकृप्रतिपूयते। पशुश्चान्वक्। पशुश्चअन्सुकमनुनीयते। एवं हि श्रूयते। शमितेनंकंठवधानमर्तीति॥ ॥प्रतिप्रस्थातान्वारभत
[illegible]अपाणिभ्यां। काष्ठमयमयीभ्यां विशाखाविशाखाभ्यां॥ ॥तेवपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभत इति वचनात्। तमध्वर्युं यजमानोध्व
र्यु॥ ॥अन्वारभत इत्यनुवर्त्तते॥ ॥वेदितृणौ अध्वर्युरादाय आश्राव्याहोपप्रैष्य होतर्हव्यादेवेभ्य इति॥ अनेनेतरं यजमानस्याभिहितत्वाद
ध्वर्युग्रहणं॥ ॥रेवतीर्यजमानइति वाचयति। रेवति यजमान इत्यमुं मंत्रं यजमानं वाचयति॥ ॥शामित्रं नातीयात्। शामित्रमतीत्य
नगच्छेत्। शामित्रेग्निं निदधाति। यतो गृहीतोग्निस्तत्र निधानमात्रमिति पुनः शामित्रग्रहणं। निर्मंथ्यमेके। अग्निं निदधातीति॥
तुव्यश्रुतिर्वाधिकल्पः॥ ॥पश्चात्तृणमुपास्यति वर्षो वर्षीयसीति। शामित्रस्य पश्चात्। मंत्रश्चानेकयजमानके विपरिणम्यते॥ ॥
तस्मिंत्रेनं निघ्नंति प्रत्यक्शिरसमुदक्पादं तस्मिन्नत्तणोपशुं प्रत्यक्शिरसमुदक्पादं निघ्नंति। प्राक्शिरसं वा। उदक्पादमिति
वर्त्तत एवा। शिरसो दिक्षियमेपिस्मतिपुरुषस्यादक्षादंतावाचनिकाकर्त्तव्याचोदकानुग्रहाय॥ ॥संज्ञपयमुखंनमयंत्यवाशमानं। मुखस्य
हणपुर्वकं नमनं यथा शब्दं न करोतीति॥ ॥वृष्ठेणावातमयंति। वेष्कश्चावनकउच्यते॥ ॥एत्यावहूनीयमावत्यासते। अध्वर्यु प्रतिदयः॥ ॥संज्ञ राम. ७
पयान्वगन्नित्येव ब्रूयात्॥ अनेनमंत्रेण शमितोच्यते। संज्ञपय संज्ञपनं कुरु। अन्वगन्निति देवान्प्रत्यनुगच्छत्वित्यर्थः। तथा च श्रुतिः। स यदी
हान्वगन्नित्येतर्ह्येष देवाननुगच्छतीत्येवं च कृत्वानेदं पाशुके स्य पदस्य विपरिणामः॥ ॥स्वाहा देवेभ्य इति जुहोति। पूर्णाहुति विकारत्वात्

१-६१

वशा वेनने ष्ठुरेवा त्वर्षतां पुरुतो। तथाच ब्राह्मणं। तानेषा वाचयतीति पुरुरत्य अथैनां सामकृय एषा संस्रप्तापयतीत्याह॥ ॥उत्तरतस्तिष्ठन्प्रत ग

प्यवपामंतरा यूपाग्नी हत्वा दक्षिणतः प्रतिप्रस्थाता श्रपयति परीत्य। उत्तरतस्तिष्ठन्नाहवनीयप्रत्यप्यवपामंतरेण यूपाग्नी हृत्वा द

यूपे परीत्य दक्षिणतो व्यवस्थितः प्रतिप्रस्थाता श्रपयति। संप्रदायेतु चात्वालावसेकादि प्रतिप्रस्थाता। चात्वाले बर्हिः क्षिप्य शामित्रे प्र

श्रं तपतीति। प्रतपने श्रपणैकदेशः। तां पशुश्रपणे प्रतपतीति तन्न। यो हास्यात्रापि श्रता भवतीति श्रूयते। श्रपणं च प्रतिप्रस्थात्रा कर्तव स्या

मिति संप्रदायः। वपां श्रपणेनाभिधारयत्यग्निराज्यस्य वेत्विति। अभिघारणं तु प्राकृतमेव। अग्निरिति लिंगसंयोगादतश्च स्वाल्यमन्यमि

नितिद तिषु॥ स्तोकेभ्योनुवाचयति श्रुतायां श्रुतां प्रचरेत्याह प्रस्थाता॥ ॥स्वाहाकृतिभ्यः प्रेष्यति। स्वाहाकृतिशब्देनोत्तमप्रयाजोभिधी

यते॥ पञ्च त्वा वपामभिघारयति पृषदाज्यं ध्रुवां प्रथममाज्यभागौ चेतराश्चेच्छेदुपयश्ययेः। यद्याज्यभागावत्रक्रियेते इति निरूढे पशौ

ज्यभागयोर्विकल्पः तेनोच्यते। अत्राज्यभागौ कुर्वन्निति। आज्यभागौ कुर्वन्नत्रावसरे करोतीति। अग्नीषोमीये पुनराज्यभागौ

न स्त एवेति क्रमेण॥ ॥वपया चरिष्य उपस्तीर्य हिरण्यमवधाय वपामवद्यन्नाहेंद्राग्निभ्यां छागस्य वपायै मेदसोनु ब्रूहीति। उप ले

स्तीर्य जुह्वामाज्यं हिरण्यशकलमवधाय वपामवद्यन्नाहेति चसरूानुवाचनार्थं इंद्राग्निभ्यां छागस्येति च प्रयोगप्रदर्शनार्थं

न सोमादिषूदासार्थं विकल्पेन सत्वदेवताश्रवणमिति॥ ॥हिरण्यमवधायाभिघारणं सोमोनिरूढे तु सकृदभिघारणं। स्वाव्रा

वर्के ट उत्क्षिप्यते। मन्त्रसत इति शिरः शेषमंत्रा यथार्थं विनियुज्यंते॥ ॥यत्ने क्रूरमित्यंगानि। अनुषिंचत इत्यनुवर्तते। शमहोभ्य इति पश्चाद्दशो ता

निषिंचतः संस्कारत्वाच्चाव्यतिरिक्ते निषिंचामीति च मंत्रेध्याहारः॥ ॥उत्थानं पशुं कृत्वाग्रेणनाभिं तृणं निदधात्योषध इति। अथैनो

ग्रे हि वपायाः स्थानमिति॥ ॥स्वधित इति प्रज्ञातया भिनीषा यच्छित्वाग्रेसव्ये कृत्वा दक्षिणेन मूलमुभयतो निलोहितेन रक्षसामि त

गोपयं ति॥ ॥प्रज्ञाताच्छन्नाकाधारा उच्यते। यया पशुसमंजनं कृतं। छित्वा सतृणं चर्मणाग्रे सव्येपाणौ कृत्वा दक्षिणेन मूलं विगृणी

कृत्वोभयतो निलोहितेन रक्षसामित्यनेन मंत्रेण॥ ॥निरस्तमित्यपास्यति। अन्ते मूलं। इदमहमित्यभितिष्ठति यजमानो रक्षोभि

धायकत्वादुदकोपस्पर्शनं। अत्र बहुयजमानके एक एवाभितिष्ठतीति कृत्वर्थत्वात्॥ ॥वपामुत्खिद्य वपाश्रपण्यौ प्रोर्णोति घृतेन द्या

वापृथिवी इति प्रोर्णौति वपया वेष्टयति। वपाश्रपण्यौ। तयोश्च उरवा कार्ष्मर्यत्वात्तन्मंत्रेण हितेनादानं द्यौ स्थः पृथिवी स्थ इति परि

वास्य चात्वालेऽवक्षिप्य शामित्रे प्रतपति। परिवासनं च छेदनमुच्यते॥ ॥शामित्रैकदेशमाहवनीये प्रास्यत्यग्नीत्। तस्य पुनरस्मु

न्द्र कमग्नीदादत्त इति पुनःशब्देोपादानार्थं व्यपदेशः। शामित्रैकदेशस्य न प्रासनमिति। काएवानामपि चतस्रुनरण्यजंतीति पते। पुनःशब्द श्री

स्य कृतार्थ वचनित्वात्॥ ॥तृणाग्रं चाघ पुर्वीयोवेरिति। आहवनीये प्रास्यतीति वर्तते। अथ स्तनपदार्थं अग्निपुरोः। च शब्देन तस्यानु राम

कर्षणं मा भूदित्यधपुग्रहणं। एवं चानेनैव ज्ञापकेनाग्नीषोमीये प्रातः। तेनास्यैनां वाचयतीत्युक्ता सोमकृयणं चसमीक्षमाणामित्यच ट

५८

= नेव कृत्तात्र रात नस्कृत तन स्रा ः मता।त • भ =

मुपगानं दर्शयति। तस्यैतद्दर्शनमिति। एवं तावत्केषांचिदयमेव सिद्धान्तः। ऋत्विजामध्ये एकः कश्चित्करोतीत्यर्थः। अत्रोच्यते। यदुक्तमपूर्व
प्रत्वा क्षामित्र इति। नैवं। येन ऋत्विग्व्यतिरिक्तस्य शमितुः प्रकल्पनं दृश्यते। शमितेनं कण्ठे बध्नानयति। तथा श्रृतं हविः शमितरिति १३
तत्र तत्र शमितारं दर्शयति। ननु ऋत्विजामेवैकः शमनं कुर्वन् शमिता भविष्यति। तस्यैतद्दर्शनमिति नेत्युच्यते। व्यापृतेषु ऋत्विक्षु शमि
तृशब्दश्रवणादन्य इति गम्यते। प्रतिष्ठिता पशुमन्वारभते। तमध्वर्युर्यजमानश्च वरुणोऽग्निप्रैषात्। तथाऽध्रिगोर्होता। अमीदुल्मुकमादा १४
कतप यामीतो गच्छति। ब्रह्मसंस्कृतौ प्रत्यवेक्षणे। एवं सर्वर्त्विक्षु व्यापृतेषु शमिता श्रूयते। अतस्तेभ्योऽन्य इति गम्यते। यच्चोपगादर्शन
मुक्तं तदप्रकल्पितविषयं। अपि च संज्ञपने ध्वर्युर्ऋत्विक्कृते केसति समाख्या प्राप्नोति। तत्राध्वर्युशमितृसंवादे इदमनुपपन्नं
स्याद्भवति। अनेनाध्वर्युर्वति शमितरि तदेनो भवतीति। तस्मादन्यः शमीतेति। अयमर्थानेन सूत्रेण विकर्तनमुच्यते। विशाखिपशु
मन्यः अन्यः पशुविकर्तनं करोति। ऋत्विजां चैको प्रकृतत्वा क्षामित्रे। ऋत्विजामेवैकः पशुविकर्तनं करोति। न शमिता। कुत एतत् प्रक
तत्। अप्रकृतत्वा क्षामित्रे। शामित्रशब्देन विकर्तनमभिधीयते। तत्र नान्यः प्रकृतः प्रपक्षवचनाच्चान्यः प्रकल्प्यते तेन तत्र ऋत्वि
जां कर्तृत्वं। उपगादर्शनाच्चेति व्याख्यातं॥ ॥विकल्पो वान्यः ऋत्विक्संयोगात्॥ ॥विकल्पो वा पुनरन्यो भवति कुत एतत् ऋत्विक्
कर्क १ संयोगात्॥ ॥अंगान्यवयवे भज्यंतां। अवखंडयतीत्यर्थः॥ ॥हृदयं जिह्वां क्रोडं सव्यं सक्थि पूर्वं न उक्तं पार्श्वे पर्श्वे दक्षिणे

अपि प्रवृत्तत्वात्। मारणे हि शमितुरभिप्रवृत्तत्वाद्धि कर्तनेनैसएवेति॥ ~~[illegible]~~ एवं प्राप्त उच्यते॥ ४ ३०·४
नरूविगिति। कुत एतत्।
३ × ब्रह्मस्थितत्वादित्त्रा समाख्या मनुष्या मुपगमत्व रादन स्वत्र नस्य भवता स्युपस्य तागद ४५·२

कर्क ९ षट्पंचावत्तान्यपामनक्तीति वचनात्। सोमशब्देन चाग्नीषोमीयोपलक्षणं। अतस्तद्विकारेषु निरूढवर्जे सर्वत्र छिद्रमिषारणमिति।
आश्राव्याहेंद्रुमिभ्यो छागस्य वपामेदः प्रेष्येति। एतदपि प्रयोगोपदर्शनार्थमेव॥ ॥प्रस्थितमिति च प्रस्तुते। प्रस्तुतशब्देन सवनी
याभिधीयते। तद्विकारेषु चैप्रस्थितशब्दः। सोऽयामप्रस्थितमिति च त्रिपशोः सर्वमिति॥ ॥ऊत्वा वपाश्रपण्या वनु प्रास्यति
प्राचीं विशाखां प्रतीचीमितरां स्वाहाकृत इति। वपाश्रपणी वऊत्येमंत्रस्य विपरिणामः॥ ॥चात्वाले मार्जयंते सपत्नीका इदमार्ये
प्रवहतेति। मंत्रलिंगाच्छ्रिमाजेनमिति॥ ८॥ ॥विशाखिपशुमन्यस्त्रोऽनुहिंसाय्। अन्यः पशुं हिनस्ति मारयतीत्यर्थः। कुत एत
दन्य इति। संज्ञाभेदात्। अन्या हि संज्ञा शमितेति। संज्ञाभेदाच्च संस्थांतरे प्रतीतिर्भवति। देवदत्तो यज्ञदत्त इति यथा। एवं प्राप्ता
विदमुच्यते॥ ॥ऋत्विजां वैकोऽप्रकृतत्वा क्षामित्रे। ऋत्विजामेवैकः करोति संज्ञपनं नान्यः। कुत एतत्। अप्रकृतत्वा क्षामित्रे। शाम
नकर्मणि संज्ञपनेनैव कश्चित्कल्पितो दृश्यते। वेदानतु च शमितेनं कण्ठे बध्नानयतीत्यपि प्रकल्पनं। उच्यते। ऋत्विजामेवैकः समन
वैर क्रियायोगाच्छमितेति। तस्मादृत्विजामेकः करोति। किंच। उपगादर्शनाच्च। दृश्यते खल्वयमर्थो यथा ऋत्विग्व्यतिरिक्तस्याप्रकल्पने ऋ
त्विजामेव कर्तृत्वमिति। उमित्रत्विज उपगायंत्यामिति यजमान इति ऋत्विजामुपगानं दर्शयति। विधिरिति चेत्। मैवं। उमित्येवंपरत्वा राम
द्धाक्षस्य न्यायप्राप्तान् ऋत्विजोनुवदति। तद्विधाने हि वाक्यभेदप्रसंगः। तथा नाध्वर्युरुपगायतीति अध्वर्योः प्रतिषेधं ब्रुवन्नृत्विजा ९

१६२

१९६

उखोखान्मंत्रेणादानं॥ पशुचोषालायां। चशब्दाच्छामित्र एव श्रपयति। अत्र हि वचनं भवति। अथ य एनमुद्वं पशुश्रपणायाहरंतीति। पशु
देवताये पुरोडाश एककपालः। अग्नीषोमीयात्पशुस्तद्देवत्यः पशुपुरोडाश इति तद्देवत्यता विहिता। एककपालार्थो यमारंभः। अग्नीषो भव
याग ६ मीय एकादशकपालः पुरोडाशः। त्वयं प्राप्यात तदन्वयाच्चैकादशकपालतो एतदुक्तं॥ ॥अग्नीषोमीयो वा विशेषापदेशात्॥ वा शब्दः प
क्षव्यावृत्त्यै। नचैकादशकपालता कर्तव्या। किं कारणं। येनाग्नीषोमीयदेवता द्वित्वसामान्येन विशेषेणैकादशकपालता भवति। न पा चा
भिषेचनीयेऽनूयते। अग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपति तदनुदेवस्याहवींषि निरूप्यंत इति। न चाग्नीषोमीयपशुपुरो
डाशविकारं पश्वंतरेषु पशुपुरोडाशः। पुरोडाशविकार एवायं। तस्मादेकविंशत्परिमाणादिभिरिह कपालसंख्याने एकादशकपाल इति
॥ ॥अत्रैव हविष्कृदाह्वानमिन्थो कत्वात्॥ हविष्कृदाह्वानाहननयोरेककालत्वमुक्तं। स यत्रैव हविष्कृतमुद्वादयति तदेव दृषदुपले
समाहंतीति। हविष्कृदाह्वानं चरुविर्निष्पत्त्यर्थं। हविः करोतीति हविष्कृत्। तेनौषधे प्राप्नोति। आह्वानकालत्वाच्च आहननमपि अत्रैवा
वसरे तेनोच्यते हविष्कृदाह्वानमेवात्र भवति। आहननं पशुपात्रप्रोदेशनेरकालमेव। तस्मिंहि पशून्यपामहे कवाक्यत्वे। आह्व
नस्य पुरोडाशेऽपि येति॥ ॥अवे यज्ञाहें डाग्नीष्मापुरोडाशस्यानुवृत्तिः। महानुवाचनं द्रव्यो चारणाच वचनात्। ऐडामिये हरणोद्य
दर्शनार्थः। सूर्यप्रजापत्योरपि पदेऽभावात्॥ ॥ यमति चावद्यति स्विष्टकृद्वत्। चशब्दादनंतरमेव स्विष्टकृदर्थस्यैव स्विष्टकृदर्यत्

---

४ रिति जौहवानि॥ कोऽत्र श्येनवक्षोभिधीयते। यकृच्छ्येन च कालेयं गुदः पश्चाच्छायावस्थानं तन्म ध्यांद श्लिष्टवस्थोनै। ओ।। ८॥ ४ ९०९

कई दमध्यद्दक्षिणाश्रोणिः एतानि जौहवानि त्र्युक्तमेवावदेयानि॥ ॥दक्षिणमक्षि पूर्वनउक्तं। सक्थिः सवतेनाम ध्रुवं दक्षिणा श्रोणिरिति गौ
१० ~~णीति स्मानि जौहवानि तास्य श्येनवक्षोभिधीयते कच्छ्येनकालेजंगुदस्य वक्षसमस्य~~ नेनोऽस्मिन्काप इति वक्षोभिधी
यते। तस्याः पूर्वः प्रथमोनुवाकः सोऽवद्यः। गुदतृतीयाणिष्ठं। गुदतृतीयस्थूलं छतरं। सव्या श्रोणिस्तथा परमतानि। उपभृत्यवदयानि रि॥
॥ ॥यूषिष्ठसुपपठीनयद्वर्षीष्ठमहत्तरं गुदत्रतीयं तडुपपक्ष्मार्थं। एवमेव विभागश्च वगाणे। अवदानकालप्रभागः गुदस्यने
स्व ५ दानीमेव। जौहवोपभृतविवेकार्थं चेतदुच्यते॥ ॥वनिष्ठुजाघनीं चावद्यति। वनिष्ठुः स्थूलांत्रं। जघनप्रदेशभवा जाघनी प्रसिद्धैव
क्लोमप्लीहा धूपूपुरीतंतं चेच्छेनवे यवृतौ। क्लोमा गलकनाडिका। प्लीह प्रसिद्धैव। अध्रूध्रीवंध प्रदेशस्योपरि भवति। पुरीतच्छे गुद ६
वेनोत्तरं यमवच्छादितं येन तदुच्यते। पुरीतत्पुरीषं हृदयं तत्पुरीतता प्रच्छादयतीति श्रुतत्वात्। एतानि भागावदानानि। एषा
मत्र विकल्पोऽन्यत्र नियमः। अग्नीषोमीयत्वभावस्त्युक्तमेव॥ ॥उदरमेदो वशिष्टं गुदे प्रास्यति कृशश्चेत्। उदरे यत्तमेदो गयल
लेनगृहीतं तदा वशिष्टं गुदे प्रास्यति। यदि कृशः पशुर्भवति। कृशो दुर्बल उच्यते॥ ॥स्वमेवधमवधाय तस्मिन् लोहितं रक्ष
सामिति। स्वमेगर्तेऽजि वधमवधाय तस्मिन्लोहितं रक्षसामित्यनेन मंत्रेणावदधाति। प्रतिपत्तिश्चियं अत्र स्नुवरुषु सर्वेषां प्रतिप राम
त्तिः॥ ॥शूले हृदयं प्रतप्य शामित्रे श्रपयति। सा शान्यविकारादुखोर्यां अपणोप्राप्ते वचनं शूले प्रतप्यश्रपणं। शूलस्य चोखाकार्यापत्य। १०

९ ६ ६ पशुधूर १९७

ग्नीषोमीयमजमालभेत अग्नीषोमीयस्य वपयप्रचर्याग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपतीति। यत्र हि येन शब्देनोपादाय फले वि
धानं। यथा वैश्वदेवेन प्रजाकामं याजयेदिति। तत्रोपादेयत्वेन विधानात् साहित्यं द्विरूपयोर्युगपदंगोपकारापेक्षानेनागृह्यमाणविशेषसं
निधानाविशेषाच्चैतंत्रेणांगोपकारसंबंधः इह पुनश्चोदनाभेदादितंत्रं संभवति॥ ॥कालगुणभेदाच्च॥ अन्यस्मिन्काले पशोः प्रयाजाः कृतास्त्र
न्यकालीनस्य कथं पुरोडाशस्योपकुर्युरिति। तथा गुणभेदाच्च एकादशसंख्यागुणका हि पशोः प्रयाजाः पंचसंख्यागुणकाः पुरोडाशस्य। अ
तो हि न तंत्रेणोपकारसंबंधः। एवमाचार्येणापकृष्टोपन्यासः कृतः। अत्र य एव न्याय्यतरः पक्षः स एवांगीकर्तव्यः। कश्चासौ अत्र यान्यस्यास
मानार्थत्वादिति। अंगोपकारस्य हि आम्नानसामर्थ्यादेतेषु पवेंगानां अपूर्वसंबंधः रक्ष्यते। इतरथांगप्रधानयोरसंबंध एव भवति। य
दांगानि न तदा प्रधानानि प्रधानकाले च नांगानीति। एवं सति पशपुत्रचोदनाभेदस्तथापि प्रयाजे कृतमपूर्वं विद्यमानत्वात्पशुपु
रोडाशेपि प्रसज्यत एव चोदनाभेदो नाकारणमिति। तथा कालभेदस्त्वाकारणं॥ गुणभेदश्च। तस्मात्साध्वभिहितमिडामवद्यत्यक्रिया
न्यस्य समानार्थत्वादिति॥ ॥पशुर्दक्षिणा धेनुर्वरो वा मार्जिते॥ ॥७॥ ॥पशुरेव पशोर्दक्षिणेति पुंपशुर्गृह्यते। वरशब्देन स्वाधीनं
द्रव्यमभिरुचितमुच्यते। मार्जितग्रहणेन च संनिधानात्पशुपुरोडाशमार्जनं गृह्यते। तथा च श्रुतिः। पशुपुरोडाशेऽडायामेवोपहूतायां द
क्षिणां नयेदिति। आचार्येणासंरोपनं वपा रंवेदनप्रसंगेन पशुविकल्पेनानुख्याप्रदक्षिणात्तमभिहितं। अवसरः पुनरयं। येनेवं हि श्रूयते।

द्रे १

११ ...ले। स्विष्टकृदवदानस्याकालत्वात्। अपि च स्विष्टकृदवदानं जुह्वां प्राप्तं तदिहापनीतमिति वत्करणं॥ ॥३॥ ऐन्द्राग्निभ्यां पुरोडाशमिति प्र
...ति। प्रदर्शनार्थमेवेदमुक्तं॥ ॥ऊत्वासमानीयाग्नये प्रदाय सगुणस्थानेऽगुणः। ऊत्वा जौहवमौपभृतं समानीय अग्नये प्रदानं क
राति। स्विष्टकृद्गुणरहितायामपेक्षुत एतत्॥ ॥सर्वविकार एकत्वात्। सर्वस्मिन्विकारे एकत्वं निर्गुणाभिधायकं दृश्यते। अनुवाक्या
यामेडादेष्ये पुरुदंससनिं गोरिति निर्गुणमभिधानं। तथा मैत्रावरुणप्रैषे होता यक्षदग्निं पुरोडाशस्य जुषतामिति याज्यायामिति स्व न४
हव्या समिषो दिदीह्यस्मे पक्तिमिमां हि अवांसि विश्वा अग्न इति। एवं सर्वत्र निर्गुणमभिधानं। यद्विवाध्वर्युरपि अनुवाचनप्रैष
योर्निर्गुणमभिधानमस्विष्टकृच्छब्दं करोतीति तदा याज्यानुवाक्याप्रैषैः सह एकवाक्यता भवति। इतरथा हि क्वचित्सगुणं क्वचिन्निर्गु पुरो॰५
णं अभिधानमित्यसमंजसं स्यात्॥ यथाम्नातं वा विभेदात्। यत्र यथाम्नातं तत्र तथैव कर्तव्यं। भिन्ने हि वाक्ये याज्यानुवाक्याप्रै
षविकाराणां विधानात्। यथावचनं सर्वत्र कर्तव्यतायुक्ता। तेन वा शब्दात्पक्षो विपरिवर्तते॥ ॥इडामवद्यत्यक्रियान्यस्य समानार्थत्वा
त्। इडाग्रहणं शेषकार्योपदर्शनार्थं न्यायस्य तुल्यत्वात्। न तत्स्रुदासमर्थं इडादीन्येवावद्यति पशुपुरोडाशचोदकप्राप्तस्याप्यवाधा पि॰
नादेरदृष्टोपकारकस्याक्रिया। कुत एतत्। समानार्थत्वात्। यमेवोपकारं पशोः प्रयाजादीनि कुर्वंति पशुपुरोडाशे तमेव। अतः पश्व राम
र्थमनुष्ठितानां पुरोडाशे उपकारप्रसंग इति॥ ॥न चोदनाभेदात्। नैतदस्ति यदुक्तं। किं कारणं। चोदनाभेदात्। भिन्ने ह्येते चोदने। अ ११

१८

५ ६५

चनाद्दक्षिणत इत्युच्यते । उत्तरतस्तु सान्नाय्यविकारादासादने प्राप्ते वचनाद्दक्षिणमित्युच्यते । प्रतिप्रस्थाता तु प्लक्षशाखास्ववद्यतिवचनात् । आ
लंभनमधर्य्येपि च ॥ ॥ उत्स्नपनं तोइपस्तरणीत्येवमाहोमहवन्यापात्र्या आचमने तापैहविषावदायमानस्यानुगृहीत्वा तेऽस्य चोरवद्यति पशोर्ले
द्विर्द्विः । यथोक्तग्रहणेन जौहवानि जुहूक्रामोपभृतान्युपभृति द्विरवदानं तु वचनात् । तानि द्विर्द्विरवद्यतीति ॥ ॥ अशेषेषु दक्षिणी मे । गुदत
तीये पुनरशेषे गृह्यते । वपावच्छिरणं । अथ स्नातोपारिष्टाच्च । मनोता प्रैषस्तु प्रतिप्रस्थातुरेवेति संप्रदायः ॥ ॥ उसीनि वसां गृहीत्वा द्विर
भिघार्य्य प्रयुतमिति पार्श्वेन संसज्य त्पासिना वा रेडसीत्यनेन मंत्रेण वसां होमहवन्यां वसां गृहीत्वा द्विरभिघार्य्य प्रयुतमित्यनेन मंत्रेण पार्श्वे
नासिना वाङ्क्ष्वयति । शेषमिडापात्र्यामासिच्य क्रोडमनस्थीनि च प्रास्यति श्रोणिं वर्जं । चोदकपरिप्राप्त्यात्वात् पूर्वं प्राशित्रग्रहणं । तत आ द्वा
सेचनादि ॥ ॥ जाघनीगुदं निधाय हैंद्राग्निभ्यां छागस्य हविषोनुब्रूहीति । जाघनीगुदयोर्निधानमुच्यते पशुसमर्थेनाभावप्रसक्त्यर्थं
प्रतिपत्तिर्हि पशुसमर्थेनं । न चैते प्रतिपाद्ये कार्यार्थत्वात् । ऐंद्राग्निभ्यां छागस्य हविषोनुब्रूहीति प्रयोगप्रदर्शनार्थमुक्तमेव आश्राव्याहैंद्रा भि
ग्निभ्यां छागस्य हवीः प्रेष्येति । एतदपि प्रयोगप्रदर्शनार्थमेव ॥ ॥ प्रस्थितमिति च प्रस्तुते प्रस्थितशब्देन सवनीयो लभ्यते । नानुवंध्यापि येन स
वनीयविकारेपि शोप्रस्थितशब्दमुपमंत्रयति । प्रस्थितमिति च त्रिपशोः सर्वमिति ॥ ॥ अर्द्धर्च्चांतरे याज्यायै वषट्कृते शं उहोति । हुते घृतपावानरति
याज्यायाः इति पश्चार्द्धे च अर्धः ॥ ॥ दैवतं कृत्वा प्रदक्षिणमावृत्य जुहूं पृषदाज्यस्योपघ्नाहवनस्य तयेनुब्रूहीति । प्रदक्षिणग्रहणमौत्तरया

व

कं॰ अथ पशुपया प्रचर्यैतेन पुरोडाशेन प्रचरतीति प्रकृत्य तस्माद्वपया प्रचर्यैतेन पुरोडाशेन प्रचरंति पशवो वै नस्य वंधुर्यच्च कुर्वेष पशुपुरोडा
११ पा शानुनिरूप्यते यपशुविशसीति । तस्मात् शाखांतरे ग्नीषोमीयस्य वपया प्रचर्य ग्नीषोमीयं पशुपुरोडाशमनुनिर्वपतीति अतो नैव
पशुविकर्त्तनादि उत्त्वा प्रकल्पतांतरतन्तः ॥ ॥ शमितारं शास्ति त्रिः प्रच्यावयतात्त्रिः प्रच्युतस्य हृदयमुत्तमं कुरुतात् यत्त्वा पृष्ठं छेत
हविः शमितारिति शृतमित्यपि वक्रूता वशृतं भगवो न शतं हीति । हृदयमुत्तमं कुरुतादित्यनेन वा पाशुकेविपरिणम्यते । यत्त्वा पृष्ठादि
त्येवमादि द्विनायमनुशासमं मतस्वतीयस्तवन शमित्रनुशासन प्रश्नत्ताद्विपदुक्तं तदेवमादि प्रत्येतव्यं एवं उशास्त्रं यथानिरंतएव ॥ नस्य
त्रिः प्रच्युते हृदयं प्रवेशोत्तमं करोति । प्रत्यवनं चोत्सेचनमुच्यते । अवहन्ति घृष्वैशूलान्निकृष्य हृदयमुत्तममवदानोत्तमं करोति ॥ ॥ शूलं चा मांसा
व्याद् मूमे । करोतीति वर्त्तते । जुहूं पृषदाज्यस्याद्योपनिष्कम्य पृष्ठति शृतं हविः शमितोरिति त्रिरभिक्रामन् ॥ ॥ जुहूं पृषदाज्यं गृहीत्वा चात्वा
कृत्वः लोत्कराचंतरेणोपनिष्क्रम्य त्रिः पृच्छति । शृतं हविः शमितारित्यभिक्रम्याभिक्रम्य । प्राप्ते तद्देवानामित्याहैष पशुः । शृतमिति प्रोक्तेथ मित्रा
प्रतिपृष्टे तद्देवानामित्याहाध्वर्युरूपांशु ॥ ॥ संततमनश्रति हृदयमभिघार्य सर्वं । पशुमभिघारयतीति सूत्रशेषः पृथक्केन हृदयग्रहणात्
पृषदाज्येनाभिघारणं तस्यैव । उत्तरस्यांतरेणान्येन त्वरमाणमेव । प्राकृतत्वादभिघारणस्य । मंत्रस्तु वचनात् हृदयएव । पश्चमः वपावत्कृत्वा ग्राम
दक्षिणतः प्रतिप्रस्थातावद्यति प्लक्षशाखास्ववद्यति । वपावदित्यनंतरापस्याग्नीहत्वा दक्षिणतोवद्यामासादयति । उत्तरत आसादने प्राप्ते व १२

१९८

नः पुरोततमध्वर्यवरति । एषां चात्र विकल्पः स्तुन्नेमेव ॥ ॥ मार्जिते प्रेष्यत्यग्नीदौपयजानंगारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामि समिध
माधायाग्निमग्नीत्संमृड्ढीति । मार्जितग्रहणं च पवित्रप्रतिपत्त्युल्मुकसमासोपलक्षणार्थं मपिधेन चैकतः प्रैषमनंतरं ब्रह्मन्प्रस्थास्यामीति प्रकृ
तमाह ॥ ॥ शामित्रादंगारानाहृत्य वेदिश्रोण्यां निवपत्युत्तरस्यां । अग्नाउपयष्टृहोमार्थं ॥ आग्नीध्रीयाद्वा सोम्ये होतृधिष्ण्ये ॥ आग्नीध्रीयाद्वा अं दो
गारानाहरति सोमे शामित्राद्वेति विकल्पः । तयोस्तु विशेषो होतृधिष्ण्ये निर्वापः ॥ ॥ प्रतिप्रस्थातोपयजति गुदतृतीयस्य प्रच्छेदमनुयाजेषु
समुद्रं गच्छेति प्रतिमंत्रं । प्रतिप्रस्थातोपयजति गुदतृतीयस्य प्रच्छिद्य प्रच्छिद्य समुद्रं गच्छेति प्रतिमंत्रं । अंगाराहरणस्य दृष्टार्थत्वात् । अं
गारेषु जुहोति हस्तेनैव । हस्तेन गुदकांडं जुहोतीति वचनात् । प्रतिवषट्कारं हुत्वा मनो मइति मुखोपस्पर्शनं । प्रतिप्रस्थाता करोतीति वा
क्यशेषः ॥ ॥ अनुयाजांते स्वरुं जुहोति दिवं ते धूम इति । अंतग्रहणाच्चधारानुयाजार्थेते स्वरुहोमः । चोदितार्थाभिधानाच्च मंत्रस्य स्वरु जां
वरुत्वे विपरिणामः ॥ ॥ पशुदेवतावनस्पतिभ्यः स्रुग्भ्यां हुत्वा स्विष्टकृतः । द्विकारत्वाद्धविःस्थानेतरप्राप्ते संकीर्तनं वचनादग्निं वीयथोपशुदेव
तायाः अनुगुणार्थमुच्चारणं । जाघन्या पत्नीः संयाजयति । आज्यकार्ये पत्नीश्च आसादनालंभने अस्याः क्रियेते । जाघनीवरुणेनेवासादने
मंत्रे विपरिणामः । उत्तानाया देवानां पत्नीभ्यो वयतीति वचनात् ॥ ॥ उडो चोत्तानाया एवापरिवर्त्यात्मपोगहपतये माधे च । अवयतीति व
चनादेव ॥ ॥ आज्येन पूर्वे । देकर्माणि कर्त्तव्ये पत्नीसाधन एव हि याग इज्यते जाघनी विहिता । अथ जाघन्या पत्नीः संयाजयतीति श्रूयते ॥ ॥ स

कर्क० र्त्रिस्रुदासर्वा । उपपूर्वो हंति अवयहणार्थोन्यत्रापि दृष्टार्थः । अथस्रुवेणोपस्त्याज्यमिति । समभिघार्याज्यस्योपहत्या सान आजुर्तिं जुहोतीति च । आश्रा
१२ व्याहवनस्पतये प्रेष्येति । अस्य च स्विष्टकृद्विकारत्वे संनिकर्षेणोक्तं ॥ देवतासंकीर्त्तनानि चात्र स्विष्टकृदुपलक्ष्यंते । अयाजनं नोपांशुयाज
विधानतः स्वरश्रुतिसौविष्टकृत इति ॥ ॥ हुत्वा समानीयसौविष्टकृतं । वानस्पत्यं हुत्वा समानीयसौविष्टकृतं द्रव्यमौपभृतात् स्विष्टकृद्यागं करो
न४ तीति सूत्रशेषः समानीयमानेन च स्विष्टकृदनुवाच्यं कर्तव्यं । अथयाज्युपभृत्यवदानानि भवंति तानि समानयमानः आहेति वचनात् ॥ ॥
प्रत्येत्य वा दिशो व्याघारयति वसाशेषेण वाजिनवत् । न्यायानेत्र स्थैस्यैव व्याघारणे प्राप्ते वाशब्देन पक्ष्यावर्त्य जुहोति त्वा जुहोति स्था
न मुच्यते । वाजिनवद्व्याघारयति । इयांस्तु विशेषः ॥ ॥ सर्वं जुहोति ॥ ॥ ऐंद्रः प्राण इति पशुं संमृशति । पशुशब्दश्चेमां सोपनदे
लार्थः । तानि चोपयुक्तव्यतिरिक्तानि गृहीतव्यानि न संस्कारार्थं विभाग्याशंकादर्शनाच्च विभाग्याशंकाहिनं नैव भवति । नोपयुक्तेषु अ
थपशुं संमृशतीति प्रकृत्याह अथपन्थु संमृशतीत्यय इमउपतिष्ठंति ते विमृष्टान्यंत इति संक्रमानृइति । तस्मात्प्राशित्रेडाजाघनीगुद
व्यतिरिक्तानामेव संमर्शनं ॥ ॥ अवद्यत्येडां प्राक्पुरोडाशात् । पशुसंमर्शनं । वाशब्दो विकल्पार्थः । अतश्च प्राशित्रप्रदानं पूर्वी उपहूतो राम
यावनिष्ठुमग्निधप्रयच्छति ॥ ॥ अवधुध्रीं होत्रे समर्पयति । अवांतरेडावा । अध्रूधीभवति । अवांतरेडाकार्यो धुध्रीभवतीत्यर्थः । १३
अस्मिंश्च पक्षे अवांतरेडा न दीयते । लोकादिनामप्यस्मिन्नेवावसरे समर्पणं । शाखांतरात् । शाखांतरं चक्कोमे बैलेमे लोत्याहयजामा १९
अतश्च जाघनीगुदनिधानो नरकांतं प्राक्प्रदानादिस्य कर्त्तव्यत् ॥ ७ ॥ इडानादधाति । वैकृतावसरे प्रकृतानुवृत्तः ॥ x ३०-३ अ

1-6

न२

ति दोः इत्यतो विकल्पः॥ ॥न सोमेन्द्रवंध्यावर्जं। स चायं शूलावभृथः सोमेन्द्रवंध्यावर्जं न भवति। एवं हि श्रूयते। स वै नाग्नीषोमीयस्य पशोः करो
ति। नाग्नेयस्य वशाया एवानूबंध्याया इति। न अर्थप्रतिषेधार्थता। अतुल्यप्रमाणशिष्टत्वात्प्रकरणेन सग्नीषोमीयस्य प्राप्तिचाक्षे
ने प्रतिषेधः विकल्पस्य चान्याय्यत्वात्। अन्याय्यो हि विकल्पः पक्षे बाधात्। ततः पर्युदासरूपेण नाग्नीषोमीयस्य पशोः करोति। नाग्ने
यस्येति अग्नीषोमीयसवनीयव्यतिरिक्तेषु शूलावभृथ इति। वशाया एवानूबंध्याया इति नित्यानुवादः॥ ॥वरुणप्रघासवत्समिदा
धानं भवतीति सूत्रशेषः। सूत्रे विसृज्यायराग्नीनां पूर्वे चतुर्गृहीतं प्रपाउत्तिवत्। वृतविसर्गोपदेशाच्च यत्रैव वृतं तत्रैव भवति। ना
ग्नीषोमीय इति॥ ॥सविहारोत्तः। अतः परमयं विहारः। अत्र कर्मापवर्गादायत इति केचित्। तदयुक्तं। अतिप्रणीतस्य पशुंगाभिनिवृत्त्यर्थत्वा
त्तातदंगत्वाच्च कर्मापवर्गायाइति। नित्यधार्ये यौमित्यपरे। अतिप्रणीतो हि पश्वर्थमुक्तः तस्मात्तदपवर्गे च स एव विहारो न्याय्य इति। सप्रदा
नुसवीहारोत इत्यग्निहोत्रार्थमुच्यते। अग्नीषोमीयविकारत्वादसमितपरिसमाप्तिरस्यात् तत्र चाग्निहोत्रं विहारस्य धारकमतः सविहार
इत्यग्निहोत्रार्थमुक्तं गतश्रियपक्ष सूत्रन्याय्यतरं वाक्याति। अग्निहोत्रार्थत्वे हि विहारस्यासंभव एव इदमग्निहोत्रं पशुयागान्ते वारूपत
तेत्र मध्ये वासूदितं तत्र मध्ये प्रसंगादिति प्रणीत एव प्राप्नोति। अपाने ततोऽपवृत्ते कर्मा लौकिक इति पुनरुद्धरणं प्रयोजयति॥ यत्तु नरुच्य
ते। अग्निहोत्रं विहारस्य धारकमिति तन्न दनुपपन्नं। अन्यार्थे हि विहारे तत्परिसमाप्तौ कर्मान्तरं विहारस्य धारकमिति दुःशकं वक्तुं॥ ॥समाप्ते

कर्कः
१४

[illegible]त्वादिशेषात् सर्वा एव नाद्यन्या कर्तव्याः। कुत एतत्। पत्नीसंयाजेभ्यो त्वाविशेषात्। ते दैवपत्नीः संयाजेपि छ्यंतः प्रति परायीती
ति [illegible] वनस्वादेवता यजतीति॥ ॥२॥ ॥बर्हिरुत्त्यायेण हं तिहृदयशूलमादाय। अथ हृदयशूलेनावभृथं यंतीति श्रूयते। अ
वभृथशब्दश्चात्रोपचारिकः। अयोगमनसंबंधात्। अतश्च यागो न भवति। तथा च सूत्रकारः बर्हिरुत्त्यायेण क्षेति हृदयशूलमादा
येति शूलस्यादानमात्रं न शूलेनावभृथमिति प्रतिपत्तित्वाच्चानेन शूले सर्वेषां प्रतिपत्तिः॥ ॥आहवनीयं वा पश्चात् प्रवृतान्निदीचे
तां वा शब्दो विकल्पार्थः। यत्रैवृताद्दीनि तानि च हविर्यज्ञविधेरिति॥ ॥अभ्यवेत्य शुष्काद्र्संधौ हृदयशूलमुपगूहति शुगसितम
भिशोचयोस्मांश्च द्विष्मश्च वयं द्विष्मो मा पो मौषधीरिति च। अभ्यवेत्य त्यवनीयादके शुष्काद्रसंधौ हृदयशूलमुपगूहति शु
गसीत्यनेन मंत्रेण चोदितार्थाभिधानाच्चास्थानेक शूले विपरिणामः॥ ॥ग्रामे तु दयात्रे निषिच्य पूर्वेण प्रपंपथा कुमुपगू
हति। ग्रैहर्षद्रूपा। ग्रामे निति ग्रदके प्रतिगमनमनुसारात्र ग्रेण पूपमुदयात्रं निषिच्य शुष्काद्रसंधौ पथा ने शूलमुपगूहेत्ताधा
म्नाधाम्नः स्तमित्रियानस्तु यस्मीं शंत्यपः। मंत्राभिधानसामर्थ्यात् द्वरुणाशाब्दनसाम्पो भिधायंते॥ ॥उपगूहनशेषो वा पूर्वः। पूर्वो मंत्रः उप
गूहनशेष एव भवति। विशेषेणोपगूहेन एव पठ्यत इति॥ ॥अभिमंत्रणं वान्तरेण। सुमित्रियानस्त्वं अभिमंत्रणं वा भवत्यपामुपस्पर्शे
ने [illegible] माध्यंदिनीयायाम् अभिमंत्रणं पठ्येते। अथाभिमंत्रयंते सुमित्रियान इति। काण्वीयानां चोपस्पर्शने अथाप उपस्पृशंति सुमि

गेलू५

राम
१४
१९९

१६८

नबी २

हि

दृसनमलुमा ॥४

तद॰

सा... आत्पौर्णमास्य सधर्मा इति पुनरूपता॥ ॥किंच। अनुहूदर्शनाच्चामास्ता निप्रकृत्य श्रूयते। कथमस्यैते पुरोनुवाक्ये भवतः। याज्यं वं नो वषट्कृते स्वाहा उत्तीम
वंतीति प्रश्नपूर्वकमाह। एतेषां वैमध्रपदानामाज्यानां यानि त्रीणि प्रथमानि पदानि तानि त्रिपदाः यस्याः पुरोनुवाक्या सा। अथ यानि चत्वारि उत्तमानि सा
चतुष्पदानि त्रिष्टुब्याज्या। इदमेव कपुसलमपंदडइति। गन्तुयस्य हा। एतेषां च पौर्णमासे दृष्टानामन्यग्रहणं च व्यो तो मासधर्मित्वं दर्शयति। एवं म
र्यधर्मपरिप्राप्ता विदमास्य॥ ॥तूष्णीमनर्थलुप्ता वचनान्मंत्र इति वृत्तिः। अनर्थलुप्ताऽइति दृष्टेनार्थेनानुप्राप्ता यथा एकाग्निं त्वे पिगार्हपत्ये अपया
दिनेति। एकाग्नयः। एकाग्निसाध्या एवं पदस्थी भवंति॥ ॥अप्रयाजाननुयाजा असामिधेनीकाः। तूष्णीमित्युक्तत्वात् सामिधेनीमंत्र चौ
न कात्र निवृत्तिः॥ ॥अनिगदाः। निगदशब्देन स्विष्टकृदुच्यते। अस्विष्टकृत इत्यर्थः॥ ॥प्रतिनिगद्य होमाः। तूष्णीमित्युक्तत्वाद्देवता प्रतिनिगद्य
होम उच्यते। वषट्कारानिवृत्तिरपि उच्यते॥ ॥स्वाहाकारप्रदानाः। परतंत्रोत्पन्नयोः जुहोतिमात्रः। परतंत्रोत्पन्नत्वं यथा वाजपेये त्र होमः सर्व
मेधे चतंत्रस्य विधमानत्वादिति न्यायसूत्रमेतत्। पाकयज्ञपरिशिष्ट्येषां पविभ्यंतरव्यते। तत्प्रसंगेन पाकयज्ञविषयमिदमाह॥ ॥पाक
यज्ञेष्वतस्य सर्वहोमः पाकयज्ञशब्देन चस्मान्नहोमाउच्यंते। तत्र होमायपयवदत्तेनस्या सर्वस्य होम कर्तव्यः॥ ॥हुत्वा शेषप्राशनं। हुतशेष
तूष्णी॥ ॥अग्निहोत्रेतत्स्य पाकयज्ञस्य विश्रुतेः। अग्निहोत्रे हि शेषप्राशनं विहितं। अथैतद्दृष्ट्वा उक्तो सर्वस्याचामतीति निर्लेढीति। तस्य पाकयज्ञेन स
र्वं करोति। तदस्य पाकयज्ञस्य त्वसंपशब्योहि पाकयज्ञरोति। यदि पाकयज्ञे प्राशनमुचितं तत एतदुपपद्यते। नान्यथेति॥ ॥अग्नीषोमीयाप

कृ३

कर्क॰ १५ रनिर्मिथितेवा। अपरास्मीनांपूर्ववारयमाहुतिर्भवति॥ ॥पयोस्माहंदद्यादसंगा तत्रोपधञ्जुयात्तरद्यादितिवचनात्॥ ॥अग्निप्रणयनसंदोह विद्ध
नाग्राभिहूतात् धिस्यान्यथाकं गृहीत्वा न्यान्याभी धप्रणयणमग्नीषोमीयदर्शनात्। सदस्यारीनि अग्नीषोमीये दर्शने। सुदत्तिस्थितेनेहो ग॰
त्रा वषट्कारः कृतः गतमन्तुत्वं तित सामिधेनीरन्वाहेति। हृविष्ठेने सामिधेन्यनुवाचने। आग्नीध्रो प्रत्याश्रावणं होता धि... उपदमः
गृहीत्वा न्यान्या ग्नीधप्रणयनं। आग्नीध्रीयादेगाराहरणं। एतानि अग्नीषोमीये दृष्टानि तद्विकारत्वात् अत्रापि भवतीति॥ ॥नमो माथेत्वा
र॰ र। सोमार्थानि हि सदआदीनि सोमं प्रकृत्य श्रूयते। अदमेवास्य सदः शिष्टवा स्य हविर्धानं वा कृएवा ... धी पश्चमार्जनी पश्चे त्य
वमादि॥ ॥प्रशंगाद्दर्शने। सोमप्रयुक्तानामेषां प्रासंगिकमग्नीषोमीयदर्शनात्। दर्विहोमस्थिदानीं चिंत्यते किं पूर्वादर्विहोमाः
गतपूर्वं वक्त इति। वक्त्रेदमुच्यते। दर्विहोमाः पौर्णमासधर्माउत्स्तु ... शेषात्। दर्विहोमास्वेपं वकादक्तस्ते पौर्णमासधर्मा भवंति
पौर्णमासशब्देन दर्शस्याप्युपलक्षणं। पयः सावन केषु हि द्रव्यसामान्यात् स्तात्रा प्यधर्माः रष्यंते। कृतस्त्नाः। जुहोत्यविशेषात्। पौर्ण
मासधर्मा इति। जुहोति यजन्यो यतो विशेषः। उभयत्रहि द्रव्यदेवतान्वे। चैपे वक्तात्रि वैयति रोडानिति निर्वपति शब्दैनोष राम
धमवगम्यते। सोमादिषु दृष्टत्वात्। तथा पंचधानाभिर्जुहोति सक्तुभिर्जुहोति लाजैर्जुहोतीति द्रव्यविधीनमात्रवर्णिका १०
देवता। तेनोभयत्र द्रव्यदेवतावत्वाद्यजतिजुहोत्योरविशेषः। अथ धर्मकाः दर्विहोमाः। धर्मापेक्षायां च सत्यामुद्रव्यदेवतावत्त्व १२

१६६ व३

कर्क॰
१६

ावा २

ऽदृष्टाप्राप्तिसाधनकत्वसामान्यादिष्यंतप्रवृत्ताविदमाह ॥ ॥ शाखानियोजनं ॥ ॥ शाखायांपशुनियोगःकर्त्तव्योनयूपे ॥ ॥ वपाकुत्वाजी
र्णापिचसर्वांगाणिवाचयतीतिनसर्वाण्येवेति ॥ ॥ सर्वांगभावेशेषास्विष्टकृतः प्रधानावदानशेषास्विष्टकृदर्थंग्रहीतव्यं ॥ स्थालीपाकेन
सहप्रदानं । सहयुक्तेऽप्रधानेतन्त्रीयाविभक्तिर्भवति । तथाचसहत्वमात्रंस्थालीपाकस्यानोवदाने स्वान्यत्वं प्रयोजनमंतरा
येऽप्रयोक्तृत्वमिति ॥ ॥ पुरुषपापत्रादक्षिणावरोवोपापात्रपूरणं ॥ औषधस्यमानपात्रं पूर्णंपूर्णपात्रं । स्वाधीनद्रव्यमभिरुचि
तंवरशब्दवाच्यमिति ॥ ॥ इतिकर्कभाष्येनिरूढपशुःषष्ठोध्यायःसमाप्तः ॥ ॥ ६ ॥ ॥ शुभंभवतु ॥ ॥ कात्यायनमस्तः ॥ ॥

200

१६

कर्कभाष्य
सप्तमाध्याय १४

२०५

[illegible]गतो[illegible]यः॥ ॥अत्यर्थमनुविदधताचार्येणाहविर्यज्ञा अनुविहिताः इदानीं श्रुतिमंत्रपाठावसरप्राप्तो ज्योतिष्टोमोऽनुविधेय
[illegible]तिदेवयजनं जोषयंत इति मंत्रपाठश्च इदमगन्मदेवयजनं अत्र चक्रमनिरूपणाधिकारणमारब्धवानाचार्यः॥ ॥द
र्शपूर्णमासाभ्यामिष्ट्वान्येन यजेतेति श्रुतेः फलवत्क्रमंप्रत्यनियमाभिहितो नियमः फलसंयुक्तोस्त्विति।इह पुनर्वाचनिकक्रम
इष्यते।दर्शपूर्णमासाभ्यामिष्ट्वान्येन यजेतेतानि [illegible]ति।एवं हि श्रुतिर्भवति देवरथो वा एतौ यज्ञस्य यद्दर्शपूर्णमासौ य एताभ्या
मिष्ट्वाथान्येन यजते यथाहवा रथस्य स्थ एवावसाने देवानामवस्यतीत्यनेन दर्शपूर्णमासपूर्विकान्यत्र प्रवृत्तिरुच्यते।अदोनुवर्ते
यंति।दर्शपूर्णमासाभ्यामिष्ट्वान्येन यजेतेति श्रुतेरित्यायमेवेति कर्मणा परिच्छिन्नाश्रुतिः।अस्या एव देवरथो वा एतौ यज्ञस्य यद्दर्शपूर्ण
मासावित्ययमर्थवादः इति।अन्यशब्देन च यजतेरेवाभिधानं न जुहोतेरपि।अन्येन यजेतेति वचनात्।तथा च प्रागप्यग्निहोत्रं न निवार्य
ते।न्यायश्चाप्रतिनियमव्युदासार्थं च श्रुतिग्रहणं॥ ॥किमेवमेवोत्सर्गः नेत्युच्यते॥ ॥सोमेनेवोपक्रमः प्रसोमः।सोमेन वा इष्ट्वान्येन यजेत।
यत्स्य रूपं सोमो ह्यमाधत्ते उपक्रम्यितं [illegible] येन सोमगायस उपरूप्रसोमः तस्याधानसमनंतरमेव सोमप्रवृत्तिः।उक्त एतत्॥ ॥आधा
नस्य सोमप्राधान्यात्।सोमप्रधानं साधानं सोमपूर्वकं।एवं हि श्रूयते।सोमेन यक्ष्यमाणो नर्तुमाद्रियेत न नक्षत्रमिति।यक्ष्यमाणः इत्य
त्यातेनेत्यद्दिमनिजमविष्यत्पयजतेनेत्यूहप्यते।यक्ष्यमाणः इति च विशेषणोपादानसोमश्चादपि चायमर्थोवगम्यते।का[illegible]अव्ये

राम
२
१९४

स्थितविभाषार्थः उपक्रमः प्रसोमस्य सोमपूर्वत्वे इतरस्मिष्टिपूर्वत्वमिति।सोमपूर्वत्वेपि चान्येषां यागानां दर्शपूर्णमासपूर्वत्वमेव वाचनिकमिति य
क्ष्यमाणा आदधीतेति सोमप्रयुक्तं आधानं सोमापवर्गस्याप्यपवर्ग इति पूर्वचोदितं उत्तरसूत्रं॥ ॥नाविशेषात्।नैतदेवं सोमापवर्गोप्यपव
ज्यते इति।उक्त एतदविशेषात्॥ सर्वकर्मार्थो ह्यग्न्याधानं चार्थ्य।सोमेन यक्ष्यमाणः इत्यनेनाधानस्य कालांतरं तोच्यते।न समर्वा
र्थतापत्तिरिति॥ ॥वसंते ग्री ष्टोमः।अग्निष्टोमग्रहणं ज्योतिष्टोमोपलक्षणार्थं।नोक्थ्यादिनिवृत्त्यर्थं।वसंते ज्योतिष्टोमरत्यग
देवो न्मेमवमवति।यद्वा यद्वसंते वसंते ज्योतिषा यजेतेति तदग्निष्टोमसंस्थेन प्राथम्यान्नित्यत्वाच्च।चतुःसंस्थोपि ज्योतिष्टोमः उक्थ्या
दीनामनित्यत्वं श्रूयते।पशुकाम उक्थ्यं गृह्णीयात्।षोडशिना वीर्यकामः स्तुवीतातिरात्रेण प्रजाकामं याजयेदिति प्रकृतिरूपताग्निष्टोमसं
स्था।तां हि प्रकृत्य धर्मोम्नाने नित्यानित्यसंयोगविरोधादितरासु तदुभयं प्रसवइति।तस्मात्साधूक्तं वसंतेग्निष्टोमइति॥ ॥ऐंद्राग्नं पुनरुत्सृष्ट
मालभेत द्विपुरुषासोमपीथिनः।पुनरुत्सृष्टो गौः गस्तेन तस्य हि वाहनेन नश्चैवल्प उत्सर्गः संभवति।क्वचित्तु दृश्यते।पुनरुत्सृष्टो गौरप्याचा
नीयइति।छाग।वा स्यादन्वयात्।तस्यापि हि हिमवत्प्रदेशे वा समानस्यात्सर्गः संभवति।अतश्चारण्यकानुग्रहाय छाग एवेति संप्रदा
यः।यत्नेश्रूयते।पुनरुत्सृष्टो गोरिति तत्रैव ग्रहणादन्यत्रागोरिति भवति।द्विपुरुषासोमपीथिन इति यस्य पित्रा पितामहेन वा सोमो न पीत
न ऐंद्राग्नमवति।एवं श्रूयते।यस्य पिता पितामहः सोमं न पिबेदथ स पिपासेत्स ऐंद्राग्नं पुनरुत्सृष्टमालभेतेति।अत्रापि नित्यवाक्यताद्

कर्क- २ त्येकं वा कपरिसंख्या॥ तथा चान्यतरस्यापि सोमपाने भवत्यैवैन्द्रा भइति। अयंवा न्वारंभणीयावत् आरंभेन अपनेत। नच दारुणीपावकंत्रम
ध्यो॥ अतः पुरुषसंस्कारत्वात् पूर्वतरं यजनीये हनि कर्त्तव्यः। पुरुषसंस्कारता चास्य यजमानपिता पितामहेः सोमेन पिबेत् सऊ ब्राह्मण इति श्र
वणात्। दीक्षणीयानिरासार्थं च अकृत्वा विधानमस्य। अतः पुरुषसंस्कारोयमिति सिद्धं भवति या॥ ॥षोडशर्त्विजो ब्रह्मोद्गातृहोत्रध्वर्यु ब्रा
ह्मणाच्छंसि प्रस्तोतृ मैत्रावरुण प्रतिप्रस्थातृ पोतृ प्रतिहर्त्रच्छावाक नेष्ट्राग्नीत् सुब्रह्मण्य ग्रावस्तुदुन्नेतृ होतॄणि। उपक्रमादेवतासि
द्धेः षोडशग्रहणं न कर्त्तव्यं। वा कर्त्तव्यं चमसाध्वर्यु व्युदासार्थं। तेषामपि स्त्विक्तो यजमानार्त्विगाख्या माभूदिति। अस्ति निचेतन स
त्वात्त्वात् ज्योतिष्टोमस्य यजतेः षोडशर्त्विज इति। अतश्च तेषाम् र्त्विक्त्वनिबंधनं कार्यं न भवति॥ ॥चतुरो वा ध्यांसतः पुरुषा इतरे यथावे
द। आद्याश्चतुरो वर्त्विजो वृणीते कस्मात् चतुरूषा इतरे यथावेदाये येयदेद्विहि तस्य कर्त्तारः ते तेते पामाघ र्त्विजा पुरुषाः प्रधानपुरुषव
रणेन च तेपि वृता एव भवंतीत्यभिप्रायः। तथा च लिंगम् अश्वमेधे यन्महर्त्विजाकृशले न प्राश्नंति। नु देव होता कान्वामन्ता इति। वाम
वीन्वृणीते। न चतुरःशावरणं स्थानत्यर्छन्नति श्रू। नचान्यास्मिन्न्वे तेभ्यन्ते वा नावृत्ता भ्रतोवा भवति। दर्शयति च पश्चाभ्यस्तिं दक्षिणादाने
प्रकृत्य। अथ येतऽत्रेथने ष्टुभा छावाकायाथा भ्रेत्र इत्येवमादि॥ ॥ब्राह्मणाच्छंस्याग्नीत्पोतारो ब्रह्मणः समासलक्षणेन एवं पोतुरग्नीध राम २ १९५
उन्नेतारः। देवयजने जोषयेते। नु पिरीक्षणार्थः तद्वै देवयजनमीहेत इति वचनात्। उच्चतमं समं यस्मिन्न् शीर्य्येत् उद्धुम समं स्यादिति वचनात्।

न

=तस्वाररनोयामिनजुर्नाने=२

अविभ्रंशीति अविनस्वरं भ्रश्यते हि भूमिगर्त्तैः यत्रौषधयो नभ्रश्यंत इत्यपरे॥ ॥अभितो देवयजनमात्रं देशं पुरस्ताद्वर्जं न पुरस्ताद्दे
वयजनमात्रमतिरिच्येतेति वचनात्॥ ॥प्राग्वंशमुदग्वा यथावि वा नूचानर्त्विजः॥ अनूचाना अनुवचनसमर्था आर्त्विजोपदेवाध्य
ऊ- वस्यंति तदेवशास्त्रं देवयजनमिति॥ ॥लक्षतोषधिमूले परंते विमितं कुर्वंति। विमितशब्दः समचतुरस्रवाचीन चा॥ ॥प्राग्वंशो यस्य पूर्वा
परायतः पृष्ठवंशः॥ ॥पुरस्तादुच्चेवचनात्॥ ॥प्रतिदिग्द्वारं। दिक्षु नाकाशान्करोतीति वचनात्। उदग्वर्जं वा। वाशब्दः परुव्यावृत्त्यर्थो नच
दग्द्वारविधानं वा सममति। पूर्वापरद्वारेतु विहिते न ऊभयतो द्वारं हविर्द्धानं भवति। उभयतो द्वारं सदस्तथा शालायाः दक्षिणाम द्वारमव
गम्यते। यमेर्दु याहि प्रवत्याह। यथैतां हो ताभि ष्टुवन्या राय शेषादिति होतुः स्निग्धपतं स्थानं न च दक्षिणाद्वार मंतरेण त संदर्शनं भवति।
तथा च सूत्रकारः दक्षिणेनानिखनति होतुः संदर्शन इति। अतो द्वारत्रयमेवसप्रमाणमित्युदग्वर्जमेवेत्युक्तं। यत्तु दिक्षुनाकाशान्करो
तीति तद्विकृतिष्वुपपद्यत एव॥ ॥शालां वा करोतीति विमितं वेति विकल्पः शालादीर्घ चतुरश्रा॥ ॥परिवृते चोत्तरापरे क्रियतेति
वाक्यशेषः॥ ॥दीक्षाप्रभृति उक्ते पदे पंचमी सप्तमी वा प्रस्तुतः। उक्ते पूर्वे दक्षितेति वचनात्। तत्प्रभृति पंचमी सप्तमी वा प्रस्तुता भवति। स्वा
त्यमवर्जयतीति। एतेन एकादशीनिसोदीक्षा इति वा संख्यमुपनिबद्धं दीक्षे कल्पपदे पंचमी प्रस्तुतत्रित्वे च सप्तमीमिति। एकादीक्षति स्वा
दीक्षो इति वक्त व्ये पंचमी सप्तमी वा प्रस्तुतरत्नकं तद्दीक्षाश्च वा चाथ्ये व्याचिख्यास मादीक्षाशब्दाद्युक्तो किं केतस्य पक्षे वा चयमि

कक- २

ऊर्ध्वं पंचमीसप्तमीवा प्रसुत इति। कृष्णाजिनादिभिर्दीक्षितः सन्यावेत्यहानि प्राक् प्रायणीयायाः। दीक्षितधर्मैरः सेतानि दीक्षाशब्दवाच्य
निशी घामिषं संस्थाप्य एकादीक्षा निसरे त्वमादिना धावाहीनेषु मासापवर्गमतामिधायदीक्षः स्त्यपसद्भेषोत्पुत्रं। तथादीक्षाणाम्
न्नमेहनिर्वपाग्निमानमिति। अहःशब्देन रात्रिरप्युपलक्ष्यते। तेनाहोरात्रपरिछिन्नादीक्षेति ज्ञापयति। तासु दीक्षासु तेषु होरात्रेषु यूप
छेदनमहावीरकारणवनीवाहनानि॥ ॥कालानि क्रमेनियतक्रियाप्राप्तकालत्वात्। मानुषादिप्रतिबलाः कालव्यतिक्रमेनि
त्यानि। प्राप्तोहितेषां काल इति॥ ॥नमसत्वात्॥ समंसत्रकारणादीक्षितस्पसतोनित्यानामक्रियासो यापि दीक्षितएवेति॥ ॥द्वादश
दीक्षा अपरिमितावाभवंतीतिवाक्यशेषः॥ ॥पुण्याहे दीक्षानं प्रसव उत्थाने। शिष्टानुस्मरणात्॥ ॥प्रक्रमोत्थाने विरोधाप्र
क्रमोत्थानेवापुण्याहनिमवतः इतिरत्र तु श्रुतिविरोधो नियतकालत्वात्॥ ॥नवाचोदितत्वात्॥ नचैतदंगीकर्तव्यं कुतः अचो
दितत्वात्। नह्यत्र चोदनास्मृतिलिंगं तेनेयत्र श्रुतिविरोधो नास्ति तत्रास्याः प्रामाण्यमेव। विरोधे त्वप्रामाण्यमिति॥ ॥दीक्षासु यू
पछेदने यूपाहुतिं प्राग्घुत्वा यूपार्थे वाग्निमथित्वा दीक्षितस्याग्निहोमप्रतिषेधश्रुतेः। दीक्षासु यूपछेदनं कर्तव्यं। दीक्षाणामेवपू
र्वं यूपाहुतीं हुत्वा यूपार्थे वाग्निं मथित्वा। हुतएतत्। दीक्षितस्याग्निहोमप्रतिषेधश्रुतेः। नदीक्षितस्याग्नावेताः माहुतिर्जुहोत्याग्नी
ध्रारणीवादाय यूपार्थे निकेग्निं मथित्वा यूपाहुतिं जुहोतीति। संप्रदायविकल्पः। दीक्षासु यूपछेदनमित्यस्य सूत्रस्यापराव्याख्या

राम० ३

१९६

यूपछेदात्प्राग्यूपाहुतिं हुत्वा यूपं वृश्चन्त्वैरमव्यर्चानुहोतीति श्रुतत्वात्। यूपार्थेतिवेवाग्निं मथित्वेति वाशब्दो विकल्पार्थे गच्छनरुक्ते
नहि दीक्षितस्याग्नावेतामाहुतिं जुहोतीति नीसयूपार्थेति चमंथनविधिशेषभूतोर्थवादो न प्रतिषेधविधिरिति। अपिच यूपाहुतिसम
नंतरमेव श्रूयते। यदान्यं परिशिष्टं भवति तदादत्ते यत्र क्वशस्त्रिभवति तन्नद्यादत्ते तत आयंति सयं यूपं जोषयंते श्रुति। अतऊर्ध्वदीक्षा
णां प्राग्यूपाहुतिं हुत्वेत्यपव्याख्या॥ ॥उक्षुपणकाले वा मयं होमछेदने संनिधेः छुपणकाले वा होमछेदने भवतः। हुतः तत्संनि
धौ हि शिष्यते यूपं वृश्चन्त्वैरमव्यचीं जुहोतीति। दीक्षासु यूपच्छिन्नत्तिवचनात्। सन्निधिर्वचनेन बाध्यः॥ ॥समारोप्यानीशाला
संभूर्वा ऊर्ध्वं गृहीत्वारणिपाणिरहेदमगन्मेति। समारोपः सूत्रत्रयसिद्धेस्तु नं। सच नित्यधारिपक्षे सर्वार्थत्वान्न भवति। स
वार्थं हि धारणमिति। सामाधानेपि अग्निनित्याधारी तिनसमारोपउक्तं प्रदायां। अत्र पुनः शक्यते वक्तुं। पुरुषधर्मोग्निनित्यधारि
ता। ऋतुधर्मश्च समारोपः। न तदकरणे चेतो वैगुण्यं उतान्न पुरुषस्य कृते। क्रतोः कर्तव्यं विरोधन पुरुषस्य। गतश्चिमः पदं। पितथेवेति चेतानां
सर्वकर्मार्थत्वाद्धारणस्य। आरण्यारम्भावात्। आरण्यभावेपि चन भवति। तथा च मंत्रलिंगं। अयं ते योनिरृत्वियो यतो जातो अरोच
था इति। येपुनरत्रापि समारोपमिच्छंति तात एवमूचुः। आरण्यारभावे वशालास्तंभप्रपादनेलौकिकारणिपाणिर्भवत्येव यजमानस्
कारात। अथारणीपाणिः कृत्वा शालामध्ये वसतीति। तच्चैतद्यागमानं सर्वे न सर्वत्र वसेन्न देते ति यजमानेहि प्रकृत्याहाधारणि

२०८

कर्क ४

पाणौ कृत्वेति। द्वादशाहे वसर्वे अरणिपाणयो गृहपतिमन्वारभन्ते शालां लं भगुपादनं कुर्वाणा। न उक्तमपि भवति। गृहपत्यन्वारंभ इति।।
शालायां ज्ञानं निदधात्याहृतश्चैतत्। यथा समादधते।। ।।प्राकृयादन्नमुपहरंत्यस्मै हविष्यममांसं हविष्यं व्रीहियवादि हविष्यत्वेपि च
मांसप्रतिषेधः। अग्नौ विहृत्य सप्तसु प्रक्रमेषु षड्व्यामेव सांनिचित्यः। विहरणेन च मेधनमूर्ध्वादित्रिभिरिति। गार्हपत्यस्योद्धृता सप्त प्राच
प्रक्रमान्प्रक्रामतीति ततः प्राचं व्यामं विमिमीने तु स्यमध्य आहवनीयायोद्धृत्यावादधातीति वचनात्। सप्तसु प्रक्रमे षड्व्यामे चेत्यु
क्तो। अनग्निचित्ये तु अनियम इति।। ।।अपरात्रिशतीषु मुपपन्नेवानवृत्ते श्राति।। ।।कृत्वर्थमपदिश्यान्यस्मा उत्तरे परिवृत उदकुंभ
वत्यस्तु रीद्दी। कृत्वर्थापदेशश्च तदर्थं तु व्यासंस्कारः विधन सामर्थ्यात्। अधस्तेन सूत्रे परलोयोऽहृणा उत्तरे परिवृत उदकुंभवत्य
स्तुरीहृति अनेनमेव ध्यते। अपरस्कंदो हैजेति चनात्। नापितश्चप्रतिष्ठति नखानि निकृंतत्यंगुष्ठप्रभृतीनि दक्षिणाग्रहस्तस्य प्रथमं
सर्वे नखान्येवाग्रे निकृंतत इति प्रक्त्यस्त वेश्मयन्त इति।। ।।दक्षिणं गोदानं विनायीनन्निमा आप इति। वितारणां वकेशान्मोहनेकेव
नादिना। उनत्ति। उंदी क्लेदने। उनत्ति क्लेदयति। निश्मयतीति। इमा आप इत्यनेन मंत्रेण। गोदानं वदक्षिणं शिरसः पार्श्वं गविप
थिव्यांरीयत इति गोदाने।। ।।यथपवस्तु शतहृणां अंतर्दधाति।। ।।क्षुरेण चाभिनिधाय। यथपवदेवा छित्वोदपात्रे प्रास्यति।। ।।छि
त्वा केशानुदपात्रे प्रास्यति।। ।।एवमुत्तरं तूष्णीं। उंदनादिना गोदाने संस्करोति।। ।।नापिताय क्षुरं प्रयच्छतिते न केशश्मश्रुवप

रामं० ४ १९८

ति। श्मश्रुणां श्वश्रूरान्यत्वं प्रसिद्धं। अनतोनेत्युच्यते।। ।।आपो अस्मानिति स्नात्वोदिदाभ्यस्त्युत्क्रामत्युत्तरपूर्वार्द्धं। दृष्टार्थत्वादुदकुंभोद
केनैव स्नानं। उदिदाभ्य इत्यनेन मंत्रेण उत्क्रामत्युत्तरपूर्वार्द्धं।। ।।हैमं व स्नानिष्यत्ये ब्रूयाद् हन्। हैम मानमसमहनमधैतं। निष्ठ्यष्टैवेव
यादिति प्रेषपूर्वकं प्रक्षालनं परिधत्ते।। ।।चेदङ्गिरसु स अङ्गिरसु रूधा परिधत्ते।। ।।स्नातवस्त्रं वा भोगे धौतं विचित्रं केशप्रसारितव
शं दाक्षा तपसा इति। स्नातवस्त्रं वा अरजकधौतं विचित्रकेशं प्रसारितदशमित्यहतमपि दाक्षा तपसा इत्यनेन मंत्रेण।। ।।नन्नी
विं कुरुते। अनीविकं परिधत्ते। समाचारपरिप्राप्तमुत्तरीये।। ।।एवं प्रतिप्रस्थातापरस्मिन्परिवृते पत्नीत्सृषणीं। दीक्षपतीति वाससा शे
षः।। ।।वपनं वा पवनं च वावेमेति। वा भवति। वपनाभावे च वितारणां स्नानादि न भवति वपनार्थत्वात्।। ।।धेन्वनडुहयोनाश्रीयात्
धेन्वनडुन्मांसं नाशितव्यं धेन्वै चानडुहे च नाश्नीयादिति वचनात्। ऋतुमध्ये समाम्नानात्। ऋतुधर्मोयमिति प्राप्त आह।।
पुरुषधर्मो वा संभवात्। पुरुषधर्म एवायं कृतावसंभवात्। प्राप्तिपूर्वको हि प्रतिषेधो भवति न चेह प्राप्तिरस्ति। कथं येनरीद्दिजस्य
पूयावृतता विहिता। निरूढे च पयसि हविःशेषभक्षते क्रतौ। अतः प्रतिषेधस्यासंभवात्। पुरुषधर्म एवायमिति संप्रदायः। इष्टाशन
विषयोयं प्रतिषेध इत्यपरे। न यथा च प्रकरणस्याबाध इति।। ।।अमृन्मयभोजनं वा। अमलः स्थूल उच्यते। तस्य वा भोजनं भवति। अश्न
न्मया स [illegible] कृतेवतीति।। ।।प्रपायामा वै सव एकादशकपालः। प्रपाय वा उरगहीतं विमिते प्रवेस्याग्नावे सव एकादशकपालः व

र्व्यः। एकादशकपाल इति श्रुतिरनुवृत्ता एकद्विशब्दपरिमाणादिभिः प्राप्नोति कपालसंख्येति ज्ञापनाय॥ ॥आदित्येभ्यो वा चरुः॥ सा
चेयं स्वपदविभाषा तद्वैकल्यादित्येभ्यश्चरुं निर्वपेदिति च वचनात्॥ ॥प्राक्समिष्टयजुषः करोति। दाक्षणी यो हि प्रकृत्यश्रूयते। तस्मा
त्तस्य यज्ञस्य समिष्टयजुर्न जुहुति॥ ॥समिष्टयजुर्वर्जं वा॥ ॥समिष्टयजूंष्येव वा न जुहोति सर्वत्वाय। एवं समिष्टयजुरेव न जुहोतीति व
चनात्। अतश्च बर्हिर्होमादयः स्युरिति न्याय्यम्॥ ॥उपांशु चरंति प्रागग्नीषोमीयात्। तस्माद्यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु च×
×प्रचरन्तीत्येव। प्रैषा वान्यस्य क्रमेषु विनियोगः। उक्तः पंचमं ऊहु ध्रुवमास्मिन्ध्येति। तद्विनियोगोत्तरं बर्हिर्होमादयः×रंतीति वच
नात्। वाग्यतेन वा दीक्षणीयायां नीचैस्तरां उच्चैस्तरामितरे। यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्। मन्द्रं प्रायणी
यायां मन्द्रतरमातिथ्यायां॥ ॥उपांशूपसदः॥ ॥उपांशूपसत्स्वीत्युपांशूपसदो भवंति। उपसदामुपांशुत्वविधानात्प्रागग्नीषो
मीयादुपांशु पद्मादिदमन्यत्पद्मांतरा। तत्रैव दीक्षणीयादिषु स्वरविकल्प इति। तथा च वाग्यतेन पदद्वये चोत्तनैः सहेत्यधस्तादुपांशु
त्वुपांशुत्वमुच्यते। प्रागग्नीषोमीयादुपांशुपद्मे च दीक्षितोयं ब्राह्मणस्त्यादविरुद्धैरितस्त्रैधमुच्यते॥ ॥शालांपूर्वेणानिष्ठत
म्यं तैकुशेषु नवनीतेन शीर्षाद्यनुलोमं सपादकोमहीनोपयेसाति। शालायाः पुरस्तात्कुशेषु व्यवस्थितं यजमानमध्वर्युरभ्य
नक्ति। तमभ्यनक्तीति वचनात्। नवनीतेन शिरस आरभ्यानुलोमं महीनां पयोसीत्यनेन मंत्रेण। सपादकमाभ्यज्यत इति॥ ॥वृत्रस्ये

त्यक्ष्यावनक्ति त्रैककुदांजनेन। वृत्रस्येत्यनेन मंत्रेण दक्षिणी अनक्ति। त्रिककुत्पर्वतः तदीयमंजनं यत्सौवीरकमिति प्रसिद्धं तेनांजनेन
स्वयमेव यजमानः। अभावेऽन्यत्तत्रैककुदाभावेन्येनांजनेनाद्विर्दक्षिणं त्रिरक्तं पराक्। पराग्नानक्तीति वचनात्। पराग्निर्मिते। नेतः स्वामु
न स्त्रु॥ ॥सकृत्सकृन्मंत्रः। द्रव्यांतरत्वाच्च प्रत्यंजनं मंत्रपरिप्राप्तौ वचनात्सकृन्मंत्रवचनं॥ ॥शरेषीकया साग्रया सतूलया त्वावन
क्तीति॥ ॥१॥ कुशपवित्रैश्चित्पतिर्मेति पावयति सप्तभिः सप्तभिः प्रतिमंत्रमच्छिद्रेणेति सर्वत्र द्विरुपरिनाभ्युत्प्रदक्षिणासकृ
द्वाङु। कुशा एव पवित्राणि। कुशपवित्राणि। तैर्यजमानं पावयति। सप्तभिः सप्तभिश्चित्पतिर्मेति प्रतिमंत्रं। अच्छिद्रेणेति सर्वत्र अनु
षंगः। द्विपरिनाभ्युन्मार्जनेन प्रदक्षिणेन सप्तभिः सप्तभिः सकृच्च वाङनाभेः सप्तभिरेव। एवं च सप्तविसप्तभिः सप्तभिः पावयति। तदुपक्रम्य
एकविंशतिरेव वैषेवसंपदित्युपपद्यते॥ ॥एकेन त्रिभिः सप्तभिर्वा। एवमेव श्रूयते पवित्रं प्रकल्प्य। तद्वा एके स्यात्। अपो अथो अपि
त्रीणि स्युः। अथो अपि शप्तस्युरिति। एता एकामयवपवित्रकल्पो वा त्रिभिः परिशिष्यते इति। कारवी यायेतुनवकृत्वः पावयतीति
श्रूयते। तत्कथमुपपद्यते चित्पतिर्मेत्येवमादिभिर्मंत्रैः साम्यात्समेकं पावनमुपरिनाभि तथा द्वितीयं। एवमेव सकृद्वाङिति। एवं
चाभ्यासापेक्षया न च कृत्वः पावयतीत्युपपन्नार्थं भवति। अभ्याससमुदायापेक्षया च द्विरुपरिनाभि सकृद्वाङिति च सत्रेणेयं॥ ॥
एकशतेन वा राजसूये पावयति। वाशब्दो विकल्पार्थः॥ ॥आवादे वासस इति वाचयति। वरुयजमानके सर्वेषां वाचयन्नुद्गतेति च प्रयोगः॥

कर्क ६

स्वाहापरे [illegible] अञ्चते नाना हस्तयोः नाना पृथक्कृतयोः । द्वे अपि कनिष्ठिके संकोचयति । स्वाहाय त्वेत्यनेन मन्त्रेण । एवं शेषप्र-
ति मन्त्रं । एवमेवाङ्गुल्यवनेशषप्रतिमन्त्रं ॥ ॥ उत्तमेन मुष्टीकृत्वा स्वाहेत्युक्त्वा वाग्यतः ॥ उत्तमेन मन्त्रेण मुष्टीकृत्वा स्वाहेत्युक्त्वा वाग्यतो
भवति । अङ्गुष्ठात्तसहिते चाङ्गुली उत्सर्जति ॥ ॥ वाग्यतं प्रवेशयन्त्याहवनीयगार्हपत्यावन्तरेण । वाग्विसर्गकालस्यानुक्त-
त्वादेवमत एव वाग्यम इति । इदं मुष्टीकरणं वाग्यमनोत्कर्षं प्रवेशनेन वाग्यम इति । वचनात् गार्हपत्याहवनीयावन्तरेण प्र-
वेशनं ॥ ॥ सास्य सञ्चर आप्रसवात् । सोऽस्य यजमानस्य सञ्चरो भवत्यायाः । आङ् प्रयोगसामर्थ्यान्मर्यादाइष्या । नाभिविधिरि-
ति ॥ ॥ एवं प्रतिप्रस्थातापत्नीमभ्यञ्जनादि तूष्णीं । दीक्षयतीति वाक्यशेषः ॥ ॥ अपरेण वा प्रवेशयति । प्रकृतत्वाद्गार्हपत्याहवनी-
यो वा अन्तरेणेति विकल्पः । चऊ याजमानके अभ्यञ्जनादि वाऊगृहीतप्रपादनान्तमेकैकस्य । संस्कारैतावत्त्वात् । अप्सुदीक्षया-
मपि प्रपादनं तमेकस्यैव ॥ ॥ औद्ग्रभणानि जुऊोति स्थाल्याः स्रुवेण कृत्वाय इति प्रतिमन्त्रं ॥ ॥ औद्ग्रभणानि इति वैदिकी
संज्ञा । तया हि संव्यवहारो दृश्यते । प्रकृतानौद्ग्रभणानि जुऊोतीति । स्थाल्याः स्रुवेण आकूत्या इति प्रतिमन्त्रं ॥ ॥ तृतीयं
जपत्येव ॥ तृतीयमन्त्रं जपत्येवान तु होति । एवकारकरणात् स्वस्थानावस्थितस्यैव जपः ॥ ॥ पञ्चमं जुऊोति ध्रौवमासि-
च्य द्विश्च स्थाल्याः स्रुवेण तृतीयं स्रुवमभिपूरयति । पञ्चमं होमं प्रति ध्रौवमाज्यं जुह्वामासिच्य द्विश्च स्थाल्याः स्रुवेणाभि-

राम० ६

१९९

च्यात् तृतीयं स्रुवमभिपूरयति । अधिकारात् स्थालीत एव । अभिपूरणस्य हृशार्थत्वात् । जुह्वामासिच्य । विश्वो देवस्येत्यनेनामेव वा पूर्णां जु-
ऊयात् । तामेवैकामाऊतिं पूर्णां जुऊयात् । तावै पचैको जुऊयात्सर्वां जुऊयादिति श्रुतेः । दीक्षणीयाद्यशेषसाध्यत्वाद्दीक्षणीया-
गमौद्ग्रभणानि एवं सति दीक्षणीयाभावे स्थियज्ञेन भवति । अत ऊर्ध्वं वर्हिर्होमादय इति ॥ ॥ आहवनीयं दक्षिणेन कृष्णाजिने मा-
समसंहिते स्तृणाति । तत्र अस्तु पश्चादासंज्ञनवतीति दधाति । दक्षिणेनाहवनीयं प्राचीग्रीवे कृष्णाजिने उपस्तृणातीति वचनात् ।
सोमसंहिते मासोपलक्षितप्रदेशसंबंधे स्तृणाति । तेषिवुत उमंतानेतान् । तस्य कृतसंप्रसारणस्यैतद्रूपं स्तृणातेत इति । परिषिविता । अन्ताय-
यास्ते स्तृणाति । तत्र अस्तु पश्चात् । चर्मणो हि विकर्तनकाल एवकानकै विततनं । क्रियते । तेन पश्चात्कालकृष्टेषु परिषिवनं । अ-
न्यत्रानियमः । आसंज्ञनवतीनागदंतकादौ येनासज्यते । तेनासंज्ञ अवलगतमित्यर्थः । उत्तरलोम्नि कृष्णाजिने निदधाति ॥ ॥
एके चेत्पश्चात्स्याद्दक्षिणं । एकं चेन्निदधाति पश्चात्स्यादेवं गृहीत्वा द्विगुणं क्रियते तत्पश्चाद्दक्षिणं प्रत्यवस्यतीति वचनात् ॥ ॥ दक्षिणतो-
न्वाच्यास्ते पश्चादेनयोः । यजमानः सदक्षिणत इति जान्वाच्य भूमिं गमयित्वास्ते । प्राङ्मुखो न्वाकृष्य उपविशतीति श्रुतेः । शुक्लेते स-
संधिमालभतेऽत्र अवस्त्यं मध्यमपारीति । कृष्णाजिनयोः ॥ ॥ दक्षिणेन जानुनारोहतीति शर्मासीतिनेनास्तेऽपरेते । तेनैव दक्षिणजानूपलक्षितप्र-
देशेन अपरेते कृष्णाजिनस्यास्ते ॥ ॥ मेखलां बध्नीते वाणीं त्रिवृतं शणमुञ्जमिश्रां मन्त्रं रावासमस्ऊर्गसीति । मेखलां बध्नीते । ऊर्गसीत्य-

कर्क. १ नेन मंत्रेण वेष्टितां यथा धि...नर ऊर्ध्वं दशितां त्रिःवृतां त्रिवृच्छिथिलां सा वै त्रिवृद्भवतीति शाणां मुंजमिश्रां शाणा भवति मुंजवल्वशेनान्वस्ता
भवतीति वचनात् । अंतरो वाससः तस्मादेषांतरा वाससो भवतीति मेखलावेधनमथ यां मे खलया यजमानं दीक्षयतीति श्रुते ॥
नाभिं ऊरू नेत्याभस्मना वीरिति । नीविरपवर्त्तिकोच्यते ॥ ॥शिरः प्रोर्णुते विष्णोः शर्मेति ॥ ॥कृष्णविषाणां त्रिवलीं पंचवलिं वोत्तानो
दशायां बध्नाति । सामर्थ्यपरिप्रापितत्वाच्चोत्तरे सिचि बध्नातीति नोक्तं । तां चाधः पुर्वं बध्नाति । कृष्णविषाणया यजमानं दीक्षयतीति
तेव वचनात् ॥ ॥तया कंडूयनं क्रियते ॥ ॥ऊर्ध्वस्य शतेन पादहृद्यास्याभ्रुव ऊपरीडूस्य योनिरिति । एतया कृष्णविषाणया सचेत् कृष्ण
विषाणां संस्कार इति संप्रदायः मंत्रलिंगादिंडूस्य योनिरसीति । एवं चुनाशेत्यापि संस्वात्रे व्येति नेतत्परे दीक्षितसंस्काराभिप्रेते
तं संस्कारोपमिति गम्यते । मंत्रस्य च क्रियासाधनद्रव्याभिधानमुविनमेवक्रिया च यजमानार्थेति ॥ न्यूमो चोल्लिखितिमुत्तस्याइति
अदृष्टोपकाराय ॥ ।३॥ ॥मुखसम्मितिमौदुंबरं दंडं प्रयच्छति । अध्वर्युर्यजमानाय ॥ ॥उच्छ्रयस्वेत्येनमुच्छ्रयति । तमुच्छ्रयतीति व
चनात् ॥ ॥तं दक्षिणात उपधत्ते । तन्निर्देशाच्चार्थं ल्लक्षणामुपधानेनानपदासो तया ॥ ॥अत्र वामुष्टिकरणाव्यमनेन अत्रैवैकेंगुलीश्रुत्य
चेति वाचं चयच्छतोऽतीति वचनात् । वाशब्दो विकल्पार्थः ॥ ॥एवं प्रतिप्रस्थाता पत्नीं तु स्त्री युगपत्न्यै खलादि दीक्षयतीति वाक्यशेषः ॥ ॥योक्त्रे राम- १
णवा सन्नह्यति । वा नसन्नह्यति । योक्त्रेण पत्नीं दीक्षयतीति वचनात् । दीक्षार्थमेतत् । प्रसंगात्पत्नीसन्नहनं च स योक्त्रापाश इति योक्त्रं निर्दिष्ट २००

त्वा । एवं यत्कैश्चिद्दैक्षिकपोऽधर्माः क्रियंत इति नदप्युक्तं ॥ ॥जालं वा शिरसि त्रिपर्यायं । जालं शिरसि स्यान्मवति । त्रिपर्यायमेकपर्यायं वा ॥ ॥
पृथुमुखो यत्र यत्र कृष्णशंकुः कंडूयनं उल्लेखनात्करोतीति खल्वादि चेत् । कर्म भवति । तत उल्लेखनात्करोतीत्यर्थः ॥ ॥कृष्णाजिनादि वेदि
उंतं । अथ कृष्णाजिनादि दंडांतं । उदंचूयते । आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः । तथा कृष्णाजिनेन दीक्षयति मे
खलया दीक्षयति कृष्णविषाणया दीक्षयति । दंडेन दीक्षयति । तत्रैतत्संदिह्यते । किमाग्नावैष्णवेन दीक्षासंस्कारः क्रियते । उत कृष्णाजि
नादिभिः । अथवा सर्वैरिति । किं तावत्प्राप्तं । आग्नावैष्णवेनेति । कुत एतत् । एवं हि श्रूयते । आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण
इति । दीक्षासंस्कारेण व्याप्यमानो गृह्यमाण आग्नावैष्णवं निर्वपतीति । एतच्चैवमुपपद्यते । यद्यनेन दीक्षासंस्कार उपजन्यतेऽरत्निएवेसतिकृ
ष्णाजिनादीनां संपत्त्यर्थता भवति । कृष्णाजिनेन दीक्षयति । कृष्णाजिनमस्य संपादयति कृष्णाजिनवंतं करोतीत्यर्थः । तथा कृष्णविषाणा
यासंपन्नं करोति । दंडेन चेति । अथ प्रयोजनमेषां कृष्णाजिनस्यासनं । कृष्णविषाणाया कंडूयनं । दंडस्य गवादिनिवारणं । किंचिदर्थोऽन्य
किंचिद्वाक्यादतः संपत्त्यर्थं नैषामिति पूर्वप्राप्त उच्यते । नैतदेवं न हि दीक्षिष्यमाण आग्नावैष्णवं निर्वपतीत्यनेन दीक्षासंस्कारः क्रियत इत्यु
च्यते । किं तर्हि भविष्यति दीक्षा आग्नावैष्णवानुष्ठानाय निर्दिश्यते । अयं हि लृडन्तः शब्दो लड्भवति श्रूयते भविष्यति । भविष्यत्याद्यकृष्णा
जिनादिभिर्दीक्षायामाग्नावैष्णवं निर्वपेदित्यस्यार्थः । नाग्नावैष्णवेन दीक्षा क्रियत इति । तथा मीमांसायां आचार्मोदतिभविष्यतीमं जिक्रिया

कर्क॰ ८

आचमनविधानाय निर्दिश्यते। नाचमनेन शुचिर्निष्पाद्यते। एवमिहापि दीक्षिष्यमाण। आग्नावैष्णवं निर्वपेत्। तेन दीक्षितान्क्रियत इत्युच्यते। य
था सोमेन यक्ष्यमाण। आदधीतेत्यत्रा यत्तनया नुद्दिश्य सोमयाग आधानं प्रति निर्दिश्यते। एवमिहापीति। अपि च कृष्णाजिनादीनि
साक्षात्कारेणादीक्षासंस्कारं प्रति विधीयंते। कृष्णाजिने न दीक्षयतीत्येवमादिना तेषां संपत्त्यर्थत्वेन कृ गुणाश्रिता भवंति श्रुतिश्च बाधिते ति। अ
नश्च कृष्णाजिनादीन्येव दीक्षाकारणानि नाग्नावैष्णव इति। यद्येवमेककार्यत्वाद्विकल्पः कस्मान्न भवति नात्र विकल्पः। अदृष्टसंस्कारोपज
नकत्वात्। अदृष्टा हि दीक्षासंस्काराः एभिरुपजन्यते। अनेककार्यत्वेपि न विकल्पः। यथाघारे ज्याघारादीनामिति। तथा च पादेवेत्यादीनां
कृतानां वत्करणानि समाधत्ते। स्थालीधारणं करोति। काष्ठानि ज्वलनमभिनिर्वर्तयति। दर्वी च घट्टनमिति। एकप्रयोजनत्वे पृथवांतरकार्य
भेदात्र विकल्पः। एवमिहाप्यन्नसाम र्थ्यादवांतरकार्याणि कृष्णाजिनादीनां कल्प्यंते। तस्मान्न विकल्पः। ननु च कृष्णविषाणायाः कंडू
यतीति कंडूयनार्थत्वात् कृष्णविषाणाया इति। सत्यमेवं यद्यदृष्टेन नापि ग्रहकाले निर्दिष्टकार्यं तुल निवार्यते। तस्माद्दीक्षार्थमेवोत्पन्नायाः कं
डूयनार्थतापाति। अपि च भगवतः कात्यायनाचार्यस्याप्ययमेवाभिप्रायो येनास्थिपत्ते दीक्षणीयापुरुषसंस्कारार्थीर्वेमिति सूचितं। य
दि हि दीक्षणीया पुरुषसंस्कारार्था स्यात्। भेदेनोपादानं नाकरिष्यन्न करोति चा। तस्मादपुरुषसंस्कारार्थताग्नावैष्णवस्य। क्रतूपकाराय
सल्लानमस्येति। स चेद्देवतापरिग्रहद्वारेणात्तु नैवाचार्येण। अभ्युपगम्यापि ब्रूमः। यद्यपि चाग्नावैष्णवस्य दीक्षार्थता भवेत् तथापि दं

राम॰ ८

२०१

नैरेव दीक्षितो भवति न तावन्मात्रेणेति। चिंतायाः प्रयोजनं। यदि नाममानुषादिः प्रतिकलात्प्राग्दंडप्रदानादग्निहोत्रकालन आपतेत्। प्राप्तनिमित्त
त्वाद दीक्षितत्वाच्च होतव्यमग्निहोत्रमिति। एवं तावदाग्नावैष्णवस्य दीक्षासंस्कारकारणोऽनुपदेशानात्मीयत्वं। यथानुपदेशो भवति। तथा च
ते। न हि भक्तिः क्रियार्थत्वेपि समर्थते। उभयत्रैलौकिकायां क्रियायां क्रियार्थायामित्यनुवर्तमाने लृट् शेषे चेति सूचितं। चशब्दात् क्रियायां क्रिया
र्थायामिति। अत्रोदाहरणं। करिष्यामीति व्रजति। एवमिहापि दीक्षिष्यमाणो निर्वपेदिति। आग्नावैष्णवस्य दीक्षासंस्कारकरणानुप्रवेशः शक्याव
न्तुं। एवमपि त्रिदंडो नैरेव दीक्षितो भवति। नाग्नावैष्णवेनेति॥ ॥ अन्यादीक्षितो यद्यात्मीयता इत्याह विरुद्धेः। अन्यशब्दे न चोपधर्मप्रविकर्षात्प्रतिप्र
सक्तानागम्यते। सत्यन्यश्च भवति समाख्यानुग्रहश्च। उच्चैरिति चोपांशुपक्षे उच्यते॥ ब्राह्मण इत्येव वैश्यराजन्ययोरपि श्रुतेः। तस्मादपि राजन्यं
वा वैश्यं वा ब्राह्मण इत्येव ब्रूयादिति वचनात्॥ ॥ आस्तमयाद्वेवं यच्छेति। स वाचंयम आस्ते आस्तमयादिति॥ ॥ अस्तमिते दीक्षितवाचं विसृ
जस्व पत्नीवाचं विसृजस्वेति त्रिराह। दीक्षितवाचं विसृजस्वेति त्रिरुक्ता पत्नीवाचं विसृजस्वेति त्रिरुच्यते। लाघवाय समासेनोक्तं। अनेकप्र
नकृविपरिणामः॥ ॥ अग्निमभ्यावृत्य व्रतं कृणुतेति वाग्विसर्जनं क्रियते। अग्निर्ब्रह्मेति च सकृत्। व्रतं कृणुतेति नद्वाग्विसर्गस्य कालोपलक्ष
णार्थं। भूर्भुवः स्वः। यस्य व्रतकरणार्थतो सामर्थ्यात्। अग्निर्ब्रह्मेति उवाग्विसर्गार्थं। यज्ञो व्यते। अनेनैव वाचं विसर्जयेदुक्ते कृणुत व्रतं कृ
णुतेरिति वा। अग्निर्ब्रह्मेति विकल्पः॥ ॥ अत ऊर्ध्वमामुष्टिविसर्गादनस्तमिते नु दिने च त्रिराह दीक्षितवाचं यच्छ पत्नीवाचं यच्छेति। पूर्वे च त्रिसंख्या

कर्क॰ ९

स्यादग्निः ॥ ॥ यद्यग्नेर्विसर्जनं हुत्वाग्निसर्जनकालउक्तएवास्तमितेवाचंविसर्जयेति । उदितेत्वग्नावाचार्येणावाग्नीमर्गोभिहितः सपथो
के यदुणोनग्न्युतेतन्तस्युक्तमुत्थायामस्मोद्वपनमस्तमितेपत्नीवाचंविसर्जयसमिदाधानमित्युपक्रम्य एवमुक्तिमस्माद्ध्यनादित्युक्तं ॥ ॥
अन्तरुपैदोहयनिकारितत्वाद्दक्षिणाग्नावेधुक इति ॥ ॥ ततो द्वौ वृतौ भवतः । तयोर्द्वारं तत्द्वारां जहुतौ भवतो दंपती । तच्च विभागेन एकैक
स्यागरिके वस्यवसतिहि दक्षिणाग्नौ पत्न्याः वृतश्रपणमिति ॥ ॥ प्रथमेवृते व्रीहियवयोरन्यतरस्यावपन्तु भावेकोतद्धेकेप्रथमेवृतउ
भौ व्रीहियवावपंतीति प्रकृत्य तस्मादन्यतरमेवावपेदित्युक्तं । ते विकल्प्यान्ते मदोह । अदोहेवृतदुहः तदृतंभवति । तच्च प्रथम
एव । अन्यत्र प्रतिनिधिरित्युक्तमेव वृतप्रसंगेन नियमशब्दादिति ॥ ॥ सर्वौषधं सर्वसुरभिचैके । सर्वौषधं सर्वान्नौषधयः सर्वसुरभि
पिप्पलादिः ॥ ॥ गार्हपत्ये दीक्षितस्य श्रपणं दक्षिणाग्नौ पत्न्या । दीक्षिणे वृतस्य पत्नीवृतस्य च ॥ ॥ यवागूराजन्यस्यामिक्षावैश्यस्य । वृतंभ
वति । तेच तस्मादुपादेयेनेह अस्येति । अन्नादविशिष्टस्य मरुणापुनिवेवात ॥ ॥ व्रतं व्रयछक्त्युदसितेमपरालेपि सामं रात्रेमपरालेप्रातर्दो
हमपराह्ने ॥ ॥ देवीर्धियमिति व्रतायोपस्पर्शनं स्वासने । उपस्पर्शनमाचमनं कुजएतेना लिंगात् । मानुषायवाएष पुराशनायावनेनिक्ते
थान्नदैव्यपिपरति । यत्तत्पूर्वमानुषाशनकाले वनेजनं तद्देवमिति ज्ञापयति । तत्रचमंत्रविधाने उदकोपस्पर्शनमात्रमेवेति संप्रदायः । स्वा
सन शब्देन चकृष्णाजिने अभिधीयते ॥ ॥ ये देवा इति व्रतयत्यमन्त्रयेपात्रे ॥ ॥ पत्नीलोहे । ताम्रमयेतस्मा उक्तमरुणामात्रमेभवतीति कर्तव्य
४ अथास्मै व्रतं प्रयच्छति । निविहितत्वात । अयं वर्डोर्ध्वमसितं मनुस्मिता । सायंदोहमपराते प्रातर्दोहे र

राम॰ ९ २०२

ता । अविहितत्वात् ॥ ॥ व्याघ्राःपीताइति नाभिमालभते यजमानः ॥ ॥ मेऽन्नाः कुलाःस्मविषाणायाजो किंचित्कंडूयनंयत इति ॥ मिह सेचने । मूत्र
पुरीषेरूपे क्षित्यर्थः । लोष्टं किंचिद्वादंतैः किंचक्षुष्टदेनचकाष्ठपाषाणा धषिग्रस्तेनावा शब्दो विकल्पार्थः ॥ ॥ अपो मुंचामीति मेहति ।
पृथिव्यासंभवेत्पात्रे निदधाति । यद्गृहीतं तत्सूतिमुंचति ॥ ॥ अग्नेत्वमित्युक्त्वास्वपिति । पूर्वः प्राग्दक्षिणा जनः । वितानस्य प्राग्दक्षिणतः प्र
क्तिराःस्वपिति ॥ ४ ॥ ॥ अभिमन्यावर्तं विदुद्धमस्वपं तं पुनर्मनइति वाचयति । अथ यत्र सुप्तापुनर्नो वद्वास्यन्नवतिनद्यावच्यानीति वचना
त् ॥ ॥ त्वमग्ने व्रतपाहडुधास्यं वावाव्याहृत्य । अव्रत्यं अश्लीलं ॥ ॥ लब्धमालेभ्यवाचयतिरास्वेयदिति । रास्वियदीत्यमुमंत्रं । आलंभ्येति चका
रितत्वाद्दक्षिणाग्नामालभस्वित्वेवमादि । अशक्येभिमंत्रणं । आलंभनाशक्तावनेनैवमंत्रेणाभिमंत्रणं करोति ॥ ॥ शूद्रसंप्रवेशे सेमाषाप्र
त्युत्थानाभिवादनेदकावायवर्षोतिवर्जयेत्प्रागवभृथात् । दीक्षितधर्मा एते प्रतिप्रागवभृथादित्युक्तं ॥ ॥ परिश्रिते वदति । परिश्रितेन्मह
च्यते ॥ विचक्षणचनसितवतीं वाचं । विचक्षणसंस्कृतोच्यते । चनेचंतीचनसत्यचनंनाम । अन्नवती । अविद्वाणमितिव तीसत्यवतीवा
चेवदतिइति ॥ ॥ शालासना स्वपिसंधिवेलयोः संधिवेलयोः शालायामासितव्यं न च स्वप्यात ॥ ॥ देयास्तत्पासुतत्पासुवर्तमानास्वेप
मासितव्यं । संधिवेलयोरेव ॥ ॥ अप्रायश्चित्तमपराधेनात्रप्रायश्चित्तिरस्ति प्रतिशुष्यमेवेनस्मातरतिवचनात् ॥ ॥ इतरेतरस्मिन्वोपहव
मिच्छेरन् । उत्तरोत्तरोपहवो भवति । सर्वऊपयजमानके ॥ ॥ पत्न्याएकदीक्षा ॥ एकदीक्षितुपत्न्यामेवोपहवमिच्छति ॥ ॥ दीक्षांतेप्रायणीय

पर्के· मदित्यै चरुं निर्वपति। चरुग्रहणान्न कर्त्तव्यं॥ अदित्यै चरुरत्रापीत्युक्तत्वात्। कर्त्तव्यं वा चरोः प्रायणीयज्ञापनार्थः आदित्यं चरुं प्रा
१०· यणीयं निर्वपतीति वचनात्। एवं च पत्न्यादानान्तं गत्वादन्तरायेसत्यप्रयोक्तव्यं॥ ॥ आज्यभागावि ष्टान्येन देवताः श्रुतत्वाद्यजति प
थ्यास्वस्तिमग्निं सोमं सवितारं च। चशब्दाददितिं चेदनेनेति। पथ्यास्वस्त्या भेदज्ञापनार्थं चतस्र इति ग्रहणं॥ ॥ चमेदूणां त्वर्हिर्निदधा
त्युदयनीयायै। उदयनीयार्थं चर्वादीनां निधानं॥ ॥ सलेपं चरुं प्रमं च मेक्षणं। तोस्थाली सहस्मं कर्षेयप्रमन्यमेक्षणानि दधाती
तिवचनात्॥ ॥ प्रस्कोलपतिवा चरुं। अनुप्रहरतीतरौ मेक्षणं बर्हिषी॥ ॥ त एव र्त्विजः॥ ॥ विप्रेते चैन्यापि प्रायश्चित्ते भुदास
र्थमित्युक्तं॥ ॥ शंयंतं भवति। शंयुरूपे प्राप्ते उदये च किं पर्वं। अंशुं पुनः शंयुं तत्र पूर्वं यावेडे उपेडान्तमुत्तरे लोपनिति। किं तावत्प्राप्तं॥ ॥ अ
तवचने पूर्वं प्राप्तेः। अतन्वचने पूर्वमेव गृहीतव्यं। उत एतत्र। प्राप्ता हि। इडान्त ताः शंयुनत्नाचेति। उक्ते च शास्त्रार्थे किमित्युत्तरे यावत् उच्यत इ
ति। किंच॥ ॥ अविशेषश्रुतेः। न चात्र विशेषः श्रूयते। अतः प्राप्तत्वात्पूर्वमेव शंयुइडान्तं गृहीतव्यमिति॥ ॥ उत्तरं वा प्रकृत्यनुग्रहानुया
जप्रतिषेधाभ्यां॥ उत्तरं वा संयुइडान्तं गृहीतव्यं। पूर्वं। उत एतत्र। प्रकृत्यनुग्रहात्। एवं बहवः प्राकृताः पदार्था अनुगृहीता भवंतीति। व
द्रौ च फलस्य परत्वं भवतीत्यभिप्रायः। अनुयाजप्रतिषेधश्च भवति। इडान्तं भवति नानुयाजान्यजतीति। तथा तच्छंयंतं भवति न पत्नी
:संयाजयंतीति। एवं चोत्तरे शंयंते इडान्ते चोपपद्यते। न पूर्वं इति। एवं प्राप्ते आह॥ ॥ ग्रहणाद्य प्रवृत्तिः। शंयंत ग्रहणादिडान्त ग्रहणा हाम०
१०
२०३

२५ २ लाउ

च्चोत्तरत्राप्रवृत्तिः। उतः। उत एव शास्त्रार्थ इति॥ ॥ सा त्वरा अवेक्ष्य। आतिथ्यं हविर्निर्वपन्निति प्रकृत्याहतस्येडोपहूता साध्वान गृहस्तस्मात्समजउ
डान्त इति। असुरेभ्यो बिभ्यद्भिर्देवैस्त्वरमाणैरिडा एव परित्यक्तमिति। एतच्च पूर्व एवोपपद्यते। नोत्तर इति। अनुयाजप्रतिषेधस्य न हि समाप्तिर्व
न्तव्यः। सामिधीयते॥ ॥ नित्यानुवादोनुयाजप्रतिषेधः। अनुयाजप्रतिषेधः सेरडान्तसंवाथः। एवं प्रमत्तमिडान्तं येनानानुयाजा अपि तत्संत
रति॥ ॥५॥ ॥ उपावदेशप्रतिप्रस्थाता रोहिते चर्मण्यानडुहे सोमं निर्वपति॥ स्थापयति॥ ॥ विकृष्याणं विचिनोति। कौत्सः शूद्रो वा। कुत्सितक
र्मं करोतीति कौत्सः। विचयनं च पर्वशावखण्डनं॥ ॥ ब्राह्मणोपातो। सच पुरुष एव। जातिविशेषः। ब्रह्मपुरुषो ब्राह्मणश्छत्री। कृताकेज
प्रत्यवेदनाय ब्रह्मणो हि व्याप्तः प्रायणीये॥ ॥ उदकुम्भश्च पुरस्तात्। भवति शर्वाततरात्। स्वशालायामपि च दृश्यते। अपयदपामन्ते क्रीणाती
ति। क्रयार्थं श्रुनिवापः॥ शालाद्वाराण्यपिधाय ध्रौवं जुह्वां च तुर्विंगृह्णाति। उपरिष्टाद्धिरण्यपवरणं विधानादिहापिधानं। ध्रौवं जुह्वां चतुः
त्वा विसृज्य ति। तत्र च बर्हिःस्तीर्णे हिरण्यं च ध्रौवं दधात्यैवातर इति। अनेन मन्त्रेण। बर्हिर्ग्रहणाच्च विनियुक्तमेव गृहीतव्यं॥ ॥ जूरसीति जुहो
ति। चतुर्गृहीते॥ ॥ शुक्रमसीति हिरण्यमुद्धृत्य वेद्यां रणे निदधाति। शुक्रमसीत्यनेन मन्त्रेण हिरण्यमुद्धृत्य वेद्यां रणे निदधाति। स्व
कं हिरण्यं उद्धृत्य। यजुष्कं प्रास्तं तदेव। अत्र प्रायणीयाप्रतिपत्तिः समाप्तिः। तच्छेषभूतं द्रव्यं हि विनियुक्तमिति। प्रायणीयाशेषभूतद्रव्य
सा ध्यापि सती यमाहुतिः सोमक्रयार्थी। एवं हि श्रूयते। वाग्वै सोमक्रयणी निदानेन तामेतयाहुत्या प्रीणाति प्रीतया सोमं क्रीणातीति। एवं च स

त्दृदयनीयायां न भवति॥ ॥चतुर्गृहीतं गृहीत्वान्वारभस्व यजमानेत्याह॥ ॥अध्वर्युः तं च यजमानोन्वारभते॥ ॥अपावृतद्वारे निष्क्रामतः। अपावृ-
तद्वारे मुक्ताविति द्वारे। द्विवचनोपदेशात् अध्वर्युयजमानौ निःक्रामतः। प्रतिप्रस्थाता द्वितीय इति संप्रदायः॥ ॥दक्षिणेन द्वारे सोमक्रयणी ति-
ष्ठत्यलोहिताव्यंगाप्रतीतारक्तवत्सा वभ्रूः पिंगला पिंगलाभावे कृष्णाभावे रोहिण्यश्येतारे॥ अलोहिता अनेकिता। अव्यंगा अनंगहीना अंधी- ५३
ता अक्वालिता अपरावा रज्जुवद्धा॥ वभ्रूः पिंगला वभ्रुवर्णा पिंगाक्षी तदभावे कृष्णा। तस्या अथ भावे रोहिण्येश्येता द्वारे णीरक्षवत्सा अ-
श्येताक्षी आरक्ता रलोमन इत्यं निष्ठति॥ ॥विदसीत्येनामभिमंत्रयते। सोमक्रयणीमंत्रश्च संडे विपरिणम्यते। उदीचीनीयमानामनुगच्छति
वत्सा सहेति। द्विवचनोपदेशात् द्वयोरपि मंत्रः। चोदिताभिधानाच्च संडे विपरिणामः। षयदान्यती सप्तमे पर्युपविशति। सोमक्रयण्याः स्य
अथ सप्तमं पदं पर्युपविशतीति वचनात्। पर्युपवेशनं च वत्सयजमानाध्वर्युप्रतिप्रस्थातॄणां॥ ॥हिरण्यमस्मिन्निधायाभिजुहोत्यदि-
त्यास्त्वेति। हिरण्यमस्मिन्सप्तमे पदे निधायाभिजुहोत्यदित्यास्त्वेत्यनेन मंत्रेण॥ ॥स्फ्येन पदं त्रिः परिलिखत्यस्मे रमस्वेति। अनेन मंत्रे-
ण। समुद्धृत्य पदं स्थाल्यामावपत्यस्मे ते वंधुरिति॥ ॥उद्धरणं हिरण्यस्य समुद्धृत्य हिरण्यमिति वचनात् पदं स्थाल्यामावपत्यस्मे ते वंधुरिति॥ ॥
अपःस्थाने निषिच्य यजमानाय पदं प्रयच्छति त्वे राय इति। वऊ यजमानकेस्य मंत्रस्य विपरिणामः॥ ॥मे राय इति यजमानः प्रतिगृह्णाति। पदं रामः
अयमपि अनेकयजमानके विपरिणाम्यते। मंत्रश्चेष्यध्याहारः। साकांक्षत्वात्। रैशवृस्यपश्चुवियलो देऊ वचनोनता त्वे राय इति त्वयि पश- ११

वस्त्वेवैतदाह। मे राय इति मयि पशवः इति श्रुतत्वात्। मा वयमित्यध्वर्युरात्मानं संस्पृशति। आनंतर्याद्यजमानो मामूदित्यध्वर्युग्रहणं॥ ॥तत्पत्न्यै
पदं प्रयच्छति। हे त्वेत्युक्तत्वादध्वर्युः प्रयच्छति॥ ॥नेष्टा तोलदत्तेनावाचयति। पत्नीं॥ ॥सोमक्रयण्याश्च समीक्षमाणां समख्ये इति च शब्दात् नेष्टैव
पत्नीं वाचयति॥ ॥प्रक्षाल्य पाणी हिरण्यं बध्नीते नामिकायां॥ हिरण्यवंधनस्य क्रयार्थत्वात् पिनाक्षिते संवै हिरण्यमित्युपक्रम्याह सत्येमा अंउ-
पस्पृशानि सत्येन सोमं पराहणानीति। अधिकारमुपनीय ब्राह्मण॥ ॥आथायनाभिषवांशुदामेषु च। पाणिप्रक्षालने हिरण्यवंधने भवतः॥
॥६॥ ॥प्रैष्यति च सोमोपनहनमाहर सोमपर्याणहनमाहरोष्णीषमाहरेति। चशब्दादध्वर्युरेव प्रैष्यति॥ ॥अनुवाकनिवपनं। अस्मिन्वा अ-
वसरे सोमनिवापः। तुल्यशास्त्रत्वात्॥ ॥शोमनं सोमोपनहनं भवतीति वाक्यशेषः॥ ॥उष्णीषाभवे सोमपर्याणहना द्व्यंगुले अंगुलं वा
उष्णीषायाः छेदनं। यदुष्णीषं न विदेत् सोमपर्याणहनस्यैव द्व्यंगुले वा अंगुले वावकृंतेदिति वचनात्। अध्वर्युर्यजमानो वा सोमोपनहनं
हरत्य इत्यपरे॥ ॥अध्वर्युर्यजमानो वा सोमोपनहनमादत्ते। एवं च अथ सोमपर्याणहनमिति वचनात्। न्यग्रोधे विपरिणामः॥ ॥प्राङ्उपवि-
श्याच्छदोसीति सोममालभति। अयमपि चोदिताभिधानादिति विपमश्रेतप्रज्ञापनार्थः। न विचिनोत्यत ऊर्ध्वं। काष्ठापासनमेके। अत्रहे
वे तृणं वा काष्ठं वा विचित्यापास्येतातिवचनात्॥ ॥सोमोपनहने द्विगुणे चतुर्गुणे वास्तृणाति प्राग्दशमुदग्दशं वा एवमेव सिद्धे यते। अथ
वा सो द्विगुणं वा चतुर्गुणं वा प्राग्दशं वोपस्तृणातीति॥ ॥तस्मिन्सोममिमीते दशकृत्वो मिन्यमिति॥ सोमोपनहने सोमं प्रक्षिपतिद

२१२

कर्क० १२

शकृत्वो । ख्यमित्यनेन मंत्रेण ॥ ॥ सर्वाभिः प्रथमं सर्वाभिरंगुलीभिः प्रथमः प्रक्षेपः ॥ ॥ अंगुष्ठप्रभृति चैकोत्संर्गं । एकैकांगुलिसन्यासेन प्रक्षेपे प्रक्षे-
पे । द्विःकनिष्ठिकया । कनिष्ठिकया द्विः प्रक्षिपति । एकोपचयश्च । एकैकोपचीयतेंगुलिः प्रक्षेपे प्रक्षेपे । एवं दशकृत्वो मितो भवति ॥ ॥
अंजलिना दसमं । दशमं प्रक्षेपणमंजलिना दशकृत्वोमुमिमीत इति वचनात् । समस्यांजलिनाध्यावपतीति श्रवणात् ॥ ॥ अन्यद्वा
ध्यावापश्रुतेः । अथवान्यदेकादशमंजलिना कर्त्तव्यं । येन तथा सर्वाभिरंगुलीभिस्तु त्वा समस्यांजलिनाध्यावपतीत्याह्यायेतु न कृते द-
शकृत्वो मिनु मिमितन्मंत्रेणाभिसंवध्यते । दशकृत्वो मिमीते ख्यमित्यनेन मंत्रेण । तस्मादेकादशो ध्यावापः ॥ ॥ ऊर्णासंग्रहणोष्णीषेणावध्ना-
ति प्रजाभ्यस्त्वेति । अथ सोमोपनहनस्य समुत्पादितानामुष्णीषेण विग्रथ्नातीति वचनात् । बध्नातीति चाध्याहारः सौकर्यात् ॥ ॥
अंगुल्या मध्ये विवरोणाति प्रजास्त्वानुप्राणंत्विति अथ मध्ये गुल्या काशं करोतीति श्रुतेः ॥ ॥ तं विक्रयिणे प्रयच्छति सोमं ॥ ॥ पंच-
कृत्वः सोमं पणते । पणव्यवहारे । पंचकृत्वः संव्यवहारं करोति ॥ ॥ सआह सोमविक्रयिन् क्रय्यस्ते सोमो राजा३ इति क्रय्य इत्याह सो-
मविक्रयी । तं वै ते क्रीणानीति । मंत्रद्वयमपि चोदितार्थाभिधायी । क्रीणीहीत्याह सोमविक्रयी कलया ते क्रीणानीति अध्वर्युः ॥ ॥ भूयो वा अतः सो-
मो राजार्हतीत्याह सोमविक्रयी भूय एवातः सोमो राजार्हतीति महांस्त्वेव गोर्महिमा गोर्वै प्रतिधुक् तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या
आतंचनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनमिति । भूयो वा अतः सोमो राजार्हतीति भूय एवातः सोमो राजार्हतीति च चोदिता-

राम० १२

२०४

र्थाभिधायिनौ । भूय एवेत्यतः प्रभृति चतुर्गावर्द्धयति । अध्वर्युः । एकैकेनांते पणते शफेन पदार्द्धेन गवा ते क्रीणामीत्यंततः प्रश्नांते प्रश्नांते । भूय ए-
वेत्यतः प्रभृति आवर्त्तते प्रश्नशेषेण चाध्वर्युसोमविक्रयिणौ । इति प्रत्युक्तौ लक्ष्येते । मंत्रोक्तशफादीनामेकैकेन पणतेध्वर्युः । उक्तौ प्रत्युक्तौ ते च
भूय एवेत्यतः प्रभृत्यावृत्तिः । अंत्ये च पणते गवा ते क्रीणामीत्युक्ते । क्रीतः सोमो राजेत्यंते वयांसि प्रब्रूहीत्याह सोमविक्रयी । अयमपि चो-
दितार्थाभिधायी । सआह चंद्रं ते वस्त्रं ते छागस्ते धेनुस्ते मिथुनौ ते गावौ तिस्रस्तेन्या इति ॥ तच्च वेनाध्वर्युरभिधियते । शुक्रं त्वेति हिरण्य-
मालभ्य वाचयति । चोदितार्थाभिधायी ॥ ॥ स एष इति सोमविक्रयिणं हिरण्येनाभिकंपयति । अभिकंपयन्नुपप्रलोभयति संदर्श-
नेन । अथ सोमविक्रयिणमभिप्रकंपयतीति श्रुतेः ॥ ॥ अस्मे तत इति यजमानसहितं निदधाति हिरण्यं ॥ ॥ सोमविक्रय्यंतदादत्ते । एतद्धिरण्यं
॥ ॥ अजां प्रतावस्वामालभ्य वाचयति तपसस्तनूरिति । अथाजां यां प्रतीचीनमुखीं वाचयतीति वचनात् । कारितत्वाद्ध्वेषणात्र चोदिता-
र्थाभिधायी च मंत्रः ॥ ॥ सद्योनाजां प्रयच्छन्नभिजोन इति द्विषेन सोममादाय गत उत्तिष्ठति वा । अपाते सोम उत्तिष्ठति वा यजमानः न वाति-
ष्ठति । मंत्रश्चोदितार्थाभिधायी । उपमार्थत्वादस्मिन् मित्रशब्दस्याविपरिणामः ॥ ॥ द्वाद्विर्तो रौद्रह्लितो प्रत्यस्य वासो निदधाति इस्मोरूमिति । अ-
यमपि चोदितार्थाभिधायी ॥ ॥ स्वान भ्राजेति जपति सोमविक्रयिणमाह्रमाणः ॥ अथ सोमक्रयणाननुदिशतीति वचनात् । अत एव
यजमानः ॥ ॥ अपोष्णे तेदीदिजः शारः स्वयमेव पत्नी च ॥ ॥ हिरण्यं सहस्रादिव पृषता वरत्राकांडेनाहन्ति वा । हिरण्यमुपित्कृत्वा सोमवि-

ऋषिस्मारादाश्रिषण्षत्ता चित्रेणावरत्राकाङ्गेनाहं तिसोमक्रयिणां नवाहंतातिविकल्पः॥८॥ ग्रहीत्वा सोमं परिमाय प्रउतिदा वाचयति। ग्रहीतसोमस्य
हरणाऊहीतेनैव सोमेन वायच्यान इति। उन्नेरे च। उन्नेरे चैकमेणाप यजमानकर्त्तृके॥ ॥उदायुषेत्यु-त्थानं शीर्ष्णि सोमं कृत्वा पाणिमंतर्द्धाय
पाणिनां नहितेनाशिरसि सोमं कृत्वा उदायुषेत्यनेन मंत्रेणोत्तिष्ठति॥ प्रतिपंथामित्यनेनाभ्येति दक्षिणातस्ति छकं त्रेसमंगिधोत्तं प्रउगा स्तौऽदुते
फलके॥ समं सर्वागोपेतो दक्षिणतो व्यवस्थितं कृयदेशस्यानस्ततुतिगच्छति प्रतिपंथामित्यनेन मंत्रेण। तस्य चेषां तरालादुद्धुते फल
के भवतः। उद्धृते प्रउगस्य फलके इति वचनात्॥ ॥ कृष्णाजिनमस्मिन्नास्तृणात्यदित्यास्त्वगसीति॥ अस्मिन्निति त्वनोभिधीयते॥ ॥तस्मिन्सो
मं निदधात्यदित्यै सद इति॥ तस्मिन्कृष्णाजिनो मंत्रश्चोदितार्थाभिधायी॥ ॥अस्तभ्नाद्यामिति सोममालभ्य वाचयति। आलभ्य
तिकारितेः काशुते चाध्येषणा। न्यग्रोधे च सोमं न्यग्रोधावितिः अस्तभ्नाद्यामिति चोदितार्थाभिधायी॥ ॥वनेषु व्यंतरिक्षमिति सोम
पर्याणहनेनेन परित्र स कृष्णाजिनपुरस्तादासजति सूर्यस्य चक्षुरित्यासनयोरन्यतरत्। वनेषु व्यंतरिक्षमित्यनेन मंत्रेण। सोमपर्या
णहनेन परित्यक्ते कृष्णाजिन मनसः पुरस्तादासजत्यवलगयति। सूर्यस्य च क्षुरित्यनेन मंत्रेण॥ ॥एके चैकावा अवकृत्य। एके चेदा
सनकृष्णाजिनग्रीवा अवकृत्यासजंति॥ ॥अनड्वाहौ पुनरनुस्त्रावेनमिति युगपद्वचनत्वात्। अनस्यनड्वाहौ पुनरनुस्त्रावेत
तमित्यनेन मंत्रेण युगपत् योगपद्याभिधायकत्वात् मंत्रस्य॥ ॥भेदे मंत्रावृत्तिः सान्निपातित्वात्। भेदेन वा योजनमशक्यत्वात्। नहि

शक्यते दक्षिणेनैकेन पाणिना द्वयोर्योजनं कर्त्तुं। योजनं च योक्त्रपरिग्रहणं। न युगस्कंधसन्निपातः। अतो भेदेनाभेदे च मंत्रावृत्त्या मात्वंसन्निप
तितो दक्षिणं गंत्रः क्रियायां उपकरोति। तथा च श्रुतिः सदक्षिणं युग्यमेवाग्रे युनक्त्यथ सव्यं युग्यमिति॥ ॥ईषांतरे अभितिष्ठः सुब्रह्मण्यः प
लाशशाखया प्राजति। यत्तं उद्धृते फलके तत्र अभितिष्ठः सुब्रह्मण्यः पलाशशाखया प्राजति गमयत्यनड्वाहौ। पश्चादन्यरात्पापालं वेदगृ
हीत्वा पालं वशब्देन पश्चादावद्वारं जुरभिधीयते। यथा वतारेनः प्रवर्त्तमानं वीधार्यते। निगृहीत्वा सोमायक्रीतायानुवाचयति। पर्युह्यमा
णायेति चेति विकल्पः। मंत्रश्चोदितार्थाभिधायी। क्रयोत्तरकालं वाभिषेचनीये बहुवचनात्तेनो हः॥ ॥दक्षिणतश्चान्वारभते। सोमं पर्यु
ह्यमाणं वै यजमानोन्वारभत इति वचनात्॥ यत्रिरुक्तां प्राप्याध्वा दक्षिणावर्त्तं शालां गच्छति। निष्कर्याप्रथमायोः सोमपरिवहन विष
दाश्रंतया प्राप्यात्वा प्रदक्षिणमावर्त्य शालां गच्छति। भद्रो मेसीति वाचयति। वाचनेन च गमनाभिप्रवर्त्तनस्य। मंत्रश्चोदितार्थाभिधायी
॥ ॥सुब्रह्मण्यां चाह्वयति सुब्रह्मण्यो३ सुब्रह्मण्यो३मिति त्रिरुक्त्वा सकृन्निगदं पावदहे सुत्या भवतीति यावाह। सुब्रह्मण्यां चाह्वय
ति। चशब्दादध्वर्युः स्वयमेवाध्वर्युर्वेदिविधानमस्याइति। सुब्रह्मण्योमिति त्रिरुक्त्वा इंद्र आगच्छेति सकृन्निगदं ब्रूयात्। यावद्भिरहोभि
सुत्यमह भवति तावत्सु उच्चारयेत्। सुब्रह्मण्यः पुनः शकटेषु ब्रह्मण्यानिगदवर्जितां त्रिरुक्तः प्रचि प्रतिप्रस्थाता मीषोमीयं पशुमादायति
प्रतिरुस्मरां। गंमेधमभावेलो हितसारंगं। शालायाः पुरस्तात्प्रतिप्रस्थाता मीषोमियं पशुमादायेति इति। अन्यवर्णकेस्मवर्णेनसहि

२१०

कर्क.
९४

तंमेध्यंमेदुरः तदभावेलोहितसारंगान्मेषिश्च स्यात्तेनमालंभ्यवाचयति। एनंपशुं॥ ॥चरतिपशौवर्त्तमानेऽनसिषट्कृत्वः प्रतीचीति॥ ॥शा
लाप्रवेशान्ते वाचनमेव। अध्वीगच्छेतिपशौवाचनमेवभवति॥ ॥आहवनीयाच्चोल्मुकमाहृत्यैकेवाचनंकुर्वंति। उल्मुकहरणंचप
शुसमिन्धानस्ववान्चरतिपशौ। एवंहिश्रूयते॥ तद्धैकआहवनीयादुल्मुकमाहरंत्ययमग्निरयंसोमस्ताभ्यंसहमन्यानिष्टाध्यानमिति॥ प
सभापेन उपस्थाप्यानेमनेनोपतिष्ठातिवरुणस्यात्रेमनमिति। शालायाः समीपेन उपस्थाप्यानंभद्रेनोपतिष्ठातिवरुणस्यात्रेमनमित्यनेनमं
त्रेण॥ ॥शम्येचोद्भूहतिवरुणस्यस्कम्भसर्जनीइति। अनेनमंत्रेण॥ ॥उदुंबरीमासंदींनाभिदघ्नामरत्निमात्रींगीर्भुतामाहरंतिचत्वारःना
भिप्रमाणामरत्निमात्रैरंगैरीषास्थूलादिभिःकृतांमुंजरज्जुं। सोत्रपमरणंहिश्रूतौप्रयन्ते। मुंजविचयनाभवतीति। मित्राचार्येणोक्तं। सोमा
संदीवदिति। चत्वारआहरंत्यध्वर्यवः। अध्वर्युश्चत्वारोहितासंदीमाहरंतइतिश्रुतत्वात्॥ ॥अभिमृशत्येनांवरुणस्यऋतसदन्यसीति। एना
मासंदीं॥ ॥कृष्णाजिनमस्यामास्तृणातिवरुणस्यऋतसदनमसीति। अस्यामासंद्यां। तस्मिन्सोमंनिदधातिवरुणस्यऋतसदनमासीदेति।
तस्मिन्कृष्णाजिने। मंत्रश्चादित्यांधोभिधायी॥ ॥शालांप्रवेशयंतिदक्षिणेनसंचरेण। अध्वर्यवश्चत्वारएवायातइतिवाचयति। चोदितार्था
भिधायामंत्रः॥ ॥आहवनीयंदक्षिणेनस्थापयंति। सहसोमेनासंदीं॥ ॥उदपात्रमुपनिनयंत्येके। उदपात्रमुपनिनयंत्येके। अन्वंहैकउदपात्र
मुपनिनयंतीति अभिधायतस्मान्नोपनिनयेदित्युक्तं। अतोविकल्पइति॥ ॥इतिकर्कोपाध्यायविरचितेकात्यायनसूत्रसप्तमोध्यायः॥ ॥७॥ ॥

राम.
९४
२०७

॥ ॥उं आतिथ्यंनिर्वपतिवैष्णवंनवकपालं॥ आतिथ्यंइतिकर्म्मणोनामधेयं। तस्मादातिथ्यंनामेति। श्रवण
ताविधायकत्वात्। संव्यवहारश्चदृश्यते॥ आतिथ्यहविष्कृतःकृत्वोत्येवमादि। तत्रवैष्णवोनवकपालोभव
ति॥ पत्न्यन्वारब्धस्तूष्णीमकविमुक्तेवानिर्वपेदग्नेस्तनूरितिपंचकृत्वःप्रतिमंत्रं। तत्पत्न्यन्वारब्धतइतिवच
नात्। सर्वेसंत्वरमाणाइवगृह्णीयादिति। तूष्णीमित्युक्तं। तद्ध्यन्यतरएवविमुक्तःस्यादन्यतरोविमुक्तोऽन
गृह्णीयादित्येकविमुक्तइत्युक्तं। वाशब्दोविकल्पार्थः। एवमपिहिश्रूयते। विमुच्यैवप्रपाद्यगृह्णीयादिति॥
पूर्वंनिर्वपतिग्रहणंकर्मोत्पत्त्यर्थं। द्वितीयंनिर्वापार्थं। अग्नेस्तनूरित्येभिर्मंत्रैःपंचकृत्वःप्रतिमंत्रंनिर्वपेत्। स
गृह्णात्यग्नेस्तनूरसिविष्णवेत्वेतिश्रुतत्वात्। निर्वापेचोदकेनसवितृपदोपलक्षितोमंत्रःप्राप्नोत्यतआह॥ सावि
त्रनिवृत्तिःश्रुतिविरोधाभ्यासावित्रस्यसवितृपदोपलक्षितस्यमंत्रस्यानिवृत्तिःकुतएतत्। श्रुत्यामंत्रांतरस्य

फर्क

१

विहितत्वात्। सगृह्णात्यग्नेस्तनूरसि विद्मवेत्वेति। उभयत्रद्रव्याभिधायकत्वाच्छब्दः। सविरुध्यंतइतिकेषां
चित्सिद्धांतः। अपरेनुव्यावर्णयंति। येनात्रऋतिर्भवति। सवाअन्येनैवततोयजुषागृह्णीयाद्येनोचान्यानिह
वीः षीति॥ चोदकप्राप्तमन्त्रस्यसविशिष्टयोर्मंत्रयोः समुच्चयोवाचनिकः। अतउभाभ्यामपिग्रहणमिति। अपरेतुचो
दकपरिप्राप्तमंत्रेत्वाशब्देमेवापनयंति। सएवविरुध्यते। अग्नेः तनूरसिशिष्टत्वेवत्वेतित्वाशब्देनद्रव्यमभिधीय
ते। सावित्रेपित्वाशब्दोद्रव्यपरएव। ततः प्रत्यक्षशिष्टेनचोदकप्राप्तस्त्वाशब्दोनिवर्त्स्यतइति। तत्पुनर्विचारणी
यं। यदावचनेनप्रत्यक्षशिष्टचोदकप्राप्तयोः।

ए२-
१५
२०८

समुच्चयोभवतितदातदवयवभूतस्यत्वाशब्दस्यैकस्यनिवृत्तिरित्यशक्यंवक्तुं। अपिच। प्रत्यक्षशिष्टेपित्वाशब्दसमुच्चयोदृश्यते। अग्नेनायत्वा
सामभृतेतिस्मवेत्वेति। अग्नये। वारायस्याप्रदेविस्मस्मवेत्वेतिच। अतः प्रत्यक्षशिष्टचोदकप्राप्तयोरास्नानसमर्थ्यांतसमुच्चयः। पूर्वंचोदकप्राप्त
:पश्चात्प्रत्यक्षशिष्टइति। नष्टशब्दस्तुचोदकप्राप्तेपिदेवतादेशादुनरएवभवति। प्रकृतावेवमेवदृष्टत्वात्। सक्षिस्यतुग्रह॥ त्रयएवप्र
योगाः प्रकृतौदृष्टत्वात्। नोत्तरयोर्नष्टशब्दस्यच॥ ॥ अग्न्यन्वाधानव्रतोपायनारण्यभोजनदानवत्सवारणानिदर्शपूर्णमासयोः प्राग्गुरवेसानाग्याः
सामर्थ्यकृतत्वात्। निवर्त्तंतइतिशेषः। अग्न्यन्वाधानंतावत्तद्देवतापरिग्रहार्थं। सचदेवतापरिग्रहः सोमिकेनकृतः। आग्नावैष्णवंनिर्वपतीतिप्रकृ
त्ययेनेतदाह। अग्निर्वैयज्ञस्यावरार्ध्योविष्णुः परार्ध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्यसर्वंचयज्ञंपरिगृह्यदीक्षाइति आग्नावैष्णवस्यचदेवताप
रिग्रहार्थतोच्यते। यद्येवंकृतत्वादित्यत्रनसंभवतीत्यतः प्रभृतिशब्दः प्रायणीयादिविषयोद्रष्टव्यः। व्रतोपायनमपिसोमिकेनकृतत्वान्निवर्त्तते
दीक्षितस्यहिसत्यवदननियमउक्तः। तस्माद्देपिदीक्षितमाहुः सत्यंवदेति। अत्रापिप्रभृतिशब्दोनोजनस्यएव। दंडोतेहिदीक्षितोभवतीति। अ
तउर्द्धंव्रतोपायनस्यनिवृत्तिस्यात्प्रकृतस्याभावात्। आरण्यभोजनमपिनिवर्त्तते। सोमेद्रव्यविशेषनियमात्। निवृत्तेहिपयोव्रतेहविःशेष
भक्षोच्यते। अस्तिआरण्यभोजनस्यप्राप्तिरितितात्रआप्लिनेप्रक्रांतेतत्रिरात्रपर्वसिद्धमुक्तं। अपवसथ्येपुनरहनिक्वचनमेव। तस्मादुपवसथ
थेनाश्नीयादिति। अथवाआरण्यभोजनप्रतिषेधसूत्रस्यैतन्मूलत्वं। तस्मादुपवसथेनाश्नीयादिति। एवंचोपवसथ्यविषयएवारण्यभोज

कर्क०
२

नप्रतिषेधः। दानमपि निवर्त्तते दीक्षणीयादिषु सोमिकेनैव दक्षिणादानेनानन्तर्निर्वर्तितत्वात्। वृषभवरणं च सौमिकेनैव रणेन कृतत्वात्।
कृदवसानीयायां तु अग्न्यंतरत्वादस्यान्वाधानं प्रवर्त्तत एव। व्रतोपायनमपुनरुक्तं दीक्षत्वादाने च विहितत्वात्। तस्य हिरण्यं दक्षिणा
ति। आनन्त्यंतरविधाना च व्रत दरणं प्रागुदयानीयाया इति सूचितं॥ ॥ प्रत्नी संनहनं च सयोक्त्रायाः निवर्त्तते। यजमानभागश्च म
रूप प्रतिषेधात्। प्रतिषेधश्च द्रव्यांतरविधानात् तानकर्मगुणत्वात् नितदेवे। यजमानभागेन मरुतः तर्पितिकिंतर्हि मरुत एव। कर्मगुणो ह्य
सौ पुरुषार्थो हि द्रव्यांतरविधानमिति॥ ॥उपसर्जनीरधिश्रयति मदंतीश्च व्रतवत्। उपसर्जन्यधिश्रयणं मदंतीनामवसरविशिष्टयो
च्यते। व्रतवदिति गार्हपत्ये दीक्षितस्य श्रपणाद् दक्षिणाग्नौ पत्न्या इति॥ ॥ आयुष्टिविसर्गोऽड द कार्यस्तनकुर्त्वेव्यः श्राति च्या यामेवा
परो विशेष उच्यते। कार्ष्मर्यमयाः परिधय आश्ववालः प्रस्तर ऐक्षवौ विधृती वर्हिश्च। विशेषाभावेपि वर्हिग्रहणं चतुष्टयप्र
तिपत्त्यर्थं। वक्ष्यति हि॥ ॥एतद्वा आग्नावैष्णवीयोपसत्स्वपि च चतुष्टयं। सुचां यं व्यति नियमः। एककारकरणात्॥ ॥आसाद्याग्निम
न्धनमासेचनात्करोति। एतच्चेह विहितं। तच्चातुर्मास्येष्टयपि वक्ष्यति पुनरिहातिदिष्टमिति॥ ॥इष्टान्ते भवति॥ तस्मात्सवनाइडान्ता इति व
चनात्॥ ध्रौवं तु न प्रदाने गृहीत्वापनयति। ध्रौवमाज्यं व्रतप्रदानभागेन गृहीत्वाप्यतय इत्यनेन मंत्रे[illegible] द्विःस्थाल्याः स्रुवेणा
हूनेष्ट्रे शाकल्येति शाकलेन त्रिःस्थाप्येति। मंत्रवर्णेन स्थाल्याः स्रुवेण गृह्णाति॥ ॥गृह्णामीति सर्व[illegible]कारित्वात्। गृह्णामीति च मं

रा०
२
२००

त्रानुषंगः साकांक्षत्वात्। द्विःस्थाल्याः स्रुवेण गृह्णातीति। उत एतत्। मंत्रचासमवेदात्। आज्यनिगृह्णाना इति[illegible]ज्यवरूत श्रयणात्॥ ॥पूर्वशेषा
च्चोत्तरो प्रति द्वंद्वं च ग्रहणमाज्यानि गृह्णाना इति श्रुतेः॥ ॥याग्यदः प्रकृत्यार्तौ। पूर्वशेषभूतो चोत्तरो मंत्रौ। न द्विःस्थाल्याः स्रुवेण ग्रहणं न सूत्र
वचनमस्ति न पूर्वमंत्रेण सह हैकवाक्यता नोपात्तः। अनेकविशेषणविशिष्टा हि सर्वे ते वा पुरमिधाय्यन्त इति। आपतये त्वा परि[illegible]गृह्णामीति द्विप
कृत्वा हयो वा अयं पवन एष आ च पवति परिचपततीति। तथा एषतनूनप्राशान्कर इति एष वै शक्रो जिघ्र इति एकवाक्यता या[illegible]मान
वाक्यता न युक्ता। अतो यन्मंत्रवाक्यसमेदात्। द्विःस्थाल्याः स्रुवेणेति तत्रातीच युक्तरूपं। पत्न्याज्यानि गृह्णाना उत्याज्यवरूत्वं तत्प्रतिपु॥
हणं न परिक्रियते। तस्मादेकमेवेदं ग्रहणं। न द्विःस्थाल्याः स्रुवेणेति संप्रदायः। अपरे तु द्विःस्थाल्याः स्रुवेणात्स्यीय ग्रहणमिच्छंति तेषां पुनर्वचनम
न्वेषणीयं। नहि वचनमंतरेणेषोऽर्थः शक्यते वक्तुमिति॥ ॥तानूनप्त्रमेतत्। अस्य तानूनप्त्रमिती पसंज्ञा वैदिकी॥ ॥दक्षिणस्यां वेदिश्रोणौ निधा
यावमशांत्यृत्विजो यजमानश्चानाधृष्टमसीति। अनेन मंत्रेण। अद्रोहस्त्यानस्तानूनप्त्रिणो द्राग्ध्यमिति श्रुतेः। यैः सह तानूनप्त्रमात्यं स्पृष्टं
ते सत्तानूनप्त्रिणः तेषां परस्परतो द्रोह इति॥१॥ ॥पत्न्यंग्य निदधात्युपविधायामन्नयेन। पल्यंग्य चालयित्वा आपधायाम् नयनेन निदधाति प्रकृत
त्वात्तानूनप्त्रं॥ ॥अपराह्ने व्रतमिश्रं दीक्षिताय प्रयच्छति। अपराह्ण इत्यनुवाद एव प्राप्तत्वात्। व्रतस्य पुरुषार्थत्वाद्यथासामर्थ्यं भवतीति
यापि केवलार्थत्वात्तानूनप्त्रप्रदायत एव। बहुषु गृहपतय एव उष यजमानेषु गृहपतय एव तानूनप्त्रप्रदानं यदि वह वो दिरु रन्गृहपतय एव व्र

कर्क तमप्सु सिञ्चप्रपदे मुरि तिष्ठते। अग्रेव्रतपारत्याहवनीये समिधमाधाय मदंतीरुपस्पृश्य गाढतरं मुष्टिमेखलं कुरुते। अग्रे व्रतपा त्वनेन मंत्रेणा
३ हवनीये समिधमाधाय मदंतीरुपस्पृश्य गाढतरं मुष्टिमेखलं करोति। अवांतरदीक्षेयमिति यजमानः करोति॥ ॥पत्नी च गार्हपत्ये तूष्णीं॥
चशब्दात्समिधमाधाय मदंतीरुपस्पृश्य गाढतरं मुष्टिमेखले करोतीत्युक्तं यजमानेन सर्वं कामवांतरदीक्षा॥ ॥यजमानषष्ठाः सोममाप्यायय
तं ऋत्विज इति॥ चतुः सोमाय ऋत्विजो प्रति वेदमाप्यायनमाम्नातं। पंचमप्रतिप्रस्थाता। एवं यजमानषष्ठा इति संप्रदायः। अपरे त्वाग्नीध्रं पं
चममन्यंते। आप्यायनं वा लंभनमात्रं। न सोमप्ररूपः नियतपरिमाणत्वात्। सर्वाग्रे यपरूपं चाग्निषु दादिष्वमंत्रस्य विपरिणामः। आप्यमा
लभ्यापस्पृशेद्यः सोममालिप्यमानस्तथाविपर्यस्य प्रतीत्य प्रस्तरे निह्नुवत उत्तानहस्ता दक्षिणोत्तानानावेष्टायरति॥ तत्रस्थस्यापि प्रस्त
रे निह्नवः संभवति। तन्मीमृड्दित्यनेनेति यहणां॥ निह्नवश्च प्रस्तरे पाणिपाः करणं। व्यूहन परिध्यंजने कृत्वैकैः। तानूनप्त्र ग्रहणादि कुर्वंति
शालीन रात्रेनानून प्रादिरव सर ति क्षिप्स या व्यूहनपरिध्यंजनेनू येनैः। संस्कारकत्वाच्चैउं तत्वे पिसत्येवमादीनां प्रवृत्तिरिणे [illegible]
त्यादकानीनि वृत्तिर्युक्ता रूपा। प्रतिपत्तित्वाच्च प्रतिपत्तीनां प्रवृत्तिरेव। समुल्लुप्य प्रस्तरमेत्स्मा परिधी श्चादाय [illegible] पारिन प्र
रं यी हि वान्काचपरिधीनादायविधृती चाग्नीन्मरं त्या पारत्याह। मदंतीत्यग्नीत्। प्रत्याह। नाभिरेहाति वृ [illegible] पाहवनीये हत्वाप्सु सा ग्रमद
ग्नीध्रे प्रयच्छति निधानाय॥ नाभिरेहात्यमुमंत्रे स्रुवत्रयापाहवनीयं हत्वा अधिशिरः सामीप्ये पा [illegible] चमदंतीभिरप्सु दत्वाग्नीध्रे ३

प्रयच्छतिनिधानार्थं॥ ॥सुब्रह्मण्यां च प्रेष्यति सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति। चशब्दात्प्रतिपत्नी [illegible] पवति [illegible] उत्तरो ततः सुब्र
ह्मण्या प्रैषः। आगंतुकत्वात् प्रवर्ग्योपसदावतः। अत ऊर्द्ध्वं प्रवर्ग्योपसदौ भवतः। अन्यत्र पठितस्यावसरो [illegible] नेह तु प्रवर्ग्य
स्योपाठ इति। उपसदेव वा प्रवर्ग्ये। अप्रवार्यशब्देन प्रथमयज्ञो भिधीयते। तत्र प्रथमयज्ञे प्रवृंज्यादिति वचनात्। स [illegible] द्विती
येवैतत्तीयेवेत्यनुवादात्। प्रथमयज्ञे उपसदेव भवति। वा त च्चापि प्रवर्ग्यः शाखांतरात् प्रथमयज्ञे प्यकुरति प्रणाता युपसत [illegible]
नोपदादौ तदाक्षिप्याच स्यादि प्रैषादित्यर्थः। अग्न्यन्वाधानं ब्रह्मवरणमपर प्रसक्तत्वात्। उपसदिति च कर्मणो नामधेयं तेषु प्रैतेषु उपसदौ न
त्वेतेति सिध्यते॥ ॥हविष्कृतमाहूयान्नाहननमेषणोऽतीर्थ्यार्थत्वात्॥ हविष्कृदाह्वानकाले यदाहननं तस्य प्रणभो वेन भवति। ऊ
न एनत्। तादृष्यार्थत्वात्। तीक्ष्णाकरणा ये दृषदुपले आहन्येते। तीक्ष्णीकृता भ्याहि शम्यया दृषदमभिनिर्वर्तंत इति॥ ॥स्याद्वा ध
र्ममात्रत्वात्। वाशब्दः पक्षव्यावृत्तौ। भवेद्वा पेषणाभावे प्याहननं। नैनत्तैक्ष्ण्यार्थं। न हि शम्यया दृषदुपलयोस्तीक्ष्णता पपादयितुं शक्य
ते। अतो धर्ममात्रमेतत्किं च॥ ॥श्रुतेश्च। श्रुतिरप्यमुमर्थं ज्ञापयति धर्ममात्रमेतदिति। अत्र पुराकल्परूपा श्रुतिः। असुरा ह्येष सपत्ना
यज्ञाकृयह पात्राणि प्रविष्टाः साययज्ञमेवयज्ञपात्राणि प्रविवेश तत्तो हेनान शेकुर्नोदितुं मिति प्रकृत्याहसैषा सुरघ्नी सपत्नघ्नी वाग्वद
तिसपत्नैषहविष्कृत सद्वादयतितदेषा दृषदुपले समाहंतीति दृषदुपलयोराहननं असुरसपत्नहननायनतीक्ष्णीकरणाय तस्माद्धर्म

कर्क· तस्मिन्नुत्सिच्य प्रपद्य पुरि तिष्ठतेः। अग्रे व्रतपा इत्याहवनीये समिधमाधाय मदंतीरुपस्पृश्य गाढतरं मुष्टिमेखलं कुरुते। अग्रे व्रतपास्त्वनेन मंत्रेणा
३ हवनीये समिधमाधाय मदंतीरुपस्पृश्य गाढतरं मुष्टिमेखलं करोति। अवांतरदीक्षेयमिति यजमानः करोति॥ पत्नी च गार्हपत्ये रूरमी॥
चशब्दात्समिधमाधाय मदंतीरुपस्पृश्य गाढतरं मुष्टिमेखलं करोति वरूयजमानके सर्वेषामवांतरदीक्षा॥ यजमानषष्ठाः सोममाप्याययं
ति अंशुरंशुरिति॥ चतुः सोमाय र्त्विजो प्रति वेदमाप्यायनमाम्नातं। पंचमप्रभृति प्रस्थाता। एवं यजमानषष्ठा इति संप्रदायः। अपरे त्वाग्नीध्रं प
चमं मन्यंते। आप्यायनं वालंभनमात्रं। न सोमप्ररूपः। नियतपरिमाणत्वात्। सर्वाग्रे यपरूचाग्निष्टुदादिषु मंत्रस्य विपरिणामः। आप्यमा
लभ्योपस्पृशेद्यः सोममालिप्यमानस्तथाविपर्यस्य प्रतोन्यप्रस्तरे निह्नुवत उत्तानहस्ताद्दक्षिणोत्तानानावेष्टारायरुति॥ तत्रस्य स्यापि प्रस्त
रे निह्नवः संभवति। तन्मीमांसदिति प्रत्येत्येति ग्रहणं। निह्नवश्च प्रस्तरेपाणेपाः करणं। व्यूहन परिध्यंजने कृत्वैकैतो न्यूनप्रग्रहणादिके वैतृ
शास्त्रं तं न रात्रेनान्नून स्रुादिरेव सरविक्षिप्त या व्यूहेन परिध्यंजनेनूयेते। संस्कारः कल्पात्रे उत्तवेपि सत्येवमादीनां प्रवृत्तिरिष्यते [illegible]
त्यादकानीनि रत्निर्दुष्कृत्य। प्रति पत्नि त्वाच्च प्रतिपत्नीनां प्रवृत्तिरेव। समुत्प्य प्रस्तरमेत्न्यापरिधींश्चादाया [illegible] पानि प्रस्त
रं यी हि। त्यात्मा च परिधीनादाय विधृती चाग्नीन्मदंत्या पारत्याह। मदंतीत्यग्नीत्। प्रत्याह। नाभिरेहीति व[illegible]प्याहवनीये हत्वाप्युक्षा रामः
ग्नीधे प्रयच्छति निधानाय॥ नाभिरेहीत्यमुमंत्रेणैव त्रय्यप्याहवनीयं हत्वा अध्यध्यरीदः सामीप्यं उपर[illegible]च मदंती। भिरभ्युक्षाग्नीधे ३

प्रयच्छति निधानार्थं॥ ॥सुब्रह्मण्यां च प्रेष्यति ब्रह्मन्सुब्रह्मण्यामाह्वयेति। चशब्दात्प्रतिपत्नी अ[illegible] पूर्वतरो। ततः स्थ
सण्यप्रैषः। आगंतुत्वात्। प्रवर्ग्योपसदौ चरतः। अत ऊर्ध्वं प्रवर्ग्योपसदौ भवतः। अन्यत्र पठितस्यावसरो [illegible] प्रवर्ग्य
स्य पाठ इति। उपसदेव वा प्रवर्ग्यः। अप्रवर्ग्यशब्देन प्रथमयज्ञो भिधीयते। तत्र प्रथमयज्ञे प्रवृंज्यादिति वचनात्। [illegible] द्विती
ये वैतरतीयेवेत्यनुवादात्। प्रथमयज्ञे उपसदेव भवति। वातज्ञापि प्रवर्ग्यः। शाखांतरात्प्रथमयज्ञे प्यकुरतीत्युपसत्[illegible]
नायकादौ तदा द्विर्वाचयति प्रैषादित्यर्थः। अग्न्यन्वाधानव्रतपरायणो प्रसक्तत्वात्। उपसदिति च कर्मणो नामधेयं ते इष्टप्रज्ञेषुपसदोत
त्वेति हि श्रूयते॥ ॥हविष्कृतमाह्वयानाहननमशेषणोऽतोऽर्थत्वात्॥ हविष्कृदाह्वानकाले यदाहननं तत्पुणाभावेन भवति। ऊ
त एतत्। नाह्वाणार्थत्वात्। नाह्वाकरणायेह दृषदुपले आहन्येते। नाह्वाकृताभावाहि शम्यस्याद्दृषणममिनिर्वर्त्यतरति॥ स्याद्वाध
र्ममात्रत्वात्। वाशब्दः पक्षव्यावृत्तौ। भवेद्वाशेषणाभावे प्याहननं। नैनतत्रैत्राण्यर्थं। नहि शम्यया दृषदुपलयोस्ताह्वानोपपादयितुं शक्य
ते। अतो धर्ममात्रमेतत् किंच॥ ॥श्रुतेश्च। श्रुतिरप्यमुमर्थं ज्ञापयति धर्ममात्रमेतदिति। अत्र पुराकल्परूपा श्रुतिः। असुरद्धीसपत्नघ्नी
य वा कयज्ञपात्राणि प्रविष्टा सा यज्ञमेव यज्ञपात्राणि प्रविवेश ततो नैनां न शेकुर्निर्हर्तुमिति प्रकृत्याह सैषा सुरघ्नीसपत्नघ्नी वा गुर्द्दे
ति सपत्नेषु हविष्कृतमुद्वादयतित देषा दृषदुपले समाहंतीति दृषदुपलयोराहननं असुरसपत्नहननायनतो ह्वाकरणाय तस्मादेषु

कर्क मात्रमिति। नन्वेवमपिद्वितीयान्तनिर्देशाद्दृषदुपलसंस्कारएवायंस्रुक्तमार्गवत्। ततःश्रुत्येषणाभावेन भवति। अत्रोच्यते। नैषदृषदुपलसंस्कारः
४ वाग्गुह्लादनमात्रं चोद्यते। तस्मादेतामत्रवाचंप्रत्युह्लादयंतीतिप्रकृतमपुनरूपसंक्रियते। सयस्यहैवंविदुषएतामत्रवाचंप्रत्युह्लादयतिपापी
यांसोहैवास्यसपत्नाभवंतीति उपक्रमोपसंहारयोर्वाक्यस्यवाग्गुह्लादनार्थतावगम्यते। नदृषदुपलसंस्कारार्थतेति। एवंचभूतमस्यसमुच्चार
णान्यथानुग्रहोभवति भूतस्यभव्यार्थतान्याय्या। नभाव्यस्याहननस्यभूतार्थता। नन्वेवंसतिआहननाददृष्टंकल्पनीयं। सत्यमेवंदृषदुपलसं
स्कारपक्षेपिअदृष्टकल्पनस्यैवेतितस्माददोषायं। अपरेतुव्याचक्षीयंति इदं दैवकंचउत्तरस्यदृषदुपलस्यगुणाभिमतत्वात्सप्तम्यानिर्देशायंदृषदुपले
समाहंतीति। स्पष्टएवदृषदुपलस्याहननंप्रतिगुणभावइति। एवंसत्यप्यसान्नाय्येपिभवत्येवाहननमिति॥ ॥परिस्तरणपात्रसंसादनप्रोक्षणा
न्यनिर्वपणाधिश्रयणानिकृत्वाज्यादिकरोति॥ उपसदोऽपूर्वत्वज्ञापनार्थंपरिस्तरणाद्युपादानं। कुतुपाहनननिरासार्थंच। नकृतः। या
वदुक्तंह्युपसत्कर्मयेनाज्यस्रुवायोविधीयते। तद्विधानेनचयावत्किंचिददृष्टोपकारकमविहितंतत्सर्वमेवनभवति। यथाहननं [illegible]
प्रहरणंच। तथोत्तराघारप्रापाज्यभागादि। स्वाहादानंत्वत्रविधीयतएव। स्तन्त्वाद्देशेवपनुहरणस्यप्राप्त्यभावात्। अनस्वाहादानंविधे
र्वाचनिर्दंसंवपनुहरणमिति। अत्रचयद्यपिकरणंनोद्घाटितं। तथापिद्रव्यसंस्कारादितएवाउद्धवोवाधारादिविधानात्हिप्रमेयं। बर्हिषःप्र[illegible]
ति। संवपनुहरणेबर्हिषोवयवंपुष्टिषपुष्टिघकरणिता। एवंस्तनेववेदिरितिगम्यते॥ मदंतीरित्युवाप्रोक्षति। वाशब्दोविकल्पार्थइतिसंप्रदायः।

पुनर्वचनाच्चप्रैषस्यनियमः। मदंत्युपादानसामर्थ्याच्चमदंतीशब्दस्य॥ मात्रावदिध्माबर्हिः॥ अष्टादशसंख्याकत्वेप्राप्तेमात्रावदित्युच्यते। नवसामिधे
न्यस्यइध्मानुपस्पृश्यपर्वदिष्टेवेदकृदसमवंति। बर्हिषश्चैकस्तरणविधानान्मात्रावदित्युक्तं॥ ॥स्रुवतनीयास्रुवःसमार्ष्टि। स्रुच्युक्तत्वाभावात्स्रु
वेनसहवक्तव्यवचनं। स्रुवतनीयानांसंमार्गोनवाच्यो अन्वयप्राप्तत्वात्। वाच्योवाज्यस्थाल्याःसंमार्गोमाभूदिति। कुतःप्राप्तिरितिचेत्। वक्ष्यतिह्याज्य
स्थालीध्रुवार्थइति। अनेनप्रापितःसंमार्गोनिवर्त्यते। यद्येवंकार्यापत्तेःप्राप्नोत्येवसम्मार्गोनैतदेवंध्रुवाकार्यापत्तिरेवस्थाल्याः। नहि [illegible] ध्रुवाका
र्यंहिस्थालीतोगृहीतस्ययज्ञार्थस्याज्यस्यधारणं। तच्चेहनविद्यते। यद्येवंकथमुक्तमाचार्येणाज्यस्थालीध्रुवार्थेतिप्रस्तरांजनार्थ्या
षणेनचध्रुवायाःप्रस्तरांजनार्थंउपधारणंकार्यंनिर्दिष्टत्वात्कार्दस्य। अपपचतुध्रुवायांगृह्णातिसर्वस्मैतद्यज्ञायगृह्णातीतियथाजेरूपमतोन्यक्ष
र्ययोःसत्योःप्रकृतौप्रस्तरांजनंविहितमेवंध्रुवायामपि। एतच्चाग्नि कृत्वाचार्येणोक्तमाज्यस्थालीध्रुवार्थइति। एवंचध्रुवाकार्याभावात्। स्थाल्य
ज्यासंमार्ज्यर्थीदुर्लभइतिसंप्रदायेउक्तामाग्न्यनिर्वापासप्रैषःसंमार्गःक्रियतएव। अपृथग्गृहीतंजुह्वांचउरूपभृतियथाप्रकृतिवा। अपृथग्गृहीतंजुह्वा
गृहीतव्यं। चतुर्गृहीतमुपभृतिसर्वाअष्टौस्रुवोजुह्वांगृह्णातिचउरूपभृतीतिवचनात्। अथोत्तराधारअश्चचतुरोवकृत्वोजुह्वांगृह्णीयाद्द्वेधाकृत्वाउप
भृतीतिश्रुतत्वात्। यथाप्रकृतिवेत्युक्तं। अत्रजगृह्णातीतिप्रकृतिलिंगसंयोगात्प्रधानार्थत्वेपिसतिप्रकृतिवदेववचनात्ग्रहणं। क्वचनच्यानेने
वप्रधानाभिनिर्वृत्तिः। एककस्तरणवचनादेवाज्यस्थालीध्रुवार्थे। कृतंव्याख्यानं। स्रुवाघारमाघार्य ६ मन्त्र आश्राव्य सीदहोतरित्येवब्रूयात्।

स्रुवाघारविधानेन यावदुक्तमेतदिति गम्यते। संमृष्टेऽग्नौ आश्राव्य सीद होतरित्येव ब्रूयात। अथाश्राव्य न होतारं प्रवृणीते सीद होतरित्येवाहेति वचनात् प्रस्त
तो निक्रमणमध्वमम्दे उवाचयति स आज्ञाति क्राममत्ययेन ब्रूहीति। प्रसवश्च। अत्र प्रयाजार्थौ प्रसवन वचनाद्भवति। उपविशति होता होतृषदन उप
विश्य प्रसौति प्रसूतोध्वर्युः स्रुचावादत्ते स आह अग्नीत् क्रामन्नमयेन ब्रूहीति। अर्धं ऊत्वा सोमाय विष्णवे समानीय। अग्नये अर्द्धं ऊत्वा सोमाया
र्द्धं च ततो विष्णवे समानीय। उपभृत्यपृष्ठहीनपरेः सर्वमेव गौहवं कृत्वा। समानीय सोमाय विष्णवे जुहोति। वचनसामर्थ्याच्च वैष्णवं समानयमाने
नानुवाचनं कर्त्तव्यं। अथ यदुपभृत्यां जुप्रभवति तत्समानयमान आह विष्णवे नु ब्रूहीति॥ ॥सादयित्वा स्रुचौ सोमाप्यायनाद्यास्तव स्रासणप्र
भात। आतिथ्या कर्म विशेष उच्यते। अत्रा प्रस्तरमुपसदं जुहोति स्रुवेण पानरत्वपः शय्यामन्वर्धे निगदव्याख्यातम्॥ ॥द्विरेकया चरति
हस्तायंस्ठपूर्वोह्ने च। एकदोपसदादि प्रचरति सायंशब्दो पराह्णवाची पूर्वाह्णशब्दः प्रसिद्ध एव॥ एवमितरे त्र्यहे ह्नः शयां हरिश
यें च। एवमेवेतरे द्वे उपसत्कर्मणी अन्वहं कर्त्तव्ये। रतः सर्यां हरिशयां च मंत्रपवा पलहिते। एकाहस्तु पसत्को द्वादसवा। एकाहे प्रक्रा
न्त एव पुनरेकाहग्रहणं द्वादशोपसत्कस्यानेकाहविषयप्रज्ञप्त्यर्थं। रहपठितं द्वादशोपसत्कं वा अनेन। अल्पाहीनमुपनीतं। तिस्र एका
हस्योपसदः कार्या द्वादशाहीनस्येति॥ ॥२॥ ॥त्रिस्तनं प्रथमायां दोहयति प्रथमायामुपसदि त्रिस्तनं व्रतं। एकोपचयेनोत्तरयोः। उत्तरयो
पुनरुपसदोरेकस्तनपचयेन व्रतं। विपर्यस्य वानग्निचित्ये। अनग्निचित्ये सोमे विपर्यासो वा भवति॥ साग्निके तूत्तरस्तना येवा एवमेव

हितत्र पठ्यते। तेत्रीस्तनानुपेयुः ते द्वौ एकमिति। एवं प्रवृद्धौ समं विभजेत्॥ उपसत्प्रवृद्धावेवमेव समो विभागः कर्त्तव्यः। समं स्यादश्रुतत्वादिति न्याया
त॥ ॥स्वस्थान विवृद्धिः। कर्त्तव्या। न दंडकलितवदावृत्त्या मंत्राणामानुपूर्व्ययोगात्। इतरथा हरिशयां कृत्वा यः शयां प्राप्नोति। तत्र मंत्राणामानुपू
र्व्यं युक्तं भवंति॥ ॥पसदान्तत्र पौर्णमासि॥ सा औपवसथ्यात्पूर्वेह्नि पौर्णमास्या प्रचर्य वेदिं मिमीते॥ औपवसथ्यमहः चतुर्दशी तस्याः पूर्वं त्रयोद
शी प्रचर्य वेदिं यजमानं वेदिशब्द अस्य संस्कारनिमित्तो तस्या दर्शनो पात्राणां प्रयाजकावेदिः। प्रणीतास्तु संप्रदायेन क्रियंते। युक्ता पुनः प्रणीतानां
मुत्पत्तिश्च संस्काराणि निर्वर्त्यंते च प्रतिपत्तिरिति॥ पूर्वार्धात्स्तंभात्पुरस्तात्त्रिषु प्रक्रमेषु शंकुं निसंतः। स्तंभमसंमितात् द्वारमध्यात् त्रिषु प्रक्रमेषु शं
कुं निखनेत। तस्मादयं पुरुष आत्मे संततार इति श्रुतेः। स्तंभग्रहणं द्वारमध्योपलक्षणार्थं। तथा च काण्वीया श्रुतिः सर्वैशालायाः पूर्वार्धात्
प्राक्प्रक्रमतीति। शंकोः प्रांतः पात्यसंस्ता संव्यवहारार्थाः शंकुनिखननाच्चोत्तरकालं वेद्युपकरणानामासादनं प्राङ्मणं तस्मात्पुरस्तात् त्रि
शति। तस्मात्पश्चिमात् शंकोः प्राक् षट्त्रिंशतं विक्रमान्प्रक्रम्य तत्र शंकुं निहंतीति। दक्षिणोत्तरौ च पंचदश पंचदश चशब्दात्तस्मादेवांतः
पात्यात्। अथ यदि त्रिंशत्क्रमा पश्चाद्भवतीति श्रुतत्वात्। पंचदशक्किमस्तुतं। अर्धसप्तदश स्युर्वा। अपि अपि त्रयस्त्रिंशत्स्युरिति वचनात्। पूर्वी
ङ्गो च वा द्वादश स्युर्द्वादश स्युः। शंकुं निहंति। चतुर्विंशति विक्रमा पुरस्ताद्भवतीति श्रुतेः। प्रक्रमाणां समाख्यायाध्यं चं परिमाणं तु पाठमानमपि स
ङ्गुणत्वाद्बाध्यते। प्रधानादि क्रिया परिमाणं ग्राम्यान्तरे इति। पृष्ठ्या मायम्य स्फ्यादिकरोति वेदिरेणकानां। पृष्ठ्या संवरदं इवे॥ मध्ये पूर्वापरायतमु

क.कं. ६

च्छायस्थानादानादिकर्म करोति । खादिरेणाक्ष्णेराच्छादनं तं । खादिरग्रहणं शम्यमवत्तुं परिभाषितत्वात् । उच्यते चात् त्विं मर्थं समानजातीयत्वशंका
निवृत्त्यर्थं श्रूयते हि तस्मात्खादिरो यूपो भवति खादिरः स्फ्य इति वै च्वादिषु यूपेषु स्फ्यस्यापि समानजातीयतेति । विशेषमाह उपरवदेशास्ते वपन्तु
हरंस्तु नेरासात्वेश्चरस्थ्यैव पदे चात्वालं करोति २ विशेषः । प्रक्रमद्वयपरिमाणं पदं । तस्मिन्नर्द्धे लिकेऽननं सामान्यश्चात्चात्वालं करोति । श्रूयते हि यात
एष एवोर्द्धः शंकुर्भवति तस्मात्स्यात् अन्नं तिनो त्रिक्रमं तच्चात्वालं परिलिखतीति । यथा कृत्वा । वाशब्दो विकल्पार्थः । यथोक्तमिति पूर्वेणाकल्पेन च
रंप रिहापाएवमपि श्रूयते नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत तावदेणात्करं तं वा चात्वालं परिलिखेदिति ॥ ॥ प्रातरुपस्थाने समस्य पूर्वाह्निस्था प्रच
र्योर्द्वितं प्रयच्छति । प्रातश्च उद्देशपामुपसत्समासः । तत्र पूर्वाह्निस्था प्रचर्योर्द्वितप्रदानं । सर्वे चाग्नेयाग्निके सर्वदा प्रपच्छतीति वीकल्पः । उभा
भ्यां चारिते प्रवर्ग्यमुत्सादयति यथोक्तं कुर्यात् चेत् । उभाभ्यामुपसमज्ञां प्रचरिते प्रवर्ग्योत्सादनं । यदि कृतः प्रवर्ग्यः ॥ ॥ अग्निं प्रणयत्यपनिवप
नान्तं त्वाह त्रिर्वीनेस्थापयति पश्चादुभयतो द्वारन्तरप्रशालिते प्राचीनमुभयतः शालामावन्तं वर्षीयो दक्षिणां । अग्निप्रणयनमुपयम
पनिवपनान्तं कृत्वा अनसी स्थापयति । पश्चादुभयतो द्वारन्तरे प्रशालिते प्राग्वंशे शालाया उभयत आनीय एक दक्षिणतान द्वितीयमुत्त
रेण । यद्वर्षीयस्तद्दक्षिणमिति श्रुतेः । वर्षीयोदक्षिणां । अग्निप्रणयनमुपयमन्तु च निवपनान्ते निरूढपशुबन्धोदितमिहापि भ[illegible]नातिदिह हृम०
समाम्नातं सदंगप्रधानार्थत्वादाह वनीयस्तत्संस्काराद्याग्निकामायस्य भवति । अत सद्विकारे निरूढ आदिष्टमाचार्येणाह पुनरा

त्रे १

दिश्यत इति ॥ ॥ तयोश्छदिरध्वस्य जातयोर्हविर्धानयोश्छदिरारोपयति ॥ ॥ मितिं वाऽभावे । छदिषोऽभावे मिती । यदि छदिर्न विंदेत् पृष्ठ्यश्छदिः
सम्मितामिति मिति श्रुतेः छदिश्चतुःस्रक्तिः पंचस्रक्तिश्च मितिः प्रसिद्धः ॥ ॥ अन्यत्रापि । छदिषोऽभावे मितिरेव भवति । स्राधा पुरस्तादासन्तत्यैषीकी ॥ ॥
तु विर्द्धानयोः पुरस्तात् । स्राध्यामिषीकामयीमवलगयति ॥ उच्छ्रायाभ्यापरिकार्यहूदिः पश्चसंवर्त्ता दार्तुरस्ताच्चारोपयति ॥ ॥ चतुर्गृहीते शालाद्वार्ये
जुहोति पुनस्त्विन्नमंत्रेण । शालाद्वार्योतः । अतः परं गार्हपत्यकार्यं मंत्रकर्तव्यं । तच्चेष्यतिष्टामसमाम्नानादचैव भवति । एवं सति उपान्पिनामपि
नाग्निहोत्रादिषु प्राजहितेनैव गार्हपत्येन संभिहोतेष्यति ष्टामेणामिति । अग्नीषोमीयविकारेषु निरूढादिषु तर्हि शालाद्वार्ये गार्हपत्यकार्यमकृत
तो दृष्टत्वात् नैतदेवं । न हि तदग्नीषोमीयार्यत्वयोच्यते । किं तर्हि प्रकरणे विधानात् प्रकरणेनोपसंगृह्यते । प्रकरणिनोपसंगृहीतत्वाच्छालाद्वार्ये गार्हप
त्यकार्यमगार्हपत्ये क्रियते । एवं च नेतद्यग्नीषोमीयार्थं । अतस्तद्विकारेषु प्रकरणापसंग्राहकानास्य गार्हपत्ये गार्हपत्यकार्यं स्यात् तेन गार्हपत्य एव
गार्हपत्यकार्यमिति । एवं च कृत्वाग्नीषोमीयोपयोगेऽपि सन्नित द्विकारेषु वेदिस्तद्रूपानभवति ॥ ॥ अपरं दक्षिणावर्त्मनि दक्षिणास्थानं साहिरण्यं निधा
[illegible] होतादे विष्णुरिति । अपरं आग्नेयं सस्कृत्य दक्षिणास्य हविर्धानस्य दक्षिणां यावर्त्तन्याहिरण्यं निधाय जुहोति दे विष्णुरित्यनेन मंत्रेण । आ
स्वाच[illegible] । अम्ह शालाद्वार्य एवसंस्कारः ॥ ॥ दक्षिणायाह्वारानीतापत्नीपालिभ्यो शेषं प्रतिम ह्यारूधुरापराभ्वक्रताविति युगपते देव [illegible]
दक्षिणाया द्वारानीतापत्नीपालिभ्यां चतुर्गृहीतशेषं गृहीत्वा हविर्धाने धुरोपरागुपानक्ति । नेन आमुतस्थ्र देवश्रुतावित्यनेन मंत्रेण । ततद्युगदं जनं द्वि

क.कं. ७

त्वामि वाचकः। नमंत्रस्य॥ ॥मेदेमं आवृत्तिः मा निपातितास्ताः। मेदेन वा जनं। न हि दक्षिणो नैके न पाणिना शक्यते तेषु गपात्कर्तुमिति। तस्माद्वः। मेदेस्वर्मं नाशनि सं
नि पानितः इति॥ ॥स्रुक्काष्ठ्यलेपो प्रतिप्रस्थाता नरस्यैरावतीति पूर्ववत्। प्रतिप्रस्थाता स्रुक्काष्ठ्यलेपं गृहीत्वा नरस्य हविर्धानस्य दक्षिणायां
वर्तन्योः हिरण्यं निधायाभिजुहोति रावतीत्यनेन मंत्रेण॥ ॥पत्नी चापरेणाग्नीध्रीयं त्येन नरस्यानक्ति पूर्ववत्। च शब्दादानीतीसती। पर्यायात्यतिपत्नी
म गो जयनेनाग्नी इति वचनात्॥ ॥हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुवाचयति। अनुवाचनं कारयति होतारं प्रैषेण॥ ॥त्रिरुक्तायामुद्धेवव
र्तनं। त्रिरुक्तायां प्रथमायामृचि अनसोरक्षे वर्तनं। सम्पु ऊहे व प्रवर्तयेयुर्यथा नो रवं जनतामिति वचनात्। प्राचीप्रेत मिति वाचयति। यग
मानं स्वर्गे वृमिति च खर्जनि। च शब्दाद्वाचयति॥ ॥पश्चाद् उत्तरवेदेस्त्रिषु प्रवृत्तेषु मन्त्रावानभ्यस्तो अमि मं त्रायते त्ररमे थामिति। अवयव
योः पादक्षेः मध्यावयवस्थयोरभिमंत्रणं॥ ॥उत्तरेणपरीक्रम्य दक्षिणमुपस्तम्भं निविमीन्नुकमिति। वै अथ नसो उत्तरेण परिक्रम्य दक्षिणस्य
पश्चात् स्थानं विमीन्नुकमित्यनेन मंत्रेण। दक्षिणास्थूणामूपनिहंति विष्णवे त्वेति॥ ॥उपनिहन्मीति च शेषः। दक्षिणानरिति च दक्षिणपूर्वकोण
स्थीयते॥ ॥दिवो वा विष्णवुत्तरं प्रतिप्रस्थाता। उपस्तम्भनानीत्यनुवर्तते॥ ॥उत्तरतः स्थूणां पूर्ववत्। अध्वर्युरेव निहंति। उत्तरतः इत्यनेन उत्तरपूर्वको
णाभिधीयते। ऋमेवा दक्षिणतः। उपनिहंत्येते। तथा च दक्षिणापरकोणो द्वितीयः॥ ॥उत्तरतः स्तम्भः उत्तरत इत्यनेनोत्तरकोणोभिधीयते। पडुचमा
नुष इति॥ ॥नेः। यज्ञमानुषव्यापारे स्थूणादित च करोति। प्रतिरूपाणि वाचयति मध्यमं छदिरालम्य। आलम्य इति करितत्वात् अथो वशाम मध्यमं

याम ७ २१४

छदिरालमस्वेति। उत्तरेचादेवाचने च शरक्रियते विष्णो रराटमसीति रराटं॥ आलम्य। विष्णोः श्नप्त्रे स्थः रस्थूणायै। आलम्य। उपाग्राणि छंदांसि
पश्चाद्ग्रेः। अथ यदि रवं आलक्ष्य दिर्भवतीति। अथ यतो न चोदगग्रे संभवति॥ ॥दूर्याः परिषीव्यति स्यूजनि प्रतिहन्तया रज्ज्वा विष्णोः स्यूरसीति स्यू
चागतयारद्वापीः परिषीव्यति विष्णोः स्यूरसीत्यनेन मंत्रेण॥ ॥विष्णोर्ध्रुवोऽसीति ग्रंथिं करोति उपरस्तान्ने प्रग्रंथिं चलितं ग्रंथिं। उत्तरपूर्वे द्वार्यापीपीषी
वाणसमाप्तिरिति संप्रदायः॥ ॥प्राग्वंशं हविर्धानं भवति। निषद्य वैष्णवमसीत्यालभते हविर्धानं॥ ॥मोजनमहतो चास्मिन्न कुर्युः। पुरुषाये
तपाप्राप्तयोर्निषेधः। अद्वारेण सहो हविर्धाने प्ररूमाणं यूपान्माप्रेरूथा इति। तच्चैतद्धविर्धाने निषद्यकाले सदसि तौ न शस्त्रकाले एव श्रूयते
तद्धाएत द्वषासाम यासाम चंसदस्यध्वेति प्रकृत्याहतस्माद्वारेण सदोपेरूमाणं यूपान्माप्रेरूथा इति। हविर्धाने पि। अथैते द्वषासोमाः योपाः आ
त्तो हविर्धाने ध्येतीति प्रकृत्यातस्माद्वारेण हविर्धाने प्ररूमाणं यूपान्माप्रेरूथार इति॥ ॥पश्चादुभयतो द्वार्यौ भवतः॥ ॥दक्षिणस्यानसोऽधः प्रउग
खनति॥ ॥४॥ ॥उपखान्। दक्षिणस्यानसः प्रउगस्याधस्तात् उपरवान् खनति॥ ॥अभ्यादिकरोत्यवटवदापरिलेखनात्। अभ्यादानादिक्षपा
वटवत्परिलेखनात्॥ ॥चतुर उपरवान्परिलिखति॥ ॥तौ अग्रापाव्यायारणवत् उत्तरापरं वा प्रथमं। अरत्नायेति चैवमर्थे नेवाच्यते॥
सम्पत्ता। अथ अपि समीचा एव परिलिखेदिति वचनात्॥ ॥उत्तरपूर्वं तत्पां सर्वपरेषु प्रादेशमात्रान्तरं दं नरात्। परिलिखित। इह नसोति पथा
परिलिखितं खनति पिनक्रमेण परिलेखनतः॥ ॥इदमहमित्युत्किरति यथाखातं प्रतिमंत्रं पांसून्॥ ॥उक्तं त्वां किरामीति पश्चात्सर्वेषां

कर्क उत्किरेत्स्रदक्षिणं॥ ॥ दारुमयान्यावन्नेन। अन्वाहार्यासंभिंद्यादशक्तौ सम्पत्। संभेदनं। अस्मिन्नहेरु पूर्वपार संभेदनमिति मे प्रदायः। नासिकासंस्तवा
८ त्। ह्यत्राडित्युवमर्शपतिय श्यावातं प्रतिमंत्रं। अवमर्शपतिकारितत्वाद्ध्येषणा। यजमानश्च स्वरादिति प्रतिमंत्रमवमर्शनं करोति। पथाखातं स्त्र
पोनु समग्राख्यया। अध्वर्युरवमर्शनमिच्छति। प्रतिप्रस्थाता वाध्येषणा इति॥ ॥ अध्वर्युयजमानौ संमृशेते पूर्वं दक्षिणोध्वर्युरपरोत्तरे यजमानः हस्तौ
प्रक्षिप्य वाययोः परस्परजः संमृशेते॥ ॥ अध्वर्युः पृच्छति यजमान किमत्रेति भद्रमित्याह तन्नौ सहेत्यध्वर्युरुपांश्च। आह। अयं च मंत्रश्चादितार्थ
मिधायी। अनेकयजमानके विपरिणाम्यते। उपांशुत्वं चवाग्गतं पदस्य एव वक्तव्यं नोपांशु पदस्य इति॥ ॥ पुनर्दक्षिणापरेध्वर्युः पूर्वोत्तरे यजमानो
यजमानः पृच्छत्यध्वर्यो किमत्रेति भद्रमिति प्रोक्ते तन्मरति यजमानः। आस अयमपि मंत्र आदितार्थोभिधायी। आरिवति चाध्याहारः प्रोक्ते
त्येनान्नदोदणाइति। अवपान्। भेदेन च प्राहप्णां संस्कार्यभेदात्। भेदमंत्रावृत्तिः सामिपातित्वात्। पक्षवचनं मंत्रे पूजार्थं॥ ॥ अवनयनावस
रणावावव्व इद्धो हस्तान्हो हणइति। प्रत्यावव्व दवनयनावस्तरणकार्यं। उपांसु विशेषा रक्षोहणा इत्यनेन मंत्रेण॥ ॥ तन्नस्तु परिऊशाञ्छुत्वा
धिषवणोफलके अंगुलंतरे प्रक्षालिते प्राचि अरत्निमात्रे संततोपदधाति पर्यूहति च रक्षोहणौ रक्षोहणो वितिः। तन्नान स्थूलानवदानामुप
रिऊशाञ्छुत्वाधिषवणफलके अंगुलंतराले प्रक्षालिते प्रागग्रे अरत्निमात्रे संततावौ अन्तःप्रत्येत्युपधाति रक्षोहणा इति। पर्यूहति च रक्षोहणा विति अने राम०
नमंत्रेण॥ ॥ तयोपर्युपरि चर्माधिषवणोपरि कृत्वं सर्वरोहितं निदधाति वैष्णवमसीति। तयोः फलकयोरुपरि चर्माधिषवणोपरि कृत्वं सर्वरोहितं निदधाति वैष्णवम ८

सीति। अनेन मंत्रेण॥ ॥ यतस्मिन्ग्रावाः पंचवैष्णवास्थेति। तस्मिन्चर्माधिषवणे ग्रावाः पंचवैष्णवास्थेत्यनेन मंत्रेण निदधाति॥ ॥ स्वरं पुरस्तात्करोत्युद्धतावो
क्षिते सिकतोपकीर्णे चतुरस्रे। निगदव्याख्यातं॥ ॥ अंतःपात्यात्षट्प्रक्रमान्प्राग्वा दक्षिणतः प्रक्रममहनं तत्रौदुंबरीमिनोति यजमानमात्रीमूर्ध्वपू
वक्षेते। अच्छ स्यपुरस्तात्। अभ्यादिकरोत्यावस्तयमात्। प्रसावटवार। उद्दिवंस्तभान श्रयति। अडंबरसि॥ ॥ घृतान्न इति मिनोति। अर्वप्रदि
पति। पर्यूहणाद्योपसेवनान्कृत्वा ध्रुवासीति चाच्य यत्पोदुंबरीमालभ्य प्रजया भूया इति पशुभिरिति वा। मंत्रगतो विकल्पः॥ ॥ स्रुवेणावि
शाविश्वैति यजेन द्यावापृथिवी इति भूमिप्राप्ते स्वाहाकरोति सर्वत्र मंत्रवत्सु गुह्नोत्युपदेशात्। स्वाहाकारेण वा वषट्कारेण वा देक्ष्या
हविःप्रदीपत इति॥ ॥ अनाम्नात प्रतिषेधाच्च। अनाम्नातेपि च स्वाहाकारप्रतिषेधं श्रुवन्न स्वाहाकार प्रदानतो दर्शपति। न स्वाहाकरोत्य
ऋतादेव देवानामरूपं इति। अमंचवस्तु पुरस्तौ त्योस्वाहाकारो विहित एव। मंत्र विषयोपमारंभः॥ ॥ नाभिदघ्नं सदः। तच्चोर्ध्वप्रमाणो
इत्यर्था। उच्छ्रिताद्युपसर्पति पञ्चनार आसंवरत्येन दन्पयानोपपद्यते। मत्वा वा। प्रमाणं भवति। एवमपि श्रूयत एव। तदस्य वंशाः पृष्ठवंशे
नः॥ ॥ अष्टादशारत्न्येकविंशतिश्चतुर्विंशतिर्वा आयामो भवति। आयामश्चोदर्ध्यमुच्यते॥ ॥ नवतिर्यक् अर्धो यामो वा। दैर्घ्यस्य॥ ॥ अ
दुंबरीमध्ये पृष्ठ्यामेवे। तन्मध्य अदुंबरीमिनोतीति अदुंबरीमध्यहन्तुनं। पृष्ठ्यामेवे। एतन्तुतः हविर्धानस्य पृष्ठ्यामुभयतो कार्यस्तु तमः
तस्मादयं पुरुषश्चोतं मंत्रस्य इति वचनात्। एप्सदोपि तथैव भवति। दगायमस्य मध्ये पृष्ठ्या। प्रागायामस्य च अदुंबरी तुभयानुग्रहात्॥ ॥ इंद्रस्य

कर्क
९

छदिरिति मध्यमं छदिः तारोप्याऽपरपूर्वे च । छदिषि आरोपयति । चशब्दो मंत्रानुकर्षणार्थः ॥ ॥ त्रिवर्गैश्चोत्तरतः ॥ उत्तरतस्त्रीणि परतस्त्रीणीति वचनात् ।
परि त्वेति परिवार्य परिषीवणग्रंथ्यभिमर्शनान्यैन्द्रैः । परि त्वेत्यनेन मंत्रेण परिवारणं कृत्वा परिषीवणग्रंथिकरणाभिमर्शनानि हविर्द्धानवदैन्द्रै
मंत्रैः कर्तव्यानि ॥ ॥ हविर्द्धानापरान्तमुत्तरेणाग्नीध्रम् अगारद्वारमंतर्वेद्यर्द्धं भूयः सर्वं वा । करोति । अथ हविर्द्धानयोर्जघनार्द्धे समन्वीक्षेतिप्र
कृत्यैवमेव श्रुतत्वात् ॥ ॥ निष्ठाप्य वैश्वदेवमसीत्यालभते । आग्नीध्रं ॥ ॥ धिष्ण्यान्निवपत्युद्धतावोक्षितेषु पुरीषं निवपति स्फ्येनान्वारब्ध उद्ग-
प विशप विश्रूर सीति प्रतिमंत्रं । धिष्ण्यान् करोत्युद्धतावोक्षितेष्वित्युक्ते न च परिसमूहनादयं सर्व एव गृह्यते तस्मान्नोऽत्र अथ्यर्थो हि गृहेभिहिताः
सदपचारे चस्मान्नैप्रायश्चित्तं । वेदेष्विते नूयते । कृते वा अवोक्षिते ग्रिमा दृश्यानीति । पुरीषं निवपति स्फ्येनान्वारब्ध उद्गुप विशप विश्रूर
सीति प्रतिमंत्रं ॥ ॥ आग्नीध्रीये पूर्वं । आग्नीध्रीयं च धिष्ण्यं पूर्वं निकृत्ता औपरिदायंते ॥ ॥ रौद्रेणेति सर्वत्र । अनुषंगः । षट् सदसि नि
वपति । प्रत्यङ्मुखो द्वारमपरेण होतुः । धिष्ण्यं निवपति ॥ ॥ दक्षिणापूर्वेणौदुंबरीं मैत्रावरुणस्य । धिष्ण्यं निवपति ॥ ॥ होतृधिष्ण्यमुत्तरेण
चतुरः समांतरान्ब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकानां ॥ धिष्ण्यान्निवपति ॥ ॥ आग्नीध्राद्दक्षिणां संप्रति वेद्यंते दक्षिणांसुखो मार्जाली
यं ॥ संप्रति शब्द आर्जवे ॥ ॥ सदोद्वारं पूर्वेणातिष्ठन्नुदिशत्याहवनीयवहिष्पवमानदेशचात्वालशामित्रौदुंबरीब्रह्मसनधाला राम॰
द्वार्यप्राजहितान् सम्राडसीति प्रतिमंत्रं । अनुदेशः संदर्शनमात्रं । रौद्रेणेति च सर्वत्रानुषंगः । अयं च शाखांतरादेकवचनीतः ख ९

त्राखोयां हि वरुणस्यवचनांतः पद्यते नस्यापरीष्टाद्विनियोग इति वक्ष्यामः ॥ ॥ उत्करं समुद्रोसि विश्ववेदा अनातिरिक्तस्य प्रतिष्ठेति । अत्रापि रौद्रेणेत्य
नुषंग एव शाखांतरात् ॥ ॥ परिस्तरणपात्रसमादनप्रोक्षण्याज्यनिर्वपणानि कृत्वोत्तरपरिग्रहादि करोति स्तरणापुद्धारनमाहननमुद्धासार्थमि
ति केचित् । तत्प्रतिषेधशासनाभावात् । एककर्तृकनियमार्थमित्यपरे । तदपि नैवं नियमशासनाभावात् । अतो गुणार्थमुद्धारनमाज्य
निर्वपणं नेमहावेदरुत्तरपरिग्रहादि करोत्येवमर्थमुत्तरपरिग्रहादिशब्दे न च स्वननादि दृष्टव्यं । समग्रहणं तस्याभिनिर्वर्तनत्वात् । किं चाग्नी
षोमीयस्य द्व्यदेवतासंबंधो नैवाभिहितः । येन दरि[illegible]य अग्नीषोमीयार्थसन्निपते । सकृत्स्यहेतोः । शाखांतरे हि अवांतरदीक्षाविमोकात्र कालेग्नी
षोमीयस्य विधानं यथाब्राह्मणं चाचार्य उपनिबध्नाति । तत्र चाचार्येणाक्रम अग्नीषोमीयोतः पशुरित्यतोत्र परिस्तरणाद्यभिधानं वचनात् । सव
नीयेष्ववकाशावाचनांतेन द्विधानमाग्रयमग्निष्टम् आलभेते । तत्रैव सूत्रकारेणापरिक्ष्य ध्रुवगोपं कृत्वा परिव्ययणादि करोतीति संमृष्टि
णाकारं वा परत्र परिस्तरणमभिधानं कृतमाचार्येण । इदं शेषवहितं शैलीयथा ब्राह्मणमुपनिबध्नाति ॥ ॥ अंतःपात्यमहितं । अत्र मार्जनं कर्म
भवति । एवं हि श्रूयते । य एवं वेदे मेनयार्द्धं शंकुसोन्यप्रतियोतानि । बर्हिरंतं प्रेष्यति तत्र सर्वमासादयति । यथा प्रेषितं सर्वं ग्रहणात् । स्मार्तं च स्वकाले
अत्रैव प्रोक्षणं । रथ्ये वेदिर्बर्हिषां । उपरिष्टाद्रशां प्रोक्षणमभिहितं चोदकपरिप्राप्त्याऽदमन्यत् पूर्वं । एवं वसत्यग्नीषोमीये द्विः प्राहितमधो
भवति ॥ ॥ उक्तं निधायाग्नीषोमीयायपवेदे स्तरणमग्रहणं प्रस्तरस्यापराह्णे पदार्थतया मीषोमीयार्थामिधं स्थापयित्वा वेदेस्तरणमपराह्णे । सायाह्ने ।

कु॰र्क॰ सोपराह्णे वेदीसीर्द्वेति वचनात् । तत्र चाग्रहणं प्रसक्तस्य ॥ ॥ अर्द्धवृते प्रत्ते प्रविश्य प्रणयनायाधानं प्रविशेपेति निष्क्रमणं लक्ष्यते । तच्च कार्यार्थं
१० कार्यं चोपरिष्टाद्दृश्यते । परिवाप्यायै दोहनमिति । परिवाप्या इति च गवामपाकृतावस्थोच्यते । अतः शालाद्वारेणार्थं निःक्रमणं प्रवेशनेन
लक्ष्यते । शालां प्रविश्य प्रणयनाय स्येध्मस्य शालाद्वार्ये आधानं ॥ ॥ आज्याधिश्रयणस्रुक्संमार्ज्जनोद्वासनावेक्षणानि कृत्वा शालाद्वा
र्य्युद्धरणास्ते यजमान उपस्थे सोमं कृत्वा । अत्र विशेषः । आज्याधिश्रयणपर्यग्निकरणे कृत्वा । स्रुक्संमार्ज्जनाद्यर्थः खिड्प्रैषः । ततः स्फ्या
द्युपहरणं प्रैषान्तरकाले दृष्टत्वात् । पात्न्यारवनेजनं तु सोम ध्यात्पूर्वमेव क्रियते । आज्यावेक्षणं च पत्नीकर्तृकमत्र । इतरदुपरि
ष्टाद्भविष्यति । शालाद्वार्यमपि रेण सोमक्रयणीपदं परिक्रयणीपदं परिकरोति । मन्त्रस्त्वाल्यामो प्रा ॥ ॥ चतुर्द्धैक आहवनीयस्योपयम
नीष्वाग्नीध्रीयस्यारोपणे च । एके चतुर्द्धा पदप्रक्षेपं कुर्वन्ति । आहवनीयस्योपयमनीषु तथाग्नीध्रीयस्यारोपणेने च । वशब्दादिहव
एकरति ग्रहणं विकल्पार्थं । आज्यप्रोक्षणीरन्तः पात्यदेश उत्पूय ध्रुवाज्यग्रहणं । आज्यस्य प्रोक्षणीनां चान्तः पात्यदेशे उत्पवनं कृत्वाप
ध्रुवाज्यग्रहणं विकल्पेनोपयोगरतु कृत्वात्पश्चाज्यग्रहणमित्युक्तं ॥ ॥ धारयंत्याज्यानि नयनाय ॥ ॥ अपिवृता आन्वारभंते यजमानं । अपिवृ
ता गोत्रजा आन्वारभंते यजमानं ॥ ॥ वाससा कादपायेन्नान् । सयजमानान् ॥ ॥ चरत्सुनाड्यियेत । चरत्सपिवृतेष्वनारदः । नत शूद्रापच्छि राम॰
न्नं न भवति ॥ ६ ॥ प्रदीप्रमिध्मं त्वं सोमेति प्रचरण्यामि जुहोति । प्रदीप्रं प्रणयनीयमिध्मं त्वं सोमेत्यनेन मंत्रेण प्रचरण्यामि जुहोति ॥ ॥ १०

जुषाणो अप्तुरिति द्वितीयां आहुतिं जुहोति । अथ ये प्रक्रियमाणायानुवाचयति सोमाय प्रणीयमानायेति वा । वाशब्दो विकल्पार्थः ॥ ॥
आहवनीयं गच्छन्त्यादाय ग्रावद्रोणकलशसोमपात्राणि धिष्ण्यं चतुष्टयं च सम्भृत्य वपाश्रपण्यौ रशने शकलं वृषारण्यौ च । ग्रावादीन्या
दायाहवनीयं प्रतिगच्छन्ति । द्रोणकलशस्य स्वशब्दाभिधानात् । सोमपात्रशब्देन ग्रहपात्राणि गृह्यन्ते । नवमसादानि । इध्माग्नीषोमीयार्थ
। चतुष्टयं चा वपाश्रपण्यौ रशने च । शकलं वृषारण्यौ च मंथनार्थानि । यद्यपि चात्र मंथनं वैकल्पिकं तथापि सवनीयार्थं नयनमि
ति ॥ ॥ अक्षेनयेतिवा चयति उत्तरेणासदोहत्वा ग्रावद्रोणौ निदधाति यावद्रोणकलशसोमपात्राणि । तान्निचहो[illegible]न्तरकालासनि
हिते जुहोतीत्यभिधायतदेव निदधाति ग्रावरहितेनमिति ॥ ॥ अयन्नो अग्निरिति जुहोत्यस्मिन्न । आहवनीये मास्मदित्यस्मिन्नित्युच्यते ॥ ॥ उत्तरेण परिक्र
म्याहवनीयस्योत्तरतो निदधात्यन्यदाज्यसोमवर्ज्यं ॥ आग्नीध्रीयमुत्तरेण परिक्रम्य आज्यसोमवर्जमाहवनीयस्योत्तरतो निदधाति ॥ ॥ धिष्ण्या व्य
वाया ध्वर्यौ अध्वर्युग्रहणादन्येषामनियमः । तस्मादध्वर्युः समस्ता धिष्ण्यान्तातायासिनी श्रुतत्वात् ॥ ॥ इध्मप्रोक्षणादि करोति । वैकृतो वसरप्रोक्ष
तानुवृत्त्यर्थमिदमुक्तं । वेरोत्तरार्द्धे एक व स्तरणं पश्चादुत्तरवेदेरिति विकल्पः शास्त्रस्य तुल्यत्वात् । आहवनीये इध्मं क्रत्वा । विभवितिजुहो
ति । आहवनीयेध्मादिति क्रुतएतौ । अत्रहि परिधिपरिधानपदार्थः परिसमाप्त इति ॥ ॥ पुरस्तात्सामिधावायेति श्रुतेः । पुरस्तादग्निं जुहोति
नाहवनीयेध्मान्तेऽस्याधायसमिधावथजुहोतीति श्रुतत्वात् । अयं च मंत्रः आदितार्थाभिधायि । इध्मामिहोमार्थोऽस्य संस्कारएवेह वेमेती

२२५

कर्क॰
११

त्याग्नीध्रीये च वैसर्जनहोमाः [illegible]चारतस्मात् सर्वाणि चेतः निवैसर्गं जानीति॥ ॥आसादयाम्यानि दक्षिणेन सिच्य स्थाजिनमासादयेत तस्मिन्नेवोभं निदधाति
देवस्य वितरीति। आज्यासादनं प्राकृतमेवात एवास्थानमत्र कोपस्पर्शनं कृत्वेति॥ एवं हि श्रूयते। आसाद्य हवींषि सोमस्य शपा पउपृश्य
राजानमद्दाप्य प्रतिपद्यत इति। आचार्येण चात्राज्यासादनमात्रमेवोक्तं स्यन्दादेशमान्मूर्ध्नी द्रोणं मादित्यं स्पृतश्च वेत्यभिप्रायः। एवं च
तियत्र प्राकृतं वैकृतोत्यवादेशात् न प्राकृतमेवपूर्वं कर्तव्यमिति। यथा साध्य हवींष्यभिमृश्यत्यासाध्य हवींषि समृशतीति। मंत्रश्चादि
तार्थाभिधायीन्य ग्राधे विपरिणाम्यते॥ ॥एतत्त्वमिति विसृज्योपतिष्ठते। विसर्गोपदेशात् पूर्वं तत्र भक्षारंभः सोमस्यातस्य यजमानत्वात्
यजमानस्योपस्थान इति। मंत्रश्चादितार्थाभिधायी। स्वाहेति रिति निष्क्रम्याग्नेव तयाद्यत्यालवनीये समिधमाधाय मदंतीरुपस्पृश्या
गुल्नाविसृजते। अत्र च यजमानस्य कर्तृत्वं। अंगुल्ना विसर्गोपदेशात्। स्पन्दादेशमात्मण्यां ज्ञानतथा च मंत्रलिंगं स्वाहा निर्वरुणस्य पाशा
न्मुच्यत इति। अनंतरादीक्षोन्मोचनाख्यानेकयजमानके प्रतियजमानं भवति॥ ॥पत्नी च गार्हपत्ये तद्वाभी मदंतीरुपस्पृश्य गार्हपत्ये समि
धमाधाय स्वमदंतीरुपस्पृश्यांगुल्नी विसृजते॥ ॥चात्वालमदंतीः कृत्वा प्रतिपत्तिश्चरितार्थत्वात्॥ ॥नायहणमोजने आस्यात् कुर्वंति
वकृवचनोपदेशात् पुरुषमात्रधर्मः। तस्मादस्या नाश्नातिमानुषा हि भवति। तस्मादस्यान्नमनाम गृह्णातीति वचनात् पूर्वं प्रतिषेधो गम्यते। वि
हितश्चासौ तस्माद्दीक्षितस्य नाश्नीयादिति। अतश्च सोमांत्रूरवव्यतिक्रमे प्रायश्चित्तं॥ ॥व्रत्यनिवृत्तिः। अतः परं पयोव्रतं निवर्तते॥ ॥हवि

राम॰
११
२२८

शेषभक्षः। यदुहस्यतितद्धविःशेषं तच्च प्रातः। येनाद्यनिषेधस्तस्मादुपवसथेनाश्नीयादिति। प्रातःसोमान्न हविःशेषाश्च भक्षयतीति श्रुतेः। सचायं
सवनीयशेषः। न हविर्मात्रस्य। सवनीयान्हि प्रकृत्य श्रूयते। अथयज्ञानां पुरोडाशानां यो ह विरुच्छिष्टमसत् समाप्य इति। वरूयजमानकेना
नापुरोडाशान्विधायोच्यते। यो ह विरुच्छिष्टमसत् कथं नाम तच्च समाप्तिर्भविष्यति। अतः सवनीयशेषायमिति गम्यते। सूत्रकारप्रस्थाना
च्चोपत्यग्निसवनीयपुरोडाशान्यो ह विरुच्छिष्टमसत् समाप्य इति॥ ॥अग्नीषोमीयातः पशुः। किमर्थमिदमुच्यते। अस्मिन्नेव सवषोप
शादेवतासंबंधश्रुतावभिहितः। यथाश्रुति च सूत्रकारः सूत्रमारभते। परिस्तरणादयो हि पदार्थाः। सोपमिवेकेयंति षक्ताः पशवतेनात
थैवोपनिबद्धा। उपांशुचरंति प्रागग्नीषोमीयादित्येवमर्थमेवोच्यते। अग्नीषोमीयात् पशुरिति सायं कृत्ये च श्रूयते। पुरोडाशो वा
ग्नीषोमीयस्थान इति। सोऽत्र यथा स्यादिति॥ ॥तद्देवत्यः पशुपुरोडाशः। यद्देवत्यः पशुर्भवति तद्देवत्यं पुरोडाशमनुनिर्वपतीति श्रुतेः
अतश्च पश्वंतरेपि तद्देवत्यो भवति नाग्नीषोमीय इति॥ ॥अन्यादि करोति। आज्यासादनांतं तस्याभिनिर्वृत्तत्वात्। अग्न्यादेरेवावसर इति
॥ ॥दक्षिणेन हविर्धानं पत्नीं उपहरति। सुदसि होता पविष्टः तत्प्रति नियमो नायाः प्राग्दक्षिणेन स्यात्यनुग्रह इति॥ ॥गुदत्तीपंचादक्षिणेने
वामाञ्जीली पर्दक्षिणेन नायनी। पत्नीशालां प्रसेनीयो। तत्र धिष्ण्या व्यवायो मा भूदिति॥ ॥प्रत्याहृत्य वा सोमाहवनीयपोर्व्यवायात् पत्नी
हृत्यश्रुत्यपाहवनीयावंतरेणैतानि नीयंते। उक्त एतः सोमाहवनीयपोर्व्यवायाद्दक्षिणेन वा प्रत्याहृत्य वेति। दक्षिणेन हरणात् तस्य तु ग्रह

कर्क· इतरस्मिन्नेवोपचारनियमः । अनुग्रहः । तस्मात्तत्राहृतमेवेत्यवधार्यते ॥ ॥ यूपैकादशिनी चेद्रथाक्षमात्राण्यंतराणि । वेद्यन्ते य यथार्थः । यदि यूपैका
११ दशिनी वक्ष्यमाणं सौम्यायनं वेति उभयं विकल्पेन आपतत इति तत्र रथाक्षमात्राणि यूपांतरालानि ॥ ॥ पूर्वार्द्धं वा समं विभज्य । पूर्वार्द्धं सम विभा
गेन वा ॥ ॥ परुःसंमितावा वा । यथोक्तं वा ॥ ॥ यूपाहुत्य आयतनं पवाद पूनानि सकृत् । भवति असन्निपातात् ॥ ॥ भेदेनान्य साक्षिणीति वा त्
स्थमं परिलिख्योत्तरं दक्षिणं वा व्यत्यासमितरान् । मध्यमं यूपावटं परिलिख्य तदनन्तरमुत्तरं दक्षिणं वा परिलिखति । इतरांश्च व्यत्यासेन ॥ ॥
आवटहोमात्करोति । पदार्थानुसमयेन । अह्ना यां च चषालेरूणां कृत्वैकैकस्याः । आ ३ समयेन । पदार्थानुसमये प्राप्ते वाचनिकः काण्डानुस
मयः ॥ ॥ श्वावाद दक्षिणोत्तराणामवगूहनं तमालं मनासंभवात् । श्वावाद दक्षिणोत्तराणामवगूहनांतं कर्म करोति । उत एव न तत् । आलंभवात् ।
नमु यपयश्वालं मः संभवति । अथवा आलंमनासंभवादिति । न ह्य यनि यमाणो चषालेरूणां तेयूपाल मः संभवति । उक्तं चैतदिदं वै यूप
मुच्छ्रित्याध्वर्युरापरिव्ययणानान्वजतीति । अयं च वाकैकदेशोपन्यासः । तस्मादुपान्तरे वो कुपेदित्यस्य शेषभूतः । न्याये हि सत्येतस्मि
न्वाचनिकी चषालेरूणां तत्रैव भवति । वचनं हि तत्र । अपरिवीतावा एतं तन्निवसंतीति । अतश्च षालेरूणां तत्ता वाचनिकः । तस्मादुपान
रे वो कुपेदित्येतदपि वचनं । अतो विकल्प एवायं । अथवा चषालेरूणां ताः परुःयूपाः श्वावगूहनांतं तेति । यच्चालं मनासंभवादि राम·
ति सोर्थवादा वाकैकदेशोपन्यासोऽनन्यायरति । इयांस्तु विशेषः ॥ ॥ परिवीय मध्यममवगूहनांतं । पार्श्वयूपानामञ्जनप्रभृत्यवगू ११

हनांतं करोति सौत्येऽहनि ॥ ॥ अग्निष्ठे वैकारशनाः परिवेष्य वासयति । भवाः पशेषयूपार्थरशनासंस्कारः नाभिष्ठायः । एवं हि श्रूयते । अग्निष्ठ
देवे रशने आदधेतरान्परिव्ययतीति । तेनैतानग्निष्ठान्करोतीति । एवं च सत्यश्वमेधे वसत्यर्थाम भवेपि अग्निष्ठे रशनाः [illegible] परिव्ययणांक
कर्त्तव्यमिति ॥ ॥ अभ्यंजनप्रभृति करोति । उत्कार्थ ॥ ॥ यथाखातमुच्छ्रयति ॥ येन क्रमेण खातं खननं तेनैव यूपोच्छ्रयणमिति प्रकल्पः ॥ ॥
वर्षिष्ठो दक्षिणानुपूर्व्य इतरे । स यो वर्षिष्ठः स दक्षिणार्द्धः स्यादथ ह्रसीयान् ह्रसीयानिति । अतत्वात् । ह्रसीयता चारत्निवशेनैव कर्त्तव्या
नानियमेन तेषां ह्रस्व अवरोपचारत्निं परिवासयेदित्यवमादि । एवं च कृत्वा पंचारत्निः पंचदशपर्यंतः सौमस्त्यस्य यूपस्य एकादशिन्या
मप्रसंग एव । अपरिमितपक्ष एव भवति । तथा चोत्यः षोडशारत्निरन्तो भवति ॥ ॥ नीव्रसुत्यमिष्टः प्राचीवानीव्रसुत्ये अग्निष्ठ एव वर्षिष्ठः प्राचीव
यूपपंक्ति भवति ॥ ॥ यथायूपं वेदिवर्द्धनं रथाक्षमात्रांतरालाय रूं ॥ ॥ वर्षिष्ठाद्दक्षिणो विनष्टे द्वादशान्निदधात्येपवनरति ॥ द्वादश उपशया
भवति वितष्टं तं दक्षिणतउप निदधातीति श्रूते । द्वादश यहणाच्च यूप एवायं तथा च श्रूयते । उपशयो यूपो भवतीति द्वादश इति च श्रवणात् ॥
यूपैकादशिन्यामेव भवति । न पंचपश्वाराविति ॥ ॥ प्रोक्षणाद्यावगूहनांतं करोत्यनर्थलुप्तं । निखनना भावादवट संवेधानर्थः । सत्रन्तु पते के
चिद्यूपधर्मान्न तत्र नेच्छंति । कार्यप्रयुक्तत्वानेषां । यूपस्य कार्यं पशुनियोगः । स चेह नास्ति जस्मादप्रवृत्तिर्द्धर्माणां । किंच उपशयो यूपो भवती
ति वचनं । मा नापदेशात् । तस्मादप्रवृत्तिर्द्धर्माणामित्यपरे चान्ति । स्यादेतदेवं यदि कार्यप्रयुक्ताः प्रोक्षणाद्यायामं वयुः । तत्वेन कार्यप्रयुक्ताः किं तर्हि स्व

रूपप्रयुक्ताः। नहि निष्पन्ने यूपस्वरूपे एते विधीयंते। यूपं छिनत्ति यूपं प्रोक्षति यूपमनक्ति। यूपं परिव्ययतीति। नच सिद्ध एव यूपोस्ति यत्रैते धर्माः क्रियेर
न्। तस्मादङ्गिरेव यूपो भाव्यत इति। यथौदनं पचति सक्तून्पिनष्टीति च यथा केनौदनमभिनिर्वर्त्तयति पिषेण च सक्तून्यत्र पुनः स्वरूपनिष्पत्त्युत्तर
कालं धर्मविधानं। यथाहवनीयस्य स्तःपरिषिपरिधानं समार्गश्चेति। तत्र कार्यप्रयुक्ततायुक्ता।। न चेह तथा तस्मादप्प कार्यप्रयुक्तता धर्माणां। य
दुक्तं वर्त्तमानापदेशान्न विधानमित्यत्र ब्रूमः। भवति वर्त्तमानापदेशस्यापि पंचमलकारकल्पनया विधायकत्वं यथाग्नेयोष्टाकपालो भवत्यैंद्रए
कादशकपालो भवतीति। अत उपशयेपि धर्माणां प्रवृत्तिर्युक्ता रूपे चेति न दुरुक्तं। अन्तु छत्पचोनरं। अस्य क्रिया।। ।। यथोक्तं सवनीयानालभं
त एकादशिनोपाकृत्याग्नेयसारस्वतसौम्यपौष्णबार्हस्पत्यवैश्वदेवैंद्रमारुतैंद्राग्नसावित्रवारुणान्। उदक्संस्थानामालभेदिति यथोक्तग्रहणं। वि
भवाग्वैकादशिनेयुक्तं।। एकादशयूपपक्षे वादशिन्यामाग्नेयं नियुज्य तस्मिन्नस्मिन्नितरानुदीचः। एकयूपपक्षे यदा पश्वैकादशिनी भवति तत्राग्नेयं
नियुज्य तस्मिन्नपशावितरानुदीचो रशनानि युनक्ति।। ।।आग्नेयः प्रथमागच्छत्यन्वारब्धो नु पूर्वा इतरे।। सोमायनेतु युगपक्रमनं।। ।।दक्षि
णं च निघ्नंत्येन मुरमुत्तरमितरान्। दक्षिणमाग्नेयं निघ्नंति उत्तरमितरान्पशून्।। ।।समानमुपप्रेष्यपरिपशव्ये संज्ञपयान्वगन्प्राक्कण्ड
न्मुक्तासि शामित्रो तर्हीन प्रच्छेद लोकसंप्रेषः शमित्रनुशासनसंवादवनस्पतीस्विष्टकृद्दिगादिग्व्याघारणं समासिच्य प्रभूत्वात्। प्रभवं
ति स्रोतानि सकृत्कृतानि स्विष्टकृदोः तु स्पृत्तु न द्रव्यभेदे गुणयोगादिश्यनेनैव प्राप्तेसत्यां महणार्थो यमारंभः युगपद्दैवतसमनंतरमेव सौविष्ट

कृतानामैन्द्राणां च ग्रहणमास्यदिति।। ।।उखा शूलं वपाश्रपण्यौ च। विभवात्तंत्रेणाभिसंबंधं नरतिप्राप्तुरदमाह।। ।।नवसासंदेहात्। नैतानि तंत्रेणाभ
वंति। कुतः एतत्। वसासंदेहात्। संदिग्धा हि वसा उखैकत्वे पृथक्त्वे चाग्नीषोमीये स्ववसा उक्ता। इहापि स्ववसैव होतव्या। सा च संसृष्टरूपत्वान्न ता
यत इति तस्मादुखाभेदः। तद्भेदाच्च शूलवपाश्रपण्योरपि। सौत्रामण्यां दर्शनाच्च। अपि च सौत्रामण्यां शूलभेदो दृश्यते। शूलो श्वमासरेणाचा
वमथमभ्यवपंतीत्येवं प्राप्त उच्यते। नाविरोधात्। नैतदेवं। नैतानि तंत्रभावे विरुध्यंते। शक्नोति ह्युखा सर्वपशूनं श्रपणं कर्तुं। तथा शूलं व
पाश्रपण्यौ च। यच्चोक्तं वसासंदेहादित्यत्र ब्रूमः। न हि प्रकृतावयमार्थः। स्ववसा होतव्येति। वसां जुहोतीति हि श्रूयते। न चेहापि न विरुध्यते। य
च्चोक्तं सौत्रामण्यां भेदो दृश्यत इत्यत्र ब्रूमः।। ।।पाकवैषम्यात् सौत्रामण्यां उखाभेदः। विषमो हि तत्र पाकः। पशूनां जातिभेदात्।। ।।मनोता वसा
होमौ पृथक्भवतः।। ।।कालभेदात्। यूपैकादशिन्या वशावपामार्जनांतं कृत्वा शालाद्वार्यं पत्नीयूपोच्छ्रयणमात्राभिमात्रस्यः वशावपा
मार्जनांत ग्रहणोपि सति गर्भसद्भावे विरोधान्निरूहणांत एव कर्तव्यः। शालाद्वार्यं इत्युक्तत्वाच्छालाद्वार्यं आहवनीयः पत्नीयूप इति संज्ञा
सूचनामिमात्रो भवति।। ।।परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणानि कृत्वा स्यमादिकरोति। किमर्थमिदमुच्यते। पशौ हिस्व
स्वरूपाः पदार्थाः कृताः पूर्वं स्याद्यादि। ततः परिस्तरणादीति इह पुनर्विहितत्वादग्नीनां पौर्णमासिक एव क्रमो न स्याद्यानादि।। ८ ।। त्वाष्ट्राव
स्तः पर्यग्निकृतमुत्सृजंति। त्वष्टृदैवतस्त्वाष्ट्रः पशुः वसः पूतिगंधः पशुः त्वाष्ट्रं पात्नीवतमालभेतेति विधीयोच्यते। तत्पर्यग्निकृतं पात्नीवतमुत्सृजंतीति

कर्क. १४ तत्रैतत्संदिह्यते। किं द्वयोः सर्गोपयुक्तकर्मोत्सर्गः स्तदंततांगरीति विधानं। किं तावत्प्राप्तं द्वयोः सर्ग इति। कुत एतत्॥ ॥आज्येन संस्थापयतीति श्रुतेः। आज्ये
न हि संस्थापनं श्रूयते उत्सृष्टे द्व्ये द्वयोरन्तरेणापरिसमापनं विधीयते। अपि च संस्थापनं प्रक्रान्तस्य भवति। प्रक्रान्तश्च त्वाष्ट्र इति॥ ॥पशुपर्यग्नि
करणाच्च। अपि च पशोः पर्यग्निकरणात्। अनन्तरं पर्यग्निकृतस्य चोत्सर्ग उच्यते। तत्पर्यग्नीकृतं पात्नीवतमुत्सृजन्तीति। तस्मादपि द्वयोः सर्गः॥ ॥
तदंतं वा कर्मनामधेयात्। वाशब्दः पक्षव्यावृत्तौ। तदंतं वा कर्म भवति। कुत एतत्। कर्मनामधेयात्। पात्नीवतमिति कर्मणो नामधेयं। तस्य
चानन्तर्यादुत्सर्गसंबंधः व्यवधानात् न पर्यग्निकृतेनेति। तस्मात्पात्नीवतस्योत्सर्गो न द्वयस्य॥ यत्त्वाज्येन संस्थापयन्तीति श्रूयते। तदनेनाख्यातेन
द्वितीयं कर्म प्रकृतत्वात्त्वाष्ट्रानुवृत्त्या सहोपांशुप्रक्रममाज्यसाधनकं विधीयत इति। यच्च पशुपर्यग्निकरणादित्युक्तं। पर्यग्निकृतमुत्सृजन्ती
ति तत्कालार्थं पर्यग्निकरणं न कर्मोत्सृष्टव्यमिति॥ ॥त्वष्टृवनस्पती चाश्च प्रयाजेष्विष्ट्यादर्शनात्। अपि च त्वष्टृवनस्पती प्रयाजेष्विष्टौ दर्शय
ति। यत्त्वष्टारं च वनस्पतिं चावाहयति स्विष्टकृतो यजसीति प्रश्नपूर्वकमाह। त्वाष्ट्री नवमी प्रयाज्या वानस्पत्या दशमी तत्रैनौ करोति। एतत्क
र्मोत्सर्ग एवोपपद्यते। द्वयोः सर्गे हि द्वयोरन्तरेण त्वष्टृवनस्पती अभीज्येते एवेति। तस्मादपि तदंतं गरीविधानमिति। समाप्ते प्रतिषेधश्च भ
वति। तत्र संस्थापयेत्पर्यग्निकृतमेवोत्सृजेदिति। तत्र च कर्मोत्सर्ग एवोपपद्यते। न द्वयोः सर्गे॥ ॥अग्नीषोमीयस्य वपामार्जनान्ते च वसतीवरीग्रह राम.
णं स्यंदमानानामनस्तमिते। अग्नीषोमीयग्रहणं। त्वाष्ट्रव्यवहितत्वात्। तद्वपामार्जनान्ते वसतीवरीणां ग्रहणं। वसतीवर्यश्च सोमार्था अ १४

प उच्यंते।ते। तांवै स्यंदमानानां गृह्णीयात्। दिवा गृह्णीयादिति वचनात्॥ स्यंदमानानामनस्तमित इत्युक्तं॥ अ
स्तमितश्चेन्निनाह्यात्पुरेजानश्चोत्संयस्याग्रहीतास्वम्यस्तमियात्तत्र प्रायश्चित्तिः। क्रियते॥ यदि पुरेजानः स्यात्ति
न्नाह्याद्गृह्णीयादिति श्रुतेः। निनाह्यशब्देनवमलिकोभिधीयते॥ अनीजानोन्यस्यापि समीपावसितस्य पुरेजान
स्यनिनाह्याद्गृह्णाति। उभयाभाव उल्मुको हिरण्यं वोपर्युपरिधारयन्हविष्मतीरिति॥ अस्तमिते सत्युभयोरभा
वे उल्मुकौ हिरण्यं वोपर्युपरिधारयन्हविष्मतीरित्यनेन मंत्रेण गृह्णाति॥ अग्नेर्वैरिति निदधाति शालाद्वार्यमपरेण
वसतीवरीः॥ शुक्रस्तपां च प्रेक्षतिपेत्नापुत्रीयं॥ चशब्दान्निधानकाल एव॥ आदित्याभ्यये हुतायामपि। माम्बयाहो
मादादित्याभ्यस्तमिते त्वाहुतायामपि गृह्णाति॥ दक्षिणाग्निहोमान्तमभीषेणीयमस्तमिते संस्थाप्य त्वनुक्रामते स्वाहेति:
वसतीवरीभिर्व्यवधानादग्नीषोमीयग्रहणं॥ तद्वाग्नीषोमीयकर्मैव दक्षिणाग्निहोमांतमितरे पशवः समिष्टयजुरंताः।
विहिता निहितेषां समिष्टयजूंषि। त्रीणि समिष्टयजूंषि जुहोति॥ देवाणानुविरोयस्तयत्तमेषन इति पशोश्च। यांश्चावह इ
तिवा पशवावित्ति॥ अग्नीषोमीयस्य तु समतिषिद्धानि। तउवसथेऽग्नीषोमीयं पशुमालभेरिति प्रकृत्य। तस्मात्तस्य पशोः।

कर्क॰ १५

समिद्वयंजुषिनजुहूतीत्याह॥ अतोग्नीषोमीयवर्जंप्रकृतेरेवत्रीणिसमिद्यजूंषिभवंतिः दक्षिणाग्नेहोमश्चाग्नीषोमीयविकार
त्वात्सर्वप्रकृतामत्वमिन एवेति। संप्रदायः॥ ध्रुक्रामतेतित्रिरुक्ते॥ शालाद्वार्यमपरेणात्तिपत्सुत्तरवेदिमपरेणयजमानउपस्थे
सोमंकृत्वा॥ आस्तइत्यनुवर्तते॥ शालाद्वार्यमपरेणवसतीवरीः परिहरति। दक्षिणेनद्वारेणनिहृत्य॥ दक्षिणस्यामुत्तरवेदिश्रोणौ
निदधातीन्द्राग्न्योरित्यनेनमंत्रेण॥ आहृत्यस्थानेनिदधाति॥ स्थानंचशालाद्वार्यमपरेण। कलशंपत्न्यालभते॥ कलशशब्देनतत्सं
स्काएकद्रव्योपलक्षणं॥ उत्तरेणपरिक्रम्योत्तरस्यांपूर्ववत्॥ उत्तरेणाग्नीध्रंपरिक्रम्योत्तरस्यामुत्तरवेदिश्रोणौनिदधाति॥ पूर्ववदिंद्रा
ग्न्योरिति॥ मित्रावरुणयोरितिवाविश्वेषांदेवानामित्याग्नीध्रे॥ वसतीवरीर्निदधाति॥ सोमंचासादयाः॥ वशब्दाद्दाग्नीध्रएव॥ दीक्षि
तव्रताः शरावेसोमंरक्षंति॥ वशब्दान्निधानसमनंतरमेवरक्षणं॥ सुब्रह्मण्यांचमेध्याति॥ परिवाप्योयेरोहनं॥ परिवाप
शब्देनयवानांयाकृतावस्थोच्यते॥ यायावरिवापावस्थातस्याः तस्यारोहनमित्येकवचनं॥ वत्सोहिताद्धृदयेनपा॥ आवस
थान्मर्दनात्संकरणादंतप्रक्षालनात्वध्वर्योर्दीक्षितस्याध्वर्योर्दीक्षितस्य। आवसथ्योवसत्यथेनगृहं। उन्मर्दनंउद्वर्तनादि॥ अलं
करणंस्नानमाल्यादि। दंतप्रक्षालनंदंतधावनं॥ तांवृत्तमित्यपरे। एतान्यध्वर्योर्दीक्षितस्यदेयानि॥ अदीक्षितग्रहणज्ञापनेषां
गदक्षिणा। संख्यामात्रामेनदित्येतस्यावसथ्यस्यादानंवसतिमात्राधेत्वात्॥ उपाध्यायकर्कविरचितेयज्ञसूत्रभाष्येअष्ट

एम॰ १५ २२२

॥ ॐ अपररात्रऋत्विजः प्रबोधयंति॥ बहुवचनोपदेशाद्यजमानेनसहकेचनाप्रकृताः तान्संप्रबोधयंतिते
पउपस्पृश्याग्नीध्रमुपसमायंति॥ तत्राज्यानिगृह्णातइतिश्रुतेः॥ आज्यग्रहणेनचपरिस्तरणाद्याक्षिप्तमन्त्रा
भिधीयते॥ अपउपस्पृश्यशालाद्वार्यंपरिस्तरणपात्रासादनप्रोक्षणाज्यनिर्वपणाधिश्रयणस्रुक्संमा
र्जनोद्वासनावेक्षणानिकृत्वाग्नीध्रउत्पूयपश्चादाज्यग्रहणं॥ शालाद्वार्यग्रहणंचअपणनियमार्थं। आहवनीयेमाभू
दिति॥ पश्चाज्यग्रहणमिति। कुतएतत्॥ पशोर्हिचोदनोपरिष्टाद्विहितेवकस्मात्पशुर्नचोदितः। ब्राह्मणेत्वाश्विनां
तेविहितं। आश्विनंग्रहंगृहीत्वात्रिवृतायूपंपरिवीयाग्नेयंपशुमुपाकरोतीति॥ तदर्थमेतदिति। पश्चाज्यग्रह
णमित्युक्तं॥ आज्यान्यासादयसोमंचाथैवचाहवनीयइध्मप्रोक्षणादिकरोति॥ अथैवग्रहणेनचयावद्द्रोणक

कर्क.
१

लक्षणादेमुच्यंते॥ तानिहितत्रनिहितानि। आहवनीय एव परिध्यप्रोक्षणं तदादिकरोति॥ आहवनीयग्रहण
त्। एवंचकृत्वापरधस्तनमिध्मप्रोक्षणं तदन्नभवति। सकृत्प्रोक्षत एवेध्मः सवनीये। नहिंकारेषु च॥ अ
ग्नीषोमीयवत्स्तरण॥ मात्र एवैनत्पुनर्वचनमुपसंहारार्थी। प्रस्थितशब्दवत्॥ यथाप्रस्थितशब्दः सौत्रामण्या
मुपसंहृतइति। अतश्चान्येषां पशूनां तदेवस्तरणं॥ नैकवृतमिति॥ आज्यासादनात् कृत्वेषां तरेणाई सोम
सद्रिषु सन्मुखेषु निदधाति हरेत्वेति॥ आज्यासादनांत त्वेपि सत्पात्मालंभनांतेईषां तरेण च सोमोपावहरणं कर्तव्यं।
स्मनादेशसामर्थ्या। हालाद्यहवींषि संस्पृशतीति॥ इवनिपाताच्चार्द्धशब्दस्य सप्तमविभक्त्यांर्द्ध द्रष्टव्यं॥ अद्री
णां वसन्मुखता सहकारिणां पद्यते। स्यवीयांस्यभ्यंतराणि तानि मुखानीति ॥

एम.
१
२२३

विश्वाः स्वामितिविसर्जयपतिष्ठते। विसर्गस्याह्लंभनपूर्वकत्वात्। याजमानमुपस्थानं। आलंभनस्ययजमानत्वात्॥ ॥ एतेनाहरणं सोमार्थस्याभिषवे। एते
नेतापांतरालमभिधीयते। तेनाहरणं सोमार्थस्याभिषवे वर्तमाने॥ ॥ नोद्धरणं नेतावहिर्वेदिभावात्। तेनोद्धरणं न कर्त्तव्यं। हविर्द्धानाभृतीति।
॥ ॥ अभिषुतस्य चानवहरणं कृतार्थात्। अभिषुतस्यसतः शुष्काभिषवेनमार्गेण वहरणं न कर्त्तव्यं। कृतत्वात् संस्कारस्य॥ ॥ प्राग्वाचं प्रवदितोः प्रा
तरनुवाकोपाकरणं देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीति समिधमादधत्। वयसां वाचः प्रवदनात् पूर्वेति॥ ॥ सुब्रह्मण्यां चप्रेष्यति। चशब्दानंदत
×र्थं प्रातरनुवाकस्योपाकरणं देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीति समिधमादधत्। देवेभ्य इत्येकः प्रातरनुवाकस्योपा×रं। प्रातरनुवाकं जाग्रदुपा
सीताध्वर्युः। जाग्रद्वाध्वर्युरुपासीतेति वचनात्। स्वप्याद्वा। तस्मादुकाममेव स्वप्यादिति श्रुतेश्च वचनाद्विकल्पः॥ ॥ अग्निरैंद्रमेकादशकपा
निर्वपति हरिवोधानाः पूषण्वत्करंभः सरस्वत्यै दधिमित्रावरुणाभ्यां पयस्या। इंद्रस्य पुरोडाशो हर्यश्वो धानाः पूषमः करंभः सरस्वत्यै दधिमित्रा
रुणाभ्यां पयस्या। इंद्रस्य पुरोडाशो हर्यश्वो धानाः पूषमः करंभः सरस्वत्यै दधिमित्रावरुणयोः पयस्या इति वचनात्॥ ॥ इंद्राय वा हरिपूषण्वते सरस्वतिभि
वरुणावते धानादीनि यथासंख्यं वा शब्दः पक्षव्यावृत्तौ। इंद्राय चैतद्गुणविशिष्टाय धानादीनि भवंति। उक्त एवतु। सर्वे ऐंद्रा भवंतीति वचना
त्। पक्षे हर्यश्वो धाना इति तद्गुणेन देवताभिधानं लक्षणाया। यथा स्विष्टकृते समवद्यतीति। स्वं च प्रैषवचनं। इंद्रो हरिवान् धाना अत्तु पूषण्वान्
करंभं सरस्वती वान्दधि मित्रावरुणावान्पयस्यामिति। तस्मादिंद्राय हरिवदादिविशिष्टाय धानादीनि॥ तन्त्रे उः पात्रयोजनं। वचं द्रवति। खरोत्तरपू

स ४

ना २

क॰ क॰ वोद्वैउपांश्वंतर्यामयोः। पात्रयोजनं। नयेच्छ दक्षिणमुपांशोः पात्रं भवति तदपरेण द्विदेवत्यानि प्रत्यंचि। रीत्या तेषां च॥ ॥राम्नावमेइंवा
२ यं वा। राम्नावमेत्युच्यते॥ ॥अजकावं मैत्रावरुण। अजकावशब्देन अनागतरमनाम् उच्यते। अनागतरमनाविवक्षितो यस्य तत्तत्र
जकावं। मैत्रेत्यपरे। गोश्च नकासंतापामिति॥ ॥ओं शमाश्विनं।तु स्रुवदित्यर्थः। दक्षिणपूर्वार्द्धश्च कामं धिनोः। तयोः। दक्षिणेश्रुक्स्याय
पतास्थाल्या मध्ये। खरस्य। तस्याश्च दक्षिणे। स्थाल्या सपत्रां तथादित्यस्थाल्युत्तरा। सपात्रातस्याएच। नउपात्रे पूर्वे स्रुक् स्रुच्छूरा कृताउभ
यतोमुखैव कार्यं यमयेआश्रुञ्जेवा। आग्रयणस्थाल्याः पूर्वे॥ ॥ऊर्ध्वानीतराणि प्रादेशमात्राणि मध्यसंगृहीतानि॥ ॥आग्रयणाद्रूपरिप्ल
वास्रुक्स्रुच्छूरां। अधाधोरूपात्रं चैंद्रोणकलशमत्रसोपर्युपर्यद्रूपवित्रमस्मिन्करोति। अधाधोरूमित्यरूस्याधस्तात्तउपर्युपर्यद्रूमित्यु
परिशाद्दिस्यनीत्वा पवित्रमस्मिन्करोति॥ ॥श्रुत्नंजीवार्णानं॥ श्रुत्नांजीवार्णानामित्यनेडिक्तीनाम्रूर्णानां॥ ॥उभयतो वृक्षं परिप्लवायां प
वित्रं करोति। अन्यतरतोदशं द्रोणकलशे॥ ॥पूर्वेणोपस्तंभनमुत्तरं ध्रुवस्थालीमनंतर्हितो उत्तरस्यानसः उपस्तंभनस्य पुरस्तात्। अनंतर्हिते
ध्रुवस्थालीं स्थापयति। तोत्रिप्रकृत्य श्रूयते। अथैतं ग्रुसनतृणांचनांतर्दधेयेति॥ ॥धुरि प्रचरणीं। धूःशब्दश्च शम्यांतरालवाचक इतिस्तु
ते। तत्र प्रचरणीं स्थापयति॥ ॥पूर्वेणारुमुपरिस्तंभनं। उत्तरस्येवानसोद्रूस्य पुरस्तादुपरिस्तंभनं करोति। अपरेणाधवनीयं। तस्यैवा राम॰
परेणाधवनीयं॥ ॥प्रागग्रदशाचमसासंर्वे नानदः। प्रत्यगो कधनानपुम्मानुदहरणं त्रिप्रमत्तापंचरशम्याम्रदुदरूशत्पश्रुरित्युच्यमाने चत २
२२५

र्गृहीतं प्रचरण्यानुहोतिश्रग्नोत्वग्निरिति। अमुञ्चारुशत्पश्रुरित्यस्मिन्मत्रवाक्येहोत्रोच्यमाने चतुर्गृहीतं प्रचरण्यानुहोति अग्नोत्वग्निरिति। सव्य
यं कालार्थः संयोगः कर्तृभेदात्। पृथगर्थत्वाच्चानेनाग्निलरूणइति॥ अपरं गृहीत्वोदंगच्छेनाहोपयिष्ठहोतरिति। अथापरं चतुर्गृहीत्माज्यं गृहीत्वो
दङ्ङ्पत्राहोपयिष्ठहोतरितिश्रुतेः। प्रेष्यति च मैत्रावरुणस्य चमसाध्वर्यवे हिनेष्टः पत्नीरुदानयैकधनिन एतासी चात्वालेवसतीवरीभिःप्रत्यु
पतिष्ठा मे होतृचमसेन चेति। अर्थभेदाच्चत्वारः प्रैषाः प्रयोजनं स्रावसानमुच्चारणं। चशब्दाऊह्येन्नेव॥ ॥अपोगत्वा देवीरापइत्यप्सुजु
होति। चतुर्गृहीतं॥ ॥कार्षीरसीति मैत्रावरुणचमसेनाप्समपोहति। अथ मैत्रावरुणचमसेनैनामाऊतिमपप्लावयति कार्षिरसीतिव
चनात्॥ ॥समुद्रस्यत्वेतितेन गृह्णाति। मैत्रावरुणचमसेनापः। एकधनांश्चानयंति॥ ॥बहुवचनोपदेशात्। एकधनिन एव। क्रियापदस्य
स्वशब्दाभिधानाच्चशब्देप्मांत्रानुकर्षणार्थः॥ ॥पात्नेजनंश्चपत्न्योद्वैधौ। चशब्दादुन्नयंतित्याचमेत्रस्याप्रवृत्तिः। पत्नीशब्दे च बहुव
नमुच्चारणार्थं। बहुत्वस्यैकांततो भावात्॥ ॥प्रत्येत्य चात्वालस्यापरि मैत्रावरुणचमसं वसतीवरीश्च संस्पर्शयति समापइति। मैत्रावरुणच
मसमुत्थापयोवसतीवरीश्च संल्गापयति समापइति। अनेन मंत्रेण प्रत्येत्यवाच्यं। अर्थप्राप्तत्वादुच्यते च। ननु किमर्थं सर्वेष्वागतेषु ना
धयावेवेति॥ ॥इतरेतरस्मिन्नानयंत्येके मैत्रावरुणचमसे प्रथमं। स्पर्शनेच्छानयनयोर्विकल्पो मंत्रस्तु प्रवर्त्तत एव॥ ॥होतृचमसेवस
तीवरीः कृत्वा यजमानाय प्रयच्छति निग्राभ्यास्थ इति। तां संतां संव्यवहारार्थः। निग्राभ्यास्तु वाचयति। निग्राभ्यास्थासिंचतीति चैवमर्थः॥ ॥होत्र

कृ.क.
२

पृष्टः प्रत्याहोतेवनंनमुरिति। अवेरपोध्वर्यो३ इत्येवं होताप्रष्टाध्वर्युः प्रत्याहोतेवनंनमुरिति॥ ॥प्रचरणीसंस्रवमग्निष्टोमेजुहोत्यभावे चतुर्गृही-
तेयमग्रइति। प्रचरणीसंस्रवमग्निष्टोमसंस्थेऽतोजुहोतियमग्रइति। तदभावेचतुर्गृहीतं। पष्ठुनालेहोमायस्या इत्यपरंचतुर्गृहीतमाज्य
गृहीत्वाजुहोतीति। उत्थाप्य प्रथमंपरिधिमालभते। अनेनैवमंत्रेण॥ ॥प्रविशतेत्येवान्यत्र। एवकारकरणादमंत्रकंप्रवेशनं। षोडशिन्यतिरा
त्रेच। तावेवहि प्रकृत्याच्युतौ। समुद्येवत्कृत्स्नामेत्यप्रपद्यतेति॥ परायालंभनंवाषोडशिनि। अनेनैवमंत्रेण॥ ॥छंदिरतिरात्रेमंत्रेण। आल
भ्यते। वाशब्दोविकल्पार्थः। षोडशिन्यतिरात्रयोःतूष्णींवाप्रदिशति। परायाछंदिषीवामंत्रेणालभतइति। अतित्यद्रूपेणहोतारंमैत्रा
वरुणचमसमाधवनीयेवनयतिदसतिवरीन्द्रतीयेच। अग्निः प्रातःसवनेपात्वस्मान्वैश्वानरोमहिनाविश्वशंभूः। सनः पावकोद्रवि
णंदधात्वायुष्मंतःसहभक्षाःस्यामेत्यनेनमंत्रेण। तावत्सैककधनानामवनीयतोऽयुगपदवनयनं। अशक्तत्वात्। रमेदनेतपरो। एक
धनस्थानेऽभयशेषन्निधायाधिषवणोपर्युपविशंति॥ ॥३॥ ॥वसतीवरीशेषमेकधनशेषंचएकधनस्थानेनिधाय अधिषवणक
फलकयोः समंतादुपविशंति। उत्तरतोध्वर्युयजमानौ। तयोश्चपूर्वोध्वर्युः॥ ॥अपरेणपरीत्येतरेत्रयः। अध्वर्युपुरुषाः। हविर्धानापरा
तउपविष्टानामुन्नेतृणामथपरेणप्रतिप्रस्थातुःप्रतिहर्तारमंतरेण। उन्नेतास्यनर्त्विग्भावः अत्विजोचयथापूर्वमिति॥ ॥देवस्यत्वेत्यद्रि
मादायवाचंयच्छतिप्राग्धिंकारात्। तस्मउपांशुसवनः। तस्यउपांशुसवनइतिवैदिकीसंज्ञासंव्यवहारार्था। तमुपांशुसवनेनमेरुयतीत्येव

राम०
3
२२५

मायर्थी॥ ॥निग्राभ्याख्यवाचयन्तुरस्येनानिमग्रग्राभ्यास्थेति। निग्राभ्यास्विपधिकरणासमवादालंभसप्तमीयं॥ ॥उपांशुसवनेसोममिमित
इंद्रायत्वावसुमतेरुद्रवतइतिपंचकृत्वः प्रतिमंत्रं॥ ॥मिमीतेप्रक्षिपति। पत्रइतिमितालंभनं। यत्रइत्यनेनमंत्रेण। मितस्यसोमस्या
लंभनंकरोति। अयंमंत्रश्चोदितार्थाभिधायी। प्रतिप्रस्थाताश्चमसडाइनेउगुल्यंतरेषुद्वौद्वौकुरुते। मितास्सोमान्। सचायमुपदेशोग्रहणा
र्थः॥ ॥अत्रास्थेत्यासिंचतिनिग्राभ्यानमितेसोमे। प्रहरिष्यन्द्वेष्यम्मनसाध्यायेदमुष्माअहंप्रहरामिनतुभ्यंसोमेति। अपप्रहरिष्यन्यदि
ष्यात्मनसाध्यायेदमुष्मअहंप्रहरामिनतुभ्यमितिवचनात्॥ ॥अभावेतृणं। मनसाध्यायेत्। यद्युनद्विष्यादपितृणमेवमनसाध्यायेदितिव
चनात्॥ ॥सचायंपदार्थकृत्यर्थः। तृणाभिधानविधानात्। मामेरितिप्रहरति अनेनमंत्रेणप्रहरतिसोमे॥ ॥एवंत्रिरभिषुत्यापासेचनि याम्याः॥
एकमभिषवंत्रिःकृत्वःकरोत्यासिच्यासिच्यनिग्राभ्याः। अत्रैवएकारशब्दत्वाद्द्वादशकृत्वःप्रहारसंख्येयं॥ ॥सर्वेपंचवर्गाःपशुकाम
स्यषड्वर्गाब्रह्मवर्चसकामस्य। गुणफलसंबंधोयं॥ ॥प्रतिवर्गंनिग्राभंवाचयतिहोतृचमसेत्यानेषूनवधायप्रागपागिति। प्रतिप्रहारवर्ग
होतृचमसेत्यानेषूनवधायप्रागपागितिनिग्राभंवाचयंति। अद्रिणाचतुर्थे। अद्रिणाहोतृचमसेप्रक्षिप्तेनचतुर्थेवाचनं॥ ॥तूष्णींवावा
शब्दोविकल्पार्थः। तदाचाद्रिप्रक्षेपमात्रंभवति॥ ॥उपांशुंचगृह्णातिवाचस्पतयेदेवोदेवेभ्योमधुमतीरिति। चशब्दात्प्रतिवर्गं॥ ॥प्रतिप्रस्था
ह्लातिपात्रं। प्रतिप्रस्थातोपांशुपात्रंगृह्णातिग्रहसमाप्तौ। आन्तानांचवैशावंतदधातिग्रहणभेदात्। आन्तानांच। चशब्दात्प्रतिप्रस्थातांगुल्यंत

२३२

कर्क ४ रेषु द्रोणकलशं तद्धाति। गृह्यमाणो ग्रहे। द्वौ द्वाविति। उक्त एतत्। ग्रहणभेदात् भिन्नानि हि ज्ञानि। ग्रहणानि षडंशवः। अतो द्वौ द्वाविति उक्तं। किंच। मंत्रलिंगा
च्च। अंशुभ्यां गभस्तिपूत इति। षड्भ्यः श्रुतिसामर्थ्यात्॥ ॥षडपि चांशून्दधाति। षड्भिः पावयतीति श्रुतिसामर्थ्यात्। एवं श्रुतिः। समर्थ्यो संगतार्थो
भवति। एवं च परुद्वयोपत्यासेषि पर्व एव परुः। संप्रदायेगाच्छतः। उक्तहेतुत्वात्। षड्भिः पावयतीत्येतत्कथं। अवयवेषु ग्रहणो द्वाभ्यां द्वाभ्यामंश
भिर्यमाना अंशुभ्यां षड्भिः पूत एव भवति। यत्र रत्पात्रो सोमे निदधाति। यत्र इत्यनेन मंत्रेण तानंशून्ग्लुनता सोमे निदधाति॥ ॥परिमृज्य सादनम्
पांशून्तर्पयेत्पोः। ग्रहेषु पत्परिमृज्य सादनमुक्तं तदिह प्रतिषिध्यते॥ ॥अभिचरन्सादयेत् विसृजन्नमुष्य त्वा प्राणं सादयामीति। उपयन्नमि
त्यंतर्यामं। अभिचरन् सादयत्पाविमुंचन्नमुष्य त्वा प्राणं सादयामीत्यनेन मंत्रेण॥ अमुष्येति चाभिचर्यमाणस्य षष्ठ्यंतेन नामदेशः॥ ॥प्रा
णिनाव्याद्दधात्यमुष्य त्वा प्राणमपिदधामीत्युदानेनिः संतर्यामं च शब्दादभिचरन्नेव॥ ॥स्वाहेत्युन्नोर्ध्वं तदिह मितिनि क्रमणं। हविर्धा
नात्। अन्वारभते त्यस्मै प्रदायहोत्स्चमसे॥ यजमानो ध्वर्युं॥ ॥वरे वृत्वा ददाति च॥ वरवरणं च यज्ञसमाप्तिप्रार्थनं। यद्यपि च श्रूयते
तस्मा एतं वरं समर्द्धयंतीति द्विप्रेनेमं ग्रहं गृह्णंति वदिति। तथापि यागपरिसमाप्तिरेवास्मिन्ग्रहे आषितेति। उक्तमप्रयाजवत्। एवं श्रूयते तेप्रा
तःसवन एव सर्वं यज्ञे समस्थापयन्निति। ददाति च वरं॥ ॥स्वांकृतस्त इति उक्त्वा पात्रमुन्मार्ष्टि। स्वांकृतस्त इति उक्त्वा ग्रहं तत्पात्रमुद्धीमुन्मा राम०
र्ष्टि॥ ॥प्रथमे परिधा उक्तानेपाणिं प्रागुपमास्थि देवेभ्यस्त्वेति। उक्तानग्रहणात्र्चाधः परिश्रिमवति॥ ॥वासउरोवाउपश्लिष्टमंशुमभिचरं ४

२२८

ऊयाद्वंशाविति। आग्रयणस्थाल्यां शेषैकदेशमासिच्यांशुं प्रास्यति तृतीयसवनाय॥ उपांशुपात्रशेषस्यासावेकदेशः। शेषैकदेश इति संप्रदायः
उपांश्वेन यामयोः शालेन्तरे शेवमहः प्रतिषेधात्॥ ॥प्राणाय त्वेति पात्रसादनं। प्राणाय त्वेत्युपांशुपात्रासादनं। सादयामीत्यध्याहारः॥ ॥उपांशु
सवनं पाणिना प्रमृज्योर्ध्वं व्यानाय त्वेति संस्पृष्टं। उर्ध्वं च मुदश्रुवं। मुखं चास्य येनाभिषवः कृतः। उपांशुपात्रसंस्पृष्टं सादयति व्यानाय त्वे
त्यनेन मंत्रेण। उपांश्वभिषवो भिहितः। इदानीं महाभिषवगत विशेषव्याचिख्यासयेदमुच्यते॥ ४॥ ॥उपविष्टेषु अभिषुण्वंति चत्वारः
पर्युपवेशनसामर्थ्यात्। उपांश्वभिषवे ह्येको भिषोता। अष्टौ कृत्वो भिषुणोत्येकश्च न निर्देशात्। इह च त्वारो भिषुण्वंति। उक्त एतत्। अ
भिषवणोपर्युपविशंतीति एतद्वचनं समर्थं भवति। परिसमंतादुपविशंति पर्युपविशंतीति। आप्यायनं भो भिषवाद्विपर्यायः। पर्यायत्रयं ते
आप्यायनं भवति॥ ॥मत्यातत्रामतिरूक्ता इहमत्याप्रहरणं। मतिशब्दः श्रृक्ष्णवाची। यावता रसप्रच्युतिर्भवति॥ ॥पर्यायादिषु निग्राभ्या
सवनं। रसप्रच्युत्यर्थं क्रियते॥ ॥प्रथमे वा प्रभुश्चात्रे। वा शब्दः पक्षांतर परिग्रहे। प्रभवति हि प्रथमपर्याये सिक्तमुदकं रसप्रच्युत्यै। उपांश्वभि
षवे तु प्रतिपर्यायमासेको युक्तः प्रतिपर्यायमेव हि तत्र ग्रहणमिति। इह पुनर्नैतथा॥ ॥निग्राभ्यांते सरसानंशून्संभरणधवनीयेव धायाभ्यूप
हरति। निग्राभावचनांते संभरणात् सरसानंशूनादाय आधवनीये वधाया धूयाहरति॥ ॥एवं द्विरपरं। एवमेव द्विरपरं। अभिषवकर्मेदं तेभ्यां
पूर्ववं निग्राभ्यान्निग्राभांत उक्ते पि पुनर्द्विग्राभ्यावचनमद्विर्णाचतुर्थप्रतिपत्त्यर्थं। इदानीं लायवाय अभिषवयोरुभयोरपि संप्रतिपादना

येदमाह॥ ॥पूर्वं ह्युपांशुं गृहीत्वा महाभिषवाप्यायनसंभरणे कृत्वानापूर्वाभिहितएवोपांश्वभिषवे। उपांशुं गृहीत्वाप्यायनसंभरणे क्रियेते। नहितत्रेतरे
तरेति। एवं चाभिषवयोर्युगपदनुष्ठानेनाप्यवमिति॥ ॥धर्ममात्रं पर्युपवेशनं। नन्वेवं सति पर्युपवेशनमसमर्थं सोमक्रयणीपदपर्युपवेशनव
दुर्मात्रमित्यदोषः॥ ॥अभिषवविपर्यासो वाभिमर्ष्टादूर्ध्वमनपकृष्य नियाम्याश्चानुपूर्व्ययोगादनान्तरस्य वाभिमानसामर्थ्यादृजीषभावाच्च
॥ ॥अभिषवद्वित्वं वा भवति। द्वित्वे च सति विपर्यासोऽभिषवयोः। उक्तएव तत्। आनुपूर्व्ययोगात्। आनुपूर्व्यं हि क्रमेणाह्वावप्याम्नातौ। अंशी
न्येहि ब्राह्मणो महाभिषवो ग्रहाद्युपांश्वभिषव इति मंत्राणामप्येवमेदानुपूर्व्ययोगो भवति। उत्तरो ह्युपांशुग्रहणमंत्रपाठः। अतएव
वाभिमर्ष्टादूर्ध्वमपकर्षो नियाम्याणां च कर्त्तव्यः। नह्यन्यथा द्वित्वानुपूर्व्यं संभवतः। अपि चानान्तरस्य सोमस्य सोमाभिमानो भवति। सोमवृद्धिर्भ
वति। तस्मादप्यपकर्षः। अथवाभिमानसामर्थ्यादिति। मा श्रूहि सायां। आनान्तरे सोमे हि सान्निध्यमानाणां समर्थो भवति। उपांशुग्रहणा
नन्तरकाले हि द्विः सान्निध्यमानाणां असमर्थिकः। ऋजीवभावाच्च। प्रत्युत तदृज्यान्तरवृद्धिर्भवति। अतोऽभिषवद्वित्वं। द्वित्वे च विपर्यास इति। प्रो
ह्य द्रोणकलशमृजीषमुखेष्वद्रिषु निदधत्युन्नातारः। प्रपूर्वस्य वहेः कृतसंप्रसारणस्य एतद्रूपं प्रोह्येति। अधिषवणफलकप्रदेशमुह्य हि
त्वेत्यर्थः। ऋजीषमुखेष्वद्रिषु निदधत्युन्नातारः। पवित्रं च वितत्य अदेपवित्रमन्यतरतो देशमुदगग्रं अवाञ्चोऽभिनितन्वन्ति। एवमेव हि छन्दो

भिश्रूयत इति। स्वयं वा कुर्वन्त्युत्स्वमध्वर्युः करोत्यकुर्वन्नृत्विग्घ॥ ॥आधावनीयाद्वन्नेतानि ग्राम्याश्वास्विंवजिति नाः पवित्रे यजमान

आसिंचति॥ ॥ततो ग्रहग्रहणमाध्रुवान्माध्यंदिने च पंच प्रथमान्। तत एव धारायां गृह्णाति॥ ॥शुक्रो द्रोणकलशे। द्रोणकलशेऽपः सोम आपत
तितस्य शुक्रः। रतायं संज्ञासंव्यवहारार्थो॥ ॥ततोऽन्ये नादेशात्। ततः शुक्रादन्ये ग्रहा गृह्यन्ते। येषां योनिर्नादिष्टा॥ ॥सावित्रपात्नीवतहारियो
जनोपद्रोणानाग्रयणात्। उपद्रोणाप्यंशुगृह्णाति। पूतभृत्स्थमसान्नगृह्णाति॥ ॥तृतीयसवने वैश्वदेवं। पूतभृत एव। अन्याभावादवाप्य
चमसोपस्पर्शनंः शंसं तरात्। प्राप्सु ते चैवानुज्ञातिवत्॥ नोक्तवत्सकर्मत्वं॥ उद्गातृवदकर्त्राऽपपत्नी सदः प्रवेशापरेणाग्नीत्रं तत उपविष्टा
मुद्गात्रा समीक्षयति। प्रजापतिर्वृषासीति। नेष्टा पत्नीं सदः प्रवेश्य अपरेण द्वारेणोद्गातॄणां नरं तत उपविष्टामुद्गात्रा सह समीक्षणं कार
यति। कारितेनाधेयता। पत्न्युद्गातारमीक्षस्वेति। प्रजापतिर्वृषासीत्यनेन मंत्रेण समीक्षते पत्नी॥ ॥पात्नेजनीभिरभिषिंचति विवृत्य

कर्क० ८

क्षिताऽस्म। विपरावृत्य दक्षिणामूरुं पन्नेजनीभिरभिषिंचते पत्नी। अत्र छंदोगेभ्य वचनं प्रति हिंकारमीक्षणां प्रतिनिधनं चोर्ध्वासोऽकः॥ ॥ऊरू
ञ्चानुज्ञाता गच्छति दक्षिणा विनिःपन्ना वीरी दक्षिणा वा गच्छति तथा च त्रिरूढो वेद्या गार्ध्वा सकृ भवतः॥ ॥ एवान इंद्रो मघवेति शस्यमाने ध्रुवं
होत्रचमसे वनयति ध्रुवं ध्रुवेणेति। एवान इत्यस्मिन्मंत्र वाक्ये शस्यमाने ध्रुवं होत्रचमसे दनयति ध्रुवं ध्रुवेणेत्यनेन मंत्रेण। अवनयामि
स्थाने [illegible] त्रा। अवनयामीत्यस्य स्थाने गृह्णामीति वाक्यशेषः। वैश्वानरं यजमानस्य गृहीतश्चेत्। गृहीतश्चेद्वैश्वानरो यजमानचम
सेवनयेत्। पात्रप्रक्षालनं तेनु याजाः समिदादि। आग्निमारुता दूर्ध्वमनुयाजैश्चरंतीति वचनात्। समिदादी नि च सामि ऊहणस्य पदा
दौतदादि उल्मुक समासादीत्यर्थः। अनुयाजार्थो युल्मुक समास इति॥ ॥उत्थ विग्रह णामुत्तरेषां इंद्रावरुणाभ्यामिंद्रा बृहस्पतिभ्यामि
द्राविष्णुभ्यामिति। उत्तरेषु संस्था विशेषेषु ऋत्थ विग्रहणामिंद्रावरुणाभ्यामित्येवमादिभिर्मंत्रैः। स्तुत शस्त्रे अधिके षोडशी चेत। अषोडशि
न्यपि षोडशिनो ग्रहणं विहितं। अप्यग्निष्टोमे गृहीतव्यः। अत्युत्थ गृहीतव्य इति। अग्निष्टोमसंस्था च यज्ञायज्ञिया ग्निमारुतांता। उत्थसंस्थ
ञ्चोक्थ विग्रहणांता। तदंते षोडशि याग विकल्पेन तत्र च स्तोत्र शस्त्रमात्रं अधिकं भवति। न च अषोडशि संस्थे तु ग्रहणं कृत्स्ना
त्र उत्थ्य वमादि। एवमेव शाखांतरस्य विधानमिति। तृतीयसवने प्रसवः। अप्रसव इति केचित्। तदनुपपन्नं प्राप्ति पूर्वकत्वात् प्रतिषे
धस्य। न चास्य प्राप्तिरुक्ता। तस्मात् तृतीयसवने प्रसव इति सूत्रे व्याख्येये विहितं च शाखांतरेषु सवनांते समर्पतीति। सवनांते समर्प

राम० ८

५२

२५८

णांतं तत्र भवतीति सूत्रार्थः॥ ॥स्त्र ग्यूहनमग्रे वनस्पते रिंद्रस्य वसुमतो रुद्रवत आदित्यवत ऋभुमतो विभुमतो वाजवतो बृहस्पतिमतो विश्वदेव्याव
तः सोमस्य जुषेति भित्य ग्निर्वनस्पतिरिंद्रो वसुमान् रुद्रवान् आदित्यवान् ऋभुमान् विभुमान् वाजवान् बृहस्पतिमान् विश्वदेव्यावान् सोमस्तमपत्नुद
त्विति। शाखांतरेप देशात्॥ ॥पशुदेवता वनस्पतिभ्यां वा सोमो पदेशादितरासां। पशुदेवता वनस्पतिभ्यामेव ऊहनमभिसंबध्यते। न
वसुमदादि देवताभिः कृत एतत्। सोमोपदेशान्नासां। सोमो हि ता उपदिश्यते। इंद्राय त्वा वसुमते रुद्रवत इंद्राय त्वादित्यवत इत्येवमादिनेति। एवं प्राप्ते
उच्यते॥ ॥सर्वा वा सवनीय सौम्यभावात्। सर्वा वा वसुमदाद्या अपि ऊहनेनाभिसंबध्यते कृत एतत्। सवनीयेषु सौम्यं च भावात्। तासां
कथं कृत्वा सर्वत्र हींद्रो भाज्यते सवनीयान्य्र कृत्य हि श्रूयते। सर्व ऐंद्रा भवंतीति। ननु च गुणाभेदात्। किं क्रियते वचनमत्र। निर्वाये हि
हरिवदादि विशिष्ट इंद्रः। यागेऽत्र निर्गुणः। ऊहने च वसुमदादि विशिष्ट इति वचनेन हि विधानं। नास्ति वचनस्येति भार सान्मा साध
नं सर्वा वा सवनीय सौम्यभावादिति। सोमस्य सौम्येति संदिग्ध एव सत्रावकाः॥ ॥विमुच्यस्तु चौंद्राणां कलश हारियोजन ग्रहणमु
पयाम गृहीतोसि हरिरसीत्यनेन च ऋक् पक्षं परा प्रा प्रेस्त्र स्विमोकं कृत्वा द्रोणकलश हारियोजन ग्रहणमुपयाम गृहीतोसि हरिरसीत्यने
न मंत्रेण। धानाश्चावपति हर्योर्धाना इति। च शब्दादनंतरं। अयणं चैतत्। शाखांतरे श्रवणात् धानाभि हारियोजनं श्रीणातीति प्र
णन्ने। अयणधर्मोऽत्र भवति। उन्नेतानु वाचय ति सूर्द्धनि कृत्वा धानां सोमेभ्यानुब्रूहीति। एतावानेन प्रैषः इति संप्रदायः। इंद्राय धा

२५८

क॰टी॰ ९ नाग्नीषोम्यउत्पपशोः। तत्पुनर्युक्तमयुक्तं चेति विचारणीयं। न ह्यत्र चोदकप्राप्तिरस्ति। अनुवाचनप्रैषो यथादेवतमित्येतद्दर्शपूर्णमासविषयं।
अतोऽत्र तुल्यभावप्राप्तिर्देवतापदोच्चारणस्य। एवं चन्द्रत्वेंद्राय मरुत्वतेऽनुब्रूहीति वचनात्। देवाय सवित्रेऽनुवाचयतीति वचनाद्देवतापदोच्चार
णं। पठ्यते। आश्राव्याह हविर्यमेस्य यजेति तत्र चोदकपरिप्राप्त्या देवतापदोच्चारणं। इह पुनर्न तथा यमेरवेति संप्रदायः। आश्रा
व्याहवाना सोमान्प्रस्थितान्प्रेष्येति। उन्नेते चाभिप्रवृत्ते। तथा च लिंगं द्वौ चोन्नेतारौ कुर्वीत तयोर्यतरो नाश्रावयेदिति उन्नेतुराश्रा
वणं दर्शयति॥ ॥मरुद्धरेदिद्धेन। इडा सर्वहुतं करोति धानावर्जं॥ ॥उत्तरवेद्यां वा निधाय विलाभं। उत्तरवेद्यां वा निधाय द्रोणकल
शं विलाभं विलप्रधानाः। वासदसि विलाभः॥ ॥पसे अश्वस निरिति प्राणमरुन्मरुपि त्वान्तरवेद्यां निवपंति। धानाः। उत्तरवेद्याव
पि विलाभे सदस्येव प्राणामरुः। तत्र हि सर्वमरुणां विधानमुदरमेवास्य सदस्तस्मात्सदसि मरुपंतीति धानामरुणां सर्वेषां। अथै
तस्य हारियोजनस्य सर्व एव लिप्संत इति॥ ॥शाद्वलाधाने देवकृतस्येति प्रतिमंत्रं। तत्र सर्वेषां सहकारिणामपि विधानसामर्थ्यात्॥ ॥अ
पेणाचात्वालं यथास्वं चमसांस्तेपात्रानवमृशंति। हरितकुशानवधाय संवर्चसेति मुख्या न्यालभंते। चात्वालमपेणाच चमसान्सू
र्यपात्रान्यूनाः दरितकुशानवधाय यथास्वमवमृशंति संवर्चसेति। वहुवचनोपदेशात्। अभिकारात्र सहकारिवचनात्र सर्वर्त्विजः। येषु राम॰
मपि चमसान्संतिते पि यथास्वं यासेनिहिता नो चमसानवमृशंति॥ ॥दधिक्रा~~सचसहकारिवचना~~नाः रत्याग्नीध्रे दधिमरुणां। सर्व ९

२५७

ऊर्युरधिकारात्सहकारित्वात्पयाच्च॥ ॥पत्नीसंयाजाः पशुवत्। पशुवदिति किमर्थमुच्यते। बहवो ह्यत्र सवनीयपुरोडाशाः समानतंत्राः भ
यसोधर्मन्यायात्तदीया मा भूवन्निति। यद्येवमस्तु तथेति चेत्। नैतदेवं। पशुतंत्रे ह्यत्र महद्युपुरोडाशिकं। तेन बृहद्योषाकृत्कन्यायेन पा
शुकृते त्राप्युपगम एव युक्तरूप इति साधूच्यते पशुवदिति। समिद्धाणउति नव समिषयजूंषि जुहोति मंत्रं। साभ्यास समिदमकृकर्मेत्युक्त
मेवा। नवसंख्योपांशुकी। तत्ते त्राप्युपगमात्। तथा च पशुगणो सवनीयपशुविकारत्वात्तद्वेव भवंति॥ ॥आसंद्यां उदुंबर्यां चात्वाल
हरति सोममलिप्रं चाहरति॥ ॥कृष्णविषाणां मेखले चात्वाले प्रास्यति माहिर्भूरिति। अहिरदाकुशदयोरूपमानार्थत्वात्तवुकलेथ
नूहः॥ ॥प्रतिप्रस्थाता च शंकुयोः क्रेतृसंमी। चशब्दाच्चात्वाले प्रास्यति॥ ॥ऊरूहीति वाचयति यजमानं॥ ॥सामप्रेष्यति गाय ब्रूहीति
वा॥वेति विकल्प्यः॥ ॥व्याघ्रादकांतयोश्च। सामप्रेष्यति। वाघ्रशब्देनार्धपथमुच्यते॥ ॥सर्वे निधनमुपयंति। सर्वशब्दो निरवग्रहः।
सर्वर्त्विजः॥ ॥आहृतमादाय पावमथं गच्छेति स्पंदमानो नो स्थावराः। पश्चात्वालमाहृतमास योऽदुंबर्यादितदा पावमथं कुर्व
पेति स्पंदमानानामपां पाष्ठावराः आपः सपस्पंदमाना नो स्थावरोरुः स्यादिति वचनात्॥ ॥तदभावेन्याः प्रयुतान्न विंदेदपि
याइवकाश्चापांस्वेयादिति॥ ॥नमो वरुणायेति दाचपत्यपावक्रमयत॥ नमो वरुणायेत्यमुं मंत्रं वाचयति। दारु गृहीतं जपमान
मपोवन्नारापन्॥ ॥प्रास्य समिधं चतुर्गृहीतेनाभिजुहोत्यग्नेरनीकमिति। समिधमप्सु प्रास्य चतुर्गृहीतेनाभिजुहोत्यग्नेरनीकमित्यनेनम

का॰ कं॰ १०

[illegible]॥ अपरेण प्रयाजान्बर्हिर्वर्जम्। अपरेणाच्चतुर्गृहीतेन बर्हिर्वर्जं प्रयाजान्करोति अपरग्रहणं पूर्वं चतुर्गृहीतहोमस्यासमाप्त्यर्थं नहि
तस्याव समो भिहित इति। किं चासमानयनव्युदासार्थं च॥ ॥अप्सु जुहोति। आहवनीयकार्यविधानं। अत एवात्र ऊर्मिसंवेधो भवति॥ ॥एककपाले
नावदायं चरन्ति॥ वारुणेनैककपालेनावभृथमभ्यवयन्तीति वचनात्। स च पूर्वमेवाभिहितः। सौम्यश्चरुर्वारुणश्चैककपालो द्विकालिति एकक
पालानां हि सर्वहुतत्वमुक्तमाचार्येण तेनोच्यते वदायावदाय चरन्तीति॥ ॥ऋजीषस्पिण्डं संवदध्येद्यजीवहणात्या सर्वहुतं शेषं करोति॥ ॥
ऋजीषस्य च सकृत्स्रुवं चेत। सपय यमुत्रजेषित्स द्विरवद्येदयान्नसकृदिति वचनात्। वशाप्रतत्कुर्यात्। वशशब्दो हीक्षावचनः। इष्ट
येतस्तगाऊ इति किं करोति इष्टयाम्नात्प्रकारात्तं। तच्चाह। यजमानोक्ता वाज्यभागौ बर्हिर्वर्जं चानुयाजौ। इष्टये तद्दृशाऊ इति किं करोति
यजमानोक्ता विति। सहकारिवचना योवाय जमानो ब्रूयादिति॥ ॥अन्यतरं कृत्वा समुद्रेतं हस्ते ऋजीषकुम्भं प्लावयति। अप्सु पकृत्स्नान्यतर
देवकर्तव्यं नान्यपदार्थो यत्। येन प्रयाजाज्यभागानुयाजानां पुनर्विधानं अतोऽपावदुक्तास्य प्रतिपत्तयप्रत्प्रतिपत्तित्वादेवाक्रियं तेन समुद्रे व
रत्नेनेन मंत्रेण ऋजीषकुम्भं प्लावयत्युदके॥ ॥देवीराप इति विसृज्योपतिष्ठते। विसृज्य जीषकुम्भमुपतिष्ठते देवीराप इति॥ ॥अवभृथ
तिमज्जयति। ऋजीषकुम्भं बोलयतीत्यर्थः॥ ॥कृष्णाजिनानि च मामैं [illegible] ज्यैष्ठ्याबोध्यारिति वंशदान्मज्जयति कृष्णाजिनानि च प्रकृतत्वादा
सनकृष्णाजिनं॥ ॥पुत्रायैनत्प्रदाय वारुण्या प्रयाससवस्नानप्रभृत्या समिदाधानात्। एनदिति कृष्णाजिनं। वारुण्या प्रयाज्ञिकावभृथव

राम॰ १० २५८

स्नानं कृत्वा समिदाधानान्करोतीति तदायेपदेशस्यातिदेशाय। न हि तत्कर्म प्रवर्तिष्यते इति। एतस्य हि तत्र धर्माः प्रवृत्ताः॥ ॥सोमलिप्तं प्रास्य
ता च रितार्थत्वात्प्रतिपत्तिः॥ ॥अदानिष्कवेय्यः वाससी। अतिदेशापवादोऽयं॥ ॥उदयमित्युक्ते। नीता आमहीयां जपेत् गत्वा स्यामसो
मु सिति॥ जपश्च सर्वेषां वऊवचनोपदेशात्। सहकारिणामपि विज्ञानसामर्थ्यात्। अग्निश्चावसेरवृत ग्रहणं भवत्युन्मुक्ते दाकृत्वात्। तेनावर्हि
होमादि॥ ॥शालाद्वार्यमपरेण तेय जमानः कृष्णाजिनमकेकृत्वा स्रुवाऊतिं जुहोति मैं यं ज्यैष्ठ्यश्रेष्ठ्यमग्निर्दधातु स्वाहेति। स्रुवाऊतिं जु
होति अध्वर्युः आहवनीये मे यं ज्यैष्ठ्यश्रेष्ठ्यमग्निर्दधातु स्वाहेत्यनेन मंत्रेण। कृष्णाजिनं निधायोदयनीयां प्रायणीयवत् वर्तिः प्रायणी
यवद्धर्मातिदेशार्थः तथाचाह प्रायणीयस्वस्तिश्च उर्थिति शालामुखीये उदयनीयाश्चरंतीति च शाखान्तरात्। शालाद्वार्ये कर्तव्या पा
त्रप्रोक्षणाज्यासादनासवनीयवत्परिव्ययणादि मैत्रावरुणी वशा नूवंध्या प्राग्प्रोक्षणात् ग्रहणं शालाद्वार्ये अपाणनियमः व्युदासा
र्थं। सवनीये हि पात्रासादनविधाने न शालाद्वार्य अपाणनियमो प्रवृत्तिः। तथाऽत्रापि माभूदिति पात्रप्रोक्षणादीत्युक्तं। स च सवनीयवदि
तियदुक्तं भवति सकृत्ताहितरश्मा ग्रीष्मे [illegible] त्पवनं हृदकृत्स्तरणमिति परिव्ययणास्पष्ट्रा त्वेन विधानात् तदपवर्गश्चा [illegible] र्गमात्राकापरि
व्ययणादीत्युक्तं। मैत्रावरुणादेव त्वावशा रितताधाचगोभवति। गोरनुवंध्येति वचनात्। स्वदेवगृह्यनादि वाकृतत्वात्। स्वदेवगृह्यनादिवा
कर्तव्यानपरिव्ययणाहितिऊन एततां कृतत्वात्परिव्ययणासंस्कारस्य। यूपसंस्कारो ह्यं यां। स च यूपः सर्वपश्वर्थः संस्कारोपि तद्देवे

२५६

कर्क· ११

ति। अत एव सर्वस्वग्रहणादीत्युत्तरपदप्रधानो बहुव्रीहिः सर्वस्वग्रहणं यस्यादौ तदादि तच्चोपाकरणं। एवं सत्युपाकरणमेव प्रथमं योरत्र नियम इति॥ ॥
वशाभाव उत्तरायादिदशान्नविदेष्युदेवशा एव स्यादिति॥ ॥उभयाभावे पयस्या कर्तव्या॥ ॥आसाये नामान्यमागप्रभृतीडेतामेक्षादके आदि
तो ब्राह्मणतर्पणान्तो विकल्प एवायं॥ ॥उदवसानीयाग्नेयः पंचकपालः समारूढे निर्मथितः। उदवसानीयेष्टिरुच्यते। तत्र चाग्नेयः पंच
कपालो भवति। समारोप्यश्चाग्निर्जहिवे कर्तव्यः गार्हपत्याहिमाइति॥ ॥हिरण्यं दक्षिणानड्वान्वा वितिविकल्पः। पश्चवत्साऽऽहुतिः। अथोच
तुर्गृहीतमेवाज्यं गृहीत्वेति श्रुतेः॥ ॥तदंते सायमाहुतिर्देया॥ ॥सोमांगं संनिधिविरोधान्न्यं॥ ॥साच सोमांगं भवति। सोमसंनिधौ विधाना
त्। अथ यदेवैषोदवसानीयेष्टिः संतिष्ठते अथ सायमाहुतिं जुहोतीति। अपि च नित्यत्वे सति कालो विरुध्यते॥ ॥नित्या वा प्रातराहु
तिश्रुतेः। अथवा नित्यैषा न सोमांगं हुत एतत्र। प्रातराहुतिश्रावणात्। काल एव प्रातराहुतिमिति। सोमयागनिमित्तः सायमाहुतेरपक
र्ष इति॥ ॥नियतक्रियातः श्रुतः परं नित्यानां क्रिया॥ न प्रागतः। उन्मुक्तादीरुत्वेष्यव मध्यार्द्धमिति॥ ॥एवमु[illegible]सोम[illegible]प्रथमो
यज्ञानां यज्ञो ज्योतिष्टोम इति सर्वविकाराणामयं प्रथमः सोमः। आदौ वा प्रविशन्ति। आदौ पत्नं च बर्हिषः तस्मिन्प्रकृत्य श्रूयते पदत्र पोष
प्रयायात्। श्रीवा वत्समेने यजमानं स्वनिधीयेरन्निति निदार्थवादाय मनुपोषस्य। षडुत्तरत्वाग्निष्टोम[illegible]सोऽर्ध षोडशी वाजपेयातिरा
त्रोप्तोर्यामः। अत्रात्यग्निष्टोमवाजपेयाप्तोर्यामाणां ज्योतिष्टोमप्राथम्यविधानेनान्तरकालता सिद्धा। उक्थ्यषोडशातिरात्राणामप्या

राम° ११

२५८

आचार्येणैव ज्ञापितोऽन्तरकालता उक्थं चोत्तरेष्वेकयेति॥ उक्थ्यं विगृह्णातामुत्तरेष्वैंद्रावरुणाभ्यामिति च॥ तेनात्र
विकारप्रस्तमर्थं षडुत्तरे इत्युच्यते॥ न क्रमार्थः॥ षडुत्तरेषु द्विकारा इत्यर्थः॥ उत्तरो हि विकारो भवति प्रकृत्यपेक्षया॥
प्रकृतिश्च पूर्वेति॥ तत्र चात्यग्निष्टोमवाजपेयाप्तोर्यामाणां ज्योतिष्टोमधर्मो एकाहद्वादशाहयोरित्यनेनैव विकार
त्वं ज्ञापितं॥ ज्योतिष्टोमप्रकरणे समधीतानामपि चोक्थ्यादीनामसमानविधानता। नित्यानित्यसंयोगविरोधा
त्॥ अतस्तेऽपि विकारा एव॥ तेन क्रतुविकारस्यावाच्यत्वात्संस्थाविकारार्थोऽयमारंभः॥ षडुत्तरे षट् संस्था विकारा इ
ति। तत्रोक्थ्यषोडश्यतिरात्राणामग्निष्टोमविकारत्वं॥ अत्यग्निष्टोमस्याप्यग्निष्टोमसंशब्दनादग्निष्टोमविकारत्वं॥
वाजपेयस्य च षोडशिविकारत्वं। कथं ज्ञायते॥ येन क्रतुपशुस्तत्र दर्शयति॥ आग्नेयमग्निष्टोम आलभते अग्निर्वा अ
ग्निष्टोमोऽग्निष्टोममेवैतेनोज्जयन्त्यैंद्राग्नमुक्थेभ्य आलभन ऐंद्राग्नानि वा उक्थान्युक्थान्येवैतेनोज्जयन्त्यैंद्रं षोडशि
न आलभते इंद्रो वै षोडशी षोडशिनमेवैतेनोज्जयंतीत्येवमभिधाय सारस्वतं सप्तदशाय स्तोत्रायालभते तदेतत्
नतिरात्रे सतिरात्रे रूपं क्रियत इति॥ षोडशिक्रतुपशूनामिह दर्शनं भवति॥ अतिरात्रेष्वेते भवंतीति चेत्॥ नानंति

कर्क॰ १२

एवैसति एवैरूपं क्रियत इति श्रुतेः। तस्मात् षोडशि विकारो वाजपेय इति॥ अप्तोर्यामे तिरोऽह्नीयेभ्यो एव त्रि
पर्यायऽतन्त्रम् इति। तिरोऽह्न्यानां दर्शनं भवति॥ तेनातिरात्रविकारोऽप्तोर्याम इति गम्यते॥ षडुत्तरे षड्विकारा इ
ति। विकारत्वे सप्तानां तस्य प्रयोजनं किमिति चेत्॥ स्वप्रकृत्यपेक्षयाऽनुकरणं यथा स्यादिति। तेनात्यग्निष्टो
मेऽग्निष्टोमिकं अनुकरणं॥ वाजपेये षोडशिनः॥ अप्तोर्यामेऽतिरात्रकं॥ उक्थ्यादिषु उक्तमेवेति॥ अत एव
च सूत्रकारेणात्यग्निष्टोमोऽग्निष्टोमानन्तरं पठितः॥ षोडश्युत्तरं वाजपेयोऽतिरात्रसमनन्तरमप्तोर्याम इति॥ त
था च धर्मसूत्रकारेणानेनैवाभ्युक्तं॥ अग्निष्टोमोऽत्यग्निष्टोम इत्येवमाद्यभिधाय सप्त सोमसंस्था इति॥ तस्मात्
षडुत्तरे षट् संस्थाविकारा इति सूत्रार्थः॥ अत्यग्निष्टोमादयो विकृताभिः संस्थाभिः संस्थिता इति॥ तेषामुक्थ्योऽच्छा
वाकमभिसंतिष्ठते होतारमितरे। तेषां संस्थाविशेषाणामुक्थ्योऽच्छावाकमभिसंतिष्ठते॥ होतारं चेतरेऽभिसंतिष्ठ
ते। किमर्थमिदमुच्यते॥ वाजपेये हि श्रूयते॥ षोडश्यन्ते स्तोत्रं चमसैरेव॥ एतमनुशंसतीति च॥ तदुक्थं होतुर्यथा
स्यादिति॥ तथाप्तोर्यामातिरेकेषु केचिदुक्तमैन्द्रावैष्णवं होता शंसतीति॥ तथा सर्वं वज्ञेनेति॥ कश्चिन्नोक्तमाचार्येण यथा

रम॰ १२ २५०

तिरात्रो द्वादशाहस्य महाव्रतमेके यथोक्तमिति॥ अत्रापि एतमनुशंसतीति। होतुः शस्त्रं यथा स्यादिति॥ अनुक्तं
ग्रहार्थं होतारमितर इत्युक्तं॥ वैश्यराजन्ययोः सोमे न्यग्रोधस्तिभीनुपनह्येदत्र सोमपक्षमयणमभ्यनुसो
समाहृतासमानमासादनं प्रागभिषवात्। वैश्यराजन्ययोः। सोमयागे कर्तव्ये न्यग्रोधस्तिभीनुपनह्येदत्र सोमा
इत्यनु होमो यापि। भक्षो हि हुतशेषस्यैव भवति॥ तस्माद्धोमापापीत्येवं होमदर्शनं भवति॥ परस्यां चमसानुन्न
यंत्यपीतमुन्नयंति॥ परेतां जुहोत्यथैनं कुशतरुणेनोपहत्य जुहोतीति॥ कपणप्रभृति सह सोमेन सोमाद
ता समानमासादनादि कर्तव्यं॥ सोमद्रव्ये विकारश्च प्रकृतावप्यूहः प्रवर्तत एव॥ चमसोन्नयनकाले वाहृत्य
दध्नो गृह्यते चमसमन्वन्नयेत्॥ विकल्प एवायं॥ तुल्यशास्त्रत्वात्॥ हूयमाने अनुकुशतरुणेन जुहोत्यहं त्वद
स्मीत्यहं त्वदस्मीति॥ ॥ इति कर्कोपाध्यायकृतौ ज्योतिष्टोमः॥ दशमोऽध्यायः समाप्तः ॥ उं सिद्धि ॥
वृत्यस्त्वनतः॥ आध्वर्यवमनुविहितमतः परं ब्रह्मत्वं व्याख्यास्यत इति॥ वाग्यतः कर्माणि वर्तमाने। तच्च सोमि
कोऽष्टिकपशुकेषूक्तमेव॥ हिरण्यवत्याः हुतायां दक्षिणेनानुगच्छत्याकथनात्। हिरण्यवत्या आहुतौ हुतायां दक्षि

कर्क- णतो व्यवस्थितो नुगछत्याक्रयात्। क्रीते माऊतीन्प्र पूर्वेणानः परीत्या परेण वा दक्षिणो नुगछत्यानिधानात्।
१३ क्रीते सोमे परार्थतया भाउयात्वा दक्षिणतो व्यवस्थितेमनः पूर्वेण परेण वा गत्वा दक्षिणो नुगछत्या सोमनि
धानात्॥ दक्षिणाग्निं गाः परेण धर्मो दक्षिणाग्निमपरेण वा अवगेषा दक्षिणेनेति संप्रदायः॥ आन्येत्वाह
वनीयं दक्षिणेनेति विकल्पमिछंति॥ दर्शपूर्णमासयोर्दृष्टत्वात्॥ तत्पुनर्नातीव युक्तरूपं। नह्यत्र दर्शपूर्णमा
सिकी धर्म्मप्रवृत्तिरपूर्वत्वात्॥ स्रुवंपजुहरिष्यत्याहवनीयदेशं दक्षिणेनास्ते वेदिसहितः स्रुवंपजुहरिष्यन्न
ध्वर्यौ आहवनीयदेशं दक्षिणेनास्ते वेदिसंलग्नः॥ एवं सर्वत्र प्रागग्नीषोमप्रणयनात्॥ आहवनीयदेशं दक्षि
णेनास्ते सर्वत्र ग्रहणात् पूर्ववत्त्व पूर्वेषु च॥ कर्म्मणः कर्म्मणो वा सहितस्तत्र देवा चेति॥ दक्षिणत आस्ते। अ
त्रैवैके तत्र देवात्वेत्येति वहिर्वेद्यो वेछंति॥ अपरे त्वंतर्वेदावपीति॥ विप्रतिपत्तिः॥ आहवनीये प्रणीयमाने प्रति एम-
रथ्यस्य दूरदशात्रुवंतन्नौ॥ अनुगछति॥ सर्वत्रैके॥ प्रणयनोद्देशेन विधानात्॥ तत्पुनरयुक्तं॥ प्रणयनविशेषे वि १३
हितत्वा। तस्माद त्रैव च॥ स्तीर्णायां यथार्थमेत्यास्ते दक्षिणतः। नियमार्थमिदमुक्तं॥ अग्नीषोमप्रणयनायोत्तरे २५१

णाधिष्ण्यान्छालाद्वार्यं पूर्वेणेत्यास्ते दक्षिणतः॥ शालाद्वार्यस्यैव॥ हुते च सोममादायाग्निमंत्वेति॥ हुते चैवैसर्जि
ने सोमं गृहीत्वा। वशब्दाछालाद्वार्यं पूर्वेणाग्निमत्वेति॥ यजमानो वा सोमं हरेत्॥ तुल्यशास्त्रत्वात्॥ अन्यस्मै
प्रदाया निहिते यथेतमेत्यास्ते दक्षिणतः॥ अन्यस्मै प्रदाय सोममनिहिते ग्रेउत्तरेणाधिष्ण्यमेत्यास्ते तस्यैव
दक्षिणतः॥ हुते च सोममादायाहवनीयं वानीत्या हुते वैसर्जिने सोममादाय॥ वशब्दादन्यस्मै प्रदाय सोममा
हवनीयमतीत्य च शब्दात्तास्ते दक्षिणतः॥ अपरणत्रैग्नीषोमप्रणयनवदिछत्॥ यदुक्तं भवति। उत्तरेण
धिष्ण्यां छालाद्वार्यं च पूर्वेणेत्यस्मिन्वा दक्षिणत आस्ते॥ इत्थन्नाहवनीयस्य दक्षिणतः॥ विप्रुषां होमः
हुत्वा प्रतिहर्त्तारमन्वारभते वा दीक्षितः। विप्रुड्ढोमकाले अदीक्षितः प्रतिहर्त्तारमन्वारभेनवा॥ नवेति वि
कल्पः। दीक्षितस्तु नियोगत एव प्रतिहर्तुरन्वारंभः॥ प्रस्तोत्रामंत्रित एतं ते देव सवितस्तत सवितुः प्रसव
इत्युक्त्वा प्रसौति॥ ब्रह्मं स्तोष्याम इत्येवं प्रस्तोत्रामंत्रितः एतं ते देव सवितरित्युक्त्वा स्तत सवितः प्रासवइ

कर्क- १४ तिप्रसौति॥ अस्यप्रसवार्थत्वात्॥ देवसवितरेतद्बृहस्पते प्रेतिवा॥ उत्कास्कन्नसवितुः प्रस--- प्र
सौति॥ रश्मिनासत्यायेतिवाप्रतिमंत्रं॥ अतिस्तोत्रंप्रतिमंत्रंस्कन्नसवितुः प्रसवइत्येवप्रेमेवप्रसौति॥ अ
स्मिंश्चपक्षे अग्नीषोमीयमस्यैवावृत्तिः। मंत्रांतरामधवात्॥ येनप्रवेशनंतस्मित्सर्पणसदसियेनद्वारेणप्रवेश
नमंगीकृतं॥ तस्मिन्नेवसर्पणं। यदुक्तंभवति॥ द्वार्ययोरभिमर्शने। पूर्वेणयूपंपरीत्यापरेणचेत्॥ अपरे
णचेद्द्वारेणप्रवेष्टुमिच्छति॥ ततःपूर्वेणयूपमिति॥ पूर्वेणचेदपरेणयूपं॥ प्रशास्तर्दक्षिणआस्तेपरेण
धिष्ण्यानितरे अधिकारात्ब्रह्मपुत्रपा आसते॥ नेष्टाचः वशाद्वादपरेणधिष्ण्यानास्ते॥ अध्वर्युपुत्रवता एम- १४
त्पृथक्त्वेनोक्तं॥ सर्वि॰ स्थितसंचरः प्रशास्तृधिष्ण्यवोत्तरेणपवमानेविम॰ स्थितसंचरः॥ अपरिसमाप्त
२५२

कर्क- १५ सवनेसंचरः॥ अपवमानेप्रशास्तृधिष्ण्यवोत्तरेणेति॥ वादक्षिणेन॥ पवमानार्थंतुसमाप्तेचसवनेदक्षिणे
नैवेति॥ सर्व॰ स्वमितरेइतरेपुरुषायथात्वंधिष्ण्यानेवमेवागच्छंति ॥ ॥ उपाध्यायकर्ककृतौकातीयसूत्र
भाष्येज्योतिष्टोमः समाप्तः॥ एकादशोध्यायः समाप्तः ॥ पूर्वार्द्धंसमाप्तमिति श्रीरस्तु॥ ॥
श्रीसम्वत् १९३७ भाद्रपद कृष्ण २ ॥

एम- १५
२५३

३५००

कर्कभाष्य

द्वादशाध्याय ६८

३१२ प२८

द्व० ९

॥ श्रीगणेशाय नमः ॥ ॥ तु अत्यर्थमनुविधिस्तु नाचार्येण ज्योतिष्टोमानुविहितः॥ इदानीं श्रुतिमंत्रपाठावसरप्राप्तो द्वादशाहोऽनुविधी
यते॥ तत्र श्रुतिपाठः ऋग्वेदे हवै देवा अग्रे सदशा अप्रु रिति॥ श्रुतिमास्य ग्रहविधानं द्वादशाहे। तान्वै पृष्ठैः षडहं गृह्णीयात् पूर्वं अहरेणे
वमादि॥ मंत्रपाठोपि च। अग्नेप स्वस्त पाठ त्रिष्टुत्रो जस एवमायति ग्रा स्य ग्रहमंत्राः। ततो द्वादशाहस्य श्रुतिमंत्रपाठावसर इति॥
तत्र तावदुक्तमप्राप्यं थमृधिकरणमारभ्यते॥ ॥ ज्योतिष्टोमधर्मा एकाहद्वादशाहयोस्तुल्यादर्शनात्॥ ज्योतिष्टोमस्य धर्मा ज्यो
तिष्टोमधर्माः। ज्योतिष्टोमशब्देन च रूपाख्या हारियोजनपर्यन्तो ग्रहयस्तोत्रास्तो विधीयते॥ ज्योतींषि यस्य स्तोमाः स ज्योति
ष्टोमः। स्तोमैः सोमो याज्यत इति। ते च सोमयागस्य स्तोमा ग्रहं वा गृहीत्वा च मस्तोत्रं न्नीय स्तोत्रमुपाकरोतीति॥ तस्माज्ज्योतिष्टोमशब्देन
सोमयागोऽभिधीयते॥ नन्वेवं सति ऐन्द्रवायवादीनामप्रकृतिविकारेषु भवति॥ नैष दोषः। उद्भिदा यजेत बलभिदा यजेतेति वाऽन्यकृत
सामान्यात्॥ ज्योतिष्टोमिकाविध्यंतः प्रवर्त्तते। उद्भिदादिषु यागमात्रं श्रूयते॥ न च द्रव्यदेवतामंतरेण यागः संभवति॥ अतो द्रव्यदे
वतस्यापि प्रवृत्तिरिति॥ यत्र पुनर्द्रव्यदेवतासहितस्य प्रवृत्तिरुक्ता॥ इह पुनर्न तथा॥ इह हि यागमात्रमेव श्रूयते। तच्च द्रव्यदेवतामंत
रेण न भवतीति चेन्नातो द्रव्यदेवतमपि साधनत्वाद्भवति। तेन तस्यापि प्रवृत्तिरुक्ता। तस्य चैव धर्मा एकाहेषु द्वादशाहे च प्रव
र्त्तेत॥ एकाहे ज्योतिषे रूपाच्च द्विवचनं॥ यद्वैकस्मिन्नेकाहे धर्मप्रवृत्तिहेतुः समस्तवैकृतस्य पाकशा शेषधर्माणामनाम्नाने॥ अन्यकेषा

राम० १

२५३

मान्येन च ग्रहणं॥ द्वादशाहेष्वेकस्मिन्नेव ज्योतिष्टोमिकधर्मप्रवृत्तिः। ततोऽन्यत्राहर्गणेषु धर्मप्रवृत्तिं वक्ष्यति॥ तद्गुणाश्चात्र दर्शयति वाज
पेयाऽहर्गणे माहेन्द्र थाच हरणादि करोति॥ यथा वहरणावसरविक्षिपरे वा क्षेमाहेंद्र दर्शयति॥ तथा तवै प्रातःसवने गृह्णीयाद्याग्रह
न्ति॥ षोडशिनोवसर विधान आग्रयणं दर्शयति॥ तथा माध्यंदिने वैनो सवने गृह्णीयात् छं गृह्णीतेति॥ श्रुतिग्राह्यावसर वि
क्षिपरे वा क्रोड छंद दर्शयति॥ एकत्र चावस्थित लिंगा स्थालीपुलाकन्यायेन सर्वत्रागमकं न्यायस्य तुल्यत्वात् ज्योति न्यायो
धर्माणामनाम्नानमपेक्ष्याचाश्यकाव्यकृत्वसामान्येन ग्रहणमिति॥ न्यायस्तु पूर्वाभिहित एव सामर्थ्यादिति॥ एवमतोऽश्री
दनावैकृत्यः समर्थो भवंति॥ इत्यथा सापेक्षः सत्पोऽनर्थिका एवस्फुरिति॥ आनुमानिकस्यातिदेशापवादत्वेन दमुच्य
ते॥ प्रथमस्य व्रात्यस्तोमस्य समाये त्रेषु वचनात्॥ व्रात्यस्तोमादिषु प्रथमस्य धर्मा उत्तरेषु प्रवर्त्तेरन् ज्योतिष्टोमिकाः। उताव
चनात्॥ उच्यते। अनेनेति वचनं नामधेयं नामधेयादिति पर्यः। तुल्यनामत्वात् तत्रैव प्रतीतिर्भवति। प्रतीत्या च धर्मसंबंधो भवति
नान्य श्रुतिः। समाख्यैः सोमकपालं त्रिवत्संस्था उमभिधाय समाख्यैः उत्तरेष्वागोः सोमकाणां न्याय्यः॥ तच्चैवमेवोपपद्यते॥ वचना
तिदेशस्तु वक्ष्यति॥ इष्टश्चतव दिति॥ नन्वेतत्पूर्वमभिहितमेव दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यादित्यत्रानुमानिकव
चनातिदेशः॥ वैश्वदेवधर्मा अपि तु मास्यपि इति प्रत्यक्षवचनातिदेशः। सोमाश्चावभृथ इति नामातिदेशः। त्रिः प्रकारोऽप्यतिदेशः

कर्क० १ कात्कि मर्थं पुनरिहोच्यते॥ सत्यमेतदेवं तत्र व्यक्तचोदनाविषयं रहस्यव्यक्तचोदनाविषयलिंगोपन्यासार्थोयमारंभः॥ नहि व्यक्तचोदनालिं
गान्निरीहगामिका भवति॥ तस्माददुनरुक्तता॥ ॥अग्निष्टुत्सं चाचेशब्दात्प्रथमस्य धर्म्माः प्रवर्त्तेते नामधेयादेवात्र च अग्निष्टुद्उत्वमे
वनाहि॥ एक एवाग्निष्टुत् तत्र दग्निष्टुदग्निष्टोमस्तस्यैवापव्यास्त्रीकविंशमग्निष्टोमसाम अग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो य
जेतेत्यभिधाया॥ एतस्यैवोरेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति॥ एतस्यैवेति सर्वनामशब्देन स
हाग्निष्टुत्कार्यान्तरे विधीयते॥ तस्मादेक एवाग्निष्टुदिति॥ एवं प्राप्त आह॥ एके तन्त्रे श्रुति॥ प्राप्तकर्म्मानुवादेनानेकगुणविधानासं
भवात्॥ नहि पूर्वस्याग्निष्टुतो रेवत्यः संति॥ ता विधातव्याः॥ तासु च वारवंतीयं तच्चाग्निष्टोमसाम्नः कार्यं पशुकामो वे ति वा क्वमेदः कृ
तातरपि हेतुः संगुणकर्म्मविधानात्र षदोषो भवति॥ तस्मात्स्युतिफलमग्निष्टुतो द्वैतं॥ ॥प्रकृतमिदानीमभिधीयते॥ द्वादशाहः
सत्रमहीनश्च॥ सत्र विशेषमाह॥ ॥आसत उपयंतीति सत्रलिंगं यजतिरत्यहीनस्य द्वादशाहमृद्धिकामा उपेयुरिति॥ तथात्रयो
दशरात्रमासीरन्निति सत्रलिंगं॥ द्वादशाहेन प्रजाकामं याजयेदित्यहीनलिंगं॥ अस्यानुकथ्यनप्रयोजनं॥ सत्र सत्रात्मके धर्मदा राम० १
तत्वेन प्रवर्त्तते॥ अहीनेवाहीनात्मकः॥ ॥उभयतोतिरात्रं सत्रमुपरिष्टाहीदनस्य॥ ७॥ यजमानाः सर्वे सत्रेषु यजमाना एवस
र्वे सत्रेषु कर्त्तारो भवंति॥ ये स्त्वि जस्ते यजमानाः इत्यनेनार्त्विजीनान्यदाप्यो लक्षणयाऽन्ये यजमानाः कर्त्तृत्वेन विधीयंते॥ ॥२५४

अदक्षिणानि च स्वामियोगात्॥ तानि च सत्राण्यदक्षिणानि भवंति॥ नहि कश्चिदात्मनैवात्मानं परिक्रीणाति॥ ॥गृहपतिर्याजमा
नमपुख्यत्वात्॥ याजमानं यत्कर्म्म तद्गृहपतिः करोति॥ कर्म्मान्तरेतत्स्याद्रुक्तत्वात्॥ इतरेषां वाध्वर्य्यवादिषु योगात्॥ ॥दर्शनाच्च॥ इष्य
ते वा यमर्थो यथा गृहपतिर्याजमानं कर्मेति॥ तस्माद्यदि बहवो दीक्षेरन् गृहपतय एव व्रतमभ्यसिच्य प्रयच्छेयुरिति॥ ॥सर्वे संस्का
रात्प्रत्येकत्वाच्छ्रायमुपदेशश्च॥ यः संस्कारकं कर्म्म तत्सर्वं प्रत्येकं कस्यचित्संस्कारप्रतिलोपो मा भूदिति॥ ॥दर्शनेवचनात्॥ य
दुदर्शनमुक्तं तद्वचनं॥ ॥अविभवात्तु गृहपत्यन्वारंभः॥ यत्र पुनः पदार्थे दक्षत्वस्याविभवः पुरुषार्थरूपताऽपि न स्यात्॥ यथा यत्रान्वाधा
नेममाग्नेवच्चैर्दिक्षु [illegible] एवमादि॥ तत्र गृहपतेः कुर्वतोऽन्वारंभः कर्त्तव्यः॥ सर्वैरवहितकृतं भवतीति॥ ॥परार्थेष्वेकः कृतत्वात्॥
यत्पुनः कृत्वमिति निर्वर्त्यार्थमेव कर्म्म॥ यथा पात्रासादनमाज्यावेक्षणं वा॥ तत्रैकस्यैव कर्तृत्वं॥ कृतत्वात्पदार्थस्य॥ ॥अग्निं चे
[illegible]समारोह्य गृहपतिर्मथ्ये मन्थत्यर्द्धशरस्ततो दक्षिणोत्तराः॥ ते यद्यग्निं चेष्यमाणा भवंतीति वचनाद्विष्यमाणारम्भकं॥ स
मारे[illegible]ति न सर्वकालतामान्नेत्यवादिघ्नो नस्समानकर्तृकतायांचोदको माबाधाति॥ गृहपतिर्मथ्यमथनं करोति॥ अर्द्धशइतिरेद
क्षिणोत्तरामंथंति॥ ॥गृहपत्याहवनीयेऽगारप्रासनं तत्र प्राजापत्यः पशुः॥ तत्र विहारे प्राजापत्यः पशुर्भवति॥ पुनर्गृहेणावाह
नीतोप्राजापत्यस्य नियन्तृता याचाश्वमेधे नियमदर्शनं भवति॥ प्राजापत्यमालभ्यासादं ता श्पयइति॥ ॥आत्मेन पत्नीसंयाजा

२६३

कर्क ३

गृहपतिवर्ज्जं। गृहपतेरेव गार्हपत्ये याजमानं पत्नीःसंयाजयंत्या येनेतरे प्रतिपन्ना आसन्निति वचनात्॥ ॥तर्हे देवैः॥ दीक्षापाःपशोश्चैककाल
त्वोच्यते॥ तत्र दीक्षाकाले पशुः कर्त्तव्यः न पशुकाले दीक्षा॥ एवं सोमस्य कालविरोधान्न भवति॥ स्वतन्त्रत्वाविरोधात्॥ ॥अथ यत्रै नियतक्रियाम
मारूढनिर्मथितेषु सर्वत्र॥ पशुदीक्षयोरेककालताऽशक्या ह्येककाले पशुं कृत्वा समारोपनिर्मथनपूर्विकानि पत्नीनां क्रियाः। सर्वत्रग्रहणाच्चेति
दृष्टिमं नपक्षेषु॥ ॥दीक्षाकालन्तु दग्धशायां पूर्ववन्मंथनं॥ तदग्धशायामिति यमः॥ पूर्ववदिति यथा पशावुक्तं॥ क्षामगार्हपत्ये प्रासनमत्र॥ अ
गारस्य भवति॥ ॥आहवनीयस्ततः उद्ध्रियेते॥ दक्षिणाग्निश्च तुल्यन्यायत्वात्॥ तत्र दीक्षा भवति॥ ॥उपवसथप्रभृति प्रागग्नीषोमप्रणयना
उपशमय्य चिनोत्येनां शालाद्वार्याद्दक्षिणोत्तरां धिष्ण्यवत्॥ अग्नीषोमप्रणयनात्प्राग्दक्षिणोत्तरान् गार्हपत्यानुपशमय्य शालाद्वार्याद्दक्षि
णोत्तरोश्चिनोति। गार्हपत्यान्धिष्ण्यवत्॥ श्रुतेः॥ अथेतरेभ्य उपवसथे धिष्ण्यानिति॥ धिष्ण्यानित्यसत्यपि वतिप्रत्यये वत्यर्थो गम्यते॥ अत
स्मिंस्तद्दृष्टस्य तद्वदति देशार्थत्वात्॥ ॥वायव्यान्ते गृहपते॥ वाशब्दात्पाक्षाद्विपरिवर्त्तते॥ न धिष्ण्यवच्चिनोति॥ किन्तर्हि पर्यन्ते गृहप
ते गार्हपत्यस्य चयनं तथेतरेषामपि॥ गार्हपत्याविशेषात्॥ धिष्ण्यशब्दस्तर्हि कथं स्थावचनरत्यदोषः॥ ॥आग्नीध्रीय उपयते गार्हमे
केके हरं प्रतिचिति शालाद्वार्यात् उपयत एवैष आग्नीध्रीयाभिर्भवत्यथैत एकैकमेवोल्मुकमादाय यथाधिष्ण्यं विपरायन्तीति ते स्वयंग
मानाए वा॥ ॥प्रत्यग्नीसक्वनीयपुरोडाशाभ्यो हविरुच्छिष्टमसस्समाप्या इति॥ नानापुरोडाशताच्च। द्वादशाहिकोधर्मस्तत्राम्नानात्॥ प्रयोगे

राम०
३
२५५

नांतिकाले दृक्षाहिकेषु भवति॥ ॥पत्नीसंयाजान्तं पूर्ववद्भवंति॥ ॥गृहपतिं वा पर्युपविश्य मंथन्ते। वाशब्दो विकल्पार्थः॥ ॥गृह
[illegible] गृहमः प्रथमः सर्वत्र। सर्वपक्षेषु॥ ॥जातंजातं गृहपतिर्गार्हपत्ये प्रास्यत्यमयत्र। पर्युपवेशनपक्षे पशौ दीक्षायां चोभय
ग्रहणात्॥ ॥उपवसथप्रभृति तुल्यं सर्वेषु। उपवसथप्रभृति यदुक्तं तत्पक्षत्रयेपि तुल्यं भवति॥ नानागार्हपत्या इति प
ठितं भवति॥ ॥तृतीयपक्षान्तरमुच्यते॥ अरण्योर्वाऽरुगृहपतेर्य इति। अग्निं जनिष्यसनः सह यदनेन यज्ञेन जेष्यामो नेन पशु
बंधेन तन्नः सह सहेन। साधु कृत्वा नानापापकृत्वा य एवं करवन्नस्यैवं तदिति फल्का गृहपतिः समारोहयते स्वा प्रथमं। अथे
तरेतीयं गृहपतेरेवारण्योः समवदंत इति वचनात्॥ गृहपतिः समारोहयते स्वावाग्नीप्रथमं॥ ॥यथास्वं वेतरे॥ गृहपतिर्वेति विक
ल्पः। गृहपतिं हि प्रकृत्य श्रूयते॥ अथेतरेभ्यः समारोहयति स्ववैव समारोहयंति॥ अस्मिन्नेव पक्षे अयमपरो विशेषः॥ ॥री
[illegible]ने संवादप्रभृति पशुबंधस्थाने सत्रे एति। पशौ। अरण्योर्वाऽरुगृहपतिरित्येतस्मिन्पशुबंधेनेति पतत स्थाने सत्रेणेति
[illegible]॥ ॥एकाहवद्दीक्षमे शालागार्हपत्यपुरोडाशपत्नीसंयाजाः॥ एकाहवदिति उत्तमे पक्षे वा प्राग्वंशशाला भवति वाद
वशीति विकल्पः॥ उपवसथप्रभृति॥ नानागार्हपत्येषु प्राप्तेषु विकल्पेन गार्हपत्यैकत्वमुच्यते॥ पुरोडाशपत्नीसंयाजाना
मप्येवमेव॥ ॥एकपुरोडाशेषु चरुत्वा समवादेदं प्रंचशराचमादने निर्वपेत्पुरोडाशं चायायोदनीपं तिपयपूपीयतीति

२५६

[illegible] ष्टोऽऽ [illegible] थं नामवृत्तस्य संभवस्यादिति ॥ ऐंद्रं पंचशरावमोदनं निर्वपेत ॥ प्रोऽऽशं वा ॥ पयोदनीयंति विकल्पेन ॥
४ [illegible] यैतद् यमिक्षेति ॥ तस्य वास्य यागशेषस्य पुरुषार्थरूपता ॥ न पुरुषार्थस्य यागार्थता अदृष्टार्थत्वात् ॥
[illegible] भवति नैंद्रं ॥ यदा रूढाद् द्वादशोपसदश्च भवंति ॥ अध्वर्युगृहपतिदिरूपतिब्रह्मादीश्च ॥ ॥ दीक्षो दीक्षा द्वादशोपसद
[illegible] प्रतिप्रस्थाता ॥ ॥ प्रतिप्रस्थात्राद्यान्नेष्टा ॥ ॥ नेष्टुर्दीनुन्नेता ॥ ॥ उन्नेतारं ब्रह्मचारी स्नातको न्यो वा ब्राह्मणो न पूतः पाच
यति श्रुतेः ॥ आप्यान्नेतारं स्नातको वा ब्रह्मचारी वाऽन्यो वा दारादीनो दीक्षयति न पूतः पावयेदिति स्माऽऽह इति ॥ आप्यो वा ब्राह्म
णा इति ॥ ब्राह्मणग्रहणं ब्रह्मचारिस्नातकयोरब्राह्मण्योरपि ब्राह्मणप्राप्त्यर्थं ॥ उन्नेतृसंबंधार्थं च ॥ उन्नेतृसंबंधो ब्रह्मचारी
स्नातकश्च यथा स्यादिति ॥ ॥ अनुपतिपत्नीरुन्नेतरुन्नेतः । दीक्षयति ॥ ॥ त एवोन्नेतुः ब्रह्मचर्यादयः पत्नीर्दीक्षयंति ॥ ॥
दक्षिणाकाले कृष्णाजिनानि कृत्वा नारदक्षिणापथेन जयंतो गच्छंति यन्मे गदा पुषः परागितो गानातेग स्व दक्षिणान्नयामाती
रमहममुमामुष्यायणममुष्यपुत्रममुष्याः पुत्रं कामाय दक्षिणां नयामीति ॥ अमुमामुष्यायणममुष्यपुत्रममुष्याः पुत्र मि
ति पश्चादमुञ्चारणं ॥ स चायं सत्रधर्मः अतश्चाहीनेन भवति ॥ एकाहिकेषु च न भविष्यति ॥ ॥ पृष्ठ्यः षडहः प्रथमाग्निष्ट राम०
[illegible] र्थः [illegible] ष्ठ [illegible] रे । षष्ठाम कृत्वा पृष्ठ्यस्तीयं संज्ञा ॥ सा च वैदिकी दृश्यते च तया संव्यवहारः अभिप्लवं दूर्वं उरस्ता ४
२५६

द्विवक्त पर्यंति [illegible] ह्यमुत्तरमित्येवमादि ॥ ॥ तत्रातिग्राह्यग्रहणं अहे पूर्वेग्निपवस्यो तिष्ठन्नदश्च मित्यन्वहमेवैकं ॥ अतिग्राह्यान्हिपृष्ठ
[illegible] नान्वेष्टव्य षडहे गृह्णीयात् पूर्वे अहे आग्नेयमेव प्रथमे हन्नैंद्रं द्वितीयेस्मा ॥ र्यं तृतीयरति ॥ ॥ उत्तरे वा अहे अतिग्राह्यग्रहणमि
[illegible] वान्यहे ॥ तानुहैक उत्तरे अहे गृह्णातीति श्रुतेः ॥ ॥ उभयोर्वा अह्नो ग्रहणं ॥ एवमपि हि श्रूयते ॥ पूर्व एवैनानश्व हे गृहीत्वा थोत्तरे अहे
गृह्णीयादिति ॥ पुरुत्रयं विकल्पेन ॥ संप्रदाये तु पक्षद्वयं ॥ पूर्वे वा अहे उभयोर्वेति ॥ ॥ माहेंद्रमनुहोमः ॥ अतिग्राह्याणां ॥ ॥ अग्ने वर्चस्व
न्निओजिष्ठः सूर्यभ्राजिष्ठ इति मंत्राणां यजमानैः ॥ सह होमाभिषवकर्तुः ॥ यजमानानामपूर्वमंत्रविधानं । नहि तत्रत्यस्याम्नायः ॥ ॥ पृ
ष्ठकाले रथसंमार्जनं प्रथमे दक्षिणेन वेदिं माहेंद्रग्रहणयाज्यायास्तोत्रे पृष्ठ्ये । तत्कालो दक्षिणेन वेदिं रथसंमार्जनं पृष्ठ्यस्य प्र
थमेहनि ॥ ॥ द्वितीयेऽहन्युद्भिशब्देनोपाकरणं ॥ द्वितीयेऽहनि उद्भिशब्देन पृष्ठ्योपाकरणं ॥ ॥ तृतीयेऽपवाजनेन उपवाजना
[illegible] नकोऽच्यते ॥ ॥ चतुर्थेरणिभ्यां मंथनं चोत्रादि सोऽहमश्च ॥ चतुर्थेऽहनि अरणिभ्यां मंथनं चोत्रातुरो होमश्चाहवनीये ॥
॥ ॥ पंचमे शावकृप्योपादश्चाऽऽउपाकरणं ॥ ॥ षष्ठे सावासिनेनासावासिनशब्दार्थोऽप्रसिद्ध इत्यत आह ॥ ॥ मार्तभिर्वेसंस्न्यस
दः पूर्वेण [illegible] वर्तयंति स्वयमुपाजेप्याऽवाचमयजप्यं न वाहणं रथं युञ्जाथामि हवां विमोचनं ॥ पूर्ववेदि हविर्धानादिकेमथा
सोमं पिवत वाजिनः ॥ इति ॥ सा वाध्वर्युप्रतिप्रस्थात्रोः तान्याहि प्रेषितान्यग्रकृतानुक्ते होतरेत यजेति ॥ ते न चाश्विना विष्टोऽस्य

कर्क ५ मपि द्विवचनांतत्वात् आ[illegible]ग्निनयणएवेतिगम्यते॥ ॥होतृप्रत्ययप्रतिगरः। मोहं इ यह शास्त्र॥ ॥प्राकृतं चान्यार्थत्वादितरेषां प्राकृतं च प्रतिग
रपदं प्रवर्त्तते॥ ॥अन्यार्थत्वादितरेषां होतृकाणां प्रतिगरपदानाम् इष्टार्थत्वात्॥ एवं च कृत्वा स्तोत्रोपाकरणमपि प्राकृतं प्रवर्त्तते॥ ॥अदृष्टार्थ
त्वा[illegible]थमंसारणादीनां॥ ॥पउहोतॄन वऊ वदेत्॥ नान्यं पृच्छेत् नान्यस्मै प्रब्रूयात्। न च कृत्वर्थं स्वाध्यायविषयमिति संप्रदायः। तत्र हि पृष्ट
प्र[illegible]व्या नानि संभवंति॥ ॥उहोतयहणाच्च॥ तदंतएव भवति॥ न विकृतेषउहे॥ ॥मधोः प्राशनं। घृतस्यवात चैतद् ममैमात्रं दृष्टार्थत्वेस
भवात्॥ ॥उच्छ्राप्य देशमात्रेयउत्तरोउत्तरे छंदोमास्त्रयउच्छ्राः॥ ॥अत्यग्निष्टोमो विदाकां दशमं। अत्यग्निष्टोमसस्थमविवाक्यसं
मं दशममहर्भवति॥ ॥पत्नीसंयाजांतान्यहान्यत्यवरूं॥ तच्चैतत्पदार्थपर्यवसानं॥ न तदंतागरीति विधानं। अवभृथस्य दीक्षोत्मो
चनार्थत्वात्सर्वांतेऽवभृथः॥ तत्र समिष्टयजुरांतपर्यवसाने प्राप्ते पत्नीसंयाजांतान्यहानि संतिष्ठंत इति वचनादिहपर्यवसानं। द्वा
दशाहस्य द्विकामा उपेयुरिति युगपत्परिसमाप्तिरित्यत इदमुच्यते अन्यवजमिति॥ ॥उएकैको वाग्यतः सोमं रक्षत्यावाचना
[illegible]जे तेषामेकैक एव वाचंयम आस्ते वाचमाप्यायं सत्यापानया या तयाम्यान्नरमहक्लृच्चतरान्नं त्रराहः शेषभावं दर्शयति॥ ॥इतरे वि राम० ५
ह[illegible]ते स्वाध्यायापसमिध्रो वा इतरे दीक्षिताः स्वाध्यायार्थं समिदर्थं च गच्छंति। अथेतरे विसृज्यंते समिद्धारा वा स्वाध्यायं वा। स्वाध्याय
आनराहः शेषमतोनित्यः प्रतिषेधात्। वाशब्दार्थे दृष्टव्यां सोमरक्षिताविसृष्टएव स्वाध्यायं करोति। समिधश्चास्यानीयंते॥ कार्यार्थ

त्वादुभयोः॥ ॥तत्राप्यशनं। अशनमपि तत्र गतानां भवति॥ तत्राप्यश्नंतीति वचनात्॥ ॥दशमेवासन्निधेः॥ दशमेवाऽहनि समितस्वाध्यायोप
गमो भवति॥ ॥तस्मिन्निधेहि शिष्यते॥ वासर्वत्र प्रकरणमंतासन्निधिः क्रमः स प्रकरणेन बाध्यते॥ तस्मात्सर्वत्रैव॥ ॥अस्तमिते समिदाधानस
र्वेदुः। तर्वेचहः स्यजमाने अग्निश्च प्रतिपत्तव्यः शाखांतरात्॥ ॥दशमेऽपराह्णेपउपस्पृश्य शालाप्रवेशनं। दीक्षितानां॥ ॥शालाद्वार्य
न्वारब्धेषु हरतिरिति जुहोतीति प्रसमन्वारब्धेषु जुहोतीति श्रुतेः॥ ॥अपरस्मुपस्त्तजन्निति। आज्यतिं जुहोति॥ ॥उत्तरेणाप
रिक्रम्यापरेणोहे विर्धानं प्रविश्यानरस्यहविर्धानं प्रविश्योत्तरस्य हविर्धानस्यापरकूवरीमालभ्य सत्रस्यर्द्धिगायंति सत्रस्य ऋद्धि
रिति। शालाद्वार्याउत्तरेण परिक्रम्य अपरेणद्वारेण हविर्धानं प्रविश्य उत्तरस्य हविर्धानस्य दक्षिणामपरकूवरीमालभ्य सत्रस्य
र्द्धिगायंति सत्रस्यर्द्धिरित्याऊः सर्व एव दीक्षिताः॥ ॥उत्तरवेदिश्रोण्या वोत्तरस्याः सत्रस्यर्द्धिगानं कुर्वंति। वा शब्दाद्विकल्पः। शास्त्रस्यतुल्य
त्वात्॥ ॥पुवंतमिति दक्षिणस्याधोऽक्षं प्राचो निःक्रामंति॥ ॥पुवंतमित्यनेन मंत्रेण दक्षिणस्य हविर्धानस्य अधोऽक्षं प्राचोनिष्क्रामंतिप
सद[illegible]श्य पूर्वेणास्वासनेषूपविशंति। पूर्वेण द्वारेण सदः प्रविश्य धिष्ण्याऽव्यवायेन स्वासनेषूपविशंति॥ ॥ग्रहं गृह्णाति प्राजापत्यं वा
पृथिव्यामस्वेणग्रहणसादनस्तोत्रोपाकरणहोमभक्षाहरणभक्षणानि मनसा कर्त्तव्यानि॥ ॥चतुर्होतृव्याख्यानं होतुः शंस्यं भवति॥
गृहपतिर्जानाति होतर्यऽजानति गृहपतिर्व्याचक्षीत॥ ॥प्रतिगृणात्यरात्सुरिमेयजमाना भद्रमेभ्य आयुष्मानेभ्यो भूदिति। चतुर्होतृव्याख्या

कर्क· ६

नेप्रतिगरः॥ ॥ब्रह्मोद्यंवदंति॥ तत्रप्रजापतेःकिमित्यतआह॥ ॥प्रजापतेरगुणाख्यानं। तत्स्तुतेर्थवादात्॥ प्रजापतिमेवतत्परिवदंतो॥ ॥अप्रतिमो
यावात तस्मादस्यप्रजापतिंपरिचरितुंप्रतिमैवनास्ति। तस्यविधिप्रतिषेधाभावात्॥ तस्मादसदेतत्॥ ॥आश्वमेधिकंवानामधेयात्॥ आश्वमे
धिकंवाब्रह्मोद्यं। कुतएतत्। नामधेयात्। नामधेयंहिब्रह्मोद्यमिति॥ तत्रैवप्रतीतिंजनयति॥ ॥अनस्तमितेगृहीत्वौडुंबरींवाचंयच्छ
न्ति॥ तत्रप्रतिपत्तिपरिसमाप्त्युत्तरकालंपत्नींजायानेहिसत्रोत्थानंदशमेहनिसशेषोत्थानंकुर्वतइति॥ ॥अस्तमितेनिष्क्रम्यापरेणान्त
र्वेदिमासतेप्रतिप्रस्थातावसतीवरीःपरिहरतीतिवचनात्॥ ॥वाग्विसर्जनंसत्रकामेनयेनकामेनसत्रमारब्धंतेनवाग्विसर्जनंमेनःका
मःसमध्यतामिति॥ ॥पृथक्कामेषुभूर्भुवरिति। वाग्विसर्जनं। यत्रअनेककामाःस्युःलोककामावाप्रजाकामावापशुकामावातेनै
ववाचंविसृजेरन्भूर्भुवःस्वरिति॥ ॥स्तुवत्स्यत्पाउपमाकृपस्वेत्युक्त्वासमिदाधानं। यस्ययस्यस्तुवत्स्यत्पाकृतानंस्तुवत्स्यत्पउपमा
कृपस्वेत्युक्त्वासमिदाधानंकरोति॥ ॥अपउपस्पृशनाद्यंतसत्रोत्थानं। सत्रोत्थानमितिनामधेयात्। तच्चसंव्यवहारार्थं॥ दशरात्रोऽस्मिन्नो
त्थानमिति॥ ॥अतिग्राह्यषोडशिप्रसंगेनेदमुच्यते॥ ॥४॥ अंतरायणपात्रेभ्योवागंतस्थानंग्रहणं। आग्रयणाच्चान्तरेणागंतवाग्र
हणाद्वा॥ ॥प्रातःसवनेतिग्राह्यान्गृहीत्वाषोडशिनंवाद्विरेणचतत्सक्तिनातिष्ठपुस्वाहेतिवा। तान्वैप्रातःसवनेगृह्णीयादाग्रयण
णंगृहीत्वेतिवचनात्। ततःषोडशिनंगृह्णाति॥ ॥वाद्विरेणचतत्सक्तिनातिष्ठपुस्वाहेतिवामंत्रविकल्पः॥ अतिग्राह्यवत्तस्या

याम०
६
२५८

मावाच्चवकवचनमुच्चारणार्थं। अतिग्राह्यषोडशिनोःपौर्वापर्यंशाखांतरात्। अस्यापिहिग्रहणमाग्रयणादुत्तरमेव। तंवैप्रातःसवनेगृह्णी
यादाग्रयणंगृहीत्वेति॥ ॥माध्यंदिनेवाग्रयणादुत्तरः। षोडशीगृह्यते। एवमपिहिश्रूयते। माध्यंदिनेवैनंसवनेगृह्णीयादाग्रयणं
गृहीत्वेति॥ ॥धाराग्रहान्तेवातिग्राह्यान्। माध्यंदिनेवैनान्सवनेगृह्णीयादुक्थ्यंगृहीत्वेतिश्रुतेः॥ ॥एतस्मिंस्तोवोपाकरिष्यन्पृष्ठ्यां षो
डशिनंगृह्णीति॥ पृष्ठ्यमुपाकरिष्यन्नितिग्रासान्गृह्णातीतियोगविभागः। एवंचातिग्राह्याणांकालत्रयं॥ षोडशिग्रहस्यतुचत्वारः
कालाः। अंतरायणपात्रेभ्योतृतीयसवनेकएवपाठाच्चतुर्थःकालः॥ ॥अपानिधायांश्वदाभ्यग्रहणमौदुम्बरेणचतुःस्रक्तिना। अ
ंशुग्रहणेवाच्योऽदाभ्यग्रहणेति॥ तन्नियोगशिष्टार्थः॥ ॥अंशोःस्नूसीमासर्वेविहूसमाप्तिकंपदार्थजातं॥ ॥अनुच्छिसंश्चछत्रंपव
कृस्मार्णाकमेव॥ ॥अआदानाश्चनिवपनोपमर्जनस्रक्त्यग्रहणग्रहणाहोमान्हिरण्येचोपतिप्रति॥ अथहिरण्यमभिप्राणतीति
वचनात्॥ ॥उपयाम्यवाप्राहरणं। सचोपयविकल्पः। शास्त्रस्पतुल्यत्वात्॥ ॥सत्रसहस्रसर्ववेदसवाजपेयराजसूयविश्वजित्सर्वपृष्ठ
मदक्षिण्यग्रत्यायनमानः॥ ॥द्वादशवत्सरयोगमिण्पारदक्षिणा। सत्राऽदक्षिणत्वासत्राणामसत्रहरस्तुतं॥ ॥वृषणोऽदाभ्यग्रह
णात्। तन्नियोगशिष्टत्वाद्दाभ्यस्यहृतिरिक्तपेक्ष्यते॥ ॥आसिच्यनियाम्याःपात्रेष्वभिस्नूश्मीत्रीनंशूनवधायामपेत्वागापञ्चछंदसमिति
उत्तरमंत्र। अंशुपात्रेनिग्राभ्याःसुभीमास्तिव्यत्रीनंशूनवधायाग्नयेत्वागायत्रछंदसमितिप्रतिमंत्रं। मंत्राभावात्तूष्णीमितिलौकिकत्वादुच्चारण

२६०

कर्क. ७ प्रतिषेधश्च॥ उपयामः सर्वत्राविशेषात्।सर्वेष्वेवाऽध्ववधानेषूपयामो भवति॥उक्तएतत्॥सर्वैर्हि योगो विशिष्टः।यथा चैतद्यो परितनयेरणात
स्या उपयामस्यानुषंगश्च॥ ॥किंच॥ विग्रहादित्यग्रहप्रतिषेधाच्च॥विग्रहादित्यग्रहेषु च प्रतिषेधो भवति।तं वैनोपयामेन गृह्णीयादथयो नैतौ स्तो
द्वेष्विति।तथा आदित्यग्रहे।तं वैनोपयामेन गृह्णीयादन्येष्वेवेषु उपयामेन गृहीतो भवतीति॥तस्मादध्ववधानं प्रत्युपयाम इति॥ अन्ये पुन
रन्यथा वर्णयंति।उपयामः सर्वग्रहेष्वेव भवति॥यत्राप्यनाम्नातः॥उक्तएतत्।अविशेषाद्धि श्रूयते॥तद्य उपयामेन ग्रहा गृह्यंत इति॥ ॥विग्र
हादित्यग्रहप्रतिषेधाच्च॥एवं च सति वाऽन्ये ये सप्तदशस्तोमग्रहेषूपयाममिच्छेद्भवति।संप्रदाये पुनर्यत्रैवोपयामाम्नानं तत्रैव भव
तिनान्यत्रानच्छनेनैव सर्वविषयता भवतु।नेत्युच्यते॥न ह्येष विधिः यच्छब्दाभिसंबंधात्प्राप्तानुवादोयं।अध्ववधाने तु विद्यमानत्वादनुषं
गोऽनुमन्यते।विग्रहादित्यग्रहे अनुषंगस्य प्रतिषेधः तत्रोपयामो विद्यत एवेत्यभिप्रायः।उपयामगृहीतोसीन्द्राय त्वा बृहद्वते वयस्वत उ
क्थ्येत्थे॥आदित्यग्रहेष्वपि।उपयामगृहीतोसीति गृहीत्वा गृहीत्वा द्विदेवत्याननुगृह्णाति इति॥सर्वविषयोयमुपयाम इत्ययमेवाभ्यु
पगमः।नहि विग्रहादित्यग्रहेष्वनुषंगप्रतिषेधो युज्यत इति।तस्मात्सर्वविषयतोपयामस्येत्येवं बुध्यामहे॥ ॥अनुष्टुप्छरेत्याग्राधूनो
त्युक्तमिद्रुशीनां वेति गच्छन्नाहवनीयं तस्मैन रतिर्जुहोति।तस्मैत इत्यनेन मंत्रेण जुहोत्यर्द्धं॥ ॥अर्धस्तोमेनिद्र — शिलोमितिप्रति रामः
मंत्रेरेषां तरेणावहृतार्द्धसोमं जतो हि गृह्णातीति॥ ॥अंशुवद्ग्रहणं भवति।उक्थान्ते षोडशिचरणमुपस्थायेन यस्मान्नजात इति चमसा १ २५

नुन्नीय॥उच्चप्रचारांते षोडशिचरणं।यस्मान्नजातश्च प्रस्थायेनाचमसानुन्नाय पूर्वतरं॥ ॥तएहिरण्ये स्तोत्रोपाकरणमुपाक्तमये सोमा
न्परेच्य पावर्त्तध्वमिति कस्मे श्च उपतिष्ठति॥ तएहिराण्येपः षोडशिनस्तोत्रोपाकरणं।अस्तमनसमये सोमोऽत्परेव्य पावर्त्तध्वमित्यनेन मंत्रेण।
हरेमेऽश्च उपतिष्ठति॥ ॥ऐंद्रश्च सम्राडिति मरुणां भवति॥ ॥आपात्रप्रक्षालनान्तं चाऽतिरात्रश्चेत्सोम्येन सहाश्विनो द्विकपालः सर्व
त्र।आपात्रप्रक्षालनान्तत्वात्षोडशिनः।अत्रैव च षोडशिसंस्थपरिसमाप्तिः।उत्तरे अतिरात्रे विशेष उच्यते॥सोम्येन सहाश्विनो द्विक
पालः कर्त्तव्यः।सर्वत्र ग्रहणस्थानेऽन्यत्रास्याश्विनो द्विकपाल एवं भवति॥अतिरात्र एवापरो विशेष उच्यते॥ ॥त्रयः पर्याया स्तुत-
स्तोत्रः पर्यायः।चमसैर्यागगपर्याया स्त्रयः।चतुःस्तोत्र एकैकः।स्तोत्रं च॥ ॥होतुः प्रथमं प्रथममनुच्यावदितरेषां शस्त्रकर्त्तारः॥ ॥तदंते च
मसानुन्नीयस्तोत्रोपाकरणं संधेः।तेषां पर्यायाणामंते चमसानुन्नीयसंधिस्तोत्रोपाकरणं॥ ॥होताशंसत्याश्विनं।पर्यायांतेष्वप्रवत्याऽश्वा
वाकेः मात्र्दिति होनेत्युच्यते॥ ॥शस्त्रांत आश्विनेन सर्वउक्तेन चारान्ति॥ ॥एकप्रदानश्च मसैः।आश्विनो भवति वचनसामर्थ्यात् सर्वेउ
तश्च॥ ॥आश्विन्या तिरोअन्हानां सोमानामनुवाचनप्रैषौ।अत्र भवतः ज्योतिष्टोमे षोडश्यतिरात्रयोः क्रतुपशवः क्रतुकरणं चोक्तं।
ऋचः संख्याशंसोऽत्राभिहित इति॥ ॥ऐन्द्राग्नः सवनीयोऽन्वहं भवति।सच्चायमंगं गाणधर्मः।तथा च विकृताश्चैकाहीकेष्वपि भवति
॥ ॥सोमायनं वा यथास्थं भवति॥ ॥एकादशिना वा विहिताः भवंति॥अस्मिंश्च पक्षे॥ ॥द्वादशाद्यो भवंति॥ ॥सर्वसमासो

कर्क० ८

वैंद्राग्नो वा वेति विकल्पः ॥ ॥ यावच्छेषमुत्तरेषु । उत्तरेषु ग्रहणेषु एकादशिनिपक्षे यावच्छेषमालब्धव्यं ॥ ॥ काम्यं समत्वानित्यवचनाभावात् । काम्यत्वेऽप्य
नेकाम्यग्रहणं पृथक्कामानामप्यधिकारप्रज्ञापनार्थं ॥ ॥ अहीने व्यूढच्छंदसि दशरात्रस्य चतुर्थनवमयोराग्रायणग्रहणं प्रथमं । त
त्रैतद्द्वादशाहेन व्यूढच्छंदसा यजेतेति ॥ व्यूढच्छंदा अहीनो । नियमंगीकृत्य ऊनातिरिक्तछंदसां व्यूहनमाम्नातं ॥ तत्र विशेषव्याचि
ख्यासुः सूत्रमिदमाह ॥ ॥ दशरात्रस्य चतुर्थनवमयोराग्रायणग्रहणं प्रथमं ॥ ॥ शुक्रस्य षष्ठसप्तमयोः प्रथमं ग्रहणं भवति । प्राथम्यं
चैंद्रवायवापेक्षया ॥ नोपांश्वंतर्यामापेक्षया ॥ येनैवमाह ॥ अथैतत्प्रज्ञातमेव पंचममहर्भवति ॥ तदैंद्रवायवाग्रो गृह्णातीति ॥ प्रज्ञा
तएवाहन्यैंद्रवायवाग्रतां दर्शयति ॥ ॥ आसादनमापूर्वेषां ग्रहणात् । पूर्वेषां ग्रहणादर्वागासादनं तस्य ॥ ॥ परिमार्जनप्रभृति काले
हि कृत्प्रसादनं यस्माद्धिकारो विहितः । इतरस्य त्वहिकृत्यैव ॥ ॥ अव्यूढो वा । छंदसां व्यूहनपक्षेऽपि व्यूढोऽपि वाऽव्यूढो भवति । द्वादशाहो
एवमपि श्रूयत इति ॥ ॥ उभयतोऽतिरात्रः । अयं द्वादशाहो भवति । यात्वन्यतरतोऽतिरात्रता कासाविकृतिविषया ॥ ॥ अतिप्रेषिते मी
दाह श्वःसुत्यामिंद्राग्निभ्यां प्रब्रवीमि विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सोमपेभ्यो ब्रह्मन्वाचं यच्छेति ॥ सर्वान्प्रैषानतीत्य वर्त्तते इत्यतिप्रेषितो हा
रियाजनोत्तरकाल इत्यर्थः ॥ तत्राग्नीदाह श्वःसुत्यामिंद्राग्निभ्यां प्रब्रवीमीत्येवमादि । अयं च श्वःसुत्यानाऽहःशेषभूतो ब्रह्मन्वाचं यच्छेत्य
यं त्वऽद्यतनस्यैव । प्रयोजनमेकाहिकेष्वविकारेषु द्वादशाहिकेषु च यथार्थप्रयोगः ॥ ॥ प्रायणीयेऽद्यसुत्यामेके प्राप्तकालत्वात् ॥ प्रा

राम०
२६०

यणीयोऽतिरात्रो द्वितीयेऽहनि परिसमाप्यते ॥ तत्र पार्ष्टिकं प्रथममहर्भवति । तेनैतदुच्यते ॥ ऽद्यसुत्यामिति वक्तव्यं ॥ प्राप्त एव हि काल इत्येवंप्रा
प्त आह ॥ ॥ न पूर्वशेषात् । पूर्वस्यैवाऽहःशेषभूतोऽयमतिप्रेषितः । तत्र श्वश्वःशब्देन कर्मांतरमुच्यते ॥ नाऽहरंतरं ॥ ॥ तस्मात्श्वोभावादिति ॥
तस्माच्च कर्मणः श्वःशब्देन कर्मांतरमुच्यते ॥ ॥ अचोदितत्वाच्च ॥ न चैवंविधा चोदना विद्यते ॥ प्रायणीयेऽद्यसुत्यामिति वक्तव्यमिति ॥ ॥
अग्निमद्येति च लिंगात् ॥ अद्यशब्दः कर्मविषयः । अग्निमद्य होतारमवृणीतायं यजमान इति । अन्यस्मिन्नेवाऽहरंतरे वृतो होताऽद्यश
ब्देनोच्यते । तच्च कर्मविषयेऽद्यशब्द उपपद्यते । नान्यथेति ॥ इदमेव तावद्विचार्यते । किं प्रायणीयात् उत्तरमहस्तस्मिन्नेवाहन्यारब्धव्य
मुत द्वितीय इति । किं तावत्प्राप्तं । सूत्रे गौणो वोपक्रमः ॥ ॥ प्रायणीयादुत्तरमहः श्वःकालाभावात् । प्रायणीयादवसितादुत्तरमहः उत्तरक
र्म श्व आरब्धव्यं । तस्मिन्नेवाहनि । कुत एतत् ॥ कालो हि न संभवेत् । अत्र प्राग्वाचः प्रवदनात्प्रातरनुवाकः कालः । तथोपांश्वंतर्या
मयोस्तयोरुदितेऽन्यतरं जुहोत्यनुदितेऽन्यतरमिति कालो न संभाव्यते । श्वः पुनः क्रियमाणे संभवति ॥ ॥ एवं प्राप्त आह न संपत्ते
र्नैतदेवं श्व आरब्धव्यमिति । अद्यैवारभ्यते । कुत एतत् । संपत्तेर्हि भवति । षड्विंशाहो वा एष यद्द्वादशाहः षड्विंशदशहरा
वरुहतान [illegible] मि संपद्यत इति ॥ तच्चैवमुपपद्यते ॥ श्वस्तनेऽहन्यारंभेण षड्विंशद्भिर्भवति छेता । न तत्र संपत्तिविरोधः
॥ ॥ कालोवचनात् । यः पुनः कालबाधः स वचनादिति ॥ ॥ इति श्रीकर्कोपाध्यायकृते कात्यायनसूत्रभाष्ये द्वादशाहः समाप्तः ॥

७क्लोद्वादशाहः। तत्संनिधाने गवामयनस्य परामर्शोस्ति॥ सोऽयं द्वितीयं षष्ठमालभते वैषुवतेऽहन्प्राजापत्यं महाव्रत इति॥ गवामयनमेव तावद
दृश्यते। पूर्वधर्मप्राप्त्यर्थमधिकरणं॥ ॥द्वादशाहधर्माः सत्रेषु तऊगादर्शनात्। द्वादशाहिका धर्माः सत्रेषु प्रवर्त्तंते॥ सत्रात्मका सत्रे
[illegible]णात्र दृश्यते॥ अभिप्लवं पूर्वं पुरस्ताद्विषुवत उपयंति पृष्ठ्यमुत्तरमिति॥ तथा पृष्ठ्यमुपरिष्टाद्विषुवतः पूर्वमुपयंतीति चेति
॥पौर्वापर्यविधिपरे वाक्ये द्वादशाहिके पृष्ठ्यं दर्शयति॥ न्यायस्तु पूर्वमुक्त एवासामर्थ्यात्[illegible]ण एव गणामयस्यात्तु समर्थो नान्यः॥ ॥
गवामयनाये काष्टकायादीक्षा। एकाष्टकायां दीक्षेतेति वचनात्॥ ॥फाल्गुनीपौर्णमासे। अत्रापि हि वचनं। फाल्गुनीपौर्णमासादी
क्षेतेति॥ ॥चैत्र्यां पौर्णमासे दीक्षेतेति वचनादेव॥ ॥चतुरहे वा पुरस्तात्प्राक्पौर्णमास्याः। पौर्णमासी च फाल्गुनी सा ह्यत्र पूर्वमभिहिता
।तस्याः पुरस्ताच्चतुरहे दीक्षेत। एवमपि हि श्रूयते। प्राक्पौर्णमास्याश्चतुरहादीक्षेतेति॥ ॥चैत्र्यानंतर्यात्। चैत्री वा चतुरहविशेषणा
त्वेन प्रतिपत्तव्या। तस्या ह्यनंतरमेव श्रूयते॥ ॥सर्वा वाविशेषात्। सर्वाः पौर्णमास्यश्चतुरहविशेषणत्वेन प्रतिपत्तव्याः। विशेषानवगमा
त्। एवं च पौर्णमासीशब्दः सर्वत्र प्रवर्त्तमानो न संकोचितः स्यात्॥ ॥माघी वाकपश्रुतेः। वाशब्दः पक्षांतरविग्रहे। माघी वा चतुर
हविशेषणं। न पौर्णमासीमात्रं। एवं हि श्रूयते। प्राक्पौर्णमास्याश्चतुरहे दीक्षितानामेकाष्टकायां क्रयः संपद्यत इति॥ एकाष्टकानाम
माघकृष्णाष्टमी। उक्त एवार्थः॥ ॥लोकप्रत्ययात्। एषा हि लोके एकाष्टकेति प्रसिद्धा। किंच॥ ॥अर्थवादाच्च। अर्थवादश्च भवति। यातु

निष्कृतउभयधयो[illegible]नस्पतयो न निष्ठंति। तान्दीक्षितानुनिष्ठंत्वोषधिवनस्पतीनां प्ररोहो भवति। तच्चैवमुपपद्यते॥ तथा तद्रूपेऽभिनंदमाना
अवरूपमभ्यवयंति॥ एतदप्यमेव घटते॥ वनस्पतिप्ररोहोऽपमभिनंदनं च चैत्रोद्देश एव भवति। तस्मान्माघी चतुरहविशेषणं॥ ॥
पवमाने ष्टऊगारमन्वारभेरंस्त्वग्नेसि गायत्रछंदा अनुत्वारभे स्वस्ति मा संपारय सपसौसि त्रिष्टुप्छंदा सशुरसि जगछंदा इतरयोस्स
वनयोः सवनांतेषु जपंति मयि भर्गो मयि महो मयि यशो मयि सर्वमिति॥ बहुवचनोपदेशात्सर्वे यजमाना उक्तालंभ सवनांत जपान्
कुर्वंति॥ ॥सर्वे चैके। सर्वे चैवैक एतत्कुर्वंति॥ उक्त एवार्थः॥ ॥यजतिशब्दात्पुरुषं हन्नारायणं प्रजापतिरुवाच यजस्व यजस्वेत्येवमु
क्तं तत्सर्वमभिहितमिति॥ ॥न प्रकरणात्। नैतदेवं सर्वं चैतदिति॥ येन गवामयनं प्रत्यैतच्छ्रूयते॥ यजतिशब्दोप्यत्र गृह्यते प्रकरणमपि
॥तस्मान्न सर्वे चैतदुक्तालंभः सवनांतजपश्च गवामयनधर्मत्वादेकाहिकेष्वपि प्रवर्त्तंते॥ ॥१॥ ॥अभिप्लवः षडहो ज्योतिष्टोमौ प्रथ
मांत्याउक्थ्या इतरे॥ षष्ठमहमभिप्लवशतीयं वैदिकी संज्ञा। संस्थामात्रनिर्देशश्चात्र संस्थास्वकाहिकाः। एवं ह्यास्तोऽभिप्लवस्त्र
[illegible] ज्योतिर्गौरायुरिति। ज्योतिरादय एव प्रतिलोमानुलोमाः॥ तथा च ज्योतिष्टोमौ प्रथमांत्यौ भवतः। उक्थ्या इतरे। एवं चात्र ना
त्राधर्माद्यैकाहिका भवंति। न द्वादशाहिकाः। सत्रगणधर्मास्तु प्रवर्त्तंत एव॥ ॥अतिरात्रावभितश्चतुर्विंशमहरग्निष्टोम उक्थ्यो वा। अतिरा
त्रावभितो चतुर्विंशमहः संज्ञकोग्निष्टोम उक्थ्यो वा भवति॥ गवामयनिकश्चायं। तत्रश्च द्वादशाहिका अपि धर्माः प्रवर्त्तंते॥ ॥

चत्वारोभिप्लवाः पृष्ठ्यश्च मासः ॥ ॥एवं चत्वारस्त्रयो मासा भवंति ॥ ॥षष्ठे त्रयोभिप्लवाः पृष्ठ्यः षष्ठे मासेभिप्लवाः त्रयः पृष्ठ्यश्च ॥ ॥अभिजि
कर्क० १० दग्निष्टोमः । ननु वायमग्निष्टोमसंस्थ एवाभिजित । किमुच्यते । अग्निष्टोममिति । उच्यते अग्निष्टोमग्रहणं दभिजिदंतरात संज्ञाकं गवाम
यनिकमेतत । अतश्चात्र द्वादशाहिका अपि धर्माः प्रवर्त्तंते ॥ ॥त्रयस्वरसामानो ग्निष्टोमा उक्थ्या वा ॥ स्वरसामसंज्ञकास्त्रयो भवंति । अ
ग्निष्टोमा उक्थ्या वा ॥ ॥अग्निष्टोमो विषुवान ॥ विषुवत्संज्ञको ग्निष्टोमो भवति ॥ ॥प्रातरनुवाकः संधिवेलायामुदिते यथोक्तं वा ॥ दि
वाकीर्त्यमेतदहर्भवतीति श्रूयते ॥ तेनैतदुच्यते ॥ संधिवेलायामिति ॥ पद्येवं नेयतां चोदकपरिप्राप्तः कालवाधः शक्योभ्य
पेतुं । दिवाकीर्त्यता हि ब्राह्मणविषया ॥ अस्य ब्राह्मणं दिवाकीर्त्यंतरः दिवाकीर्त्यं । कीर्त्तनशब्दश्चोच्चारणार्थः । नानुष्ठा
नार्थः ॥ एवं चेद्यथोक्तमेवेत्यवधार्यते ॥ ॥सौर्य उपालंभः ॥ सौर्यं द्वितीयं पशुमालभंते ॥ वैषुवतेहनीति वचनात ॥ ॥उ
त्यमिति ग्रहग्रहणमतिग्राह्यवर्ज्जं । अतिग्राह्यश्च विधिर्भवति महाव्रतस्य ॥ ॥पूर्वपक्षः प्रतिलोमं । पूर्वपक्षः प्रातिलोम्य
नोत्तरो भवति ॥ आवृत्तिशेषमाह ॥ ॥अभिजित्स्थाने विश्वजिदग्निष्टोमः सर्वपृष्ठः सर्वत्तिग्राह्यो भवति ॥ एतदापि चाग्निष्टोमग्र
हणात् विश्वजिदंतरानेकाहिक इति ॥ एकाहिकत्वेहि अग्निष्टोमग्रहणं नाकरोत आचार्यः ॥ कौ चात्तस्माद्विश्वजिदंतरः ॥ गवामयनि
कमेतत ॥ अतश्च द्वादशाहिका अपि धर्मा भवति ॥ ॥षष्ठे मासे त्रयोभिप्लवा गो आयुषी दशरात्रो महाव्रतमग्निष्टोमः । अत्र दशरात्रो द्वा राम० १०

दशाहिकः । महाव्रतं गवामयनिकं शेषा एकाहिकाः ॥ महाव्रते विशेषमाह ॥ ॥प्राजापत्य उपालंभ्यो भवति ॥ प्राजापत्यं महाव्रत इति व
नात ॥ ॥ग्रहेष्टकाति दिन इंद्र वाचस्पति विश्वकर्म्मन्निति ग्राह्य वत ॥ गृहीतस्य विधिर्भवति ॥ ॥उपमायंतु मजपंसन्नी उउपमाजरुप
माम नीषा प्रियामहे तन्वं यशपमानोमे रमो देवानां तेजसे ब्रह्मवर्चसाय इति मंत्रः ॥ यजमानैः पृष्ठ्यापाकरणं वानेन शततं तेनां केन
यं ॥ ॥मौंजास्तृतत्वोचेत संवारुने ॥२॥ बृथीद्वप विशंति प्रेंखे होता फलके धनुः प्रतिग्रहणाति ॥ प्रेंखशब्देन डोला उच्यते ॥ ॥उञ्जनासेंदी
प्रादेशपार्थोसामासंदीवत ॥ अन्यदं तवेदिबस्पमाणां कर्म्म भवति ॥ ॥अभिगराऽपगरौ ॥ अभिगरो राहिनास्तुतिः । अपगरश्च निंदा ॥ तद्
वेदमुक्तं ॥ ॥आक्रोशत्येकः प्रशंसत्यपरः ॥ पुंश्चलूब्रह्मचारिणावन्योन्यमाक्रोशतः ॥ पुंश्चलू जेयन चपलाखी ॥ ॥शूद्रार्यौ चर्म
णि परिमंडले व्यायच्छेते । निमित्तसंबंधेप । चर्म्मणि निमित्तं भूते ॥ ॥जयत्यार्यः ॥ मार्जालीयं दक्षिणेन परिवृते मिथुनं संभवति ॥ ॥
रुत्रियं संन्नाहयति दक्षिणां वेदिश्रोणिमपरेण संनह क्रियां कारयति ॥ कारिचाध्येषणा रुत्रियं संनह्यस्वेति ॥ ॥समाणीतरति व
द्व यक्रुति । रुत्रियाय ॥ ॥ रूभ्यामन्येभ्यः । व्रतवचनोपदेशात्त्रिभ्यः । अन्यशब्दस्य समानजातीयापेक्षत्वात् रुत्रियेभ्यः ॥ ॥त्रिः स
तेनपरियंति शालामपरेण । उत्तरेणा च चात्वालं वशाः चर्मकर्त विशाः व्योरर्वावक्तृतं ॥ ॥अनिष्यत्र x स्तासमुछ्रिता वाविध्यंते निषादं ॥के
२ आसीसनिधाय्या वा x मित्यनिः श्रजपत्रे विध्यंति ह्रत्रियाः ॥ ॥दक्षिणेन चर्म्म यंति ॥ त्रिर्विद्वापुरस्ताद्विमोचनं । वितानस्यासंदः स

र्क॰ ११ क्षिपुदुंदुभीन्वादयंति॥ ॥अग्नीध्रमपरेणाश्वमंसवालधानेनचर्म्मणावनह्यवालधानेनाहंतीति॥ वालधानंपुच्छमुच्यते॥ ॥गोधावीणा
काः कांडवीणाश्चपन्मावादयंति॥ ॥उपगायंति॥ स्तोत्रस्योपगानंकुर्वंति॥ अन्यांश्चशब्दान्कुर्वंति। येकेचनगानेप्रसिद्धाः मूर्छनाद
यः॥ ॥उदकुंभानशिरस्सुकृत्वामार्जालीयंदास्यःपरियंति। वाचयत्येनाः पर्यायादिषु। एनादास्यःपर्यायादिषुवाचयति॥ हैमहा३
हैमहा३ इति। पर्यायानिदानामाह॥ ॥गावोहारेसुरभयइदंमधुगावोगुल्गुलुगंधयइदंमधु॥ गावोघृतस्यमातरइदंमधु॥ ता
रह संजम्भयसीरिदंमधु॥ तकोवयंपूर्वामपूरिदंमधु। शम्याप्रचतामिवेदंमधुनवैगावोमंदारस्य गेगायाउदकंपपुष्पपुः सारस्वती
नदीताः प्राच्यउजिगाहीरिदंमधु॥ निगीयंस्तवोआवीरिदंमधु। मध्वित्याकुर्वः ऊशेयथेदंमधित्येवं॥ मध्वित्याकुर्वः ऊशीरिति
सर्वत्रानुषंगः॥ ॥अपसव्यंप्रदक्षिणांचाचोत्तानात्॥ दास्यःपरियंति॥ ॥त्रिस्त्रिर्वा॥ अपसव्यंप्रदक्षिणंचपरिगमने॥३॥ निषिच्य
मार्जालीयेपूर्णानिदधति॥ निषिच्ययत्रक्वचनप्रदेशेमार्जालीयेपूर्णान्निदधतिदास्यः॥ ॥अभिमरादिस्तूयमानेसर्वेकुर्वते। स्तो
यमानेमहाव्रतस्तोत्रेमहाव्रतशब्दश्रूयते कः क्रतुःप्रतिपादकः। महाव्रतमग्निष्टोमस्तोत्रपर्यायः। महाव्रतेनस्तुवीतेत्यत्रचश्रू राम॰
यतइति॥ एषसंवत्सरस्त्रिमहाव्रतः। अत्रविंशमहाव्रतंविषुवतिमहाव्रतंमहाव्रतेएवचमहाव्रतमिति॥ विषुवतिक्रतुश्चमहाव्रतस्तोत्रेऽभि ११
वर्तीतिसंप्रदायः। महाव्रतएवंमहाव्रतमित्यपराएवहिश्रूयते। त्रिमहाव्रतेप्रकृत्यतेतेजस्विनः आत्मसत्यवादिनः संशितव्रताश्चयेस्तु २६३

त्रिमहाव्रतत्वमनुष्ठितंमन्ये आचार्याऽजिप अथयत्रैकेनमप्येतर्हितथापेयु। यथातैरनुष्ठितमेषांदोषमाह॥ पथामपात्रमुदकमासि
क्तंविसृत्यैरेवंहोवत्तेविसृत्येयुः॥ अतश्चैवपर्युपयंतिमहाव्रतक्रतौमहाव्रतंस्तोत्रमिति अमहाव्रतेदोषमुद्भाव्यमहाव्रतेमहाव्रत
स्तोत्रंविदधाति॥ अतश्चविकल्पोनमहाव्रतएवमहाव्रतमिति॥ ॥अतिरात्रश्चाप्राप्तत्वादवाच्यमितिचेत्॥ उच्यते। संवत्सरसत्रत्वा
त्सर्वसंवत्सरेऽतिरात्रौभावोमाभूदित्यतिरात्रग्रहणं॥ यद्येवमतिरात्रः किमितिभवति॥ अथैतदहरत्येतीतिपदैर्दृष्टवतमितिवचनात्
॥ ॥तिस्रोऽन्वंध्याः। ऐन्द्राग्नावारुणीवैश्वदेवीवाईहस्यान्याः। अत्रचतुर्थ्याम्यासेनकर्मवत्अनवम्॥ अभ्यस्तरूपमेककर्मप्रकृतावेकत्वात्॥
॥ ॥संवत्सरावरेषुसत्रेष्वसारस्वतेषु॥ सहस्रदक्षिणावरेषुच। क्रतुषुतिस्रोऽन्वंध्याभवंति॥ एवंश्रूयते। सप्तसहस्रंवाभूयोवादद्या
त्पनाः सर्वाआलभेतेति॥ तथा। अथयद्दीर्घसत्रमासीरंसंवत्सरंवाभूयोवाततएनाःसर्वाआलभेरन्निति॥ ॥अन्वंध्यावपाहोमा
तेदक्षिणास्थानेक्षिप्रा॥ सर्वकेशश्मश्रुलोमवपनंभवतीतिसूत्रशेषः॥ ॥पत्न्याश्चावपनेनाभिसंवध्यते॥ ॥नैवात्रचदेवसानीयास
र्ध्या॥ सर्वत्रग्रहणेनसंवत्सराणिसत्राणिअसारस्वतानिसहस्रदक्षिणावराश्चक्रतवोगृह्यन्ते॥ तत्रह्यपिज्ञाःसमानमन्त्राअन्वंध्यावि
धायवकेनैधात्तवीविधायकंच॥ ॥अवभृथादरदेत्यज्योतिष्टोमोग्निष्टोमःपृथुशमनीयः। अवभृथग्रहणंसमाप्यपूर्वेद्युर्ध्या
नुद्धाराग्निष्टोमएवभवति॥ संस्थांतरस्यानुक्तत्वात्॥ व्यर्थमग्निष्टोमग्रहणं॥ उच्यते। गुणकामार्थोपदिष्टापरार्थमित्यपरोवा

का.श्रौ. १२ पृष्ठ्यशमनीयमिति[illegible]त्वा॥ ॥सहस्रदक्षिणो वा प्राकृतदक्षिणा॥ ॥एकाहमेदेकारेछंति॥ ॥सत्रांगप्रकरणात्तासच पृष्ठ्यशमनीयः सत्रस्यां
गं भवति॥ तद्धि प्रकृत्य श्रूयते॥ अवभृथादुदेत्य ज्योतिष्टोमाग्निष्टोमः पृष्ठशमनीय इति॥ किंच॥ ॥फलाश्रुतेश्च। नचात्र फलं श्रूय
ते॥ तस्मादपि सत्रांगं॥ ॥न फलं न्यायात्॥ नैतदेवं सत्रांगमिति॥ न्यायेन हि फलमत्र परिकल्प्यते॥ ॥कालप्राधान्याच्च। अपि चाऽस्य का
लः प्रधानः शब्दः सत्रादुदवसायेति। एवं प्राप्ते पुनर्व्याचक्षते॥ ॥सत्रांगमेव प्रकरणात्॥ फलाश्रुतेश्चेति फलवत्सत्रमसन्निधौ तदंगे
नैव न्याय्या एवं च फलं न कल्पयितव्यं भवति॥ पृष्ठशमनीय इति चार्थानुगता संज्ञा॥ पृष्ठानां सत्रे नियुक्तानामुपरतानां श्रमाणां शा
मनं करोतीति पृष्ठशमनीयः। सारस्वतेषु च प्रतिषेधात्। अपृष्ठशमनानि सारस्वतानीति॥ ॥सहस्रे यदि दक्षिणा त्रिरात्रे प्रतिविभज्यान
पत्नो हिरण्यमुपधत्तामप्रवीतामतिरेचयति त्रिरूपं वा॥ अहीनः सहस्रदक्षिणास्त्रिरात्रस्तत्र प्रतिविभागेन प्रत्यहं दक्षिणा पृथनदक्षि
णापत्नो हिरण्यवतीं तरोपधत्तां अक्षामिंतामतिरेचयति॥ त्रिरूपां वेति विकल्पा। एवमेव हि श्रूयत इति॥ ॥आद्येहन्प्रथमां नयेदस्य
वा पश्चात्॥ आद्येहनि पदे गवां प्रथमा नेयेत॥ अन्येवाऽहनि पश्चादिति॥ ॥रुविर्धानामाध्रांतरोड्डाणकूलशमेनामा प्रापपत्पाजिघ्रेति।
रुविर्धानाग्नीध्रांतरव्यदक्षिणामेनारोहिणीड्डाणकूलशमाप्रापपत्पानि प्रेत्यनेन मंत्रेण॥ ॥रउरंतरशंति दक्षिणास्यांच संपजमानाजप राम० १२
[illegible]॥ ध्रुवमगा[illegible]ति यजमानग्रहणात्क्रियते यहिरण्यसंस्कारोऽयमिति अधर्तुमो भूयि॥ ॥वोचेरिति वांतो मेत्रस्य भूता दितिविक

त्वनः ॥ समस्तं ततो नवत्सदशमीं कृत्वा होत्रे दद्यात्॥ विष्याद्यऽहोम्पत्ति स्वत्तिस्त्रः। उपादाय श्रेहिणीं दशमीं कृत्वा होत्रे दद्यात्॥ ॥उन्नेतारो वा कु
त्वा नाश्रावयते॥ द्वौ वा नेतारौ कुर्वीतेति वचनात्॥ तयोरन्यतरा नाश्रावयेत्॥ तस्मादेनां दशमीं दद्यात्। होत्रे चेति विकल्पः॥ उन्नयने
स्तु विभागेन कुर्वीत॥ ॥दश दशामेदेन दाक्षिणाद्यात्॥ अन्येनादशतो नयेरिति वचनात्॥ अत्र च चोदकाबाधेन दशतीं नादान
मनुद्देशं॥ ॥अनूबंध्यवपाहोमांते दद्यादेना दशमीमिति सूत्रशेषः॥ ॥उदवसानीयायां वेति विकल्पः॥ ॥अन्यदि कश्चिद्विकल्पं॥ ॥अ
हणतो व्याक्रामता यन्वहं कर्त्तव्यमिति सूत्रशेषः॥ ॥वसतीवरीग्रहणं च॥ अन्वहमेव कर्त्तव्यं॥ ॥एके माध्यंदिनेवनीया वसतीरविग्रहणं
चा अन्वहमेव कर्त्तव्यं॥ ॥एके माध्यंदिनेवनीया वसतीवरीग्रहणं कुर्वंति एके परिहारकाल एवेति विकल्पः। माध्यंदिनेवनीयः॥ ५
इति श्रीउपाध्यायकर्ककृतौ कात्यायनभाष्ये गवामयनं त्रयोदशोध्यायः॥ समाप्तः॥ ॥ वाजपेयः शरद्यवैश्यस्य॥ गवामयनमभिहितमि
दानीमवसरप्राप्तो वाजपेयोऽनुविधेयः॥ वाजपेय इति कर्मनामधेयं न हि द्रव्यगुणो वा प्रसिद्धिरस्य॥ स च शरदि भवति। शरदि वाजपेये
न यजेतेति वचनात्॥ अवैश्यस्येति शाखांतरात्॥ लिंगाच्च॥ अथ यदि ब्राह्मणो यजेत॥ यदि वा राजन्यो यजेतेति विशेषविधानं॥ ॥उभय
तः शुक्लः प[illegible]बृहस्पतिसवेन यजते। यान्तरौ शुक्लपक्षौ। तयोर्बृहस्पतिसवः॥ ॥ज्योतिष्टोमेन वा यजेतेति विकल्पः॥ ॥द्वादशवा
उभयतः शुक्लप[illegible]जते॥ तत्र च॥ ॥पुरस्तादपकुज्योतिष्टोमः पार्ष्ठिकानीतरेषु॥ ऽपुरुपक्षान्पार्ष्ठिकानीति॥ ॥प्रतिलो

262

कर्क० १३ संपार्ष्टिकान्यपरि॥ उपरिष्टात्प्रातिलोमेन। अथ ऊर्ध्वपार्ष्टिकानि॥ पुनश्च ज्योतिष्टोमः। पार्ष्टिकान्यपि प्रातिलोम्येन त्रयस्त्रिंशारंभणानि वंभक्ति
॥॥ सर्वाग्निष्टोमैर्वा राजसूयसोमैः॥ उभयतो यजते॥ तेषां संस्थामात्रापनयः॥ ॥प्रतिलोममपरा। उपरिष्टात्प्रातिलोमेन ज्योतिष्टोमादारभ्य
ति॥ अत्रांश्वदाभ्यग्रहणं। राजसूयसोम चाङ्गवति॥ पार्ष्टिकेषु तु असत्रत्वान्न भवति॥ अतिग्राह्यग्रहणमपि अहःसंयोगान्न भवती
ति संप्रदायतः॥ ॥नानादीक्षाः परियन्ताः कालभेदात्॥ पार्ष्टिकानां तंत्रेणादीक्षाः प्राप्नुतः॥ स्थापितश्चैवमाभ्यवन्निति नानादीक्षात्वमुच्य
ते॥ तन्त्रुतन्त्रकाभेदात्॥ भिन्नो यत्र काल इति॥ ॥सप्तदशदीक्षाः परियन्तानां दीक्षाः प्राप्ताएव। एतास्तु वाजपेयस्य॥ ॥देवसवितः सवितरीति
जुहोति यजत्यादिषु॥ सकर्मणः कर्मणः पुरस्ताद्देवानां सा विज्ञीमाऊतिजुहोतीति वचनात्॥ कर्मशब्दः प्रायशो यजनादिष्वेव वर्तते तत्राभि
प्रायः॥ तेन यजत्यादिष्वित्यर्कं॥ ॥सकृद्दीक्षारंभे कर्मकत्वात्॥ अप्सुदीक्षाद्यारंभेषु देवहोतव्या॥ उत एतत्॥ कर्मैकत्वात् कार्यैके
त्वादित्यर्थः॥ एवं हि कार्यं दीक्षाणां पुरुषसंस्कार इति॥ यजत्यादिषु पुनः ये वाजपेयाङ्गभूता यजतयो दीक्षणीयादयः तेष्वेवानेति
दंगेष्वपि प्रयाजादिषु नास्तिसाद्दीक्षा नेपध्य॥ ॥क्रयणादेधारंभण प्रवर्ग्योपसादनाग्निप्रणयनहविर्धानाग्नीषोमानोसद आग्नीध्र
विध्यनि वपनवसतीवरीग्रहणपरिहरणेषु च कर्मांतरत्वात् प्राकृत्यापाः। क्रयणादीनि प्रागेव स्थाप्या भवंति। यजति विशेष राम १३
णामेतत्॥ प्राकृत्यायारति॥ अथाग्नीषोमीयेण पशुना चरिले तामाऊतिमुत्सृजेतीति वचनात्॥ ॥सोमाक्रयमाणासहितं द

२६४

दिशतः सीक्षेन पारिस्कृतः क्रयणां केशवात्॥ भवतीति सूत्रशेषः॥ केशवो दीर्घकेशः॥ शंख इति केचित्॥ परिस्कृत्सुरोच्यते॥ ॥बहिः सोनप्रवेश्य
दक्षिणाग्रोपच्छास्तुराम परेतेनेष्टा करोति॥ यदि नपश्चात्तत्पच्यते॥ ॥खरं कृत्वा नाराशंसस्थाने पूर्णं॥ खरं करोतीति वाक्यशेषः॥ ॥दक्षिणतः से
धिं करोति॥ दक्षिणतो हविर्धानस्य ऊद्वारं करोतीत्यर्थः॥ ॥यूपवेष्टनं सप्तदशभिर्वस्त्रैः यूपं ग्रथनं वा परिव्ययणकाले सप्तदशभि
र्वासोभिर्यूपो वेष्टितो वा विग्रथितो वा भवतीति वचनात्॥ यूपग्रथनेन च अवचूलकरणं॥ तच्च परिव्ययणकाले। परिव्ययणाद्वा परतः॥ आ
गंतुत्वात्॥ ॥अश्वो वा सवनीयेषु॥ यूपवेष्टनं भवति॥ तत्र हि वाजपेयशब्दो वर्त्तते। वा अग्नीषोमीय एव ग्रथने कर्त्तव्यो॥ यूपसंस्कारस्यातदुद्देशे
न विहितत्वात्॥ ॥उष्णीषः समाग्नेगोधूमचषालः॥ यूपो भवतीति वाक्यशेषः॥ गर्तेन्वोत्कृपोती क्ष्णाग्रो भवतीति॥ जयागोधूमे चषालं भवती
तिश्रुतेः॥ गोधूमे गोधूमविकारमयं च षालं भवति॥ ॥सुत्यादो हिरण्यपत्रजोपिनह्यंते श्वःकृता यजमानः पत्नी च सहस्तस्पात्स्थात॥ हिरण्यमा
लिनौ वाजपेयेन चरंतीति श्रूयते॥ सुत्यायां च वाजपेयशब्दवाच्या॥ ॥सर्वत्राविशेषात्॥ सर्वत्र वा हिरण्यमालित्वं॥ सर्वेष्वयं वाजपेयरति
प ॥एकधनप्रवेशनकाले सुरा नेष्टी परेण प्रवेश्य खरे करोति॥ संक्षिनागः ग्राह्याहत्य पात्रे वालेन पुनाति। नेष्टैवाभिप्रवृत्तत्वात्॥ ॥प्रातःस
वनेति ग्राह्याग्रहीत्वा षोडशिनं पंचचैंद्रान्ग्राहाग्नं हति॥ ॥ध्रुवसदमिति प्रतिमंत्रं॥ ॥अथ ग्राह्यं वर्द्धोमः। पंचानामैंद्राणां॥ ॥सप्त
दशाऽपरान्॥ सोमग्रहाग्नं हति॥४॥ नेष्टा च तावतः सौरान्॥ च शब्दाऊहति॥ ॥व्यत्यासं ग्रहणं। सोमग्रहमेवाध्वर्युर्गृह्णाति सुराग्रह

कर्क॰ नेष्टैवमेवैनान्यत्पात्रसंग्रहात्‌इतिवचनात्॥ ॥अंशूनतिक्रमणं ग्रहाणां। कर्त्तव्यमितिशेषः॥ ॥उपर्युपर्येकमध्वर्युर्द्धारयन्नधोधोनेष्टासंप्र
१४ चावित्यनेनमंत्रेण॥ ॥विपृच्चावित्याहरतः॥ अध्वर्युनेष्टाच॥ ॥हिरण्मयेनमधुग्रहंगृहीत्वाखरमध्येसादयति॥ ततः उक्थादि।ष्ठा। अति
रात्रपशूनुपाकृत्यवशांपृश्निंमरुद्भ्य उक्षेभ्यः उपाकरोति। वशासिक्ता। पृश्निश्चित्रा॥ ॥तदभावेअपृश्निः। पृश्न्यभावेअपृश्निमुपाक
रोति॥ ॥प्राजापत्यांश्चसप्तदशश्यामतूपरान्वस्तान्॥ उपाकरोति॥ ॥तद्गुणाभावेसर्वेषामेकदेशोपि। तद्गुणः स्यात्॥ एवंहिश्रूयतेप्य
रोवंसमस्तात्रिविंददपिकृतिपयाएवैवंसमृद्धाप्नोति॥ पवाचउत्तममेके। तद्धैकेवाचउत्तममालभंतइतिवचनात्॥ सप्तदशपशूनेकेवा
चआलभंते। एकंप्राजापत्यमितिविकल्पः। तस्यचनोपाकृतत्वमप्राजापत्यत्वात्॥ अत्रेदंचिंत्यते। किंसप्तदशपशुगणसाधनकमेकंक
र्मोउतसप्तदशैतानिकर्म्माणीति। उतसंदेहः। यदिकृतैकशेषाणांतद्धितः। अयंचाऽयंचेत्येकशेषीकृत्यतद्धितोत्पत्तिस्तदेकंकर्म॥
अथतद्धितोत्तरकालमेकशेषः। प्राजापत्यश्चप्राजापत्यश्चप्राजापत्याइति॥ तदासप्तदशकर्म्माणि॥ अत्रचोदकबाधेनवास
व्यावर्त्तनंकर्त्तव्यं। प्रकृतावेकपशुनिष्पन्नेनरूढ्यादिग्रहणेनपागामिनिर्देशिनःकृतार्थत्वापितथैवक्रियेतचेत्॥ षोडशानामा
लंभवैयर्थ्यं। अथैकैकमवदानंगृहीत्वाएकादशसंख्यापूर्य्यते॥ तथास्तितिषोडशानामालंभवैयर्थ्यप्रसंगः॥ नचचोदकउद्यद् राम॰
इति॥ तस्मान्नैकशेषीकृतानांतद्धितोत्पत्तिरेकैकरूपाणि। कृततद्धितानांतुएकशेषत्वेनैषदोषोभवति॥ तस्मात्सप्तदशैतानिकर्म्माणीतितेषां १४

चसंप्रतिपन्नदेवत्यैकत्वात्सकृत्प्रदेयः॥ नन्वेवमपिअवदानस्यप्रदानोत्तत्रानसंभवति॥ नत्चोदकबाधएव। नैषदोषः अवदानस्यप्रदा
नाततात्‌उग्रहेसतिप्रधानाभ्यावृत्तिःप्राप्नोति। नचैषागुणानुरोधेनवृत्तिः। तस्मात्सकृत्प्रदेयइति॥ सकृत्प्रदेयंचदर्शयति॥ प्रजा
पतयइत्येकोपांश्वनुक्त्वाछागानामाहविषोनुब्रूहीतिप्रजापतयइत्येकोपांशूक्त्वाछागानांहविःप्रस्थितंप्रेष्येतिवषट्कृतेजुहोतीति॥ एवंत्वा
चार्येणापिप्रदर्शितमेवनद्रव्यभेदेगुणायामादितिवास्यइति॥ ॥माहें। द्रोतेवशावपावरणा॥ माहेंद्रयहयाज्याऽभ्यासीतेवशाया
वपाप्रचारः॥ ॥अवदानेश्चद्वैधंश्रुतेः॥ वशावदानेश्चद्वैधंश्रुतेःप्रचारश्चद्वेधावदानानिश्रपयतीतिवचनात्॥ चशब्दाद्वपाप्रचा
रोऽपिद्वैधाअपरणं। स्वकालएवप्रधानयागः॥ ॥पूर्वेभ्योवादेवताभ्यःस्विष्टकृत्आमवयति॥ उत्तराणिविशददाति॥ पूर्वाणिहृदयादीनि
॥उत्तराणिअंगादीति॥ ॥वामदेव्यग्रहेतेप्राजापत्यानां। वपाप्रचारः॥ ॥स्रुग्व्यूहनात्प्राग्हविषाप्राजापत्यानांप्रचारः॥ ॥यथान्या
यंवोभयोः॥ यथान्यायंवाउभयोर्वपाहविषाःप्रचारोभवति॥ यथान्यायशब्देनचोदकानुसारेणमुच्यते॥ ॥वशायाश्च॥ चोदका
नुसारएवनोत्कर्षइति॥ वाशब्दोविकल्पार्थः। विकल्पेनसुतस्ज्यतइति॥ ॥एकधंचश्रपणं। एकध्येनश्रपणमवदानानाम
स्मिन्प्रदेशे॥ ॥अवदानेचविशेषः। अंगानांविष्टेनचप्रजोच्यते॥ ॥माध्यंदिनीयैःसहनैवारंचरुंबार्हस्पत्यःसप्तदशशरावःमा
ध्यंदिनीयसवनीयैःसहनैवारश्चरुःसप्तदशशरावश्चपरिमाणतोबार्हस्पत्यःकर्त्तव्यः। अत्रोचोदकप्राप्तेनचतुर्मुष्टिनानिर्वापेनसप्त

कर्क०
१५

दशशरावो भवतीति॥ अवश्यंभाविनि संख्यामुष्टिव्यवाधरदमाह॥ ॥संख्यामुष्टिनिवृत्तिः सामान्॥ संख्या सामान्येन सप्तदशसंख्यायाश्च
तुःसंख्यो निवर्त्तते। शरावैश्च मुष्टयः। उ तत। सामान्यात्॥ समाने हि समानस्य निवर्त्तकं भवति॥ यथा तैलं घृतस्येति॥ ॥एवं प्राप्ते आह
॥नयजतिशब्दात्॥ नैतदेवं संख्यामुष्ट्योरुभयोरपि निवृत्तिरिति किं कारणं। यजतिशब्दात्। यागे हि सप्तदशसंख्या शरावाणां च
श्रूयते॥ चतुःसंख्यो मुष्टयश्च निर्वापे। न चान्यत्र श्रुतास्वपि सामान्येऽन्यस्य निवर्त्तकं भवति॥ न हि शिरोभ्यंगे श्रुतं तैलं भोजने घृतस्य
निवर्त्तकं भवति॥ यथा तैलं घृतस्येति॥ कथं तर्हि चतुर्मुष्टिके निर्वापे सति सप्तदशशरावत्वं दानां भवति। उच्यते। ऽथोदन्याऽन्यत्तास्य
निवृत्त्या भवितव्यं संख्याया मुष्टीनां वा न्यायनिवृत्त्या सप्तदशशरावो भवति। तत्रापि संख्याया मुष्टीनां वा निवृत्तिर्नोभयोस्तत्र मुख्यत्वा
संख्यानुग्रहः। जघन्यत्वान्मुष्टिलोपः इति। सप्तादचतुःशरावपरिमाणेन पात्रेण निर्वापे क्रियमाणे सप्तदशशरावत्वं दानां भवति॥
एवं मुष्टीनां लोपः। संख्यानुग्रहश्च भवति। ननु च मुष्टयः प्रधानभूताः संख्या गुणभूता तान्न दवश्यं कर्त्तव्येवा धेवरं गुणो बाधितो न
प्रधानमिति। अत्रोच्यते॥ न हि संख्यामुष्ट्योरत्र गुणप्रधानभावः॥ उभयोरपि हि निर्वापसंबंधः॥ संख्यामुष्टीसंबंधविधाने मु
ष्टीनां च निर्वापसंबंधविधौ वैरूप्यलक्षणो वाक्यभेदः प्राप्नोति। तस्मादुभयोर्निर्वापसंबंधः। यश्च गुणयोः परस्परतो बाध्यबाधकभा
वः। देशेकोऽत्र शब्दादिति॥ न हि व्यवछेदयमंतरेण संख्यायानिर्वापसंबंधो भवति। तस्मात्संख्यानुग्रहो मुष्टिलोपश्चेति सिद्धं॥ ॥

राम
१५

सप्तदश सप्तदशशतानि ददाति। गावस्त्राजीवीनोप्रत्येकं॥ ॥सप्तदश वृषल्यो निष्ककण्ठ्यः दीयंते। चतुःसौवर्णिको निष्कः कंठे
यासां ता निष्ककंठ्यः॥ ॥हस्तिवहसकमहानसानो। सप्तदशसंख्याविशिष्टानां दानं॥ ॥नान्तेजातेश्चा सप्तदशगणपूरणान्य ऽउक्तस्तत्र
॥ ॥सप्तदश सदृश्यानि ददातीति श्रुतौ भिन्नजातीयत्वे चैतद्भवतीत्यभिप्रायः॥ ॥द्रव्येषु च सप्तदतान भिन्नजातीयेषु। एवं हि श्रूय
ते। सप्तदश सप्तदशानि ददातीति गोदानं च दक्षिणा सूचितं महाभागा हि गाव इति तस्मात् द्रव्येषु सप्तदशता॥ ॥मरुत्वतीयांतरेऽश्वाव
ग्रेरतिरथावहरणं न तु रथावहरणात्॥ तस्य च प्रदेशांतरे दृष्टत्वात्तत्र रथावहरणं करोतीति॥ अव पूर्वं ह्वहरति। रथवतारणो वर्त्तते॥ ॥
दक्षिणेन चात्वालमावर्त्तयति वाजस्येति धूर्गृहीतं रथमावर्त्तयति। चात्वालस्य दक्षिणतः वाजस्येत्यनेन मंत्रेण॥ ॥अश्वान्प्रोक्षत्यपो क्ना
यमानोऽहं तोत्वामग्नानऽस्मतरिति॥ अनेन मंत्रेण॥ ॥देवीरापरतिवा दिवीरापरतिवा अनेन मंत्रेण प्रोक्षति॥ ॥समुच्चयो वा मंत्रयो
र्वा। मंत्रयोर्भवति। एवमपि स्मिन्श्रूयते॥ ॥ दक्षिणं युनक्ति वातो वेति॥ अनेन मंत्रेण रथे॥ ॥ पत्तरं वा तरं हारति॥ युनक्तीति वर्त्तते॥ ॥दक्षिणा
प्रष्टिं जवो यस्त इति॥ दक्षिणाप्रष्टिं। दक्षिणास्थितीयउच्यते॥ ॥अयुक्तश्चतुर्थोऽनुगच्छति सर्वयंत्री। सर्वयंत्रीति कविकापर्याणरूपेता॥
॥ ॥बार्हस्पत्यमेनं नाघ्रापयति वाजिन इति॥ अनेन मंत्रेण। बार्हस्पत्यो नैवारश्चरुस्तमश्वानवघ्रापयति। अव घ्राणं वाश्वसंस्कारो वा मथि
षात्॥ तदयदश्वानवघ्रापयति। वियमेवैतद्दधातीति॥ स चायमाग्नीध्रधावनार्थः संस्कारः। तत्र अविस्मरणेन तदुत्तरकालेन भवति॥ ॥चतुर्युजो

कर्क पुनन्नमपरास्मरश्मी वर्हिर्वदिषात्र शरथान्॥ यो जनक्रियाशेषत्वान्मंत्रप्राप्तिर्माभूदिति तस्मामित्युच्यते॥ ॥देवस्याहमिति ब्रह्मा रथ्याचक्रमारो
१६ हत्य॥ त्केरेनाभिमान्त्रस्थापौष्ठितं॥ स्थाणुः खेउके मुच्यते॥ ॥ऐंद्राः कृत्वियस्य च कुंदुभ्याः॥ हृत्वियस्य च कारोहणं डुंडुभिवादने मंत्रा ऐंद्रा
मवंति॥ ॥सप्तदश डुंडुभीनामसंजत्यनुवेदि पश्चादाग्नीध्रात्॥ आग्नीध्रमपरेण सप्तदश दुंदुभीवनलग्नयन्ति। अनुवेति॥ ॥बृहस्पते वाजमि
त्येकं डुंडुभिमाहंति तस्मामितरान्॥ आहंतीति वर्त्तते॥ तत्र चाद्यस्मामिति मंत्रनिवृत्यर्थमाह॥ ॥कृत्वियः सप्तदश षु प्रव्याधानस्पतितो
थी उदीचः॥ इषुःप्रव्याधरष्षु प्रक्षेपउच्यते॥ तीर्थादारभ्य सप्तदश षु प्रक्षेपान् प्रक्षिपतीत्यर्थः॥ ॥अंत्ये मिनोत्योडुंवरीं शाखां। अंत्ये प्रक्षेपे
शाखामौडुंवरीं। शाखां॥ अंत्ये प्रक्षेपे शाखामौडुंवरीं निखानति॥ ॥देवस्याहमिति यजुर्युक्तमारोहति यजमानपत्नी युक्ते रथे यजमानो
देवस्याहमित्यनेन मंत्रेण आरोहति॥ ॥अध्वर्योऽन्यतस्मी ब्रह्मचार्यंतेवासी वा वाचनाय। च शब्दाद्यजुर्युक्तं रथं। अध्वर्यो ब्रह्मचारी॥
अध्वर्युणा। उपनीतः। तस्यांतेवासीति शिष्यः। यजमान वाचनायारोहति॥ ॥इतरेषामेकस्मिन् राजन्यो वैश्यो वा सौरप्रतिग्रहाय॥ आ
रोहतीति वर्त्तते। इतरेषां रथानां राजन्यो वैश्ययोरन्यतरः। एकस्मिन्नारोहति॥ सौरग्रहणाय॥ ॥आजिंशीघ्नं यंति। आजिशब्देन स्पर्द्धोच्यते॥ ग्राम०
स्पर्द्धया अहमहमहमिकया शीघ्रं धावंति॥ ॥वाजिन इति वाचयति॥ ब्रह्मचार्यंतेवासी वा यजमानं॥ ॥२ ब्रह्मा त्रिःसामगायति। त्रिस्सा १६
मगानं करोतीत्यर्थः॥ ॥दुंदुभीन्वादयंति॥ वहुवचनोपदेशात् प्राकृताश्वा॥ ॥एषस्य इति प्रत्यचं जुहोत्यनुमंत्रयते वा॥ धावतोश्वान्॥ ॥उत्तरे २६८

णचतृचेन। च शब्दाज्जुहोति॥ अनुमंत्रयते वा। अथोत्तरेण त्रिचेन जुहोति वानुख्या मंत्रयत इति वचनात्॥ असन्नियोगार्थं पृथगुपाकरणं॥ ॥स
प्तयजतिप्रसुवं नु यजमानो जिनातीतरान् रथान्॥ ॥शाखां प्रदक्षिणं कृत्वायंति। उडुंवरीं शाखां प्रदक्षिणं कृत्वा आगच्छंतीत्यर्थः॥ ॥आगते
षु ब्रह्माऽवरोहति देवस्याहति देवस्याहति देवस्याहमिति॥ सर्वेष्वागतेषु रथचक्रात् ब्रह्मावरोहति देवस्याहमित्यनेन मंत्रेण॥ ॥एषा व इति मं
त्राहतमवहरते डुंडुभि॥ ॥तस्मामितरान् डुंडुभीनवहरंति॥ ॥अवरूढायैनैवारमालभते तार्थे स्थितमामावाजस्येति॥ यजमानो अवरु
ढरथात्पत्नी चात्वालोत्करावंतरेण स्थितं नैवारं चरुं आमावाजस्येत्यनेन मंत्रेणालभते॥ ॥यजुर्युक्तानाघ्रापयति वाजिन इति। यजुर्युक्तेत्रीन्
अश्वान्नैवारमाघ्रापयति वाजिन इत्यनेन मंत्रेण॥ ॥चतुर्थं युक्ताध्वर्यवे ददाति॥ चतुर्थमश्वं युक्त्वाध्वर्यवे रथं ददाति॥ ॥सर्वेभ्यः षोड
श सर्वेभ्य एवर्त्विग्भ्यः षोडश रथान् ददाति॥ ॥अध्वर्युर्यजमानायमधुग्रहं सौरप्रतिग्रहायप्रयच्छत्यनुत्तरस्यावेदिश्रोणावुपविष्टाय सौरप्र
तिग्रहीता च राजन्यो वैश्यो वा योऽसौ रथमारूढः॥ ॥नेष्टा च शौराण्पश्चिमेन निर्हृत्य शालामपरेणाहत्वैकं प्रयच्छत्याहानेनतरस्मै निःक्रीणा
मीति॥ नेष्टा च सौरग्रहान् पश्चिमेन हविर्द्धानद्वारेण निर्हृत्य शालामपरेणाहृत्वैकं सौरप्रतिग्रहाय प्रयच्छत्याह॥ अनेनतरस्मै निःक्रीणामीति॥
ततः सर्वत्रैव सौरान् प्रयच्छति। मधुग्रहमादत्ते॥ ॥ब्रह्मणो मधुग्रहं ददाति सपात्रं। ग्रहशव्दस्य द्रव्यविषयत्वात् सपात्रमित्युच्यते॥ ॥तं सपथे
ष्टं कुरुते। ददाति वा सिंचति वा पिवति वेति॥ ५॥ द्वादश स्रुवाऊतीर्जुहोत्याप्ययेस्वाहेति प्रतिमंत्रं॥ वाचयति वा। विकल्पः श्रुतेः। वाचनपक्षे

कर्क· दशसंख्या यथा स्यादिति द्वादशग्रहणं ॥ ॥षड्ढोतारं जुहोति वाचयति वा ॥ अथ षड्ढोतारं जुहोति वा वाचयति वेति श्रूयते ॥ ॥नेष्टापत्नीमानेष्ठ
२७ त्कौशं वासः परिधापयति । चंडातकं दूरसं वा परिधापयतीति कारितत्वादध्येषणोऽत्र भवति । चण्डातकं केवलं नकच्यते ॥ एवं ह्यभियु
क्तोपदेशः । अर्द्धोरुकं विलासिन्या वासः मच्छंडातकं विदुः ॥ दूरसं तु कौपीनाद्ह्रस्वशब्दस्य अल्पवाचकत्वात् ॥ ॥अग्नेर्दीक्षितव
सनात् ॥ परिधापयति कौशं ॥ ॥निष्क्रम्य यूपं गच्छत्युत्तराद्दक्षिणाद्वा ॥ स दक्षिणेन तं गच्छेद्योहि उत्तरातावा दक्षिणतवचनात्
॥ ॥आरोहं जायामामंत्रयते जाय एहि स्वो रोहावेति रोहावेति प्रत्याह ॥ प्रजापतेरित्यारोहतः जायापती ॥ ॥स्वरिति गोधूममाल
मते चषालं ॥ ॥शिरसा यूपमुज्जिहीतेऽमन्ता इत्यनेन मंत्रेण यूपाग्रमुज्जिहीते ॥ ॥अस्मेव इति दिशो वीक्षते यजमानः ॥ ॥स
प्तदशोऽश्वत्थपात्रापनद्धान्नूषपुटाननुदस्य यस्मै विशः अस्मै यजमानाय अश्वत्थपत्रोपनद्धान्नूषपुटाननुदस्यति ॥ विशः प्रजाः ॥ ॥प्र
तिगृह्णात्येनान् । तान् यजमानः प्रतिगृह्णाति ॥ ॥नमो मात्र इति भूमिमवेक्षते अनेन मंत्रेण ॥ ॥सरुक्मे वस्तचर्मण्यवरोहति भूमौ वा ॥ स
रुक्मायामेवा भूमिग्रहणं तु सरुक्मार्थमेवान्यथा वाच्यमयं प्रसत्वात् ॥ ॥उत्तरवेदिमपरेणौदुंबरीमासंदीं वस्तचर्मणास्तृणाती
यंत इति ॥ अनेन मंत्रेण ॥ ॥स्वेतमस्यामुपवेशयति यंतासीति ॥ वा ऊ गृह्णात यजमानमासंद्यामुपवेशयति यंतासीत्यनेन मंत्रेण ॥ ॥नैवा राम°
रेण प्रचरति ॥ अस्मिन्नवसरे ॥ ॥प्राक्स्विष्टकृत औदुंबरपात्रेऽप आसिच्य पयश्च ॥ सप्तान्नौषद्धीणां पयोत्रासिच्यते ॥ ॥सप्तदशान्नान्या २७

वंपति यान्स्मृतिवाः तच्च ॥ ॥एकं वर्जमभोजनं तस्याशासात् ॥ एकमन्नं वर्जयित्वा । तस्य अभोजनं । उच्छासनं यावज्जीवमित्यर्थः
॥ ॥स्रुवेण संभृताञ्जुहोति वाजस्येममिति प्रतिमंत्रं । सप्तैतानि जुहोति कर्म्माणि । ततश्च सप्तानां षड्गुणानां पयोत्रासिच्यते । सप्ततु षध्च
तुर्मुष्टिकानि भवंति चोदकानुग्रहाय ॥ अपावान्यधर्मो भवति ॥ वस्त्रसामान्यात् ॥ ॥शेषेणाभिषिंचति यजमानं देवस्य त्वेति यजमा
नं देवस्य त्वेति मंत्रेण ॥ शेषश्च हुतशेषः ॥ ॥सरस्वत्यै वाचस्स्थाने विषंत्वा देवानां ॥ प्रयोगः ॥ ॥सरस्वत्यै त्वेति वा ॥ ॥सम्राडुपमसावि
त्याह त्वामहमाह त्वरचेः श्रुतत्वात् ॥ ॥अग्निरेकाक्षरेणेत्यनुवाकं द्वादशवत्कृत्वा नैवारस्विष्टकृदादि करोति माहेंद्रादि वा ॥ द्वादश
वदिति जुहोति वाचयति वा । अत्रापि हि श्रूयते । अथोजितीर्जुहोति । वाचयति वा ॥ ॥अवरुह्य गच्छति स्तोत्राय प्रहितः ते स्तोत्राय
प्रमीवति स उपावरोहति सोत्ने स्तोत्रस्य भवत्यंते शस्त्रस्येति ॥ ॥ऊर्जितिभ्यो वोत्तरा माहेंद्रं भवति । ततः स्विष्टकृदिडं ॥ ॥षोडशंपते सो
त्रं चमसैरेवाषोडशिग्रहयागो नेतः स्तोत्रं चमसैरेव भवति । ग्रहो न भवत्येवकारणात् ॥ ॥ऋत्विक्चमसेषु सप्तदशाऽवनयति ॥ शप्तद
शसोमग्रहान् ऋत्विक्चमसेषु अवनयति ॥ इयांस्तु विशेषः द्वौ द्वौ अवनयति ॥ ॥एकं नेष्टुश्चमसेऽवनयति ॥ ॥उदवमानीयाते
यूपवेष्टनान्यध्वर्यवे ददातीति वासांसि ॥ ॥यथापमुक्तं हिरण्यस्रजः । दीयंते यायायस्य हिरण्यस्रजः उपमुक्ताः ॥ ॥उपाध्याय कर्कवि
वरणो कात्यायनपरासूत्रभाष्ये वाजपेयः समाप्तः ॥ ॥१४॥ ॥ॐ इति मंत्रपाठानुसारिणाचार्येण वाजपेयान्तविच्छिन्नः ॥ इदानीमवस

कर्क० १८

रघ्राप्रोराजसूयोनुविधेयः॥तदर्थंसूत्रं॥ ॥राज्ञोराजसूयःभवतीतिसूत्रशेषः॥सचायंराजशब्दःक्षत्रियजातिनिमित्तःपूर्वदेशान्तरेदृश्यते॥
तस्ययत्कर्मस्मृतिविहितंतद्राज्यमित्युच्यते।किंचातत्तंजनपुरपालनादिननुचराज्ययोगाद्राजशब्दःप्रयोगःसार्वभौमःतद्युक्तेक्ष
त्रियेपिराजशब्दःप्रयुंजतेजनाइति।राज्यंयःकरोतिसराजेति॥एवंचकृत्वाराजसूयप्रवेष्ट्यादर्शनंभवति॥यदिब्राह्मणोयजेतबार्हस्प
त्यंमध्येनिधायाहुतिमाहुतिंहुत्वाभिघारयेत॥यदिराजन्यऐंद्रंयदिवैश्योवैश्वदेवमिति॥त्रयाणामपिवर्णानामधिकारंदर्शयति।तच्च
यदिराज्यस्यकर्त्ताराजातदेवमुपपद्यते।अत्रोच्यते॥नराज्यकर्त्ताराजेतिशक्यतेवक्तुं।नह्यत्रप्रत्ययलोपःप्रातिपदिकस्यप्रत्यापत्तिर्वास्म
यते॥राजशब्दात्तुवेत्कर्म्मणिष्यञ्प्रत्ययोविधीयते॥तेनराज्ञःकर्म्मराज्यमितिशक्यतेवक्तुं।नराज्यकर्त्ताराजेति।यत्त्विष्ट्याब्राह्मणादी
नांदर्शनमुक्तंतद्राजसूयानवहिरन्नाद्यकामस्यावेष्टिर्विहितातद्विषयमिति॥यच्चैकदेशेनातोराजशब्दःप्रयोगःऽराज्ययोगानुप्रयोगप
सार्वभौमइत्यत्रब्रूमःएकादशेपिशब्दशक्तिमंतरेणप्रयोगोनुपपन्नएव॥सार्वभौमप्रयोगउपचारवत्।राज्ञःकर्म्मेऊर्ध्वंनवाऊर्ध्वे
नूसराजेवराजेत्युच्यतइति॥तथाचसमानचोदनायांदृश्यते।तस्माद्ब्राह्मणाश्वमेधेनयजेत।क्षत्रियपज्ञउवाएषयदश्वमेधनयजेतय
क्षत्रियपयसंउवाएषयदश्वमेधइति।तस्माद्ब्राह्मणःक्षत्रियमधस्तादुपास्तेराजसूये।यजमानेसन्नम्रत्विक्त्वेनेति।क्षत्रियस्यरा
जसूयंदर्शयति॥ ॥अनिष्टिनोवाजपेयेन।तस्माद्वाजपेयेनेष्ट्वानराजसूयेनयजेनेतिश्रुते॥ ॥इष्टिसोमपशवोभिन्नतन्त्राःका

राम० १८

लभेदात्॥अनुमत्यादयइष्टयःपवित्रादयःसोमाः।मरुदादयश्चपशवः।एतेभिन्नतन्त्राभवंति।उक्तंएतत्॥कालभेदात्भिन्नकालानामे
षांविधानमिति।ननुचकालभेदात्भेदउक्तएव।किमुच्यते॥कालभेदाद्भेदोनफलभेदेनेति॥तत्रउक्तः।राजसूयेनस्वाराज्यकामोयजेतेति
सकलस्यराजसूयस्यफलसंबंधः।राजसूयशब्दश्चयजतिशब्दसमानाधिकरण्याद्यत्रतिषुवर्त्ततेनसर्वजातानामेकफलमिति॥ ॥पवित्रेश्च
उद्वीक्षः॥सचसोमयागोदीक्षासंबंधात्॥ ॥सहस्रदक्षिणः।एवंवांश्वदाभ्ययहांतिस्रोनूवंध्यासौधातवीचात्रभवति॥ ॥माघीपक्षस्य
जनीयेदीक्षा।माघपौर्णमास्याउपरिष्टात्पदेगतेतयजनीयंतत्रदीक्षा।फाल्गुनावतारप्रतिपदीत्यर्थः॥ ॥तदंतेपूर्णाहुतिर्गृहेष्विक
तोवरदक्षिणा।सयदिकामयेतउपादेतायचकामयेतापिनाद्रियेतेतिवचनात्।इच्छतरस्यात्तं॥ ॥श्वःप्रभृत्यन्वहंपंचोत्तराणि॥हवीं
षिभवंतीतिशेषः।अथश्वोभूते।अथश्वोभूतइतिवचनात्।अन्वहमेकैकंतान्याह॥ ॥अष्टाकपालोनुमत्यैपुरोडाशोभवतीतिरोष
॥ ॥शम्यायाःपश्चाद्विष्णुशंनेस्रुवेहुत्वादक्षिणाम्फल्गुकमादायदक्षिणागत्वास्वयंप्रदीर्णइतिरिणोवाग्नौजुहोत्येषतेनिर्ऋतइतिस
म्यायाःपश्चाद्विच्छिन्नेषुपिष्यमाणेषुयदवशीर्यतेतंडुलापिष्टंवाजतस्रुवेहुत्वादक्षिणाम्फल्गुकंगृहीत्वादक्षिणांदिशंगत्वास्वयंप्रदी
र्णेश्वभ्रेइतिरिणेचोषरेअग्नौजुहोत्येषतेनिर्ऋतइतिमंत्रेण।अग्निग्रहणंचेतिकर्त्तव्यतावकदास॥ ॥अनपेक्ष्यमेत्यानुमतस्यसंवपना
दिकरोति॥संवपनादिग्रहणंचरुणांनष्टंतद्भवति॥ ॥वासोदेयं।आनुमतस्यदक्षिणा॥ ॥हिरण्यमाग्नावैष्णवेदेयमित्यनुवर्त्तते॥

२-६

कृ.द०
१९

पुनरुत्सृष्टो गौरग्नीषोमीये देयः॥ ॥अनड्वान्साण्डः ऐंद्राग्ने देयः॥ ॥गौराग्रयणो देय इति।ननु च।गौरेवाग्रयणे भवति अतश्चपवाग्रयणं ब्रीह्य
ग्रयणं विशेष्यते॥ न सौम्यायनपणमिति॥ ॥चातुर्मास्यप्रयोगेण फाल्गुन्या।भवतीति शेषः॥ चातुर्मास्यशब्दो धर्मातिरेशार्थो नैतानि चा
तुर्मास्यानि।चातुर्मास्यवद्राजसूययागा एते।अतश्चानित्यानामपि क्रिया भवति।नैतैः कृतत्वमचातुर्मास्यत्वात्॥ ॥पौर्णमासेन कृसमपद्याने
त्यामावास्येन शुनासीरीयात्॥ अत्रापि दर्शपौर्णमासवद्राज एवायं न दर्शपूर्णमासाविति॥ ॥पवित्रदीक्षास्थाने शुनासीरीयं भव
तीति सूत्रशेषः॥ ॥पंचवातीयमाहवनीयं प्रतिदिशं व्यूह्य समध्ये च स्रुवेणाग्निषु जुहोत्यग्निनेत्रेभ्य इति प्रतिमंत्रं पंचवातीयमिति कर्मनामधेयं प
होममंत्राणां च लिंगेन व्यवस्था॥ ॥उत्तरा समस्य ये देवा इति प्रतिमंत्रं॥ जुहोतीति शेषः समस्य वाऽग्नीनिति॥ ॥त्रियुक्तोऽश्वरथो दक्षिणा।त्रिभिरश्वै
र्युक्तो रथो दक्षिणा॥ ॥व्याधितस्याप्येवं।व्याधिगृहीतस्यापि पंचवातीयं भवति॥ ॥इंद्रतुरीयं व्याख्यातमिति शेषः॥ एतच्च काण्वानां श्वाभृतेषु पठ्य
ते॥ ॥आग्नेयो वारुणो यवमयश्चरुरन्यत्रापि॥ वारुणो यवमय एवेति॥ ॥रौद्रश्च गावेधुकः।चशब्दादन्यत्रापि रौद्रो गावेधुको भवतीति॥ ॥व
हिनीरध्वैंद्राया गौर्वहति स्कंधेन सा वहिनीत्युच्यते।न दीर्घ्यं दध्यैंद्रं भवति॥ ॥सैव दक्षिणा॥ ॥अपामार्गहोमः॥ व्याख्यास्यत इति सूत्रशे
षः।इंद्रतुरीयात् श्वाभृते काण्वानां पठ्यते॥ ॥स्रुवि पालाशे वैकंकते वाऽपामार्गतंडुलान्कृत्वा।तेनैव सर्वहोमः कर्तव्यः॥ ॥स्रुवकृवद्दि
गत्वा।अग्निर्दक्षिणाग्निर्दिगुदीची॥ ॥प्राचीवा।स यदि प्राङ्त्वा जुहोति प्राचं स्रुचमस्यति यद्युदङ्त्वा जुहोत्युदंचं स्रुवमस्यतीति श्रूय

राम०
१९
२०

ते॥अत्रच गमनमात्रे विकल्पः।वितानं तु प्रागुदगेव॥ ॥आग्रसहस्तेत्युल्मुकादानं॥ अन्वाहार्यपचनात्॥ ॥देवस्य त्वेति जुहोति प्रागुद
ग्वा गत्वा॥ ॥रुद्रसांत्वेति स्रुवमस्यति तां दिशं यस्यां गत्वा जुहोति॥ ॥अवधिष्ण्यरुद्रस्त्यापं त्यनपेक्ष्य॥ ॥अभिचर्यमाणो पितादिशं गत्वाभि
चरतो नामादिशं होमः।स्रुवग्रासनागमनेषु।स चापंनामादेशे।रुद्रःशब्दस्य स्थाने भवति॥ अमुमसाविनो दक्षिणा॥ ॥त्रिषंयुक्तेषु कर्मान्व
ते।आग्नावैष्णव ऐंद्रावैष्णवो वैष्णवो वामनो दक्षिणा॥ ॥अलिंगग्रहणो गौः सर्वत्र भवति॥ ॥आग्नागौष्मः ऐंद्रापौष्णः पौष्णश्यामो दक्षिणा
अस्यापि श्वाभृते काण्वपाठात्॥ ॥अग्नीषोमीय ऐंद्रासौम्यः सौम्यावभ्रुर्दक्षिणा॥ अस्यापि श्वाभृत एव काण्वीयायां पाठात्॥ ॥
एकादशकपालः प्रथमः प्र[illegible]॥ ॥चरवरितिरे भवंति॥ ॥वैष्णवस्त्रिकपालो वा।भवति चरुर्वा॥ ॥श्वा वैश्वानरो द्वादशकपालो
वारुणश्चैकतंत्रे।भवतीति शेषः॥ ॥श्वावेकः।भवतीति विकल्पः॥ ॥ऋषभः पूर्वस्य दक्षिणा॥ ॥वृषभं वा स उत्तरस्य॥ ॥अभावेऽकृत्स्न
तंत्रमैंद्रवैतद्भवति॥ एकतंत्रेन चोदकपरिप्राप्त्याऽन्वाहार्य इति॥ ॥द्वादशान्तराणि रत्नहवींषि भवंति॥ द्वादशग्रहणं क्रियते॥
चतुर्गृहीतस्यापि श्वाभृते नुष्ठानं यथास्यादिति॥ ॥प्रतिगृहमेकैकं स्वः स्व कर्तव्यं॥ ॥सभारूढ निर्मंथिते॥ ॥अग्नयेनीकवते सेना
न्यो गृहे॥ ॥बार्हस्पत्यश्चरुः पुरोहितस्य गृह इति सर्वत्रानुवर्तते॥ ॥ऐंद्रो यजमानस्य।ऐंद्र एकादशकपालो यजमानस्य॥ ॥अदित्यै
चरुर्महिष्याः॥ ॥वारुणः सूतस्य।सूतश्चाश्वसारथिः॥ ॥मारुतो ग्रामण्यः।सप्तकपालः।ग्रामणीर्महत्तरः॥ ॥सावित्रः क्षत्तुः।आष्टाकपालो

२८६

कर्क० १९

पुनरुत्सृष्टो गौरमीषोमीये देयः॥ ॥अनड्वान्साण्डः ऐंद्राग्ने देयः॥ ॥गौराग्रयणे देय इति।ननु च गौरेवाग्रयणे भवति अत श्च पवाग्रयणे ब्रीह्या
ग्रयणं विशेष्यते॥ न सौम्याग्रयणमिति॥ ॥चातुर्मास्यप्रयोगः फाल्गुन्यां भवतीति शेषः॥ चातुर्मास्यशब्दो धर्मातिदेशार्थो नैतानि चा
तुर्मास्यानि।चातुर्मास्यवदाजस्य यागा एते।अतश्च नित्यानामपि क्रिया भवति।नैतैः कृतत्वमचातुर्मास्यत्वात्॥ ॥पौर्णमासेन कृत्वमप्रज्ञाने
त्यामावास्येन शुक्लानां शुनासीरीयात्॥ अत्रापि दर्शपौर्णमासवदाज एवायं न दर्शपूर्णमासाविति॥ ॥पवित्रदीक्षास्थाने शुनासीरीयं भव
तीति सूत्रशेषः॥ ॥पंचवातीयमाहवनीये प्रतिदिशं व्यूह्य समध्ये च स्रुवेणाग्निषु जुहोत्यग्निनेत्रेभ्य इति प्रतिमंत्रं पंचवातीयमिति कर्मनामधेयं।
होममंत्राणां च लिंगेन व्यवस्था॥ ॥उत्तराः समस्य ये देवा इति प्रतिमंत्रं॥ जुहोतीति शेषः।समस्य वाऽग्नीनिति॥ ॥त्रियुक्तोऽश्वरथो दक्षिणा।त्रिभिरश्वै
र्युक्तो रथो दक्षिणा॥ ॥व्याधितस्याप्येवं।व्याधिगृहीतस्यापि पंचवातीयं भवति॥ ॥ऐंद्रतुरीयं व्याख्यातमिति शेषः॥एतच्च काण्वानां श्वोभूतेषुपष्ठ
ते॥ ॥आग्नेयो वारुणो यवमयश्चरुरन्यत्रापि॥ वारुणो यवमय एवेति॥ ॥रोहिणी गावो धुक्ता।च शब्दादन्यत्रापि रोहिणी गावेधुको भवति॥ ॥व
हिनीरथ्यं द्रापगौर्वहति स्कंधेन सा वहिनी।स्कंधेन।तदप्यं रथ्यं द्रं भवति॥ ॥सैव दक्षिणा॥ १ अपामार्गहोमः॥ व्याख्यातमिति सूत्रशे
षः।ऐंद्रतुरीयात् श्वोभूते काण्वानां पक्षे॥ ॥स्रुवे पालाशे वैकंकते वाऽपामार्गतंडुलान् कृत्वा।तेनैव सर्वहोमः कर्तव्यः॥ ॥स्रुवकृवदि
गन्नी॥ अग्निर्दक्षिणाग्निर्दिगुदीची॥ ॥प्राची वा।स यदि प्राङित्वा जुहोति प्राचं सन्धमस्यति यद्युदङित्वा जुहोत्युदंचं स्रुवमस्यतीति श्रूय

राम० १९

ने॥ अत्र च गमनमात्रे विकल्पः।वितानं तु प्रागुदगेव॥ ॥आग्नेयसहस्रेत्पत्कमुकादानं॥ अन्वाहार्यपचनात्॥ ॥देवस्य त्वेति निर्वपति प्रागुद
ग्वा गत्वा॥ ॥रक्षसां त्वेति स्रुवमस्यति।तां दिशं यस्यां गत्वा जुहोति॥ ॥अवधिष्वरदृत्यायं त्पनपेत्॥ ॥अभिचर्यमाणो पितां दिशं गत्वाभि
चरतो नामादिशं होमः।स्वप्रासनागमनेषु।सचापनामादेशी।रक्षः शब्दस्य स्थाने भवति॥ अमुमसाविनो दक्षिणा॥ ॥त्रिषंयुक्तेषु कर्माव्य
ते।आग्नावैष्णवमैंद्रावैष्णवं वैष्णवो वामनो दक्षिणा॥ ॥अलिंगग्रहणो गौः सर्वत्र भवति॥ ॥आग्नापौष्णमैंद्रापौष्णं पौष्णः श्यामो दक्षिणा
अस्यापि श्वोभूते काण्वपाठात्॥ ॥अग्नीषोमीयमैंद्रासौम्यः सौम्यो वभ्रुर्दक्षिणा॥ अस्यापि श्वोभूत एव काण्वीयपाठात्॥ ॥
एकादशकपालः प्रथमः प्रथमः॥ ॥चरवस्तिरे भवंति॥ ॥वैष्णवस्त्रिकपालो वा।भवति चरुर्वा॥ ॥श्वो वैश्वानरो द्वादशकपालो
वारुणश्चैकतंत्रे।भवतीति शेषः॥ ॥श्वो वैकः।भवतीति विकल्पः॥ ॥ऋषभः पूर्वस्य दक्षिणा॥ कृष्णं वासस्तूपरस्य॥ ॥अभावेऽकृष्ण
तंत्रमेदैवतद्भवति॥ एकतंत्रेण चोदकपरिप्राप्त्याऽन्वाहार्य इति॥ ॥द्वादशान्तराणि रत्निहवींषि भवंति॥ द्वादशग्रहणं क्रियते॥
चातुरेहीतस्यापि श्वोभूतेनुष्ठानं यथा स्यादिति॥ ॥प्रतिगृहमेकैकं श्वः श्वः कर्तव्यं॥ ॥समारूढे निर्मथिते॥ अग्नये नीकवते सेना
न्यो गृहे॥ ॥बार्हस्पत्यश्चरुः पुरोहितस्य गृहे इति सर्वत्रानुवर्तते॥ ॥ऐंद्रो यजमानस्य।ऐंद्र एकादशकपालो यजमानस्य॥ ॥आदित्ये
चरुर्महिष्याः॥ ॥वारुणः सूतस्य।सूतश्चाश्वसारथिः॥ ॥मारुतो ग्रामण्यः।सप्तकपालः।ग्रामणीर्महत्तरः॥ ॥सावित्रः क्षत्तुः।आष्टाकपालो

2८0

कर्क० २०

द्वादशकपालो वा। रुक्मप्रतीहारः इत्येवा॥ ॥अश्विनः संग्रहीतुः संग्रहीता रथयोजयिता॥ ॥पौष्णो भागदुघस्य। भागदुघो भोजयिता॥ ॥
रौद्रो यजमानस्य द्योतानपगोविकर्त्तं गृहेभ्यो गवेधुकानां आहरणं कृत्वा। अक्षावापोऽक्षदूतः। अक्षगोप्तेत्यपरे। गोविकर्त्ता हालिकः॥ ॥
चतुर्गृहीतं गुषाणां धान्यस्य वत्विति इतस्य॥ ॥नैर्ऋतः परिवृक्त्यै कृष्णव्रीहीणां नखनिर्भिन्नानां दर्विहोम एष ते निर्ऋत इति जुहो-
ति॥ वषट्कृते वा। ततश्च विकल्पो यं॥ ॥पृथ्वासंख्येर्दक्षिणा। हिरण्यं। शितिपृष्ठः २ ऋषभः ३ धेनुः ४ अश्वः ५ वृषः ६ शेपतोनद्धानौ ७
यमाऽवमादेऽनुपूर्वजौ ८ श्यामः ९ त्रिदक्षिणा। रौद्रः। १० शितिवाऊः शितिवालो योरन्यतरः। शितिवाऊः श्वेतसक्थिः॥ शितिवलः श्वेत-
पुच्छः। ऽ। तयोरन्यतरः। असिर्नखरः। नखरो पुरिधारः॥ ॥वालदाम वद्धक्षामवपणं। अक्षा उप्यंते। पृक्षिप्त दक्षिवपणं॥ ॥उष्ट्रस्य-
॥ ॥उष्ट्रस्याष्कृत्वेष्टितधनुः। ध्यकृशवेनचक्षा यनिधीयते॥ अजगरश्चर्मेत्यपरे॥ ॥चर्म्मतल्पैः शेषुकाः। सहेषुभिश्चर्म्म-
मय्यामस्त्रागच्यंते॥ ॥लोहितउष्णीषः॥११॥ चर्मापरिमृत्यपहतो नमस्य। जीर्णा अपहता अपद्वीकृशा। गोरुत्तमस्य रक्षिणा॥
॥ ॥परिवृत्ती चाह॥ मामेऽयशायां। वासीरिति। मध्ये मावासो दित्येतदुक्तं भवति॥ ततश्चासौ ब्राह्मणगृहं प्रविशति तत्र राज्ञो न स्वाम्यमि-
ति॥ ॥सौम्यारौद्रो गार्श्वरुः शुक्लापयस्विन्युस्तवसायाः मैत्रं दक्षिणा॥ ॥अनूच्यानोपयशायजेत। अनेन॥ ॥किलाशावाधंता किलासः श्वेतेन
व्याधिविशेष उच्यते। तद्वाधमि छं च यजेत। उशवद्यार्थे॥ ॥मैत्राबार्हस्पत्यश्चरुः। श्वेताभूते भवतीति शेषः॥ ॥बार्हस्पत्यमपि श्वत्याश्वत्थीयाः स्व-

राम० २०

२०२

यंभ्राप्राच्यदीचीवाशाखात्पात्रेणापिदधाति बार्हस्पत्यं॥ ॥विनाटाउथपर्यूदा नवनीतं स्वयंजातमाज्यमासिच्यपात्रे तस्मिंस्तु विष्टास्तंडुलानि
न्यायावपति। विनाटोरति इत्युच्यते। ता तारथपर्यूटा॥ स्वयंजातं नवनीतमाज्यं भवति॥ अत्र च तंडुलेष्वाज्यमासिच्यते। नाज्ये तंडुला। श्वेदकान्
ग्रहाय। तंडुलानां चाधश्यपाये न तक्रादिनास्पंदनं पक्वार्थे तया कार्यं॥ ॥उष्णा श्रुतो भवति। मैत्रेः अग्निष्टानि तस्मिन्न। बार्हस्पत्ये॥ ॥
एकप्रदानं॥ सचायं मेकएव यागः। मैत्राबार्हस्पत्य इति समुदायान्नदितोत्पन्नेः॥ अतश्चैकं प्रदानं। अद्वी छित्केतया चावदानग्रहणं॥ ॥
गोदक्षिणा॥ ॥अभिषेचनापदशपेपयोर्दक्षिणा। तत्र देवयजने भवत इति सूत्रशेषः॥ तयोश्च॥ ॥दक्षिणामभिषेचनीयस्यान्य-
ति॥ ॥फल्गुनीपक्षयजनीये भिषेचनीयापदीक्षते॥ फाल्गुन्याः पक्षेऽतीते यजनीयं प्रतिपत्तत्र दीक्षा॥ चैत्रशुक्लप्रतिपदीत्यर्थः॥ ॥
२ भार्गवो होता। भृगुसगोत्रो होता भवति। अभिषेचनीयदशपेययोरेवानसर्वत्र॥ तत्रैतच्छ्रूयत इति॥ ॥पंचापवर्गः पंचभिरहोभिरप-
वर्गोऽस्य यउक्तं भवत्येकादशाहेति॥ ॥सोमं क्रीत्वा द्वैधमुपनह्य पर्युह्यैकं ब्रह्मागारे निदधाति। स च दशपेयार्थः॥ ॥अग्नीषोमीयस्य पशु-
पुरोडाशमनुदेवसूहवींषि निर्वपति यजप्रैषाणां। देवसूहवींषि नामधेयं। यजप्रैषाणीति॥ उक्तः। चोदकेन। यद्येवं किमर्थमिदमुच्यते
यजप्रैषाणीति। मुख्यत्वात् पशुपुरोडाशधर्माः शकानि वाद्यर्थं॥ ॥प्राशुकानां सवित्रे सत्यप्रसवाय। प्राशुकाः पुनः प्ररूढाः॥ ॥श्यामाकः सो-
माय वनस्पतये॥ ॥नैवारो बृहस्पतये वाचे॥ ॥हायनानामिंद्राय ज्येष्ठाय। हायनाः रक्तशालयः॥ ॥रुद्राय पशुपतये। नांबो मित्राय सत्याय

कर्क. ५२ स्वयंजाता व्रीहयो नीवाराः॥ ॥वरुणाय धर्मपतय इति। अर्थः॥ ॥उत्तमेन चरित्वा सविता त्वेत्याह यजमानं वा ऊर्ध्वं दक्षिणं गृहीत्वा नामास्य गृह्णाति
मंत्रे यथास्थानं॥ यस्मिन् स्थाने अमुमिति सर्वनाम तत्र नामग्रहणं तत्संस्कारात्॥ ॥मातापित्रोश्च। यथास्थानं नामग्रहणं॥ का॥ एवोनां पद्यते
॥एष वः कुरवो राजा पांचालो राजेति च॥ तदुच्चारणार्थमेवमाह इत्यनेनाह॥ ॥यस्याश्च जाते राजा भवति। जातिग्रहणं जनपदोपल
क्षणार्थं॥ यस्मिंश्च जनपदे राजा भवति तस्य च नाम गृह्णातीत्यर्थः। कुत एतत्॥ ॥देशस्यानवस्थितत्वात्॥ न हि जात्या देश व्यवस्था॥
कुरुपंचालग्रहणमत्र देशोपलक्षणार्थं। अंगाः वंगाः सुह्माः पुंड्रा इति चैवमादीनां॥ ॥पशुपुरोडाशतंत्रं प्राधान्यात्॥ देवसूहवि
षां पशुपुरोडाशिकं तंत्रं भवति॥ कुत एतत्॥ प्राधान्यात्॥ मुख्यत्वादित्यर्थः॥ न हि पशुपुरोडाशः प्रधानभूत इति स्थानित्वात् प्राधा
न्यमुक्तं॥ ॥इतरेषां वाल्पत्वात्॥ इतरेषां वा तंत्रं भवति न पशुपुरोडाशिकं। कुत एतत्। अल्पत्वात्॥ बहूनि हि तानि देवसूहवींषि
एवं च विकल्प एवायं। मुख्यत्वात् पौरोडाशिकं तंत्रं भवति। अल्पत्वेन वेतरेषामिति किं च॥ ॥स्विष्टकृद्धुते च। उभयरूपा हि स्विष्टकृ
द्धुतिः। का॥ एवानां यजः प्रैषं स्विष्टकृन्मा धृष्टिनानां प्रैषप्रैष इति॥ तेनात्र विकल्प इति पाशिकान्यल्पत्वान्तु ग्रहोऽनुरूपतर इति। तेनात्र
विकल्प इति पाशिकान्यल्पत्वान्तु ग्रहोऽनुरूपतर इति॥ प्रैषणवन॥ ॥इडांतेऽपां गृह्णाति। इडांत अग्नेर्देवसूहविर्भिरोपकार्याया ५२
लक्षणं॥ तत्र श्रुतद्भागपरिहरणं तेषां ग्रहणं॥ श्रुतौ तु स्विष्टकृत्समनंतरमपां ग्रहणं पठ्यते तत्रापि स्विष्टकृता शेषकार्योपल २७३

क्षणं॥ ॥रूपमुत्तरेणानैमित्तिकारसंभवात्॥ या आपो निमित्तेन प्राप्यंते यथा गोरुल्व्याः आतपवर्ष्यास्तासामस्मिन्काले ग्रहणासंभवा
दतः पूर्वं गृहीत्वा रूपमुत्तरेण पुनर्ग्रहणं॥ तच्च वचनात्॥ ॥गत्वेतराः पृथक्पात्रेष्वौदुंबरेषु सारस्वतीः॥ अपो गृह्णाति॥ ॥अव
गाह्यावगाह्य पशोः पुरुषाद्वा पूर्वापरा ऊर्मी। अवतीत्यत्यर्थः पुरुषाद्वा पूर्वापरौ ऊर्मी गृह्णाति॥ ॥स्यंदमानाः गृह्णाति॥ ॥प्रतिलोमा गृह्णाति
॥ ॥आपपतीर्यो स्यंदं त्यपएवापयंतिता अपयंतीति॥ ॥नदीपतिं सूर्याः। नदीपतिः समुद्रः। तत्रापि याः सूर्याः सद्धूयंतिताः सूर्याः वीवीरुह्
रित्यर्थः। ता गृह्णाति॥ ॥काष्ठवो छृतोऽ। अथवा समुद्राभिरेवाद्भिः काष्ठमुच्छ्रितमूर्ध्वं पाभिस्ता गृह्णाति॥ ॥निवेष्याः गृह्णाति निवेष्य आवर्तः
॥ ॥स्यंदमानानां स्थावराः प्रत्यातापे। पास्सूपरिष्टात् स्थित आदित्यस्तपति। तां गृह्णाति॥ ॥अंतरिक्षप्रुतिग्रसा आतपवर्ष्याः सरस्याः कूप्या
: प्रुष्वा मधु गोरुल्व्या। पयः घृत॥ उक्ता आपस्तासां ग्रहणमाह॥ ॥सारस्वतीर्गृह्णातीत्यपो देवा इति॥ ॥गृहीत्वोत्तरा सु च तद्गृहीता निरस्य
ऊर्म्यादिभिः स्वाहाकारांतैः पूर्वैः पूर्वैः प्रतिमंत्रं मुत्तरैरुत्तरैर्गृह्णाति॥ का॥ एवानां च यथाश्रुति विनियोगक्रमेण मंत्रक्रमेण अपो गृहीतव्याः
॥ ॥आपस्वराजरतिमरीचीर्गृहीत्वा गृहीत्वो नलिना सर्वसु संसृजति॥ सारस्वतीषु मरीचिषु च न होमः प्रतिषेधात्॥ ॥औदुंबरपात्रे समासि
चत्यै नाम मधुमतीरिति। अनेन मंत्रेण॥ ॥मैत्रावरुणधिष्ण्यस्य पुरस्तान्निदधात्यनादृष्टाः सीदतेति॥ ॥पात्राणि च वल्मी पालाशोदुंबरनैयग्रो
धपादाश्वत्थान्यभिषेकाय। चशब्दात्पुरस्तान्निदधाति॥ ॥उच्छ्वाःश्व भवति॥ ॥पयस्यामैत्रावरुणी माध्यंदिनीयैः सह भवति॥ ॥शतेन सहस्रा

कर्क०
११

णिदक्षिणा॥ ॥मरुत्वतीयाने पात्राणि पूर्ववत्॥ व्याघ्रचर्मास्तृणाति सोमस्य त्विषिरिति॥ अनेन मंत्रेण॥ अगृहीते माहेंद्र इति वचनात्॥ सर्वमरुत्व
तीयानां मंत्रे॥ ॥अपरेणैनं सीसं निदधाति॥ व्याघ्रचर्मणः॥ ॥पार्थानामग्नये स्वाहेति॥ षड् जुहोति प्रतिमंत्रं। पार्थानि हि प्रकृत्याह षट् पुरस्ताद
भिषेकस्य जुहोतीति॥ ॥पवित्रे कृत्वौदुंबरपात्रमेनयोः प्रनयति॥ पौर्णमासिकेन विधिना पवित्रकरणं। उत्संदिशास्त्रिमंत्रं॥ ॥ताभ्यामुत्पुना
त्यपः सवितुर्व इति। ताभ्यां पवित्राभ्यामभिषेचनीया अप उत्पुनाति सवितुर्व इत्यनेन मंत्रेण॥ ॥अभिषेचनीयेष्वेनाभ्यानयति सधमाद इति॥
अभिषेचनीयानि च पालाशौदुंबरादीनि॥ ॥तार्प्यं परिधापयति। तच्च देशमंतार्प्यमुच्यते॥ ॥त्रिपाणं वा त्रिरुत्नःपारतं वा। सहृदिति विकल्प
॥ ॥घृतोन्नमेके॥ एके आचार्याः घृतोन्नं तार्प्यमभिवदंति घृतोन्नं च घृतशौचं॥ ॥यय यज्ञरूपस्यूतं। तस्मिन्सर्वाणि यज्ञरूपाणि निष्यूतानि भवं
तीति वचनात्॥ यज्ञरूपाणि च स्तुक्ष्मसादीनि॥ ॥पांडुं च निवस्ते। पांडुं कंबलं। तच्च निवस्ते॥ उपरि तार्प्यस्य॥ ॥अधीवासं प्रतिमुंचत्याशीर्षं सं
वेष्टनिचातिव ऋहते नाभिदेशे परिहरते वा॥ अधीवासः कंचुकः प्रतिमोकवचनात्। उत्सीषः शिरोवेष्टनं तत्संवेष्टनिवीतो। निवी
तं च कंठापसनानेनानोवगृह्यते। नाभिदेशे परिहरते वा॥ ॥तार्प्यप्रभृतीनि दृष्टस्येति प्रतिमंत्रं। परिधत्ते॥ ॥दीक्षितवसननिवृत्तिर्विरोधा
त्॥ माहेंद्रादौ वा पुनः परिधानं निधायैतानि तार्प्यादीनि॥ ॥इंद्रस्य वार्त्रघ्नमिति धनुरातनोति। आरोपयति। मित्रस्य वरुणस्येत्यस्य बाहू दिमा
र्ष्टि। वा। धनुषः कोटावुच्यते मंत्रद्वयोपदेशात्॥ प्रतिमंत्रमिति गम्यते॥ ॥धनुः प्रयच्छति त्वयायमिति। अनेन मंत्रेण यजमानाय॥ ॥द्वा

राम०
११
२७५

शाविधृति मंत्रमादायति स्त्ररस्यः प्रयच्छति पातैनमिति प्रतिमंत्रं। यजमानायैव॥ ॥आविर्मर्या इति वाचयति॥ केषांचित्प्रतिमंत्रानेति संप्रदा
यः॥ ॥अवेष्टा इति लोहायसमाविध्यति केशवायसदोंत उपविष्टाय। लोहायसं तान्त्रलिंगात्॥ अथ यज्ञाहा संभवति॥ लोहितायस
हिदंदशूकादिति॥ ॥समन्वंतमाक्रमय दिशः प्राचीमारोहेति वाचयति प्रतिमंत्रं प्रतिसंयथालिंगं। समन्वंतं यजमानं वा उगृहीतमाक्रमय्य
दिशं चाक्रमणमाभिमुख्यगमनमात्रेण वा। न ह्यन्यथा संभवः॥ आक्रमय्यैव वाचयति॥ ॥आक्रम्य पादेन सीसं निरस्यति प्रत्यस्तमिति। यच्छा
र्दूलचर्मणो जघनार्द्धे सीसं निहितं भवति॥ तत्पदा प्रत्यस्यं प्रत्यस्तमित्यनेन मंत्रेण॥ ॥व्याघ्रचर्मारोहयति सोमस्य त्विषिरिति॥ यजमानमारोह
यति वा उगृहीतं मंत्रे तु यजमानस्यैव॥ ॥रुक्ममधःपदं कुरुते मृत्योरिति। रुक्म आभरणविशेषः॥ तं पदस्याधस्तात्कुरुते मृत्योरिति मंत्रेण।
॥ ॥शिरसि च नवतरं शततरं वौजोसीति॥ चशब्दाद्रुक्ममेव॥ ॥बाहू उद्गृह्णाति हिरण्यरूपा इत्यनेन मंत्रेण यजमानः॥ ॥मित्रोसि
वरुणोसीति चा। बाहू उद्गृह्णातं॥ ॥स्थितं प्रांचमभिषिंचति पुरोहितोध्वर्युर्वा पुरस्तात्पालाशेन प्रथमं पश्चादितरे द्वितीयेन स्वस्त्रितीयेन मि
त्र्यो राजन्यो वैश्यश्चतुर्थेन सोमस्य त्वा द्युम्नेनेति प्रतिमंत्रं॥ स्थितं प्रांचमभिषिंचति॥ पुरस्ताद्व्यवस्थितः। पुरोहितोऽध्वर्युर्वा। पालाशेन पात्रेण
पश्चादितरे व्यवस्थिताः। द्वितीयेनौदुंबरेण भ्राताभिषिंचति॥ तृतीयेन नैयग्रोधपादेन राजन्यो मित्रत्वेनोपागतः। वैश्यश्चतुर्थेनाश्वत्थेन
पात्रेण॥ सोमस्य त्वा द्युम्नेनेति प्रतिमंत्रं॥ ॥अभिषिंचामीति सर्वत्र साकांक्षत्वात्॥ अभिषिंचामीति सर्वत्राध्याहारः॥ ॥क्षत्राणां क्षत्रपतिरे

२८३

का॰ २३ षीनि च॥ सर्वत्रैव शेषः॥ ॥इममम्रुक्षेति च प्रथमो देवसूवरः॥ अभिषिंचति॥ ॥पार्थानामिंद्राय स्वाहेति षड् जुहोति प्रतिमंत्रं॥ ॥शौनःशेपं च प्रेष्य
ति॥ शौनःशेपं शंसेत्येवं॥ चशब्दादनंतरं। पार्थसमनंतरमेव॥ यजमानं वा॥ प्रेष्यति॥ तदा तत्रैव शंस्यते॥ ॥ऋङ्मिश्रं चाप्रतिगरं स्याथेति गाथा
नां ऋचो ओं यत एव। गाथा छंदो विशेषेण॥ ॥होताध्वर्यू हिरण्मय्योः कशिपुनोरुपवीष्टौ आसीनौ कशिपुमस्तरके॥ ॥शौनःशेपांते पृथक्
शते ददाति॥ पृथग्वचनात्तं गवामेकैकस्य॥ ॥सहस्रं वा॥ वेति विकल्पयं॥ ॥आसनं च ददाति। यो यत्रोपविष्टः॥ ॥कृत्थ्यन्यामभिषेकेण प्रलिंपते
प्रपर्वं न स्पृशति॥ कृत्थ्यनीरूरमविषाणा। तया शरीरस्थं लमोदकाभिषेकेण प्रलिंपते प्रपर्वं न स्पृशति॥ ॥चर्म्माणि निर्विक्रमयति दिशामिति प्रतिमं
त्रं॥ विक्रमणं कारयत्यध्वर्युर्मंत्रस्तु यजमानस्यैव॥ क्रमणाशेषत्वात्॥ ॥पालाशे शेषानासिच्य पुत्राय प्रयच्छति प्रियप्रजामोप्यरं मेकर्म्मेदं वीर्यं एनो उ
सतनोत्विति॥ शेषा अभिषेकशेषाः॥ ॥शालाद्वार्ये जुहोति त्रेधा वारव्रेपजापतइति॥ ॥पुत्रयजमानयोर्नामग्रहणं पितृशब्द पुत्रे कृत्वा यथायथं
पश्चात्॥ अयममभिमन्यस्नुर्नो [illegible]स्मा पितेत्येवं पितृशब्दः पुत्रकृतो भवति यथायथं पश्चादिति॥ अयमजुनोभिमन्या। पितेत्येवं॥ अयममु
ष्य पिता ऽसावस्य पितेति मंत्रपाठः॥ व्राह्मणोपि च यः पुत्रः सोपि तरं करोति यः पिता तं पुत्रं पुनर्यथायथं। यः पिता तं पितरं करोति यः पुत्रः सं
पुत्रमिति॥ ॥आग्नीध्रीये पालाशे नशेषां जुहोति रुद्र यत्तेरति उत्तरार्द्धे अभिषेकशेषाः॥ ॥गवां शतमधिकं वा स्वस्याहवनीयस्योत्तरतः स्थापय राम॰ २३
तिस्व शब्देनाख्यायते॥ ॥पूर्वाग्निवहनं च सामाग्निशान्तिकपौष्टिकार्थाग्नियेनानमोध्या येन तं च सामाग्निस्थापयति॥ ॥वाजपेयवद्रथमवरूह्यरदि

२७५

रास्यां वेदिश्रोणौ पुनक्ति पूर्ववन्मित्रावरुणयोरिति चतुर्भिः॥ वाजपेयवदिति रथावहरणं धूर्गृहीतस्य चावर्त्तनं कृत्वा दक्षिणस्यां वेदिश्रोणौ स्थव
स्थितं पुनक्ति पूर्ववन्मित्रावरुणयोरित्यमेन मंत्रेण॥ चतुर्भिरश्वैर्जन्तराप्रष्टिश्चतुर्थः॥ ॥दक्षिणापथेनयात्वा ऽपरेण चात्वालं स्थापयति र
थं॥ ॥अन्यथायैत्वेति सुन्वन्नारोहति॥ तमेव रथं॥ ॥मरुतामिति दक्षिणाधुर्यं प्राजति यन्ता॥ ॥गवां मध्ये स्थापयत्यपामेति॥ अनेनमंत्रेण। रथं य
तेव॥ ॥धनुरार्त्न्यौपस्पृशति गा यजमानः समिंद्रियेणेति॥ अनेन मंत्रेण॥ ॥जिनामी माः ऊर्वरमारति वा वाह॥ वशब्दा यजमानः॥ ॥तावद्दद्यावा
गोः स्वामिने दत्वा पूर्वेण यूपं परीत्यांतःपात्यदेशे स्थापयति मानरति॥ अनेन मंत्रेण॥ ॥अमेय गृहपतयरति च त्वा रिरथ विमोचनीयानि जुहोति
मंत्रं॥ ॥पश्चन्नारसोसानिदशाहोपानहारुपमुंचते॥ यजमानः॥ ॥भूमिमवेक्षते पृथिवि मातरिति अनेन मंत्रेण यजमान एव॥ ॥अवरोहति
हंसः शुचिषदिति॥ रथात् यजमानः॥ ॥विमुच्यासयं त्रिकं रथवाहणं करोत्यनसस्तत्कर्म्म शालायाः दक्षिणतः। विमुच्यरथं सहयंतारं रथवाहणके
रोति॥ ॥रथवाहनस्य दक्षिणेते शतमानावासजति रथेनौ द्वन्दा कारो रक्षिकाः शमानौ॥ ॥अनुवत्सामौदुंवरीं शाखामुपगूहति उपस्पृश
ति शतमानाविपदसानि॥ इयदसीत्येकं। युङसीति चापरं॥ ॥तौ ब्रह्मणे दत्त्वोर्गसीति शाखामुपस्पृशति॥ ताविति शतमानौ॥ ॥
रं द्रस्य वामित्यवहरते॥ वारूपयस्यायां व्याघ्रचर्मदेशस्थितायां। इंद्रस्य वामित्यनेन मंत्रेण पयस्यायामवहरति वारूपजमाने। व्याघ्र
चर्म्मदेशस्थितायां॥ ॥सेष्टुकं धनुः प्रयच्छति॥ धनुर्धाराय॥ ॥उत्तरवेदिं हत्वा पयस्यायाः प्रचरति॥ ॥प्राकूस्विष्टकृतः खादिरीमासंदी

रजतं वा व्याघ्रचर्मदेशे निदधाति स्योनासीति ॥ अनेन मंत्रेण ॥ ॥ अधीवासमस्यामास्तृणाति वरुणस्य योनिरिति ॥ अस्यामित्यासंद्यावास
आस्तृणाति वरुणस्य योनिरित्यनेन मंत्रेण ॥ ॥ सुन्वंतमस्यामुपवेशयति ॥ स्योनामासीदेति ॥ वाऊग्रहांतं यजमानं आसंद्यामुपवेशयति ॥
मंत्रस्तु अध्वर्योरेव ॥ ॥ निषसादेत्युरस्यालभते ॥ यजमानस्य ॥ ॥ अभिभूरित्यस्मै पंचाक्षान्पाणावाधाय पश्चादेनं यज्ञियवृक्षदंडैः शनैस्तू
ष्णीं घ्नंति ॥ अभिभूरित्यनेन मंत्रेण पंचाक्षान्यजमानस्य पाणावाधाय पश्चादेनं यजमानं यज्ञियवृक्षदंडैः शनैस्तूष्णीं घ्नंत्यध्वर्यवो बहुवचनोप
देशात् ॥ पाप्मानं तेपहन्मोति त्वा वधेन यामीति वा ॥ अनेन मंत्रेण घ्नंति ॥ तूष्णीं वेति विकल्पः ॥ ॥ वारचत्वा ब्रह्मन्नित्यामंत्रयते पंच कृत्वः यजमानः ॥
प्रत्याह व्यत्यासं सविता वरुणो रुद्रो रुद्र इति त्वं ब्रह्मासीत्यादिभिः ॥ त्वं ब्रह्मासीत्यादि सविता वरुण इत्येवमादि व्यत्यासेन ब्रह्मा प्रतिवचनं ददा
ति यजमानाय ॥ ॥ आदिष्टैर्वात्यं ब्रह्मासीत्यनेनैवात्यं पंचमं प्रतिवचनं ॥ ॥ बहुकारेति च कूयति एवं नामानं संशब्दयति ॥ एवंमेव हि श्रूयते
य एवं नामा भवति कल्याणमेवैतन्मानुष्यं वाचो वदतीति ॥ ॥ स्फ्यमस्मै प्रयच्छति पुरोहितो ध्वर्युर्वेंद्रस्य वज्र इति ॥ अनेन मंत्रेण यजमानायप ॥
राजा राजभ्राता सूतस्थपत्यो रंमनतरो ग्रामणीः सजातश्चैव पूर्वः पूर्व उत्तरस्मै ॥ स्फ्यं प्रयच्छति ॥ सजातस्त्व ग्रामणीः सजातः ॥ ॥ प्रत्नेन सन्नी
तः प्रतिप्रस्थाता च पूर्वाग्निसहितौ ॥ शुक्रपुरोरुचा कृतमूर्मिं ऊरुतः । प्रत्नेन वज्रेण । सजात प्रतिप्रस्थातारौ पूर्वाग्निवहनसंलाभाः शुक्रपुरो
रुचा कृतमूर्मिं ऊरुतः ॥ ॥ मंथिनो विमितं । मंथिनः पुरोरुचा विमितं ऊरुतनरति वर्त्तते ॥ ॥ कृतमस्मै हिरण्यं निधायाभिजुहोति ततोगेहो

तेनाग्निः पृथुरित्यनेन मंत्रेण हिरण्यमभिजुहोति ॥ ॥ अक्षान्निवपति स्वाहा कृतारति ॥ कृतमस्मा अक्षान्निवपति स्वाहा कृतारित्यनेन मंत्रेण ॥ ॥
गादीव्यधामित्याह ॥ कृतं च रणप्रेषोयं ॥ ॥ कृतादि वा निदध्याद्राजप्रभृतिभ्यः ॥ कृतादिभिर्वा कृतं भवति राजप्रभृतीनां वा कृतान्तरं ॥ ॥ सजा
तापकलिंगामस्याली पयच्छति ॥ कृतादिपदेसजातापकलिंगामस्यानीयच्छेति ॥ अस्य सजातस्य संबंधि हनं गामानीय तां प्रतिहंति श्वाऽ
हननमात्रेण मारणार्थेन ॥ ॥ पूर्वाग्निवाहो दक्षिणा ॥ सा च कृतस्य तदागमविधानात् ॥ ॥ पयस्यायास्[illegible]इडं करोति माहेंद्राद्दिवा ॥ करो
तीत्यनुवर्त्तते ॥ मरुत्वतीयांते वै कृतं कर्म विहितमतः प्राकृतानुवृत्त्यर्थं माहेंद्रादीत्युक्तं ॥ ॥ अवरुह्य गच्छति स्तोत्राय प्रहितः ॥ आसंद्या अ
वरुह्य प्रहितः सन् स्तोत्रायागच्छति ॥ संतते स्तोत्रस्य भवत्यंते शस्त्रस्येति वचनात् ॥ ॥ अवभृथमेके न तार्प्यादीनि चेत् ॥ यदि माहेंद्रादौ
दीक्षितवसनं न परिहितं तदा तार्प्यादीनामेकेनावभृथमभ्यवतरेति ॥ ॥ उदैत्येकेन । उत्तरत्येकेनोदेति ॥ अथ माहेंद्रादौ दीक्षितवसनं
परिहितं तत्तस्तेनैवावतरणमुत्तरणं च ॥ ॥ दीक्षितवसनं च प्रास्यति ॥ तार्प्याविततरणपक्षे ॥ ॥ अनूबंध्यवपाहोमांते दद्या देभानि ॥ तार्प्या
दीनि ॥ ॥ उदवसानीयायां वा दद्यात् ॥ आगंतुत्वान्नदंते निवेशः ॥ ॥ त्रैधातव्युदवसानीयात्र भवतीति शेषः ॥ ॥ ऐंद्रवैश्वदेवो द्वादशक
पालो व्रीहियवाणां ॥ तमुभयेषां व्रीहियवाणां गृह्णानीति वचनात् ॥ ॥ तृतीयं यवानां मध्ये तृतीयभागो यवानां मध्ये भवति ॥ ॥ अधिश्र
यणं च ॥ एवमेव हि ॥ व्रीहिमयमेवाग्रे पिंडमाधिश्रयति ॥ अथ यवमयमथ व्रीहिमयमिति वचनात् ॥ अवदानं तु धातुत्रयपादवियाहे ॥

२८५

वा.कं० १५

निस्वस्तिस्वादक्षिणाददाति शतमानानि ब्रह्मणोधेनूर्होत्रे वासांस्याध्वर्यवेगामग्नीधे।तिस्वस्तिस्वरूपवाच्यं॥वऊवचनोपदेश्यात॥आदिसामर्थ्याच्च
तारप्राप्ते॥वाच्यंदा॥अग्नीधेपिगावस्तिस्त्र एवयथास्युरिति॥तावाएताद्वादशवान्नयोदशवादक्षिणावंतीतिश्रुतेः॥ननुचैवं द्वादशभवंति॥तत्र
योदशउच्यते।कात्यायनपाठाऽंगीकरणान्नत्रयोदशमुविष्यंति॥तत्रद्वयोःपद्यते।नीलिवासांसिनपश्चान्नडुहोगावाऽजेवाऽग्नीधरतिचत्र
योदशभवंति॥वचनात्रैधातवीउदवसानीयाकार्येभिषेचनीयस्य भवति।प्रकृतौचोदवसानीयासमारूढेनिर्मथितेदृष्टा॥इहचतत्स्थानस
मवति॥येनाभिषेचनीयदशपेययोःप्राकृ यादेकतंत्रतावक्ष्यति॥तेनात्रभवति संदेहः॥किंमतिप्रणीतेक्रियताम्उतापराग्न्याहवनीयेति॥अत्र
केचिदाऊरभिषेचनीयस्यैवेष्टिरितितदाहवनीयएवातिप्रणीतेप्राप्तेति॥अपराग्नयोदाशपेयाइति॥अतोऽतिप्रणीतइति॥नकश्चैतदपरे।
नहीयंप्रकृतावतिप्रणीतेदृष्टेति॥ननुपराग्न्याहवनीयेपिनैवप्रकृतौदृष्टा॥समारूढमंथनविधानात्सत्यमेवं॥समारोपमेथानदशपे
येनविहितेअतोनक्रियेति॥अपराग्निसंबंधश्चाभिषेचनीयस्याऽनपनीतएव॥केवलंमंथनेननक्रियते॥तस्मादिहैवयुक्तरूपमनुष्ठा
ने।अपिचनिर्देत्रप्राकृतंकार्यंतिप्रणीतेनोदवसानायपापेरूते॥ननुवापराग्नयोदाशपेयिकारत्नं॥सत्यमेवं।तथाप्याहवनीया
पेक्षायांसएवप्रसज्यते॥नातिप्रणीतेनिर्वर्तंकार्यत्वादिति॥॥भैषज्याभिचारेपारथ्यपा॥नैधातवी॥पदशोनराणिसंसृपाहवींषिनिर्वे
पति॥संसृपाहवींषाविनामधेयं॥तस्मात्संसृपानामेति।दशानामपिषष्ठामनुष्ठानंपयास्यादितिवमर्थदशग्रहणमिति।मंप्रदायश्रकाणांनो

राम० १५ २७७

उषस्पतिपत्नीस्त्वोमूनरतिपद्यते।नचाचार्येणसूचितं।अन्यत्रचात्रप्रतिग्रहमेकेकंस्वःस्वरति॥तेनाचार्याभिप्रायादेकस्मिन्नेवाहनीतिग
स्पते॥कात्यायनपाठाद्वाप्रत्यहमिति॥॥देवयजनोत्तरमेकैकेनोसर्पति॥हविषा॥॥शालायामंत्यं।अंत्यंहविर्दशपेयशालायांभवतिप
शालायहरणंचोपलक्षणार्थं।साचित्रसारस्वतत्वाष्ट्रपौष्णैंद्रवार्हस्पत्यवारुणामेयसौम्यवैश्वदेवानिपश्चात्।यथाप्रदेशं॥तेरश्चाचा
र्येणोक्तानीतियथानग्रहणं॥॥प्रतीष्टिपुंडरीकाणिप्रयच्छति॥प्रयच्छतिग्रहणात्तद्दक्षिणार्थं॥तथाचकात्यायनः॥मादक्षिणा॥॥हिर
ण्मयानिवा।पुंडरीकाणि।संचार्यविकल्पः॥॥उत्तमास्वतिसृषुपंच।उद्वैतयोरंत्यायामकं॥॥तेषांस्रजप्रतिमुंचते॥तेषांपुंडरीकाणा
स्रजंमालांकृत्वाप्रतिमुंचतेयजमानः॥॥तद्वाहोभवति॥सास्पदीर्घेइतिवचनात॥इदंविचार्यते॥किमेतानिहवींषिदशपेयांगभूता
नि।उतपृथगुत्पत्यर्थत्वमिति।पृथगुत्पत्यर्थत्वमितिब्रूमः।एवंसंश्रूयते॥एभिर्मेयाष्टमसदेभिरपिसूयाइति॥तेनत्रिपुष्कादिव
तुपृथगत्वर्थत्वमिति।कृचित॥नैवमित्यपरे॥एतैर्हिदशपेयाख्यमग्नीनांतद्देवयजनंप्रतिनयनेक्रियते।तस्मादत्यर्थमितिगम्य
ते॥अतस्तदर्थमितिगम्यते॥तथाचमंत्रलिंगं।सवित्राप्रसवित्रेत्युपक्रम्यविरमुनादशम्यादेवतयाप्रसूतःप्रसर्पामीतिसर्पणार्थत्वं
दर्शयति।एभिर्मेयाष्टमसदेभिरपिसूयाइति॥अर्थवादप्रायं।प्रयोजनं।दशपेयांगत्वेगृत्वावानाभावः।वाजपेयेचसर्पणाभावादप
रत्नि॥॥एककंतंत्रैकसूयैवत्वात॥इदंविचार्यते॥किमभिषेचनोपदशपेयावेकतंत्रावुतपृथक्तंत्राविति॥एकतंत्राविति ब्रूमः।उतए

ततो ऽक्रयप्रतिकर्षात्॥ एवं ह्यवभृथे श्रूयते॥ सह सोमै[illegible]णा नीति तेन प्रतिकर्षोच्चाधस्तस्यापि प्रतिकर्षरति॥ ॥एवं प्राप्त आह॥ नाना वा ऽवभृथदीक्षाश्रुति
ष्योः॥ नानातंत्रो वा भवेत्॥ उक्तमेतत्॥ अवभृथदीक्षाश्रुतिर्भ्याम्॥ अभिषेचनीयस्यावभृथः श्रूयते। स यत्रावभृथमभ्यवैति तदेतद्यमभ्यवहरंती
ति दीक्षितं च मसनप्रामन विधिपरो वाक्ये ऽवभृथं दर्शयति॥ तथा च दीक्षा श्रूयते॥ पुरोरुक्स्रजं प्रतिमुंचते सास्य दीक्षेति॥ यदि ह्येकतंत्रो स्यात्तो
नावभृथः श्रूयते॥ तथा दीक्षा इति॥ एवं प्राप्त आह॥ ॥एकं त्वानुपूर्व्ययोगात्॥ तु शब्दः पक्षं व्यावर्तयति॥ एकमेव तंत्रं न भिन्नतंत्रता। उ
क्तमेतत्॥ एवं हि पदार्था आनुपूर्व्येण प्रयुज्यंते॥ क्रयमाने पुनः प्रकृष्यमाणे दीक्षणीयाप्रायणीयादीनां पश्चादनुष्ठाने नानुपू
र्व्यं स्यात्॥ तत्र चोदकबाधः। यत्तु दीक्षा ऽवभृथश्रवणात् तद्वचनेनेत्यदोषः॥ तदुक्तं॥ ॥अवभृथदीक्षाभ्यासो वचनादिति॥ यथा
ऽश्वमेधे ऽवभृथदीक्षाभ्यासः॥ ॥सप्तम्यां ब्रह्मागारात्सोममाहृत्यासंयभिमर्शनादि करोति॥ सप्तम्यां तिथौ ब्रह्मागाराद्दशपे
यार्थं सोममाहृत्य आसंयभिमर्शनादि करोतीति॥ ॥उपसद्देवताहवींषि निर्वपत्युपसदं तरकल्पथोक्तं॥ एवमेव हि श्रव
णमिति॥ ॥पितामहदशगणां सोमपानां संख्याय सर्पणं॥ यजमानस्य पितामहदशगणां सोमपानामुच्चार्य सर्पणलौकिकं तेष्वः
॥ ॥सवित्रेति चानुवाकमुक्त्वा सर्पणं भवतीति दिक्कल्पः॥ ॥दशदशैकैकं चमसमनुभक्षयंति॥ दशदशैकैकं चमसमनुप्र
सप्राभवंतीति वचनात्॥ ॥अन्ये च॥ यजमानस्य राजन्यस्य तत्राच यजमानचमसे राजन्या भक्षयंति॥ संख्या हि समानजातीये

षु भवति॥ ननु च शतं ब्राह्मणाः सोमान्भक्षयंतीति अन्यत्र श्रूयते॥ तत्र कथं राजन्या भवेयुः॥ उच्यते। भूयस्त्वात्॥ ब्राह्मणेषु चाब्राह्मणे
शतसंख्येत्यदोषः॥ एवं च सहपानविरोधो न भवति। एवं प्राप्त आह॥ ॥ब्राह्मणा वा श्रुतेः॥ वा शब्दः पक्षं व्यावर्तयति। ब्राह्मणा एव भवंति
न क्षत्रियाः॥ शतं ब्राह्मणा इति हि श्रूयते॥ न न चाब्राह्मणेषु च भूयस्त्वात् शत शब्द इत्युक्तं॥ नैतदेवं॥ शतं ब्राह्मणाः सोमान्भक्ष
यंतीति विभागविधाने॥ ॥तुल्याः संख्यायोगात्॥ शतसंख्या च तुल्येषूपपद्यते॥ नातुल्येषु॥ अतो यजमानचमसेपि ब्राह्मणा एवेति॥
सहपानाविरोधस्तु वचनात्। अत्र भवति॥ ॥ब्रह्मणे ददात्यश्वं च दक्षिणा। अश्ववदिति॥ तुल्यशास्त्रत्वात्॥ ॥हिरण्मयीं स्रजमुद्गात्रे
रुक्मं होत्रे हिरण्मयौ प्राकाशावध्वर्युभ्यामश्वं प्रस्तोत्रे वशां मैत्रावरुणाय ऋषभं ब्राह्मणाच्छंसिने वाससी नेष्टापोतृभ्यामन्यतरतो
युक्तं यवाचितमच्छावाकाय वा गामग्नाधे ददातीति सर्वत्रानुषंगः॥ गौश्चाऽनडुद्भवति॥ कारणविशिष्ठात्॥ ॥अभिषेचनीयात्केशव
पनार्थे निवर्तनं संवत्सरं। अभिषेचनीयानंतरग्रहणेन दशपेयांतोऽलब्धेतो अभिषेचनीयो ने शू[illegible]न दशपेयांतो ऽलब्धेते केशान्व
पन इति श्रुतेः॥ तेन संवत्सरं न वपत इति श्रुतिः। वपने च मुंडने निवर्तनेन च केशानां खंडनं। येनैवमाह॥ सर्वैन्येव वर्त्यंते केशान्वपतीति॥ ॥
भूम्यनधिष्ठाने चा च शब्दात्संवत्सरमेव॥ ॥आनुपानत्कस्य यावज्जीवं॥ अनुपानत्कस्य पुनर्यावज्जीवमेव॥ भूम्यनभिष्ठाने संवत्सर उक्तो
पानत्कस्यापि भूम्यनभिष्ठानमिति॥ ॥उत्तरेष्वृक्षु पंचबिलः पंचबिल इति नामक्षेपात्तस्माच्चरुः पंचबिलो नामेति। उत्तरग्रहणमने

2-6

कर्क॰ तरव्यादासार्थः। उत्तरानंतरार्थं च वैशाखशुक्लप्रत्यर्थं॥ ॥आग्नेय ऐंद्रः सौम्यो वा वैश्वदेवश्चरुः पयस्या मैत्रावरुणी बार्हस्पत्यश्चरुः॥ ॥प्रतिदि
२७ शमासादनं। तेषां चैव प्रतिदिशमासादनं॥ ॥आग्नेयं पुरस्तात्प्रदक्षिणमितराणि मध्ये त्वं हविर्भवति॥ ॥पूर्वैश्चरित्वा चरित्वा मध्यमे संश्रवासे
चनं। सवतः संस्कारः॥ अंतश्च संस्रवाभावेऽप्यन्येन कार्यः॥ ॥आग्नेयो हिरण्यं दक्षिणाग्नीधे ददाति॥ ऐंद्रस्य ऋषभः सौम्यस्य बभ्रुर्ब्रह्मणे
वैश्वदेवस्य पृषन्होत्रे पयस्यायां वशाऽमावेऽप्रवीताध्वर्युभ्यां बार्हस्पत्यस्य शितिपृष्ठो ब्रह्मणे ददातीत्यनुवर्तंते॥ वशा रिक्ता। अप्रवीता
अकामिता। अवधूत्स्यामिति द्वितीयोऽग्नीत्॥ ॥अन्नाद्यकामस्याप्येषा। राजसूयाद्बहिरिष्टिर्भवति॥ ॥द्वादशानरात्रीणि पृथुर्वीषिम
मात्तराणि॥ पृथुश्चवीषिनामधेयं। सर्वैः पृथुर्नोह विभिर्यजतइति श्रुतेः। द्वादशग्रहणं च मासांतरपक्षे कस्मिन्नेवाहनि क्रियेतेत्येवमर्थं
तथा कारणात्। षट्षट्ऽव्यामृतइति पठ्यते। यद्वा द्वादशानामेव पृथुगविष्टमुत्तरेषां नेति द्वादशग्रहणं॥ ॥आहवनीयाद्द
पुरस्ताच्छम्याप्रासे शम्याप्रासे आग्नेय सौम्य सावित्र बार्हस्पत्य त्वाष्ट्र वैश्वानराय यथा नैरृत्यया प्रदेशांतर उक्तं॥ ॥एवमावृतस्य
चरवः सारस्वतपौष्णमैत्रक्षैत्रपत्यवारुणादित्याः॥ ॥एवमेव प्रत्यावृत्तस्य शम्याप्रासे भवंति॥ ॥षट्षद्वै कृतेन भवंतीति स्वे शेषं॥॥
श्वोऽग्निवाहोदोदोषस्माषस्मादक्षिणा इतरत्र तु चोदकेनाऽन्वाहार्यः॥ ॥अष्टापदी वत्साध्रुवंधो गर्भिण्योर्म्यास्वगुणा दक्षिणा॥ अ
ष्टापदीशब्देनाष्टवंध्याच्यते लक्षणया। तद्वत्य ध्रुवंधो भवतः। तावेव गर्भिणीभ्यां भवतः। स्वगुणं दक्षिणा तद्गुणदक्षिणानित्यर्थः। राम॰
२७
२७९

शम्यादित्येभ्योऽदित्यै वा भवति॥ ॥वैश्वदेवी पृषती मारुती वा भवति॥ ॥तदेतत्केशवपनीयोऽतिरात्रः पौर्णमासीमुत्पात्तदंतग्रहणाच्चानंतर
पौर्णमास्यां केशवपनीयोतिभवति॥ ॥उत्तरे चामासांतराः॥ उत्तरे ऋतवो मासांतराः च शब्दात्पौर्णमासीसुत्पाश्च भवंति॥ ॥व्युष्टिद्वि
रात्रः अग्निष्टोमातिरात्रौ। अग्निष्टोमग्रहणमपर्थिकृत्वज्ञापनार्थं॥ ॥क्रतुधृतिः अपरः क्रतुर्भवति॥ ॥तमुभयत एके त्रिष्टोमज्योतिष्टोमौ
कुर्वते वक्ष्यपरिष्टात्॥ अत्र च वैशाखामावास्यायां पशुबंधौ। ज्येष्ठपौर्णमास्यां केशवपनीयः आषाढ्यां व्युष्टिद्विरात्रः॥ श्रावण्यां क्रतुधृतिः
भाद्रपदाश्वयुजायास्त्रिष्टोमज्योतिष्टोमौ। कार्तिक्यां सौत्रामणीति॥ ॥अभिषेचनीयाद्वा संवत्सरात्केशवपनीयोऽतिरात्रः सोमापवर्गः
सोमापवर्ग इति सोमानामपवर्गो भवति वा दपवर्गः सोमाः॥ ॥उत्तरेऽस्युक्ते सौत्रामणी सोमान्ते तस्युक्ते सौत्रामणी भवति॥ ॥व्रीहीन्विरूढा
विरूढान्। रोममुपनय क्रीणाति क्लीबात्सीसेन। मंत्रः॥ ॥पक्वौदनं विरूढांश्चूर्णीकृत्याश्विभ्यां पच्यस्वेति संसृजति॥ उदनपाको वि
रूढैः सच च तस्य चतुर्मुष्टीकग्रहणपूर्वकश्चोदकानुग्रहाय॥ तस्य च विरूढैश्चूर्णैरश्विभ्यां पच्यस्वेति संसर्गः॥ ॥सिंहवृकव्याघ्रलोमानि चा
वपति। च शब्दात्तत्रैव॥ ॥पयःसुवा। आवपति तुल्यशास्त्रत्वात्॥ ॥पुरोडाशधर्म्मा द्रव्यसामान्यात्॥ अत्र सुरायां पुरोडाशधर्म्माः प्रवर्तंते
द्रव्यं हि तेषां पर्युपस्थापकमिति। ननु च ग्रहग्रहणपुरोरुक्षुपयामादीनां दर्शनात् सौमिका भवंतीति गम्यते॥ नेत्याह॥ ॥यावदुक्तं सौमिका
गुणत्वात्॥ द्रव्यसामान्यात्पुरोडाशधर्म्माः यावदुक्तं ते भवंति। नहि सौमिकधर्म्मप्रवृत्तिरत्र व्यक्तोक्तात्॥ न च गुणप्रवृत्त्या गुणांतरप्रवृत्ति

युक्ता॥ गुणत्वादेव॥ ला। त्रिपशुः पशुबन्धः श्वश्वस्तुर्थ्या पञ्चायावा। चतुर्थे वाह्नि॥ पञ्चायावा सुत्यायां॥ ॥ आश्विनः [illegible] आरन्ने [illegible]
दिः सारस्वती॥ मेषमल्हानीत्रि[illegible]दाकि सासारस्वती॥ ॥ ऋषभ ऐन्द्राय[illegible]॥ तदुरणाम्भावेऽजाः। तेउरणानाममभावे अजा भवति॥ ॥ प्रथमा
लोहितः। तदाञ्च लोहितः प्रथमो भवेति॥ ॥ त्रियूपो वैकादशिनिलिंगात्॥ ॥ त्रियूपो भवति। एकयूपो वा। एकादशिनिलिंगात्॥ एकादशिन्या
ह्युभयं दृष्टं॥ एकयूपताऽनेकयूपता च। एकादशिनिलिंगं चात्र गणत्वमिति॥ आम्नो च्यते। सौत्रामण्यां सशब्दनादेकयूपतैवनियन्तु युज्यते॥
तत्र हि श्रूयते॥ ज यदेतं सौत्रामणिकं यूपमेतो यूपावभिजो भवतरति॥ अपि च सूत्रारंभसामर्थ्यादयमर्थो वगम्यते॥ सूत्रारंभमंतरेणैव
हि विकल्पः सिद्धः स्यैवातस्मादेकयूपतानियमइति॥ ॥ अग्नीवरुणा प्रयासवत॥ ॥ अंवेदिर्द्विगुणा भवति॥ ॥ वपया मार्जनान्ते दृशेः परि[illegible]
तं पुनाति वायुः पूत इति॥ अनेन मंत्रेण॥ ॥ कुवलकर्कन्धुवदरसक्तूनि चावपति॥ कुवलादयो वदरान्ता विशेषा वयो वक्ता विशेषा इत्या
परे॥ ॥ ग्रहे गृह्णाति उविदंगतित्री न्वाप्रतिदेवनमेतयेव पुरोरुचा सचायं विकल्पः। एकं वा त्रीन्वेति श्रुतत्वात्॥ ॥ समस्यानुवाचैनेयजेति
चासमासश्चतुर्थ्यन्तानामेव पदानां न विभक्तिलोपेन॥ ॥ प्रथमस्यानुहोममितरे॥ ग्रहे॥ ॥ परिस्रुत्सोमादद्विणमै॥ ॥ तत्र चाहवनीयसं
स्कारः कर्तव्यः चोदकपरिप्राप्त्या॥ ॥ भक्षमाहरत्यपरिस्रुत्सेकं मासि च्यावकमवकिउंकूमं शिसस्कृत्वा परिदद्विणास्यधारयस्रवंतमुप
तिष्ठते तच्चैसोमवतो वर्हिषदामग्निष्वात्तानामिति। भक्षाहरणमात्रोपदेशाद्विशेषोऽनुपदेशात्तं च पथाऽन्यत्र भक्षणा तयेहापीति॥

हवींषि निर्वपति सावित्रवारुणैन्द्राणि यथार्थं पशुपुरोडाशार्थेरेवतान्यतान्यपि पशुपुरोडाशार्थ इत्युक्तं॥ ॥ नपुंसकोऽर्दक्षिणार्थस्याहि
वा वडवा वेति विकल्पः॥ ॥ सामा तिपूतस्याप्येष॥ सौत्रामण्यां भवतीति शेषः॥ ॥ अनुयाजान्ते पशुपुरोडाशार्थैरइति॥ आश्विनेनप्रा
दशभिरहोभिश्चितिपुरीषे देये। अंत्यं पुरीषमेकादशभिरहोभिर्विकल्पादित्वा पंचगृहीताद्युत्तमा तद्वितैव॥ ॥षड्विंशदहशः संवत्स
रे॥ एतच्च समर्थ्यां संवत्सरोपसत्के द्रष्टव्यं॥ संवत्सरोपसत्त्वे हि विशेषं वक्ष्यत्येव॥ तथा च तिसृभिर्मासैः षट्त्रिंशद्भिश्चितिपुरीषाणि
भवंति॥ ॥तापश्चिमे मासस श्चितिपुरीषे चतस्रणां॥ चितानोमासेन मासेन चितिपुरीषे चीयते॥ मासेन चितिः मासेन पुरीषं एवमष्टौ मा
सा॥ ॥पंचम्यामसपत्ना विराजः प्रथमेहन्॥ पंचम्यां चितौ प्रथमेहन्यसपत्ना विराजश्चोपधीयंते॥ ॥सोमभाग अत्र च हं चीयते॥ ॥एवं
नवमासा गता भवंति॥ ॥मासं पुरीषं तृतीये॥ एवं दशमासाः॥ ॥नाकसत्प्रभृति मासं॥ एवमेकादश मासा भवंति॥ ॥पुरीषं च चशब्दान्मा
समेव॥ ॥उत्तमयोरन्हो विकल्पादिपूर्वा अत्रोत्तमयोरन्हो विकल्पादिपूर्वेहनि॥ पंचगृहीताद्युत्तमा तद्वितैव॥ ॥द्विमासहसीप प्रथमाला

३०५

का॰सं॰
४६

कंपृणानांपचाशद्भवति॥ ॥उत्तमस्याः शतसंख्या भवंति॥ ॥त्रिसाहस्रस्तम्या॥ उत्तमाविति त्रिसाहस्री लोकंपृणानां भवति॥ ॥वक्रालिखितानां
दक्षिणोत्तरे मध्यमतरासां। वक्रालिखितानां दक्षिणोत्तरदेश उपधानं। मध्यालिखितानां च मध्ये॥ अथ पंचमीं चितिमुपधाय त्रेधाग्निं विमिमीत इति
प्रकृत्य एव मेधक्षतत्वात्॥ ॥षट्त्रिंशच्छत्या चात्र जीयाऽष्टादशशत्याऽन्तरः। अयमपरो लोकंपृणानां परिमाणविकल्प॥ ॥गार्हपत्यलोकं
पृणाः प्रथमायां। चितौ विगणयितव्याः॥ ॥धिष्ण्या उत्तमायां॥ ॥अपरिमिता एकेषां। अग्निर्भवत्ययं वा परिमितशब्दोऽपरिमाणव
चनस्तमेमिष्टा॥ ॥प्रथमोत्तमयोः पादमात्रारतिरिक्ता। प्रथमोत्तमयोश्चित्योरप्यतिरिक्ता सा पादमात्री भवति॥ नातोऽधिकेति॥
दशगुणाधिका मित्वा अरत्नेरुपात्त॥ गार्हपत्याहवनीयाव द्वौ चेषि स्यादिति दशगुणाः॥ अतो या अधिकाः ता मित्वा अरत्नेरुपात्त॥ ॥द्वितीय
यामाश्विनीः प्रतिदिशं। द्वितीयाग्रहणं प्रथमायाः परिसमाप्तिज्ञापनार्थं। आश्विनीरिति चतस्र इष्टकानां संज्ञा। ताः प्रतिदिशमुपधीयंते
॥ ॥रेतःसिग्विलायामन्तकमुत्तरेण पूर्वो द्वितीये लोके उपधीयते॥ ॥दक्षिणो पूर्वेणाऽनुकमुपधीयते॥ ॥अपरा दक्षिणेन॥ ॥उत्तराः प
रेण॥ ॥दक्षिणामुत्तरेण पंचमी। अर्द्धे पये चैते भवतः॥ ॥वैश्वदेवीः पूर्वां दक्षिणेन॥ वैश्वदेवीरिति इष्टकानां संज्ञा॥ तासां देशमाह॥ ॥पूर्वां
दक्षिणेन॥ ॥दक्षिणामपरेण॥ ॥अपरामुत्तरेण॥ ॥उत्तरां पूर्वेण॥ ॥एवं वैश्वदेवीभ्यः प्राणभृतः उपधीयंते॥ ॥प्राणभृद्भ्य उपस्याः
उपधीयंते॥ ॥पूर्ववत्पंचम्यः सर्वासां। एतच्चाचार्येण लाघवार्थमुपदिष्टं। इदानीमुपधानक्रममाह॥ ॥आश्विनी द्वे व द्वितिरिति प्रति

राम॰
४६
२९२

मंत्रं। उपदधाति॥ ॥ध्रुवक्षुध्रुचिश्चान्यतव्ये पूर्वयोपरि उपधीयेते॥ ॥उत्तराश्च। अतव्याः पूर्वयोरेवोपरि॥ ॥वैश्वदेवी। सजूऋतुभिरिति
प्रतिमंत्रं। उपदधाति॥ ॥उत्तराश्च। चशब्दात्प्रतिमंत्रं॥ ॥प्राणभृतः प्राणंमऽइति। प्रतिमंत्रे उपदधाति॥ ॥अपः पित्वेत्यस्या उपदधाति॥
वयस्याः पंच पंचान्येका त्रेषु मूर्द्धा वय इति प्रतिमंत्रं। उपदधाति॥ ॥तासां चतस्रः पुरस्ताद्वेजं यामा अमसम लोके व्याप्तेः। द्वे वाऽध्वर्द्धे।
शेषा अध्वर्द्धा एव॥ ॥दक्षिणत उत्तरतः पश्चात्॥ अनेन क्रमेणोपधानं॥ ॥दक्षिणाश्रोणिरखिलोकंपृणाः पूर्ववत्॥ उपधीयंते॥ ॥तती
यायां स्वयमातृण्णामिन्द्राग्नी इति मध्ये। उपदधाति॥ तृतीयाग्रहणं द्वितीयानप्रसक्त्यर्थं। तदंतप्रसंगे प्रयोजनं। पुरीषदानादिभ
वति। द्वे प्रथमायां इति स्तोमध्यमायामिति च रोपनाय॥ ॥अन्ये के पंच दिश्या वैश्वदेवीवद्राज्यसीति प्रतिमंत्रं। वत्करणं चारेतः सिग्वे
लार्थं। दक्षिणामुत्तरेण पंचमी स्येवमर्थं च॥ ॥विश्वकर्मेति विश्वज्योतिषमुपरि पूर्वस्या उपदधाति॥ ॥उत्तमायां च॥ ॥अतव्ये
नभश्च नभस्यश्चेति। उपधीयेते॥ तयोश्च॥ ॥ऽवकाः कूर्मवद्भवंति॥ ॥इषश्चोर्जश्चेत्यपरे। अतव्ये चोपधीयेते। अर्द्धो सेधाश्चेताः च
यनयोगात्॥ ॥पूर्वेर्द्ध प्राणभृतो दशाग्नेऽइति प्रतिमंत्रं। उपदधाति॥ ॥छंदस्या द्वादश द्वादशाप्यये उमा छंद इति प्रतिमंत्रं॥ पदे
पुच्छाप्ययेषु छंदस्या इष्टका द्वादश द्वादशमा छंद इति प्रतिमंत्रमुपदधाति॥ ॥वालखिल्या लोकंपृश्च छिद्राया। पश्चादुपधीयं
ते॥ ता वालखिल्या लोकस्य पुरस्तात्॥ ॥वालखिल्याः सप्त पुरस्तादुपदधाति॥ ॥प्राणमऽआवाऽपराः। वा पूर्वा इति विकल्पः॥ द्वादश

२०७

४७

ष्योऽपरास्तु। द्वादशस्यऽस्वपराएवा॥ ॥मूर्द्धासिराडितिप्रतिमंत्रं उपधीयंते॥ ॥यजुष्मतीरज्ञानन्॥ उपदधाति॥ ॥यांकांचयजुष्मतीमिष्टकाविधात्तो मध्यमायां चितावुपदध्यादिति वचनात्॥ ॥उत्तराः श्रोणोरपिलोकंपृणाः पूर्ववत् उपधीयंते॥ ॥चतुर्थ्यामनूकांते पुद दक्षिणोत्तरे द्वे द्वे। चतुर्थीग्रहणात्तृतीयांऽन्तःप्रस्तापनायापरस्तात्पश्चाद्यजघामाच्यः दक्षिणा तदुत्तरतः पंचाः॥ ॥पूर्वास्यामपराश्चतुर्दश॥ ताश्चार्द्धपद्याः॥ ॥तभ्यः षट्। ताभ्योऽपराः षयद्याः॥ ॥पूर्वेदक्षिणोऽवांतरादशएकैः॥ चतुर्दशषष्ठ्योपदधाति॥ ॥उत्तरावादक्षिणाभ्यां॥ उपधीयंते। लाघविकेन महाचार्येणैवं उपदिष्टाः उपधानक्रमः पुनरिहोच्यते॥ ॥उत्तरोपूर्वयोराशुस्त्रिवृदिति॥ उपदधाति॥ ॥दक्षिणामपरयोर्द्धरुणएकविंशइति॥ ॥दक्षिणादक्षिणायोर्भांतः पंचदशइति॥ ॥दक्षिणामुत्तरयोर्व्योमासप्तदशइति॥ ॥चतुर्दशप्रतिमंत्रं प्रतूर्त्तिरष्टादशइति॥ उपदधाति॥ ॥दक्षिणापूर्वयोरग्नेर्भागइति॥ ॥उत्तरामपरयोर्मित्रस्य भागइति॥ ॥उत्तरादक्षिणायोर्नृचक्षसोभागइति॥ ॥उत्तरामुत्तरयोरिंद्रस्य भागइति॥ ॥षप्रतिमंत्रंवसूनांभागइति। षडुपदधाति वसूनांभागइति प्रतिमंत्रं॥ ॥अनक्षे सहश्च सहस्यश्चेति। उपदधाति॥ ॥रेतःसिग्वेलायां च सप्तदश सर्वतो नव दक्षिणोनाऽनूकं सप्तोत्तरे एकयाऽस्तुवतेति प्रतिमंत्रं। सष्टीतीष्टकानामातत्रच। दक्षिणातोऽनूकसामभितोऽर्द्धपद्ये॥ ॥उत्तरेसादपिलोकंपृणाः पूर्ववत्॥ ॥१०॥ पंचम्यामंतेऽष्टाश्विनावदसपत्नारष्टका उपधीयंते॥ ॥अंतग्रहणात्रेतःसिग्वेलाव्युदासार्थं। आश्विनावदिति द्वितीयलोके उपधानं चतस्रणामपि॥॥ दक्षिणायोरस्म

राम
४७
२९९

त्तरां पंचमीश्चपधा भवति प्राग्दक्षिणा॥ आश्विनावदित्यर्द्धपद्ये माभूतामिति॥ ॥अग्नेजातानिति मंत्रे। असपत्नोपधानं॥॥ पश्चिमद्वितीया उपधीयते। पुरस्तादुपबाध्य पश्चादुपदधातीति वचनात्॥ ॥विराजोदशदश प्रतिदिशं पुरस्तात्प्रथममेवछंदइति प्रतिमंत्रं उपदधादिति। वहिर्विराजत्वे चसर्वाःपया भवंतीति॥ ॥गायत्र्यसपत्नागणामध्ये संभवात्॥ गायत्र्यरष्टका असपत्नाश्च विराजणास्य मध्ये भवंतीन हि विराजत्रयाणामस्य बहिःसंभवः॥ ॥तस्मिन्नेवावाऽपरा अर्द्धपद्या उपधाय॥ तस्मिन्निहामंत्रोपहितत्वात्तत्रोक्तस्यापराः अर्द्धपद्याः विराजो भवंति॥ ॥असपत्नास्त्वष्टौऽन्यतोऽन्तराः। अन्यत्र विराजः असपत्नासंलग्नाः अंतरा उपधीयंते॥ ॥सर्वतोऽषाढावेलायां स्तोमभागारश्मिना सत्यायेति प्रतिमंत्रं॥ उपधीयंते॥ ॥पंचदशदक्षिणोनाऽनूकं। तत्र वाऽनूकसमभितोऽर्द्धपद्ये॥ ॥वेषश्रीःकृत्वापदृत्रेजिलेतिनिशत्रमीमेके। उपदधात्येकेनेति॥ ॥पुरीषमासाचपतिमंत्रेणावातापश्चितस्य तूष्णींश्रुतेः। आस्तुस्तोभागासुपुरीषमावपतिमंत्रेणाशीतापश्चितस्य तूष्णींश्रुतेः। उत्तरत्रतानापश्चितस्य तूष्णींश्रुतेः। तत्र हि श्रूयते। तूष्णीं मासंस्तोमभागा पुरीषमभिहरंतीति॥ तेनाप्रवष्टितिगम्यते। एवंप्राप्तोवाशब्देन पूर्वमर्थोव्यावर्त्यते। त्वामंत्रेणपुरीषावापः। नह्यत्रमंत्रोविहितइति। नन्वनापश्चिते तूष्णीमित्यत्र लिंगादिहमंत्रोगम्यते नेत्युच्यते। तूष्णीमित्यनुवादोयं। मासोहि अत्र विधीयते॥ तूष्णीं मासंस्तोमभागा पुरीषमभिहरंतीति॥ मासोत्रविधेयते। यदिमत्र निवृत्तिर्विधीयते। वाक्यं भिद्येत। तस्मात्तूष्णीमेवेह पुरीषनिवापः॥ ॥नाकसदोनुकेषु पूर्ववर्जमनन्त्यावेलायामाश्रि

३०८

कर्क॰
४८

नाकसदातसातिमंत्रं॥ नाकसदइष्टकाः॥ अन्त्येषूपधीयन्ते। पूर्ववर्जं। भवत्यावेलायामा। प्राचीनीवदितिदक्षि॥ मुत्तरे। पंचमी। स्वपये चैते इति चगम्यते॥
सर्वाश्चैता अर्द्धेसेधाः पूर्वा उद्दिताये लोके॥ ॥पुरीषमोप्यापर्युपंपुर इति पंचचूडाः प्रतिमंत्रं। उपदधाति॥ एता अप्यर्द्धेसेधाः पुरीषवा पद्धे नाकसद
॥ ॥प्रतिदिशं यथालिंगं उपधानं॥ ॥पश्चिमोत्तमा। उपधीयते॥ ॥छंदस्यास्तिस्त्रस्तिस्त्रोऽनूकाः पुरस्तात् गायत्रीरभिमृद्धेति प्रत्यृचं॥ छंदस्याः एकादि
स्तिस्त्रस्तिस्त्रोऽनूकास्तेषु उपधीयते पुरस्तात् त्रिष्टुभो रेतःसिग्वेलायां भुवोऽयायत्रिरभिमृद्धेति प्रत्यृचं॥ ॥उत्तराश्च। चशब्दात् प्रत्यृचं॥ ॥पुरस्तात् यत्रस्येति॥ ए
भिर्मंत्रैः प्रतिमंत्रं॥ ॥जगतीश्च पश्चादयमिहेति॥ चशब्दाद्रेतःसिग्वेलायामेव॥ ॥अपरासामम्योऽनुष्टुभः सखाय संवरति। एभिर्मंत्रैर्जगत्याम्यापरा
नुष्टुभः॥ ॥अषाढावेलायाः पुरस्ताद् बृहतीरेना वः इति॥ ॥भद्रोन इति ककुभस्ताम्योऽवबृहत्यंतरश्रुतेर्मंत्रक्रमेण। भद्रोनस्त्वेभिर्मंत्रैर्बृहतीनो
पुरस्तान्मंत्रेण ककुभमुपदधाति॥ उत्तरं एतदितिचेत्॥ बृहतीनाममंतरे ल श्रुतेः सोत्तरेण। त्रिष्टुभश्च ककुभश्च बृहतीरुपदधातीति वचनात्॥ ॥छं
तान्युपकृष्टेन॥ एवं हि श्रूयते। अथैतासां ककुभां चत्वारि चत्वार्यक्षराण्यादायातिछंदसि उपदधाति। सा सातिछंदा एव भवति गायत्र्यु
त्तराः संपद्यंत इति॥ एवं च सत्यपकर्षं प्राप्नोति॥ तथा च गायत्र्युत्तराः संपद्यंत इति आह। एवं स्थित उच्यते॥ एकैव नपकृष्येति। ककुछंदस्यछंदोविध
यत्वाच्चतुर्थकेषु उद्धृतेषु ककुभत्वमेवहीयते। अपूर्त्ता च न गणयोऽभिधानसमर्थो न भवति॥ तथा सत्यपकृष्टार्थता स्यात्॥ न चासौ न्याय्या। अपि चाच
तुर्णामक्षराणा[illegible]तिछंदसि विकल्पविधानेनार्थवद्धा संसे जाते॥ न न्यूनानां ककुभां प्रयोग इति निःप्रमाणकमेव स्यात्॥ नन्तु च श्रूयते॥ गायत्र्युत्त

राम॰
४८
३००

राः संपद्यंत इति॥ [illegible] कत्वात्॥ न ह्ययं विधिवर्त्तमानोपदेशादितरसंस्तवइति॥ तस्मादनपकृष्यैवेति॥ ॥अपरा गायत्रीभ्य उत्सिहाग्ने वाजस्येति॥ प्रतिमंत्रं उ
पदधाति। इदानीं ककुभामुपधानं॥ ॥अनुक्तोत्तेदक्षिणं पंक्तीरध्नि तमिति॥ उपदधाति॥ ॥उत्तरे पदपंक्त्यारे भेतमयेति॥ उपदधाति॥ ॥पुरीषवत्याः पूर्वा
मतिछंदसं प्राच्यां पुरीषसहिते भद्रारातिवैश्नल्पैव स्थिराभिं होतारमिति॥ उद्दिश्यायोत्तराऽसपत्ना पुरीषवती तस्या हि पुरीषं विहितं पुरीषसहितेति॥
प्राच्याविति प्राग्द्वारो चैतो भवतः भद्रारातिरित्येवमादि ता नामंत्रेण पुरीषवत्याः पूर्वामतिछंदसमुपदधाति॥ भद्रारातिरित्येवमादितानि चत्वारि चत्वार्य
क्षराणि॥ ॥अश्मावमित्यनूकान्तेऽपरे द्विपदा उपधीयंते। सर्वच्छंदस्या स्वमिति द्विपदे उभिहस्तुतिर्यग् द्विपयाः॥ ॥मध्येऽश्मः गार्हपत्यं। उपदधाति॥ अ
श्मेष्टकमित्यनुक्तत्वात् अधिकानभवंति॥ गार्हपत्यमिति च नामधेयात् द्वेवोपधानमृत्रानामपि। तथा च शाखां तेवा एतैर्यजुर्भिरितया ब्राचिनोतीति।
इयां स्तु विशेषोर्द्धे बृहतीनां स्थाने द्विपयाः॥ ॥पुनश्चितिं चोपरि तद्धेन मापय इति प्रत्यृचं। तस्येव गार्हपत्यस्योपरितद्वदेव पुनश्चितिमुपदधा
ति। इयां स्तु विशेषोपेन मापय इति प्रत्यृचं। अस्मिं अपद्धैर्धे सेधार एका भवत्यसेधयोगात्॥ ॥पुंछ सधावेके। पुनश्चितिमुपदधाति। तां द्वेके ज
घनार्द्धे उपदधतीति श्रुतेः॥ अस्मिंश्च पक्षे द्विपदा अर्द्धे सेधाः॥ ॥पूर्वार्द्धे वा। पुनश्चितिमुपदध्यात्॥ अत्र पक्षे भवमर्द्धेसेधाः॥ ॥गार्हपत्यं पुच्छे सं
धौ कृत्वा पुनश्चितिं पूर्वार्द्धे उपदधाति। तं हैके जघनार्द्धे गार्हपत्यमुपदधाति पूर्वार्द्धे पुनश्चितिमिति श्रुतेः॥ ॥ऋतव्योपपश्चात्पशुस्त्रीति॥ ॥विश्वज्यो
तिषं परमेष्ठात्वेति॥ ॥दक्षिणांसायत्यगरत्निमात्रादविलोकणाः पूर्ववत्। उपदधाति॥ ॥प्रच्छाद्य पुरीषेणाविकृणां स्वयमातृण्णं शर्करे सृष्टे

छिद्रे प्राप्यदस्य रत्फत्तरं विकर्षी मापोष्टेति स्वयमातृणां। प्रच्छाद्य पुरीषेणाचितिं॥ विकर्षीं स्वयमातृणा सेतुपध्यायेत॥ संलग्ने प्राप्य दस्य रत्फत्तरं विकर्षी
मुपदधाति॥ स्वयमातृणामायेष्टेति। संधौ रे छिद्रे इति च विकल्पेऽर्थमुच्यते॥ ॥स ऊन्नित्य प्रादन सूददोहसो मरूद्देवस्वादना मेदादारंभः॥
पुरुषमिहोमवन्ति ष्ठन्नग्निं प्राहुति हिरण्यशकलसहस्रेण। शतेद्वे प्रक्षिपति सहस्रस्येति प्रतिमंत्रं सहस्रस्येति प्रतिमंत्रं॥१३॥ इति त्र्याध्यायिक
केन्द्रे कात्यायनपत्रसूत्रभाष्येऽग्नौ द्वितीयोध्यायः समाप्तः॥७॥ उं शतरुद्रियहोम उत्तरपक्षस्यापरस्यां स्रक्त्यां परिश्रित्स्वर्कपर्णेनार्ककाष्ठे
न शातनयसंततं जर्तिलमिश्रान्गवेधुकासक्तून्नमो रुद्रायमेके तिष्ठन्नुदङ्मुखः समस्ताध्यायेन। शतरुद्रियमिति नाम। अथातः शतरुद्रियं जुहोती
ति स्रक्त्यामुत्तरपक्षस्यापरस्यां स्रक्त्यां परिश्रित्सु कर्तव्यः। परिश्रित आहवनीयकार्ये॥ तासां समुदितानां नैकैकस्याः परिश्रित्सु जुहोतीति व
चनात्॥ प्रयोजनं समुदितानां धर्मसंबंधः। अर्कपर्णेनार्ककाष्ठेन शातनयन॥ अर्कपर्णं जुह्वाकार्यं अर्कपर्णेन जुहोतीति॥ काष्ठमप्येवला
दुपकल्पनीयं। तेन शातनयसंतानमविच्छिन्नं जर्तिलमिश्रान्गवेधुकासक्तून्॥ जर्तिलैर्जुहोतीति गावेधुकासक्तुभिर्जुहोतीति विकल्पे
प्राप्ते शाखान्तरात्समुच्चयः। तेन जर्तिलमिश्राणीत्युक्तं। अजाक्षीरमेके। अजाक्षीरेणैके जुह्वति। शाखान्तरात्। तिष्ठन्नुदङ्जुहोतीति। जुहो
तौ सतीति ष्ठतिक्रिया वाचनिकी। उदङिति चैदमिमयर्थं। समस्ताध्यायेन मंत्रद्रव्यं संततं जुहोति। वहूनि चैतानि कर्माणि। अयं तेष
ष्टिश्चरुद्वैत्रा॥ चशतान्येतच्छतरुद्रियमथ त्रिंशदथ पंचत्रिंशदिति। एतावंतो रुद्रदेवतासंबंधाः। एवं च सति एताश्चत्रिचतुर्दशी कानिग्रं

तो अजाक्षीरपक्षे वैतावंत एव पक्षहोमाः॥ ॥अनुवाकान्ते स्वाहाकारोऽन्नानुमायस्तवै जानुदघ्ने प्रथमं स्वाहाकरोतीति वचनात्॥ ॥पंचान्ते च नाभि
मात्रे। पंचानुवाकान्ते नाभिमात्रे। चशब्दात्स्वाहाकारः॥ ॥प्राक् प्रत्यवरोहेभ्यो मुखमात्रे स्वाहाकारः॥ ॥प्रतिलोमं प्रत्यवरोहान् जुहोति प्रमा
णो पुनर्मेऽस्त्विति प्रतिमंत्रं। प्रातिलोम्यं च प्रथमं मुखमात्रे। ततो नाभिमात्रे पुनर्जानुमात्रे इति। प्रत्यवरोहांश्च नमोऽस्तु रुद्रेभ्यो ये दिवीति॥ ॥
हवने प्रास्यति चात्वाले॥ अर्कपर्णार्ककाष्ठे इत्यर्थः। आगतत्वात्स्वकर्मोपवर्गात्ते॥ ॥१० चित्यं परिषिंचत्यग्निं दक्षिणं निक्रम्य उडिं कृत्वाऽश्मन्नूर्जे
मित्यद्भिः रक्षि चित्यमग्निमग्नीत्परिषिंचेद्दक्षिणं निक्रम्य उडिं कृत्वाऽश्मन्नूर्जमित्यनेन मंत्रेण॥ उदारभ्य॥ ॥अश्मंस्तेरित्यड्डो ऊंमं कृत्वाम्पिते
ऊर्गित्यादाय॥ ॥एवं द्विरपरं। परिषिंचति॥ ॥तावत्प्रतिपर्येति॥ निधायोदहरणं त्रिर्विपल्ययत इति श्रुतेः॥ ॥ऊंमेडि कृत्वा दक्षिणस्यां वेदि
श्रोण्यां प्रक्षिः ष्ठद्दक्षिणाश्मेति पंडिष्यरत्यनेन मंत्रेण॥ ॥अभिन्नेऽभेत्तवै ब्रूयात्। यदि न भियेत मेत्तवै ब्रूयादिति॥ तच्च प्रतिप्रस्थाता॥ भेदने तु
प्रधानत्वादध्वर्युः। अत्रैतच्चिंत्यते॥ किं ऊंमविषयमेतद्भेदनं। उतानाद्विविषयमिति॥ किं तावत्प्राप्तं। अस्त्रेण वोपक्रमः॥ ॥ऊंमेभेदनं सामर्थ्या
त॥ ऊंमविषयमेतद्भेदनं। नाद्विविषयं। कुतः एतत्॥ एवमेतद्वचनं समर्थं भवति॥ यदि न भियेत मेत्तवै ब्रूयादिति। अद्भोल्वसमर्थमेवान्हित
स्य कठिनत्वाद्भेदनमाशंक्यते॥ ॥एवं प्राप्ते आह॥ अश्मनि चाऽर्थवादात्॥ वाशब्दः पक्षव्यावृत्तौ॥ अश्मनि वैतद्भेदनं कर्तव्यं। नं ऊंमविषयं। कु
त एतत्। अर्थवादात्। यद्येव समभिपतेथ तं शुग्भिर्च्छेतिमंदेह्यीति। सा च शुगश्मनि निहिता। तदश्मनिरुं चंदधातीति॥ ॥वाच्यवाच्ये॥ अपि चाश्म

नेचवाचंमेष्टनं।नरूंमे।सेयाद्रिगर्भनिक्षिप्रोवश्यमेवभियतइति॥ ॥अनेपेङ्खमेतोदग्रांञ्चिष्ठमात्मानमुपरिप्राप्पोत्तेजपतीमामइति॥ ॥आत्माचात्र
ध्यात्मोच्यते॥ ॥मंडूकाऽवकावेतसशाखाऽप्येवोगधावकर्षतिमंत्रक्रष्वसमुद्रस्पत्वेतिप्रत्यृचं।मंडूकादीन्येवोघाऽस्मिंनिकर्षति॥मंत्रक्रष्व
ऋमेणसमुद्रस्यत्वेतिप्रत्यृचं॥ ॥पक्षपुच्छानिचाप्यात्ममन्नेणावकरोविषेति॥ अस्यात्मानमाभिमुख्येनपक्षपुच्छानिविकर्षति॥ ॥अन्नेपा
वकरोविषेतिप्रत्यृचमेवा॥ ॥अन्नमुत्तरं।अंत्यमुत्तरंपक्षं॥ ॥वेणुमुक्तरेवैतोचितयमालभ्यतिष्ठन्हिंकृत्यसामगायति।सामगानमुद्रा
तुःस्यात्॥समाख्यानात्॥अध्वर्योर्वावचनसामर्थ्यात्॥नान्योध्वर्योऽन्नायेदिति॥समाख्यानमध्वर्योरेवविधानानुसारिणीहिसमाख्या
विधानेचाध्वर्युर्वेदविहितं।अथैनंसामभिःपरिगायतीतिएवंवचनात्ध्वर्योर्गायेदित्यनुवादएवा॥ ॥पुरस्तादापवं।सामगायति॥ ॥द
क्षिणपक्षेरथंतरं॥ ॥उत्तरेवृहत्॥ ॥आत्मनिवामदेव्यं॥ ॥पुच्छेयज्ञायज्ञियं॥ ॥दक्षिणेनिकारूप्रजापतिहृदयं॥ ॥अध्यक्षंशंसेत्याहहोता
प्रेषणं॥ ॥अथवसथ्येविसृष्टवाचिपंचग्रहीतेहिरण्यशकलान्प्राश्यतिपंचाउपवसथीयेहन्यातरुदितआदित्येवाचंविसृजतेत्रिप्रक्षे
त्येवमेवश्रुतत्वात्॥ ॥दधिमधुघृतंपात्र्यांससमासिच्यपलाल्योवामहासुवमौदुंबरीमुष्टिंचापर्युप्यपमादापचित्यारोहणंनमस्तइति॥दध्यादीन्य
स्यांमहासुवमौवाऽसिच्यतस्यांतदुपरिचउदुंबरमुष्टिंप्रयमपंचगृहीत्वाचित्यामारोहेणेनमस्तइत्यनेनमंत्रेण॥ ॥स्वयमातृण्णायांपंचगृहीतंजुहो
तिनाभिवद्धिरण्यदर्शनंचेनघृदेवेडितिप्रतिमंत्रं।स्वयमातृण्णायांपंचगृहीतंजुहोतिनाभिव्याघारणावत्॥ ॥नघृदेवेडितिप्रतिमं

राम०
५०
३०२

त्रंहिरण्यदर्शनंचनभवति॥ ॥सप्तासिक्तानुशेः।प्राञ्चतिसपरिश्रित्यंवायुनचयेदेवाइति॥ अथैनमसुक्तानिप्रकृत्यसर्वतःसमुद्रस्याप्यपिवाञ्चन
परिश्रितइतिश्रुतेः॥ ॥प्राणादाइत्यवरोहति।अवतइति॥ ॥एवमारोहणावरोहणमंत्रः।अतऊर्ध्वमेवमेवारोहणावरोहणेकार्ये॥
उपसदंतेप्रवर्ग्यासादनेपर्योक्तमंत्रोपरिषिंचेद्वा।वाशब्दोविकल्पार्थः॥ विकल्पेनहिश्रवणाम्नयपरिसमंताद्पःस्पंदंतेयस्यप्रदेशस्य
सपरिषेचनः॥ ॥स्वयमातृण्णायाःस्पृष्टप्रथमं।अग्निपदेस्वयमातृण्णायासंस्पृष्टप्रथमंप्रवर्ग्यमुत्सादयतीतिवचनात्॥ ॥पंचगृहीतंजुहो
त्यग्निरस्मिजन्मनेत्यृचा।षोडशगृहीतार्द्धमनुवाकशेषेण।पुनःषोडशगृहीतंगृहीत्वातदर्द्धमनुवाकशेषेणाष्टाभिरष्टाभिर्जुहोति॥ ॥
चतुष्पदपितेत्यपरमनुवाकेन।अपरमर्द्धंचतुष्पदपितेत्यनुवाकेन।अष्टाभिरष्टाभिःसर्वाणीचैतानिशालाग्नौजुहोति॥ ॥आर्द्रेदु
वर्द्धंतोषितासित्वजेदेनमित्यादधातिप्रत्यृचं।औदुंबरीःसमिधःघृतेन्यक्ताःसर्वाराविमुषिताःतिस्त्वजेदेनमित्यादधातिप्रत्यृचं।
वैकृतावसरेप्राकृतानुवृत्त्यर्थमाह॥ ॥अग्निंप्रणायतिजत्रुविशेषमाह॥ ॥प्रेष्यत्येयच्छेयमुपयच्छोपयमनीः।अयंचप्रेषःप्रतिप्र
तिप्रस्थातुःतरथीध्वर्योः॥ ॥अग्नयेप्रह्रियमाणायानुब्रूह्यादिकंप्रथमतूदेहिब्रह्मन्प्रतिरथंजपेतिचप्रेष्यति॥ ॥विरूपाक्षपासुधर्मो
दुत्वेतिचित्यंगच्छतिपंचदिशइति।विरूपाक्षोहोताप्रथमायामचिदुदुत्वेत्येयम्यानिविपंप्रतिगच्छंतिपंचदिशइत्यनेनमंत्रेण॥ ॥आग्नी
ध्रुवेशादृक्षिणपक्षमहितेप्रश्नाग्नानमुपरधातिविमानइति।अनेनमंत्रेण॥ ॥ननितोनिते।अत्रसादनस्तूददोहमानमतः॥रश्मा

क॰ ५१

संस्रवात्प्राप्तयोर्निषेधः॥ निधायैनमतिक्रामंतीदं विश्वायुरिति॥ तन्निधायैव यथान्नशेषं यथोपातिष्ठंतीत्यवचनात्॥ ॥ अमध्यममभिनेतिचित्यमारोहंति॥ अ
तश्च नमस्त इत्ययं निवर्तते॥ ॥स्वयमातृण्णामध्यग्निं धारयं शुक्लवत्सायपयसाभिजुहोति॥ कुम्भ्यायादोहनेन स्वयमातृण्णामवसिंचन्नक्तोषासे
ति॥ स्वयमातृण्णाया उपरि धारयन्नग्निं। कृष्णायागोः शुक्लवत्सायाः पयसा दोहनेनाभिजुहोति। नक्तोषासेत्यनेन मंत्रेण॥ स्वयमातृण्णामवसिंच
न्। अयं जुहोतिः सत्यश्च सात्राम्यधर्माः प्रवर्तंते न जुहोतित्वान्मंत्रवर्जं। दोहनस्य जुहूकार्यापत्तिः। रतश्च तद्धर्मा भवंति। महावेदेश्च संमशेनं फतावमी
ः कृताः॥ तत्रत्रेरपरियहादि अत्र कर्तव्यं॥ शतरुद्रियेन तु खननादि॥ ॥येतु दारवायत्रैकेके प्राग्न्यपि गृह्णामीति जपात्॥ तत्र सकृत्साचार्येणान्त
रवेदिप्रोक्षणाद्यासंभारनिवपनान्तं वेति॥ यथैव। मिहस्कसमासंभारनिवापः॥ अत्रार्थ लाता यथैव मिहैव संभारनिवापः॥ ॥तस्यामग्निं नि
दधाति सुपर्णोसीति वषट्कारेण। तस्यां स्वयमातृण्णायां सुपर्णोसीत्यनेन मंत्रेण वषट्कारांतेनाग्निं निदधाति॥ ॥नित्यैव। अत्र भवतः स्थ
कामं सत्वादग्नेः॥ ॥समिदाधानं शमीलाकं कर्तव्यं उ वयं सोमव्रतेरिति प्रतिमंत्रं चतुर्मासकर्तृका॥ समिद्भवति॥ ॥कर्तृकामावदधिद्वस्मात्कोः
कर्तव्या॥ ॥स्रुचा उत्तीर्जुहोत्येतमये इति प्रत्यृचं॥ ॥प्रत्तोउतिं च सप्तत इति जुहोति॥ ॥तिष्ठश मिथः सर्वेत्र मध्ये। सर्वेत्र गृह्णातस्तमिदुदं
शेन विहितत्वान्निवृत्तिः क्रियासर्वत्र भवतीति॥ समिदाधानं गृहणाउत्पामध्ये। अत्रेष्ठाउतारितिभूवितन्वात्॥ ॥ अत्रेष्टा उती रूपविश्य
तिष्ठति रूपानं तयोरुपविश्यैत्यां चोते॥ ॥अत्र पंचम्याः सप्तर्च्योपस्थानं सर्वेषां यानात्॥ अस्मिन्नवसरे पंचम्याश्चितेः सप्तर्च्योपस्थानं कर्तव्यं॥

राम॰ ५१ ३

अत्र हि समवत्ता पंचमी चितिरुपहिता भवति॥ ॥धिष्ण्यान्याविचातमासंयोगात्॥ अथवा धिष्ण्याश्चितास्तु सप्तर्च्योपस्थानं कर्तव्यं॥ उक्त एतत्॥ ॥धिष्ण्यानां
हि पंचम्याश्चितेरंतर्भावः। तस्मात्तेनैव पुक्तरूपमुपस्थानं॥ ॥अभिमृशेदिदं सन्न सरोसीति अग्निं॥ एवं यथाविति। संमर्शनं कर्तव्यं॥ यन्नामा
चितिसदभिधायकेन मंत्रेण॥ पवैश्वानरमारुतान्निर्वपति यथोक्तं। वैश्वानरश्च मारुताश्च वैश्वानरमारुताः॥ तान्निर्वपति। यथोक्तेग्र
हणाच्च वैश्वानरो यजतिः॥ मारुता जुहोतयः। तान् कथं वैश्वानरं हि प्रकृत्याह॥ तं वा एतं पुरोनुवाक्यवंतं याज्यवंतं वषट्कृते स्रुचा जुहोती
ति॥ यजतीनां येष धर्माः पुरोनुवाक्याभिधानाच्च। यावद्दूतः स्यात् तावमारुतान्प्रवृत्याहृहते नैवतरासीनः स्वाहाकारेणेति। जु
होतीनां यत्र धर्माः कपालसंख्यार्थं च यथोक्तग्रहणं। वैश्वानरस्य हि द्वादशकपालता पद्यते॥ मारुतानां सप्तकपालता॥ ॥वैश्वान
रमधिश्रित्य दक्षिणोत्तरौ॥ मारुतौ। अधिश्रयति॥ अत्र वरोक्तसूत्ररमितु स्यापवादाय॥ ॥पश्चात्त्वसंसृष्टतरौ। चशब्दाद्दक्षिणोत्तरा
वधिश्रयति॥ ॥एवमपरौ। द्वावधिश्रयतीति शेषः। एवंशब्देन न च दक्षिणोत्तरतासंसृष्टतरता चलभ्यते॥ ॥ पश्चादरणेन त्वामु
राणेन च्यवं तु पुरोऽशं पश्चाद्धिश्रयति॥ ॥होमासादनयोश्च। चशब्दादयमेव विधिः॥ ॥पुरस्तादपरोऽऽशानां तीर्थोहवनीयसहि
तान्याततत्रासादनं। ऊशानां तीर्यैति प्राकृतमेव बर्हिस्तरणमनूयते॥ प्रदेशविधानाय पुरस्तादपरानिति॥ उक्त एतत्। सपुरस्तादाह
वनीयइति। प्रकृतौ चाहवनीयमपरेण स्तरणं वचनमिहापितथैव कर्तव्यं। आहवनीयसहितान्वेति। उक्त एतत्॥ आहवनीयशब्दो

के घ्यमभिधायकउपचारात्वृत्पास्त्वन्ऽवर्त्तो । तस्मादाहवनीयसहितानेवोत्पूवधायते । तत्रासादनं कर्त्तव्यं ॥ ॥ वैश्वानरे ॥ प्रचर्य सर्वहुतेन हस्तेन मा
रुतो जुहोत्युपविश्य वैश्वानरे वा वैश्वानरं पृष्ठे त्वा शुक्रज्योतिरिति प्रतिमंत्रं मारुतां जुहोति । विकल्पश्चायं वैश्वानरहोमाग्नेर्वेति ।
॥ ॥ विमुखेनारत्निमूच्यं । अरत्निं नूच्यं पुरोडाशं ॥ विमुखेन जुहोति । विमुखस्याध्येत्रणां प्रसिद्धः । उग्रश्च भीमश्चेति ॥ पदं देवीरिति जप
ति ॥ आगंतुत्वादत्र ॥ ॥ इमं स्तनमिति वा चयति वा जपति वेति विकल्पः । वैश्वानरमारुतानामेकतंत्रं । तत्र चयः साधारणः पदार्थः समंत्र चा
न्कर्त्तव्यः । मारुतानां हि पदार्थमात्रेण प्रयोजनं । समंत्रकोपि पदार्थः स्यादेवेति ॥ ४ वसोर्द्धारां जुहोत्यौदुंबर्या पंच गृहीतं संततं यजमानोऽरत्निपानूच्य
थिप्राप्रैवाजश्चमरश्चेत्यप्यनुवाकेन । वसोर्द्धारेति कर्मनामधेयं । तच्च समुदायस्य । एवं हि श्रूयते । षष्टिश्च ह वै त्रीणि च शतान्येषा वसोर्द्धाराः षड
थ पंच त्रिंशदिति । अत्र चयदंतरितं तस्यावृत्तिर्भवति ॥ अडंबर्या स्रुचा पंचगृहीतमाज्यं यजमानोऽरत्निपान्नूच्यो जुहोति ॥ अग्नेरा प्रैवाजश्चम
रश्चेत्यनुवाकेन । संततमिति च द्रव्यसंततं मंत्रसंततं । अत्र च श्रूयते ॥ अथास्मै कल्पयति द्वादशकल्पयतीत्येवमादिना वाक्यपरिसमाप्तेः प्रतिवा
क्यं च स्वाहाकारकरणं । अत्र च देवतापदं तदरायेपंचगृहीतमेव सकलवाक्येन होतव्यं । न ह्यन्यथैतद् दृष्टमिति ॥ ५ उत्तरावत्यासनं । तच्चाग्नेः । एवं हि
श्रूयते ॥ अत्र तो स्रुवमनुप्रास्यति यदत्राज्यलिप्तं तेनैवाहिः द्वावरसदिति ॥ ६ अग्नये स्वाहेति षड्ढाथानि जुहोति । तान्नि च राजसूयीकानि । तत्राम्ना राम० ५२
---दूह च श्रूयते । सैव राजसूयस्य पूर्वाणि जुहोतीति ॥ ७ वाजप्रसवीयानि च प्राक्संस्रवस्य चमसं स्रुवेण । वाजपेयिकानि वाजस्येममिति वा ३०४

जै. ीयानीति सर्वथा । विश्वार्थवादमंत्रत्वासंभवात् ॥ समुदायनामधेयं चैतत् । सप्त ह्येतानि कर्माणि वाजपेयिकानि । प्रयोजनमन्यत मा ऽपायेतस्यैवा
वृत्तिः । तानि चैव प्राक्संस्रवस्य चमसस्य स्रुवेणाव प्राशब्देनाग्निदेनैकदाराभिधानं ॥ तदुद्दत्रापि संस्रवस्य चमसे च तत ऊस्तोकिनां स्रुवेण ॥ ॥ वाजपेयि
कानि वाजस्येममिति प्रतिमंत्रं जुहोति । वाजपेयिकग्रहणं तत्र अप्यप्य सप्रदिष्यते । एवं हि तत्राचार्येणाभिहितं । अदुंवरे पात्रे पयः आसिच्य पयस्युस
प्रदशान्नान्यावपति यावस्मातिवेति । एवं च सति सप्रषद्गोः सप्त चतुर्मुष्टिकान्न पादयान्यापश्चेति ॥ ॥ आग्निकानि च वाजस्येत्विति । अग्निकानि चे
वाजप्रसवीयानि वाजस्येत्विति प्रतिमंत्रं जुहोति । आग्निकेष्वपि सप्तैव सर्वौषधस्य च चतुर्मुष्टिकानि ॥ ॥ स्रुवं प्रास्यपरिश्रित्य रुक्मे जिनमास्ती
र्य पुच्छादुत्तरं शेषः कृत्वा । अभिषिंचतीति सूत्रशेषः । स्रुवमुखे प्रास्यतदंते परिश्रित्य स्तेन ग्रंपुच्छाउत्तरतः रुक्मे जिनमास्तीर्य हुतशेषं कृत्वापः
उत एतदभिषेकसामर्थ्यात् ॥ अन्यथाभिषेक एव न भवति । वा नैवाऽपामासेकः ॥ येन क्षीरोदकं वाजपेयिकशेषविद्यते एवाऽतश्चाभिषेको
पि संभवत्येव ॥ ॥ तत्राभिषिच्यते ब्रह्मवर्चसकामश्चित्तं त्वार्द्धोदेवस्य त्वेति । तत्र रुक्माजिने अभिषिच्यते ॥ यजमान श्रुतस्यानारद्धो देवस्य
त्वेत्यनेन मंत्रेण ॥ ब्रह्मवर्चसकाममिति वचनात् ॥ ॥ तिष्ठन्पुरुषः । स्मृतिमिच्छं क्तिष्ठन्नभिषिच्यते ॥ ॥ स्रुत उपविष्टः । प्राप्तस्मृतिः उपवि
ष्टाभिषिच्यते ॥ ॥ वस्तचर्मणि पुष्टिकामः । पुष्टिमिच्छन्वस्तचर्मण्यभिषिच्यते ॥ ॥ उभयेकुरुभयोः । योनामपुष्टिं ब्रह्मवर्चसं च भ गपाछे ति
सः मयोश्च मर्त्तो व्यवस्थितोभिषिच्यते ॥ ॥ केदक्षिणात श्चितस्य वा । स्थितमभिषिंचति । तं हैके दक्षिणातोग्नेरभिषिंचति । आहवनीयगेहे के भि

२१२

कर्क॰ ५३

षिंचनाति च श्रुते॥ ॥प्रास्य चमसमिंडाय स्वाहेति षड्जुहोति॥ एतान्यपि राजसूयिकानि ततश्रुव एव पार्थान्यसंस्कारो ज्ञापि भवति॥ ॥द्वादशगृहीतं
४होति प्रतिमंत्रं॥ अग्नौ प्रास्य चमसमिंडाय स्वाहेति षण्णो र्णोनि जुहुयाद्विग्राहं जुहोति ऋताषाडिति प्रतिस्वाहाकारेण॥ हुमनः वा द्वारांतः पूर्वः पूर्वो मंत्रः॥ द्वा
दशगृहीतमाज्यं षिनाप्य सरजुहोति ऋताषाडिति प्रतिस्वाहाकारेण हुमनः संज्ञको नहोमानां तत्र च वाकारांतः पूर्वः पूर्वो भवति। उत्तरा तु स्वाहाका
रांत॥ एवं य्रत्र श्रूयते॥ मिथुनानि जुहोति। गंधर्वाप्सरोभ्यो जुहोति वर्द्रीभ्य इव स्त्रीभ्यः॥ उभाभ्यां वषट्कारेण च स्वाहाकारेण चा वषट्कारेण
च स्वाहाकारेण च पुंभ्यो जुहोति॥ स्वाहाकारेणैव स्त्रीभ्य इति॥ एवं श्रवणेऽमति समाम्नायपरिपाठे तेमंत्रे विभागः कर्तव्यः। यानि पुल्लिंगानि ता
न्येकवाक्यतामुपनेयानि। एवं स्त्रीलिंगानितान्यपि॥ ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाडिति पूर्वो मंत्रः। तस्यौष
धयोऽप्सरसो मुदो नामेति ताभ्यः स्वाहेत्युत्तरः॥ अत्र च। तस्यौषधय इति सापेक्षत्वादनाकांक्षादृतधामाग्निर्गंधर्व इत्यनुवर्त्तते॥ ॥पंचगृहीतं रथशिरस्य
ध्याहवनीयं ध्रीयमाणे पंचवक्रः सनो भुवनस्येति। पंचगृहीतमाज्यं च शब्दाज्जुहोति॥ रथशिरस्यध्याहवनीयं ध्रीयमाणे पंचवक्रः सनो
भुवनस्येत्यनेन मंत्रेण॥ ॥अत्र विशेषमाह॥ प्रदक्षिणं यतो उपरिहारः कर्तव्यः॥ ॥पुरुषाउति वहा। वेति विकल्पः॥ ॥पक्ष्देशेपि। अध्वर्युरभि
मुखो रथशिरः जुहोति॥ ॥वातहोमांजुहोत्यंजलिनाऽकृत्य पुरस्ताद्दक्षिणे वेदेरधो दक्षिणस्यां उपुत्तरतो गर्त्तस्यार दक्षिणतो दक्षिणप्रष्टेः समुद्रोसी
ति प्रतिमंत्रं वातहोमान्जुहोति॥ पुरस्ताद्दक्षिणे वेदेरंजलिना वातमाहृत्य अधो दक्षिणस्यां धुरि। एवमेवोत्तरत आहृत्योत्तरस्यां धुरि। दक्षिणतः

राम॰
५३
३०४

अस्यादाहृत्यान्यद्दक्षिणपृष्टेरेवमेव॥ समुद्रोसीत्येभिर्मंत्रैः प्रतिमंत्रं॥ ॥येत्र परिहरणं च सर्वत्र वशब्दो समनंतरमेव॥ ॥प्रग्रहवर्षोरावसथ
हरणं रथस्य कर्तव्यं॥ ॥दक्षिणाकालेध्वर्यवे ददाति रथं॥ ॥अश्वोश्वा दक्षिणी॥ ॥ नव जुहोति मासांश्च इति प्रतिमंत्रं अग्नो तीः॥ ॥मानन्वाज्यसापेत्राजुहुया
त्। पांको च वत्स्यमानावती मासास्तिविद्यात्तामेनस्मिन्काले जुहुयादिति श्रुतेः। तमेव प्रकृत्याह। न जुहुयान्न दतिर्वयानीति। विहितप्रतिषेधाद्विकल्प
॥ ॥हविर्द्धानप्रक्षालेना याग्नीध्रालंमनात्कृत्वा विम्नोच्छिनो त्यपेष्टकोलोकं पृणाभिश्च तु स्कृत्वा मिरश्चे। न्युप्यनुप्यावैकृतावसरे प्राकृतानुवृत्यर्थम
ह॥ हविर्द्धानप्रक्षालनाग्नीध्रालंभनात् प्रकृतं कर्म कृत्वा विस्रंसाच्छिनत्यपेष्टकान्लोकंपृणाभिरिति॥ तद्धर्मप्रवृत्त्यर्थं। चतुःस्रक्तीः ति स्रस्रधी
ति पंक्त्यु मारीनोपरिस्थलि कृतयाचयनं। न्युप्यन्युप्येति। पंपमेवाध्वरधिष्ण्यं निवपति तं तं चिनोतीति वचनात्॥ ॥एकाशमाचाग्नीध्रीये उपधेय
॥ ॥सकृन्मंत्रवचनं॥ ॥होत्रीये विरेकविंशत्या॥ होतृधिष्ण्ये त्रिमंत्रवचनं। एकविंशतिभिरिष्टकाभिर्नोपधाभिश्रूयते॥ ॥ब्राह्मणाच्छंस्यादिष्वेकादश
सुषष्ठाभ्यो नेत्रिये। शेषा अष्टेष्टकाः॥ ॥यावदिष्टकं परिश्रितः परिनिधाय तेषां वै यावत्य एवापनुष्यन्तस्तावत्यः परिश्रित इति वचनात्॥ परिनीधा
नं च परिश्रितां श्रूयते॥ न निखननं। सर्वैः पर्येवनिदधाति॥ ॥पुरीषं च कृत्स्नां पुरीषनिवाप मंत्रो मा भूदिति कृत्स्नामित्युक्तं। प्राकृतानुवृत्यर्थमा
॥ ॥अनुदेशाय पुरोडाशलिप्सस्ते लाभिषेचनीयवत्कर्म भवति॥ एषवो ममीराजेत्यस्य वचनसमर्थ्यात्। विलिंगस्यापि प्रयोगो भवति। अथैनं पूर्वाभि
षेकेणाभिमृशतीति प्रकृत्याह। एषवोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजेति॥ ॥अग्निर्योजनं प्रातरनुवाकमुपाकरिष्यन्नधीनालंभ्य यादृ

३१४

समिंपुनरग्नीतिप्रत्यृचं॥प्रागनुवाकमुपाकरिष्यन्नग्नियोजनंकरोतिपयस्वतीं॥ ॥आग्निमारुतस्तोत्रपुरस्ताद्विमोचनंपरिधिसंध्योर्हिवाम्रूर्द्धं इतिप्रत्यृ
चं॥आग्निमारुतस्तोत्रस्यपुरस्तादग्निविमोचनंपरिधिषंध्यालंभनंबलादिवाम्रूर्द्ध इतिप्रत्यृचं॥ ॥प्रायणीयेतिरात्रेपुरस्तादुदयनीयेविमोकमेके
एके॥हरहर्युंजंतिचविमुंचंतिच॥ ॥अथामसमिष्टयजुरंतरिष्टीयजतेतिच॥प्रत्यृचमपरे॥समिष्टयजुषीजुहोति॥ ॥पशुपुरोडाशमनुअनुबं
ध्यस्यदेविकाहवींषिनिर्वपतियजप्रैषाणि॥अनुबंध्यपशुपुरोडाशमनुदेविकाहविषांनिर्वापःक्रियते॥यजप्रैषान्तो॥तानिइदानीमा
ह॥ ॥अनुमतिराकासिनीवालीकुहूःधाताद्वः॥ ॥धात्रीद्वादशकपालःसर्वेऽतत्रकर्तव्यः॥ ॥हृदयशूलंतेस्रुवाहुतीजुहोतियदाकू
तादितिप्रत्यृचमष्टौ॥अनुबंध्याहृदयशूलान्तेयदाकूतादितिप्रत्यृचमष्टौस्रुवाहुतीर्जुहोति॥ ॥चित्रासीतिचित्यनामकर्त्रेप
तिष्ठतेयेअग्नयइति॥तमेवचित्यं॥ ॥पयस्यामैत्रावरुणीयन्नूपरमिपुनर्दक्षिणोदवसानीयान्ते॥उदवसानीयान्तग्रहणंमाभूदुपस्थानान्ते॥
पयस्यापाश्चात्यपरौक्ता गौमिथुनौदक्षिणा॥ ॥वर्षेसंवत्सराणामतः॥अग्निचिद्वर्षतिनधावेदितिचवचनात्॥ ॥पक्षसंयोजनं॥नवयसोपि
चिदश्नीयादिति॥ ॥स्ववर्सोपायी॥स्ववर्सशब्देनद्विजात्यभिधानं॥ततश्चशूद्रानिवृत्तिः॥एवंप्रामनंति॥अग्निंचित्वाप्रथमंचिद्धानरा
मामुपेयादिति॥रामाचशूद्री॥साहिरमणायैवोपेयते॥नधर्मायेति॥ ॥द्वितीयेस्यामेवा॥द्वितीयेग्निचयनेभिनिर्वृत्तेस्यामेवोपेयात॥नतृ
तीयेवेशांवेति॥एवमपिहिश्रूयतइति॥ ॥तृतीयेनकांचन॥तृतीयेचयनेभिनिर्वृत्तेकांचननोपेयात॥ब्रह्मचर्यंवभवति॥ ॥यावज्जीवव्रतोन्य

राम०
५४
३०६

विशेषात्॥अग्निविद्वर्षतिनधावेदित्येवमादीनिभवेयुः॥ऊतएतत्॥अविशेषात्॥नसंवत्सरकालविशेषःश्रूयते॥एतावंतंकालमेतानिव्रतानीति॥
एवंस्थितआह॥ ॥संवत्सरंवाकालस्यानवस्थितत्वात्॥संवत्सरंवायावदेतानिव्रतानिभवेयुः॥ऊतएतत्॥कालस्यानवस्थितत्वात्॥नहि
कालोव्यवस्थितःशास्त्रे॥व्यवस्थितेनचशास्त्रार्थेनभवितव्यं॥ ॥तद्व्रतश्रुतेश्च॥अपिचतद्व्रतश्रुतिर्भवति॥संवत्सरसंमितावैव्रतचर्येति॥त
देतत्परस्ताद्दर्शितमाचार्येण॥अत्रयःश्रेयस्तरःपक्षःसएवास्माकंपक्षः॥कश्चासौयावज्जीवव्रतान्येतानीति॥ऊतएतत्॥अग्निचित्संया
मात्॥अग्निंचित्वानरःसोग्निचिदुच्यते॥यावज्जीवंचासावग्निचित्॥अतोव्रतान्यपितावदेवेति॥आचार्यस्याप्ययमभिप्रायः॥येनविश्वजि
द्याजिनःसंवत्सरसंमितंव्रतचर्यामाह॥संवत्सरंनयाचेदिति॥ ॥चित्याशक्तौपुनःसोमेज्यायांस्वयमातृण्णाविश्वज्योतिःस्तव्यानामन्यत
माःउपधेयाः॥स्वकृतैहेषाग्निचितआहुतिःसोमाहुतिर्यामनिष्टकेजुहोतीतिप्रकृतौ॥यैवमेवश्रुतत्वात्॥सस्वयमातृण्णाएवोपदधीततथा
ह॥सतव्याएवोपदधीतविश्वज्योतिषएवोपदधात॥ ॥पुनश्चितिमेवोपदधीतेतिच॥ ॥अचयनंवा॥ऊतएतत्॥ ॥चित्यस्याहवनीयाभिसं
पत्तेः॥आहवनीयएवचित्याभिसंपत्तिश्रवणात्॥योवावचितेग्निर्निधीयतेतामेवेष्टकामेषसर्वोग्निरभिसंपद्यतइति॥ ॥इतिअष्टाध्यायकर्कके
तौकात्यायनसूत्रविवरणेग्निःसमाप्तः॥ ॥१८॥ ॥आचार्येणाग्निरनुविहितः॥इदानीमवसरप्राप्तःसौत्रामण्यनुविधानंकूपते॥ब्राह्मणाय
सौत्रामएषष्टिकामस्यात्माद्देषब्रह्मणायजएवयतसौत्रामणीतिवचनात्॥ब्राह्मणग्रहणंक्षत्रियवैश्यनिरस्यर्थं॥साचऋद्धिकामस्यमे

वति शाखांतरात ॥ ननु क्षत्रियवैश्ययोरपि निधनविशेषविधानमस्ति । संजित्यै विजित्यै सत्यजित्यै जित्या इति क्षत्रियस्य । संपुष्ट्यै विपुष्ट्यै सत्प
पुष्ट्यै पुष्ट्या इति वैश्यस्य उच्यते । क्षत्रियवैश्ययोर्विशेषश्रवणम् अंगसौत्रामणीविषयं । अग्नौ हि तयोरभिधानात् प्राप्तिरस्ति । तस्मात् ऋद्धि
कामस्य ब्राह्मणस्यैव नेतरयोर्वर्णयोरिति । सौत्रामणीति नामधेयं न चेष्टिपशुसमुदायस्य । सन्निधानात् तल्लिंगाच्च । उभयं वै सौत्रामणी
ष्टिश्च पशुबंधश्चेति । तथाचार्यप्रस्थानं ॥ सौत्रामण्यामिष्टिपशवो भिन्नतंत्राः कालभेदादिति । एवं प्राप्त उच्यते ॥ त्रिपशौ नामधेयं । कुत एतत
लिंगादेव । आम्नाये यत्तस्य सौत्रामणी वाह्रूऐं इन्द्र वयोधाश्च । ऐंद्रवायोधसव्यतिरिक्ते वस्तुनि सौत्रामणीशब्दमाह ॥ तथा तद्यदेतं सौत्राम
णीकेन पयसैतौ यपावभितो भवत इति सौत्रामणीशब्दं त्रिपशावेव । यच्चोक्तम् उभयं वै सौत्रामणी इष्टिश्च पशुबंधश्चेति । तदितरेषामंगत्वेऽपि सं
भवत्येव । पशुपययोः सुराग्रहवत्त्वेनाभयरूपा सौत्रामणीति । आचार्यीयं तु प्रस्थानं उपकारलोपलक्षणार्थं । पूर्वो जनं । तत्पशोरेवान्तराये
प्रयोक्तव्यमिति ॥ अग्निचित्सोमयाजी सोमातिपूतसोमवामिनः । एभिर्निमित्तैः सौत्रामणी भवति । तत्राग्निचित्सोमयाजीति ग्रहणं अग्निम
तः सोमस्यांगं यथा स्यादिति । सा हि फलवत्त्वात् निष्फलोऽग्निरिति । एवं च सत्यग्निमत्सोमयागे ते सौत्रामणी भवति । ननु चाग्निं चित्वा सौत्रामण्या यजे
तेति वचनसामर्थ्यात् चयनसमनन्तरमेव प्राप्नोति ॥ नेत्युच्यते । अग्निं चित्वेत्यत्राग्नेः परार्थेनोपादानं । अग्निं चित्वेति चयनेन । कार्यमभिनि
र्तितं भवति । किं तत्कार्यं । तत्र स्थितेनाग्निना सोमयागोऽभिनिर्वर्त्यस्तस्मादग्निमतः सोमांगमिति ॥ तदुक्तमाचार्येण अग्निचित्सोमयाजी

[illegible] नीति । यथाग्निनिमित्तकालता नैमित्तिकस्यैवमिहापि चयनाभिनिर्वृत्तिकालता किन्न भवतीति विषमोपम
न्यासः । यत्र हि निमित्तं स्वयमेव भवति ॥ तत्र निमित्तकालता नैमित्तिकस्येति युक्तं ॥ तदुक्तमाचार्येण । कालो वा प्रत्ययादिति । इह पुनरग्नेः
सोमांगतया विधानसामर्थ्यात् । अग्निकार्याभिनिर्वृत्त्यनन्तरकालतैव युक्तरूपेत्यग्निं चित्वेत्यस्यार्थः । तस्मादग्निमता यः सोमेनेष्टवांस्तस्यै
व सौत्रामणी । ननु च अग्निमतोऽपि सोमस्यांगत्वेऽपि न सौत्रामणी श्रूयते । सोमेनेष्ट्वा सौत्रामण्या यजेतेति ॥ नैतदेवं । अग्निं चित्वेत्यस्य वा
क्यस्याग्निप्रकरणे श्रुतत्वात्तदंगता युक्ता । यस्य प्रकरणं तस्य नान्यद्विधीयमानं तदंगमेव भवतीति न्याय्यं । सोमेनेष्ट्वा सौत्रामण्या यजेतेति
सौत्रामणीप्रकरणे पाठः । तेन प्रत्युत विपरीतवत्त्वात्सोमस्यैव सौत्रामण्यंगता भवति ॥ न सौत्रामण्याः सोमांगता । यथा वाजपेयेनेष्ट्वा
बृहस्पतिसवेन यजेतेति वाजपेयं प्रकृत्य विधानात् ॥ वाजपेयांगता बृहस्पतिसवस्य । तस्मात्त्वानग्निमति सोमे सौत्रामणी । सोमेनेष्ट्वा सौ
त्रामण्या यजेतेति किमर्थं तर्हि पाठः । अग्निमत्सोमस्यांगत्वादोषमित्यदोषः । यद्यग्निचित्वेत्यस्यैव शेषो यं । अग्निमता सोमेनेष्ट्वेत्येतदुक्तं
भवति । ननु कस्मादर्थमेतद्वाक्यं कस्मान्न भवति ॥ यथा दर्शपूर्णमासाभ्यामिष्ट्वान्येन यजेत । एवं सोमेनेष्ट्वा सौत्रामण्या यजेतेति । नैतदेवं । अंगत्व
प्रतिपादनस्वरूपो ह्यर्थवादोऽत्र भवति । सोमेनेष्ट्वा सौत्रामण्या यजेतेत्यन्वाह । यथा धेनुं दुग्ध्वा पुनराप्याययेदेवं हैव पुनराप्यायत इति
तस्मादग्निमत्सोमांगमेवेति । सोमातिपूतसोमवामिनोश्च सौत्रामणी भवति ॥ शाखांतरश्रवणात् सोमातिपूतः सोमवामी च ब्राह्मण एवानहि

३१६

कर्क० ५६

क्षत्रियवैश्ययोरेतद्विशेषणमिति। ननु च सोमकार्ये तयोरपि न्यग्रोधविधानं। तेन तदन्तिपक्षे तद्भक्षणे च क्षिप्ति न भवति। नैतदेवं। यदि नाम कार्य-
पत्याधर्मप्राप्तिर्भवति। न चायं सोमधर्मेण किं तर्हि तदतिप्रवचनेप्यागांतरविधानमिति। अग्निहोत्रहवण्यां तत्रापस्यापि भवति। अग्निसंयोगविधा-
नात्॥ ॥राज्ञोपरुद्धस्य च। सौत्रामणी भवति। राज्ञः अपरुद्धस्य राज्यात्प्रच्यावितस्येत्यर्थः। दुष्टरात् इष्टं यो सापनोद शपरुद्धं राज्यादपरुद्धं स्या-
सेति। तद्विधानात्॥ ॥अलंपशोरपशोश्च॥ सौत्रामणी भवति। यः अयोग्यः सन्यो नाम पशून्न विंदते सोऽलंपशुरपशुः॥ ॥आदित्यश्चरुः भव-
तीति सूत्रशेषः। आदित्यं चरुं पयस्यमानो निर्वपतीति श्रुतेः॥ ॥अंते च आदित्यश्चरुर्भवति॥ आदित्यमोजोनशति। ईजानश छं इष्ट वत्स्व-
भवति॥ ॥आमिक्षाया वा पूर्वेः। आदित्यश्चरुर्भवति। तस्य द्विकौ चरव इति कद्रुसंस्तवः। वायोश्च सस्य च वाकुसंस्तवान्। पयस्यात्रे च तद्विधाना-
त्। आमिक्षायाः पूर्वा भवतीति संप्रदायः। विकल्प इत्यपरे॥ ॥धेनुर्दक्षिणा॥ अस्यादित्यस्य चरोर्भवति॥ ॥तत्र विभागमाह। वत्सः पूर्वे चरौ
॥ ॥मातोत्तरे। दीयते। वत्सं पूर्वस्यां ददाति। मातरमुत्तरस्यामिति॥ इष्टापेक्षया स्त्रीलिंगानेता॥ ॥अभ्यादधाति प्रत्यृचमाहवनीय इति समि-
धोऽभ्यादधाति। उद्धृत्याहवनीयं॥ ॥सत्यवादी यजमानो भवतीति शेषः। अत्र चेष्टिषु केचिद्व्रतग्रहणं नेच्छंति॥ सौत्रामणिकस्य सत्यनियमस्य
विद्यमानत्वात्। यथा दीक्षितस्य सत्यनियमेन ज्योतिष्टोमे व्रतग्रहणाभावः एवमिहापीति॥ तदेतन्नातीव युक्तरूपं। येन चोदकपरिप्राप्तस्य
नियमाबाधो नापि सौत्रामणिकस्य विषयोऽस्त्येव। तद्याप्रप्रदेशाद्बहिः। अपरे चेष्टिविधाने स एव पूर्वः सत्यनियमः प्राप्नोति। प्राकृतसत्यनियमस्य

रामः
५६
३०२

त्ता एव इष्ट्यो विधायंते। तस्मादयमौत्तरालधर्म इति॥ ज्योतिष्टोमेप्येवमेवास्त्विति चेत्॥ न दीक्षितनिबंधनत्वात्तस्या। यावद्धि दीक्षितकालभावित्वाच्च सत्यनि-
यमस्य प्राकृतस्य नावसर इति बाध्यते॥ प्रयोजनं। इष्टिषु व्रतं गृह्यत एव॥ ॥उक्तोच्छिष्टभक्षः यजमानो भवति। अग्निहोत्रे च उक्तशेषभक्ष इत्यप-
॥ ॥चतूरात्रं। अयं क्रतुर्भवतीति सूत्रशेषः। किं वा स्यात्॥ पौर्णमास्यां सर्वेष्टयो मा भूवन्निति॥ अग्निहोत्रं जुहोति। पुनर्विधानस्य सामर्थ्यात्स्व-
धर्मेवेति नियमः॥ ॥ऐंद्रः पशुः। सूत्रेष्विति शेषः॥ ॥चरुपशू विपर्यासमेके इच्छंति। कद्रुसंस्तवाच्चरोः। वाकुसंस्तवाच्चैन्द्रस्येति। यद्येवं पूर्वे-
कस्मादादित्यश्चरुः। पयस्यमानो निर्वपतीत्यतो वचनात्॥ अस्तु तथेति चेत्। न। कद्रुसंस्तवाभावात्। वाकुसंस्तवाच्चेतरस्य। अतएव हि भावमंगा-
त्प संस्तवायेमिति॥ कथं तर्हि पयस्यमान इति भवति॥ प्राक्पशुकालात्यदृमाणो भवति॥ ॥अन्त्यपात्यस्थाने च सौत्रामणी सुरासोमविक्रयिक्रया-
ले सुरासोमा इत्यामे आमेऽप्रणः सीसेन शष्पक्रयणीकानाम्। सोमिल्लीजानो सूत्रैः सुरासोमविक्रयि सर्वेषु। प्रक्रमते। यो येन सोमवद्भुने-
रां वक्ष्यति। तत्रांत्यपात्यस्थानमस्ति। तत्र सुरासोमविक्रयिणः सकाशाच्छष्पाणि सीसेन शष्पक्रयः कर्तव्यः। सा संप्रसिद्धमेवाशस्य शब्देन ब्रीह्यावि-
रूढा उच्यंत इति संप्रदायः॥ अपरे तु शष्पशब्देन तृणमात्रवाचकमाहुः। प्रसिद्धास्य यवतृणस्य पाति। तोक्मशब्देन यवा विरूढा उच्यंते। तेषा-
मूल्यामिक्रयः॥ लाजानां सूत्रैः॥ पञ्चप्रघाते। उत्सौ सूत्रेण क्रीणानाति। सर्वदैव वडवाः। सुरासोमविक्रयिक्रयात्। सत्सु सुरासोमा उक्तां मंत्राम-
त्रक्रयः कर्तव्यः। सर्वेष्विति च सर्वस्य ग्रहणं नयऊं विषयांतस्यापि च आमंत्र्य नियतद्रव्याणां क्रयणं कर्तव्यं॥ ॥न्वा वो देकेनोअभि

३१७

कर्क
५१

च्छेति। ज्ञावप्रसिद्ध एव॥ ॥दक्षिणेन हत्वा नयत्यः चूर्णानि कृत्वा तांश्च व्रीहिश्यामाकौदनयोः पृथग्गावाप्यो निषिच्य चूर्णैः संसृज्य निदधाति तन्मा
सरं। दक्षिणेन द्वारेण प्रवेश्याग्न्यागारं नयत्यः चूर्णानि कृत्वा नयत्यः किण्वं उच्यते॥ तांश्च शष्पादीन चूर्णयति॥ व्रीहिश्यामाकौदनयोः पृथग्गावामी
निषिच्य चूर्णैः संसृज्य निदधाति तन्मासरमुच्यते॥ व्रीहिश्यामाकाभ्यां च सुरा निष्पाद्यते॥ सा च यागसाधनं तेन सान्तउ मैरेभिसंबध्य
ते॥ अतस्तयोः शूतमुद्दोकयहणं पूर्वकं पृथगोदनौ निधायेते॥ ॥ उदनौ चूर्णमासरैः संसृज्य स्वाद्वीं त्वेत्यनुनात इति। चूर्णमासरसंसृ
ष्टावोदनौ स्वाद्वीं त्वेति मंत्राभ्यां उभ्यां प्रक्षिपति॥ ॥त्रिरात्रं निदधाति॥ प्रक्षिप्य च त्रिरात्रं निधेयात्स्॥ ॥एकस्याः पयसा पाकतेनाग्निनेन
परिषिंच नि परीतो षिंचतेत्यनेन मंत्रेण॥ एकस्या दुग्धेन प्रथमरात्रिं परिषिंचतीति वचनात॥ अश्विनावुदिस्यापाकरणं कर्तव्यं तत्सा
पूर्वत्वादप्रधानत्वाच्च पयसः अश्विभ्यामपाकरोमि इति गोस्पर्शेन मात्रमेवेति संप्रदायः॥ अपो... त्रमेवदपाकरणमिच्छेति॥ ॥शष्पं च
र्णानि चावपति। व्रीहयो विरूढाः च शब्दात्सुरायां॥ ॥सारस्वते नद्ध्याः प्रातः प्रातः शब्देन च द्वितीयमहरभिधीयते तत्र च रात्रावेवप
रिनिषेकः प्रथमरात्रिं परिनिषेकः प्रथमरात्रिं परिषिंचतीति प्रकृतत्वात्पयोर्दुग्धेन द्वितीयामित्यास्॥ द्वितीयां रात्रिमिति गम्यते॥ ॥तो
क्म चूर्णानि चाव्यावपति॥ ॥ऐंद्रेण तानेमेति हरणं। गवां दुग्धेनैन्द्रेण परिषिंचति॥ ॥लाजचूर्णानि च॥ आवपति॥ अत्र चूर्णानां पयसश्च
सं[illegible]त्वात्साधनं तु व्रीहिश्यामाकावेव। अतस्तयोरेव देवतोद्देशेन ग्रहणं॥ ॥वेदिं मिमीते वरुणप्रघासवत्॥ उत्तरा न्यामवति दक्षिणा

राम°
५३
३०९

न्येति। दक्षिणस्याः अतिप्रसक्तात्कर्तृकता च वर्तिनात्लभ्यते॥ ॥प्रक्रमतृतीयेनावृत्तेनोत्तरां सोमवत्॥ प्रक्रमस्य तृतीयं प्रक्रमतृतीयं। तेनोत्तरस्यां वे
द्यामारंता॥ मानक्रियां सोमवत्कर्त्तव्यां सोमवदिति च। प्राचीं षट्त्रिंशतां पश्चात्त्रिंशच्चतुस्त्रिंशन्ना। पुरस्ताच्चतुर्विंशति इति। तृतीयेनेति कृते
ष्वपि सिते। वितृतीयेयजेत। वितृतीये सोमस्य सोत्रामणीति वचनात। एवं सति यदि प्रक्रमस्य तृतीयं गृह्यते ततः क्षेत्रस्य गृह्यते॥ तत्र
क्षेत्र -- व भागः परिछिद्यते॥ तत्र तृतीययजेते समर्थं स्यात्॥ तस्मात्प्रक्रमशब्देन प्रक्रमपरिछिन्नं क्षेत्रमभिधीयते। यथा पादावरत्या परिछि
न्नं क्षेत्रं पादावर्त्त शब्देनाभिधीयते। एवं प्रक्रमपरिछिन्नं प्रक्रमशब्देन तस्य तृतीयं प्रक्रमतृतीया तेन च मानस्य शक्यत्वात्परिछेदकं प्र
माणं लभ्यते। तेन प्रमाणेन सोमवत्क्रियां तरस्याः यद्वा प्रक्रमपरिछिन्नक्षेत्रतृतीयकरणी प्रमाणेन सोमवदावृत्तेनेति॥ प्रक्रमतृतीयकर
णीप्रकारश्च शुल्वकारणोक्त एव॥ ॥तयोः पश्चात्खरौ करोति। तयोर्वेद्योर्विच्छिन्नस्वरूपयोः पश्चाद्भागे खरौ करोति। खरकरणं च प्रदेशांतरभि
हितमेव॥ ॥श्वः प्रणयनीयाधानादि करोत्याज्यासादनात्। स्पयादि करोति दक्षिणस्यां वरुणप्रघासवत्॥ दक्षिणस्यामेव। एवं चेदुद्देश्यो गते
वेदिछिद्रनान्नोत्तरा वेदिर्भवति। दक्षिणस्यामुत्करणांता॥ अस्यां वरुणप्रघासवदिति॥ वत्प्रदेशात्प्रतिप्रस्थाता कर्ता॥ ॥सौरमेव
स्या। दक्षिणस्यां सौरमेव भवति॥ एव कारकरणं च तदंगभावप्रज्ञापनार्थं। ततकृतः। अत्र हि शूयते॥ आश्विनो जोधम सारस्वतो मेषऐं
द्रऋषभ इति॥ तथा पयः पशु सुरा च भवन्तीति सर्वस्यास्यैकतंत्रतं च वचनाद्दक्षिणेऽग्नौ सुराग्रहहोमः। दक्षिणेऽग्नौ सुराग्रहान्जुहोतीति तदंगान्

कर्क॰ ५८ त्र एवात था चाह। अन्तरेणै पशुभिः पुरोडाशः पयोग्रहौ राति चरंतिय द्वान्यदिति॥ अन्यग्रहणेन सौत्रग्रहा उंगान्युच्यंते॥ तान्यप्यन्तरेण
मेवैकं तं स्यात्॥ अतश्चाचार्येणाज्ञापितमेतत् सौत्रमेकांगं भवति॥ एवं कारकरणात् अंगान्तरम् एवं। एवं च कृत्वा नूनं कृत्वा न्त्र दक्षि
णवेद्यर्थं प्रणीताः क्रियंते। अग्निप्रणयनमप्याहवनीयाद्दक्षिणस्यां। यथा पशुकेषु चातुर्मास्येषु तत्रमेवा दक्षिणवेद्यर्थं प्रणीता प्रणय
नं क्रियते। गार्हपत्याच्चाग्निप्रणयनं॥ ॥ स्वमुखेन्यावरमपरेण चर्म चबाय पृष्टिकृतमासिच्य कारोतरमवदधाति कारोतराद्वा चर्म
णि मंत्रलिंगात् पूतामादत्ते सिंचति परिषिंचतीति॥ दक्षिणा वेदिमपरेण स्वमुखेवा चर्म वधाय परिस्कृतमासिच्य तत्र कारोतरमव
दधाति सुरापचनाय। कारोतरं च सुरापावनं प्रसिद्धं सौत्रिकानां। ततः पूतां सुरामादत्ते सिंचंति परिषिंचतीत्यनेन मंत्रेण। कारोतरा
द्वापतितां चर्मणि गृह्णातीति उ न एनं तेन चर्मणि मंत्रलिंगात्॥ कारोतरेणादधतो गवोवचीति मंत्रलिंगमप्यर्थप्राप्तस्यापायस्य
नियामकं भवति॥ यद्येवं कारोतरादेव पतितां चर्मणि गृह्णाति संप्रदाये तु विकल्पः॥ ॥ सतेपुनाति गोश्ववालवालेन पुनातीति परिस्रु
तमिति। सत शब्दः पात्रवाची तेन पालाशं। तत्र हि सुरा न विनाशमुपयाति॥ तत्र गोश्ववालपवित्रेण सुरां पुनाति पुनातीति परिस्रुतमित्य
नेन मंत्रेण॥ ॥ वायोः पूत इति सोमातिपूतस्य पुनाति॥ ॥ प्रातिउग्रहामिनः पुनातीति विशेषः॥ ॥ तत्र रस्योपावेत सोज ऽविलोमपवित्रेण ब्रह्म राम॰ ५८
क्षत्रमिति। अत्र रस्याविद्यान्अजाविलोमपवित्रेण वैजसपात्रे पयः पुनाति ब्रह्मक्षत्रमित्यनेन मंत्रेण। तत्र पयोयागार्थं तावद्भवति॥ ॥ ब्रह्मानुमं २९०

त्रणमध्वर्यो अद्रिभिरीति॥ पूयमानं पयो ब्रह्मानुमंत्रयते अध्वर्यो अद्रिभिरिति॥ ॥ पयोग्रहान्गृह्णाति कुविदंगेति। अनेन मंत्रेण॥ ॥ पृथगुपयाम
यानीत्युपयामयोनीप्रति ग्रहं भवति॥ ॥ खरयोः सादनं पयोग्रहे सुराग्रहाणां च कर्तव्यं॥ ॥ आश्विनमाध्यक्षेन पात्रेण गृह्णाति॥ गोधूमकुवल
चूर्णानि वापति तेजोसीति वशब्दात्॥ ॥ सारस्वतमौदुंबरेण॥ ॥ उपवाकबदरचूर्णानि चवीर्यमसीति चशब्दादावपति॥ ॥ ऐंद्रं नैयग्रो
धेन पात्रेण गृह्णाति॥ ॥ यवकर्कंधुचूर्णानि च बलमसीति॥ आवपति॥ ॥ स्थालीभिः सौत्रा नाना हि वा मिति। सौत्रान्ग्रहान्गृह्णाति नाना हि वामि
त्यनेन मंत्रेण नोक्तं॥ ॥ व्यत्यासं। व्यत्यासेन गृह्णाति। अहन्व्यत्यासेन गृह्णाति। पयोग्रहे गृहीत्वा ततः सुराग्रहं। पुनरप्येवमेव। व्यतिषक्तानी गृह्णातीति
वचनात्॥ ॥ पयोग्रहान्वा पूर्वं॥ गृह्णात्येवमपि स्मिश्रूयते॥ ॥ सुराग्रहं श्रीणाति ऽजोसीति वृक व्याघ्रसिंहलोमभिः प्रतिमंत्रं मिश्रैः। तु जोसी
त्यभिमंत्रैः प्रतिमंत्रं वृकादिलोमभिर्मिश्रैः सुराग्रहान्श्रीणातीति॥ ॥ एकैकं यथासंख्यं लोमभिः श्रयणं कुर्वंति॥ ॥ सोमो राजेत्यनुवाके
नग्रहाननुपतिष्ठते युगपत्। योगपद्येन॥ ॥ चतुर्भिर्वा पयोग्रहान्शेषेण सौत्रानुपतिष्ठते॥ ॥ दारूणाव त्वावयतो नः पात्रेशेषेन पत्राभ्यां पावया
घ्रमिति॥ अध्वर्युप्रतिप्रस्थातारावंतः पात्रेस्थितेयजमाने श्येनपत्राभ्यां पावयतो यथा व्याघ्रमित्यनेन मंत्रेण। दारूणा वद्भिः ऊर्ध्वमवांचे च॥ ॥ अ
ग्निं प्रेक्षयति यदापिपेषेति। प्रेक्षयति कारितत्वाद्ध्येषणा। यदा पिपेषेति यजमानः प्रेक्षते॥ ॥ पयोग्रहसंमर्शनमप्यच स्थैति। विष्टप्य च स्थैति सौ
त्राणां। अभिमर्शनं॥ सोमानामिमर्शं पादकस्पर्शनमिति संप्रदाय। व्याप्ता सग्रहणो य्यवं। वैकृता वसरे प्राकृता नुवक्तव्य मर्थमाह॥ ॥ आश्विनमादि करोति॥ ५

कर्क- आश्विनो जोधूम्रः पशुर्भवति। अजग्रहणमुत्तरविवक्षयात्॥ ॥सारस्वतो मेषः॥ ॥ऐंद्र ऋषभः॥ ॥मध्ये यूपो दक्षिणोत्तरावैंद्रवायोधमयोः। एवं देशव्यवस्था
५८ नेकर्तव्या॥ मेवहि श्रूयते। तस्य देवं सौत्रामणिकं रूपमेमौ रूपावमितो भवत इति॥ ॥यूपामार्जनांते ग्रहानादाय पूर्ववदनुवाचनं सुरासोमेभ्योनुब्रूहि
ति॥ पूर्ववच्छब्देन चाजरूपसौत्रामणिकं रूच्यते॥ तत्र ग्रहकर्मण्याश्विभ्यां सरस्वत्या इंद्राय सुत्राम्ण इति॥ एता हि ग्रहदेवता इति॥ ॥अतश्च पयो ग्रहार्थं
तदुद्देशेनापाकरणं। सुराग्रहार्थं च ब्रीहिश्यामाकयोः चतुर्मुष्टीकग्रहणमिति॥ अयं च चरकसौत्रामण्यामनुवाचनातिदेशः परो विशेषः॥ ॥सर्वप्र
संतु। तशब्दो विशेषणार्थः॥ ॥प्रस्थितमिति च शब्दाद्यशेषविशेषः॥ प्रस्थितशब्दस्य प्रयोगः। सुरासोमान्प्रस्थितानप्रेष्येति॥ ॥त्रिपशोः सर्वप्रस्थि
तशब्दवद्भवति॥ सर्वग्रहणं च वपार्थं॥ पशुपुरोडाशार्थमित्यपरे॥ तच्चानुपपन्नं। येनापि सवनीयेषु पठ्यते। प्रस्थितमिति च प्रस्तुते तेनेह प्राप्तस्या
पसंहारार्थमिदं वचनं। न च पुरोडाशे प्रस्थितशब्दस्य प्राप्तिः। तस्मात्सर्वग्रहणं वपार्थमेव। पशुशब्दस्यांगेष्वपचरितत्वात्॥ तत्रैवमाम्ना
दिति सर्वग्रहणं। इह वोपसंहारात्प्रस्थितशब्दस्य पशुगणात्तो प्रवृत्तिः॥ ॥सुरावंतमिति जुहोति। पयोग्रहान्॥ ॥पालाशैः सौरान्सम्न
यमाउतिमानश इति श्रुतेर्यस्त इति पालाशैः सुराग्रहान्जुहोति यस्ते रसस्तेन मंत्रेण। उत एतान्। पालाशैरिति। यस्मात्ता मन्यथमाउतिं न्याप्नोति
कथं ज्ञायते। यज्ञानस्यावैर्देवेभ्यो जुहुयात्पथकस्मादेतान्मन्त्रेणैव जुहोतीति। वानस्पत्यं देवानामुचितं मन्मयं चाग्नुवितमिति ज्ञापयति। अ राम
पि च पालाशान्यूपशयानि भवंतीत्यत्र श्रूयते। माभूदृष्टार्थं तातेषामिति॥ ॥अध्वर्युः प्रतिप्रस्थाता मीयमाश्विनेन्या आश्विनेभरूपंति द्विविधाव ५८
३२२

नेऽध्वर्य्वादयः आश्विनग्रहशेषं द्विविधावयवमपमश्विनेतिमंत्रेण भक्षयंति॥ ॥होताब्रह्ममैत्रावरुणाः सारस्वतमाश्विनवत्। भक्षयंतीति शेषः॥
शेषं शेषमासिंचत्यत्र पूर्वस्याभक्षितशेषपूर्वस्य ग्रहस्योत्तरस्मिन्नासिच्यते॥ ॥ऐंद्रं यजमानः भक्षयतीति शेषः॥ ॥यद्वत्रेति सौरान्भक्षयंति यथा
भदितं प्राचीनावीतिनो दक्षिणतः दक्षिणतो वितानस्याग्न्यवस्थिताः। प्राचीनावीतिनः संतः यदत्रेत्यनेन मंत्रेण सौरान्भक्षयंति। यथा पयोग्रहा
णां भक्षणं कृतं तथैवेति॥ ॥ब्राह्मणा भक्षमेके ब्रुवंति सचायं विकल्पः शास्त्रस्य तुल्यत्वात्॥ ॥परिक्रीतो वा वैश्यो राजन्यो यो वान्यतरः भक्षयेदि
ति॥ ॥अंगारेषु वा वहिष्परिश्रिदक्षिणेनो जुहोत्याश्विनमुत्तरे मध्यमे सारस्वतमैंद्रं दक्षिणे पितृभ्यः स्वधायिभ्य इति प्रतिमंत्रं जुहोति॥ ॥अत्रान्यितरइ
तिब्रह्मालनेनापसिंचति। यथाहोमपात्रेण॥ ॥पितरः शुंधध्वमिति जपति॥ ॥ॐभौमासयस्तुभवच्छतविरणां वालपवित्रहिरण्यान्यत्रर्दी
यनवर्चं वाचयति पुनंतु मेति॥ ॐभवदिति दक्षिणस्याग्नेरुपरि सुरावंतमासंजति। वालपवित्रहिरण्यान्यत्रर्जीयमध्ये। नवर्चं वाचयति पुनंतु
मेति॥ ॥सोमवंतं बर्हिषदामग्निष्वात्तानां च। चशब्दान्नवर्चं वाचयति॥ ॥पूर्ववत्सोमातिपूतश्रुतौ सोमातिपूतसौत्रामण्यां पूर्ववदुपस्थान
कर्तव्यं सोमवद्भक्षणादिति॥ ॥पयस्वतीरिति यजमानो जुहोति गत्वसेच यज्ञोपवीत्युत्तरस्याग्नौ चाजुहोति। चशब्दाद्यजमानः। अत्र च श्रूयते। सर्वे यज्ञो
पवीत्युत्तरस्याग्नौ चाजुहोति। चशब्दाद्यजमानः। अत्र च श्रूयते। सर्वे यज्ञोपवीत्यस्तस्येतानीन्मत्वोत्तरमग्निमुपसमायन्तीति॥ ॥अन्वाहार्यपचने
जुहोति द्विसंतत इति। तच्चैतज्जुहोति धर्मैर्द्धर्मवद्भवति॥ ॥शंयं यजमानो भक्षयतीदं हविरिति मंत्रेण॥ ॥चात्वाले मार्जयंते सपत्नीकाहि

कर्क० ६०

रणमतर्द्धाय ॥ ॥ पशुपुरोडाशान्निर्वपत्यैंद्रं सावित्रं वारुणं दशकपालं ॥ अन्यदेवत्याः पशवो भवंति ॥ वचनादन्यदेवत्याः पुरोडाशा यिति । पशुपुरोडाशस्य प्रकृतौ पशुदेवतासंस्कारार्थत्वात् । सा चात्र न संभवति । तत्र केचिदाहुः पशुपुरोडाश ऐंद्रः पशुदेवतासंस्कारकः । सावित्रः सकाशसामान्यात्सारस्वतस्य । वारुणश्चाश्विनस्य । एवं संस्कारत्वमेषां । तत्पुनः युक्तायुक्तविचारार्हमिति ॥ ॥ एककपालं चावभृथाय वारुणं चैककपालं । तेरेव महावभृथाय इति निर्वपति । वारुणस्य दशकपालतेंद्रसावित्रयोरपि कपालसंख्या फलरूपार्थं एवं हि श्रूयते । एकादशकपाल ऐंद्रो भवति । द्वादशकपालः सावित्रो दशकपालो वारुण इति ॥ ॥ आसाद्यैनानाज्यभागौ यजति अत्र स्विष्टकृद्वनस्पत्योः प्रैषदर्शनात् । पुरोडाशानासाद्याज्यभागौ यजति । अत्र हि क्रमे स्विष्टकृद्वनस्पत्योः प्रैषश्चाज्यभागदेवतयोः संकीर्तनात् ॥ ॥ यथोक्तं वा मंत्राणामविधानात् ॥ वाशब्दः पक्षव्यावर्तनो नात्राज्यभागविध्येते । यथाप्राप्तमेवाज्यभागयोरनुष्ठानं । कथं च प्राप्तिः ग्रहस्यागात्पूर्वं तेषां हि दर्शपूर्णमासचोदकेनाज्यभागयोः प्राप्तिः ॥ यदुस्विष्टकृद्वनस्पत्योः प्रैषदर्शनादित्युक्तं । तन्न । मंत्राणामविधायकत्वात् । न हि विधायका मंत्राः ॥ ॥ त्रयस्त्रिंशतं दक्षिणा ददात्यनुशिष्टं च वडवधेनुं । ननु च धेनुग्रहणादेवानुशिष्टत्वं प्राप्तं । अनुशिष्टग्रहणं न कर्तव्यं । नान्यतोपकाराभावाद्धि शिष्टनेलम्यते ॥ तस्मात्कर्तव्यमेव धेनुग्रहणं तर्हि न कर्तव्यं । नैनं देवं । न हि अक्षिपमाणो हि परशिष्टैरपि प्राप्नुयात् । तन्माभूदित्यमयमुक्तं । अस्मिन्नवसरे दक्षिणादानमुक्तं । पशुपुरोडाशे जाते यथा स्यादिति ॥ ॥ एकादशिनिधर्माः पशुगणेषु भवंति गणान्वसामान्यात् ॥ ॥ शमित्र

राम० ६०
३२२

तुमीसनप्रभृतिस्त्रुवस्यपंतं कृत्वा सोमासंदीवदासंदी जानुमात्रपादा वेद्योर्निदधाति रुक्मस्योपरीति । ह्रानुत्तरस्या वेद्याः पार्श्वे भवतो द्वादक्षिणस्यामिति श्रुतेः । शमित्रनुशासनं तु द्वितीयं पृष्ठव्यं प्रथमं हि सवनीयवोदकपरिप्राप्य पशुपुरोडाशप्रोदकदानं तेनत्यात्रमार्गकृत्वा निवर्त्तमिति ॥ ॥ कृष्णाजिनमस्यामास्तृणाति मात्वेति । आसंद्यां ॥ ॥ तस्मिन्नास्ते यजमानो निषसादेति । निषसादेत्यनेन मंत्रेण यजमान उपविशेत् ॥ ॥ पादयोरुक्मा उपस्यति ॥ ॥ राजन्नसव्यमत्यारिति ॥ अनेन मंत्रेण ॥ ॥ सौवर्णं शिरस्येके वियोदिति ॥ सौवर्णं तु नः शिरस्येक आचार्याः कृपास्यंति । एके दक्षिणपादे वियोदित्यनेन मंत्रेण ॥ ॥ क्षुरैर्वसायहांद्वात्रिंशतं जुहोति सीसेनेति प्रत्यृचं । क्षुराश्चार्थभाः प्रतिपत्तव्याः ॥ ॥ द्वौ द्वौ उत्वा शेषां संतं करोति । तोष्ठ द्वौ द्वौ त्वा तत्केषां संतं करोति वैनसे ॥ ॥ सर्वसुरभ्युन्मृदितं शेषैरभिषेचनीयामुखादवमावपत्युत्तिदिशं सर्वत्र सावित्रमश्विनोः सरस्वत्या इंद्रस्येति प्रतिमंत्रं । सर्वसुरभिश्रुंदनादिरभ्युन्मृदितं यजमानं ग्रहशेषैरभिषिंचति । आसुत्वादन्यच्च स्नापयन् । आसुत्वादितिमर्यादेयं । अकर्मविषयत्वात् । प्रतिदिशं त्वच स्थितः सर्वतः परिक्रामन्निति वचनात् ॥ सर्वत्र सावित्रं । सर्वाभिषेकेषु सावित्रं मंत्रमाह । अश्विनोः सरस्वत्या इंद्रस्येति प्रतिमंत्रं ॥ ॥ सर्वाभिश्चतुर्थं । अभिषेकं । सर्वाभिर्देवताभिः करोति । पुरस्तात्प्रत्यङ् अभिषिंचति पुरस्तात् प्रत्यगत्र मयते शीर्षतः शीर्षतो ह्यन्नमद्यत इति प्रकृत्य श्रुतेः ॥ ॥ महाव्याहृतिभिरेके । साचेयं स्वपदविभाषा । तेन हि कएताभिर्देवताभिरभिषिंचति भूर्भुवः स्वरित्येताभिरुच्चव्याहृतिभिरिति वचनात् ॥ अत्र न ज्ञापते विंक्या

३२५

स्मृतिपदं पूर्वं रवताप्देभ्यः। उत्तोत्तममित्यत आह॥ ॥उत्तमेन वा। उत्तमेन वा व्याहृतिपदेनाभिषेको न पूर्वेण। न चानियमः। ऊतस्पततेर
कर्के ६१ पाठक्रमात्। तं देवेष्टाभिश्च देवजाभिरभिषिंचंति भूर्भुवः स्वरित्येताभिश्च व्याहृतिभिरिति॥ ॥उन्मर्दनमभिषेके वनीये के उन्मर्दनं चंद
नादि। तदभिषेके वनीयाभिषेकमेके कुर्वंति॥ ॥यजमानमालभते कोसीति अनेन मंत्रेण॥ ॥स्फ्याके त्यालब्धो रूपयति। पडुक्तं भवति
यजमानः॥ ॥अंगानि चालभते यथालिंगं शिरो मे इति प्रतिमंत्रं। चशब्दात् यजमान एव यथालिंगमंगान्यालभते। अत्र चाऽक्षिजिह्वि
यापदाध्याहारः साकांक्षत्वात् यथायोगं मे उ इति च पदस्याऽनुषंगः॥ ॥उपछं न्येन शतरुद्रियवत् प्रमाणेषु। एनं यजमानं स्फ्याकादय आ
हन्तागुह्निपंति। ऊतस्पतत। एवं दृष्टार्थता ज्ञानस्य भवति। स्फ्याकादिग्रहणं च राजस्य यवदेवेनामोपलक्षणार्थं॥ ॥कृष्णाजिने वैराह
तिप्रति रुन्द्र इति॥ ॥कृष्णाजिने उन्नरति यजमानः प्रतिरुन्द्र रत्पनेन मंत्रेण॥ ॥त्रयस्त्रिंशं च साम्यग्रहं गृह्णाति यो भूतानामिति। त्रयस्त्रिंशाय
हणां च खुरेण ग्रहणं॥ ॥आन्यग्रहमाश्वत्थेनैके। एके आन्यग्रहमाश्वत्थेन पात्रेण गृह्णंति। ततश्चाहवनीये यजति त्वात् हुत्वाया
सवषट्कारत्वात् चेवनुग्रहणमाप्यायनवत्॥ ॥सामप्रेष्यति। साम गायत्येवं। ब्रूहीति वा ब्रह्मा गायति॥ ॥ऐं यो वृहत्सामगायति। इडलिंगा राम° ६१
गो वार्हतेन तृच्च रसो पेता पाम विगायति॥ ॥संश्रवसे विश्रवसे सत्यश्रवसे श्रवस इति। सर्वे निधनमुपयंति॥ ॥संजित्यै विजित्यै सत्यजि
त्यै जित्या इति रुक्मियस्य निधने॥ ॥संपुष्ट्यै विपुष्ट्यै सत्यपुष्ट्या इति वैश्यस्य निधनं। अस्मिंग तयातयोरपि प्रापितत्वात् सोत्रामणाः॥ २१३

यद्बा म्नातं वा सर्वेषां॥ सर्वे वर्णानां वा यथाम्नातं निधनं भवति। तच्च संश्रवसेत्येवमाहि॥ ॥आसे प्रतिगरिष्यन्॥ होतुरग्रतः॥ ॥अय
देवाइन्नि शस्त्रं तेजु होति। यहोत चान्तुवाचनयजप्रेषपूर्वकं देवताश्चात्र हृता एव तथा च यान्यानुवाक्यायोः तदभिधानं दृश्यते। अभिन्न
नेनसाञ्ज्ञा पिबतामिति॥ ॥शेषभक्षत्विजः प्राणभक्षं भक्षयंति प्राणापाम इति। यह शेषभक्षत्विजः प्राणभक्षं भक्षयंति प्राणापाम उ इति। अनेन
मंत्रेण॥ ॥प्रत्यक्षं भक्षं यजमानोऽल्लोमानि प्रयुतिरिति। अनेन मंत्रेण॥ ॥स्विष्टकृत्समत्यावर्हिर्होमा कृत्वा परिस्कन्नीशेन ब्राह्म
दाया वभृथवज्जमनं। स्विष्टकृत्समत्यावर्हिर्होमान्कृत्वा परिस्करान्निम्नान्यादाया वभृथवद्गच्छेति। शूलावभृथेन चाव धानाद
वभृथवदित्युच्यते॥ ॥आशूलाभिमंत्रणात्कृत्वोदकाभिष्ठान प्रभृत्यावभृथोक्तः शूलाभिमंत्रणांते। कृष्णे कृत्वा उदकाभिष्ठान प्रभृ
ति आवभृथेष्टेः॥ ॥मासरकुंभं प्लावयति यद्देवा इति। अनेन मंत्रेण॥ ॥पूर्ववन्मज्जनं। मासरकुंभसैवावभृथेति मज्जनं॥ ॥सुमित्रि
यान इत्यपोंजलिनादाय दुर्मित्रिया इति द्वेष्यं परिषिंचति द्वे विक्रमात्कृत्वा। सुमित्रिया न इत्यनेन मंत्रेण अपोंजलिनादाय द्वेष्यं विक्र
